In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

नाट्यसंस्कृतिसुधा

डा० रमेशचन्द्र शुक्लः
एम. ए., पी-एच. डी.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाट्य संस्कृति सुधा

डा. र. च. शुक्ल

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

नाट्यसंस्कृतिसुधा

(ई०पू०प्रथमशतकादीशवीयषष्ठशतकावधिकसंस्कृतरूपकपारावारमामथ्योपनता)

रचयिता

डॉ० रमेशचन्द्र शुक्ल, एम० ए०, पी-एच०-डी०

सांख्ययोगाचार्यः साहित्याचार्यश्च,

प्रबन्धरत्नाकर-प्रबन्धप्रभादिप्रणेता

आचार्यः, संस्कृत-विभाग, वार्ष्णेय कालेज, अलीगढ़।

प्रथम-संस्करणम्

१९६८

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रकाशकः
देवशङ्कर शुक्लः, एम० एस-सी०,
कृष्णापुरी, अलीगढ़ ।

१९६१ तमेशवीयाब्दे
अलीगढ़ मुस्लिम विश्वविद्यालयद्वारेण पी-एच०डी० इत्येतदुपाधिकृते
स्वीकृतः शोधप्रबन्धः ।

प्रकाशनाधिकारः प्रकाशकायत्तः

मूल्यम् १०·००

मुद्रकः
शिक्षकबन्धु मुद्रणालयः,
अलीगढ़ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आ११२४

श्री डॉ. रामसुरेश जी पाण्डेय —
संस्कृत-विभाग,
राजधानी कालेज, दिल्ली
को
सेवा में
सादर
आ. रहि.
१।१।'६८

श्रीः

समर्पणम्

यत्नादुद्भाव्य नाट्योदधिमथनविधौ संस्कृतिं जीवनं च ।
प्रीत्या तेऽन्विष्य पुंसामिह भरतभुवः प्रस्तुते भावभव्ये ।।
वैकुण्ठेऽकुण्ठधाम्नोर्हरिरतमनसोः प्रस्फुरत्कीर्तिभाजोः ।
तामेतां वन्द्यतातांङ्घ्रियुगकमलयोर्मत्कृतिं चार्पयामि ।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

निवेदना

भारतीयां संस्कृतिं जीवनं च लक्ष्यीकृत्य प्रियभारतैर्विद्यारतैर्बहुभिर्विद्वद्भिर्ग्रन्था अग्रथ्यन्त परं शुङ्ग-सातवाहन-गुप्त-शासनश्रीशोभितसमयनिषेविणीं भारतौकसां संस्कृतिं जीवनञ्चोद्दिश्य न कदाचित् प्रयत्न आचरितोऽभूच्चेज्जातोऽपि प्रयासस्तादृगित्युररीक्रियेत तदासावुद्योगस्तत्कालप्रणीतरूपकाण्याधृत्य न सञ्जात इत्यत्र तु न मनागपि विचिकित्सा। अत्र शुङ्ग-सातवाहन-गुप्तकालवर्तिनः प्रत्नस्य भारतस्य संस्कृतिजीवनसम्बन्धिनीमाभां विलोकयितुं तत्कालप्रादुर्भूतभासकालिदासाश्वघोषशूद्रकविशाखदत्तविरचितरूपकाण्याश्रित्यायासोविहितः स्यात् तस्मादत्र गृहीतोऽयं शोधनीयो विषयो नैजं मौलिकत्वमेवोपादाय परिस्पन्दते।

उपरिनिर्दिष्टयुगप्लाविसंस्कृतिजीवनयोर्यद् वैशिष्ट्यं यत्स्वरूपं यच्च वैचित्र्यं निर्दिष्टेषु रूपकेष्ववाप्यते तत् कृत्स्नं सर्वथा पुराणेतिहासादिप्रतिपादिततत्तत्तत्त्ववदेव वीक्ष्यते न च तत् स्तोकमपि तस्मिन् विपर्यस्यति। अत एवात्र तत्काले तत्कालस्याभ्यर्णे वावतीर्णानां पुराणादीनां वचांसि प्रमाणत्वेनोपन्यस्तानीति च विदाङ्कुर्वन्तु विपश्चिज्जनाः।

एतस्मिन् शोधप्रबन्धे प्रथमं रूपकाणां प्रकर्षस्य, ततः संस्कृतरूपकाणां ततो रूपकोद्भवस्य ततोऽभिमतरूपकाणां प्रामाण्यस्य तदनन्तरं राजनीतिकसामाजिकार्थिक-धार्मिक-नैतिकस्थितीनां चित्रणं कृत तदनुनिर्दिष्टकालगामिनोः संस्कृतिजीवनयोर्विलोकनाय कृतावलम्बनानां रूपकाणां तदुत्तरसमयोद्भूतरूपकाणामुपरि कियान् कीदृक् च प्रभाव आपपात इत्येतदुपपादितं तदनन्तर-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विषयानुक्रमणी

परिच्छेदः	विषयः	पृष्ठ-संख्या
	नुतिः	१—२
१	विषय-प्रवेशः	३—१६
२	रूपक-प्रकर्षः	१७—२३
३	संस्कृत-रूपकम्	२४—३३
४	रूपकोद्भवः	३४—६१
५	अभिमतानां रूपकाणां प्रामाण्यम्	६२—१०५
६	राजनीतिकस्थितिः	१०६—१३२
७	सामाजिकस्थितिः	१३३—१९४
८	आर्थिकस्थितिः	१९६—२१४
९	धार्मिकस्थितिः	२१५—२२५
१०	नैतिकस्थितिः	२२६—२४०
११	प्राक्तनानां रूपकाणामर्वाक्तनेषु रूपकेषु प्रभावः	२४१—२५६
१२	संस्कृतरूपकाणां सन्देशस्तदीयो भाविकालश्च	२५७—२६५

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शुद्धिपत्रम्

पृ०	पं०	अशुद्धम्	शुद्धम्
४	३	उत्तरतितं	उत्तरलं
,,	२०	सामग्रयाः	सामग्र्याः
१०	५	वीदि	वादि
,,	१३	ध्रुव	ध्रुँवं
१३	११	क्खेश	क्लेश
१४	६	मायोधनं	मायोधनं
,,	१२	भारत	भारतं
,,	२५	वय	वयं
१५	७	मर्हू ति	मर्हति
२१	१५	प्रतियोगिताषु	प्रतियोगितासु
२२	४	समतव	समतैव
२३	११	प्रतीक्च	प्रतीच्य
,,	२४	प्रषासायाम्	प्रशंसायाम्
३०	२२	श्रङ्खलेन	शृङ्खलेन
३५	१न	विच्छत्य	विच्छित्या
३६	७	मूरीरण	मुदीरणं
४०	६	भवत	भवत
४३	१५	प्रभृतीना	प्रभृतीनां
,,	२५	कन्ठा	कण्ठा
४४	६	शास्त्रं	शास्त्र
,,	२१	अकारयन्त	अकार्यन्त
४८	१	तद	तद्
४६	२	क्रूरतयाः	क्रूरतायाः
,,	२०	सौन्दर्प्यं	सौन्दर्य्यं
,,	२३	कतु	कर्तुं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पृ०	पं०	अशुद्धम्	शुद्धम्
५३	१२	प्रकोरेण	प्रकारेण
५४	१३	प्रतिष्ठापयितं	प्रतिष्ठापयितुं
,,	२७	सुन्द	सुन्दरं
६२	२३	तयदादि	तदादि
६३	१५	विपश्चिता	विपश्चिता।
६५	२२	अभ्यूह्यते	अभ्यूह्यते
६८	२	प्रवर्तमानस्य	प्रवर्तमान
,,	६	पाण्डभ्यो	पाण्डवेभ्यो
६९	२१	दुहृदयतां	दुर्हृदयतां
७५	१७	प्रार्वतत्	प्रावर्तत
७८	२३	मुक्त	मुक्तं
९०	५	स्त्रीपि	स्त्रीण्यपि
९२	१८	ऽपरा	पिपरा
९९	१२	रूपक्रारेण	रूपककारेण
,,	१६	द्युय	पृथु
१०१	१६	संगृध्नस्ति	संग्रथनन्ति
१०३	१२	यंत्र	पत्रं
१११	२७	लभ्यमामा	लभ्यमाना
११२	७	तत्सम	तत्समय
११४	१०	ददृशः	ददृशुः
,,	१२	विभिन्नवय	विभिन्नव्य
१३०	८	णासीत्	णामासीत्
१३१	११	वर्द्धमस्य	वर्द्धनस्य
१३७	१६	तवापि	तदापि
१३९	२१	विरचस्य्य	विरचय्य
१४५	पादटिप्पण्याम्	यक्	ऋक्
१५६	१३	ममोह्यत्	ममोहयत्
१५७	३	सशय	संशय

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पृ०	पं०	अशुद्धम्	शुद्धम्
१५६	११	किल्व	विल्व
१६४	३	उज्जि	उज्ज
,,	२१	काली	कालि
१७०	६	रूके	रूहके
१७२	१६	विकरन्त्यो	विकिरन्त्यो
१७३	२४	वणन	वर्णन
१७५	११	भज्जिका	भञ्जिका
,,	१६	लेखोऽय	लेखोऽयं
१७६	५	स्पर्श	स्पर्शं
१७८	२४	अन्वेषणीय	अन्वेषणीयं
१८७	१२	मय्याः	मय्यः
१९२	१	जन	जनैः
१९३	४	चरित	चरितं
१९६	१४	प्रापयन्त	प्रापयन्तः
,,	पादटिप्पण्यां	१	२
२०५	२२	सहस्रश्च	सहस्रशश्च
२१३	१३	मित्र	मिश्र
२२३	१६	पर्यंयोषयन्	पर्यपोषयन्
२२५	१०	विद्या	विद्य
२२६	६	भारतीनां	भारतीयानां
२३३	८	नार्या	नार्यां
२३४	१२	प्राच्यैव	प्राप्यैव
२३६	१	भूरमरेण	भूरमणेन
२३७	१२	कुपथगामिना	कुपथगामिनो
२३८	२१	नितातं	नितान्तं
२४०	८	निष्कर्म	निष्कर्ष
२४४	१८	विवके	विवेक

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

नुतिः

अखिल दुरितहारी सिद्धसाध्यादिभर्ता
सकल भुवन विध्न ध्वान्त विध्वंसकर्ता
हिम गिरि तनयाया नन्दनः सिद्धिदाता
वितरतु करुणालु मंगलं धी विधाता ॥

सरस सरल चित्तां शील-सौन्दर्य शुभ्रां
हरिहरविधि वंद्यां शारदां ज्ञान-रूपां
मतिगतमलपुञ्जध्वंसने त्वां प्रवीणां
जननि धिय मवाप्तुं नौमि विद्यासुदीप्ताम् ॥

शिव सदय न विद्या विद्यते मे सकाशे
न च मयि गुण आस्ते कोऽपि भो दीनबन्धो ।
न मति रिह वराके वर्ततेऽल्पापि मन्दे
शरण मह मतस्त्वा मागतो नाथ पाहि ॥

दशरथनृपपुत्रं राम मानन्दकन्दं
निखिल गुण निधानं जानकीशं शरण्यं
सुर-मुनि जनसेव्यं जीवनं जीवनानां
रुचिर ललित वृत्तं शील सिन्धुं नमामि ॥

माता पिता च मम कृष्ण दयामय त्वं
स्वामी त्वमेव मम बन्धुवरस्त्वमेव ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्ञान प्रदो मम गुरुः कलुषं जहि त्वं
त्वां स्तौमि सादर महं भव मे सहायः ॥
वाणि प्रसीद करवाणि तव प्रसादात्
नव्यां कृतिं जननि संस्कृत वाङ्० निवद्धां
याचे शुभाशिष महं करुणामयीं त्वां
विन्दानि येन हृदयेष्टफलं मनोज्ञम् ॥
भासादि कोविद कृतेषु हि रूपकेषु
भव्य प्रभेषु भरतावनि मानवानां
गीतेऽभिरामतरसंस्कृति-जीवनेऽनु-
सन्धान पूर्वक मिहाथ विभावयामि ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रथमः परिच्छेदः

विषय-प्रवेशः

अस्मत् प्रिय देशस्य भारतवर्षस्य संस्कृतिः सभ्यता च पुरातनीन संस्कृतिसभ्यतानां मध्ये पुरातनतमी संस्कृतिः सभ्यता च स्तः। इयं भारतीया संस्कृतिः सभ्यता च गरिम्णि महिम्नि श्रेयः प्रेयस्कृत्कृत्य-कलाप-सम्पादने च सर्वेषामपि विषयाणां संस्कृतिं सभ्यतां चातिशयात इत्येतद्धि सत्यं तस्मात् संस्कृत वाङ्मयात् सर्वथा सरलतया ज्ञातुं शक्यमास्ते यत् सांम्प्रतिकेनेहसि समवशिष्यते।

चिरादस्माभिर्भारतीयैः स्वकीयस्य संस्कृतवाङ्मयस्य स्वाध्यायः संत्यक्त स्तेन नैजं गौरवं, नैजं चारित्रिकं बलं, नैजं यशश्च कृत्स्नतथा विस्मृतम्। एतस्य विस्मरणस्येद खेदास्पद दुष्फलं संवृत्तं यद् भारतीयाः सन्तोऽपि सिंहस्य शावकाः आत्मानं न तथाविधं विदन्ति। स्वकीयस्य आत्मनोऽनवधारणवशात् ते नितान्तं पतनं प्राप्ताः सन्ति। तेषु तद् दौर्बल्यं समागतमास्ते यत् ते तृणाघातेनापि निःसंज्ञाः सञ्जायन्ते। तेषु सा भीरुता संचरते यत् पदमेकमपि न पुरः प्रयातुं प्रभवन्ति। त्रस्तत्व-त्रस्तत्वात् ते तादृशं किमपि कार्यमनुष्ठातुं नार्हन्ति यत् कार्यं नैतिक-कार्य मित्युदीर्यते। अतएव सम्प्रति यदा देशः स्वातन्त्र्यसमीरे श्वसिति महतीयमपेक्षा जागर्ति यदस्मद् देशस्य जनता स्वकीयं गरिमाणं महिमानं च जानीयात्। सा स्वीयां संस्कृतिं स्वकीये आचारे व्यवहारे च परिणमयेत् किंच स्वकीयां सभ्यतां समीचीनतया परिष्वजेत।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इदानीं प्रत्येक राष्ट्र-भक्तस्य कर्तव्यं प्रमुखमिदं वर्तते यत् सः स्वयं संस्कृत साहित्यमवगाहेत किंच जनसाधारणस्य समक्षे तदमृतं सन्निदध्यात् यत्संस्कृतविद्यायामुत्तरलितं सत् प्रवहेत् ।

संस्कृत वाङ्मयं महाविशालं महागंभीरं महोदग्रं च विद्यते । तत्र तस्य कालस्यापि जन जीवनं विलोकयितुं शक्यते यः श्रौतः काल आसीत् किंच तस्य कालस्यापि लोकच्छविः प्रेक्षितुं शक्या वर्तते यो हि कालः पौराणिकः स्मार्तः किं वा रघुवंश-बुद्धचरितादीनां काव्यानामथ च स्वप्नवासवदत्ताभिज्ञानशाकुन्तलशारिपुत्रप्रकरणादीनां रूपकाणां काल आसीत् ।

ऋषीणां समये वा राम-कृष्णादीनां महापुरुषाणां समये भारतीयं जीवनं कीदृशं वभूव कीदृशी च तदानीन्तनी सभ्यता वा कीदृशश्च तात्कालिक आचारः किं वा व्यवहारोऽभवदित्येतज्ज्ञापनं नास्य प्रवन्धस्य विषयः । अत्र तु वयं भासकालिदासाश्वघोष-शूद्रकादि रूपक काराणामीशवीयसप्तमशतकोद्ध्र्ववर्तिनां समये भारतीयाचार-विचार-जीवित-ज्योतिः प्रदर्शयितुमीहाँ विधास्यामो येनास्मद् भारतीयाः किंवा देशान्तरस्य बन्धवो जानीयुर्यत् तदानीन्तने काले भारतौकसः केन विधिना अजीवन् केन च प्रकारेण ते सर्वेषु मिथो व्यवाहरन् ।

वयमेतद् बोद्धुं खलूपरिनिर्दिष्टकवीनां रूपकाणि आश्रयिष्याम-स्तान्येवेह मुख्योपकरणत्वेन ग्रहीष्यामः ।

एतत् कार्यं कर्तुं यस्याः सामग्र्याः सकाशाद् वयं साहाय्यं लभामहे सा सामग्री त्रिविधास्ति:—

१—ऐतिहासिकी सामग्री,

२—साहित्यिकी सामग्री,

३—स्फुट संकेतरूप सामग्री ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वर्तमान काले इतिहासो यद् रूपं यां च शैलीं बिभ्राणोऽवाप्यते अस्मन् मार्गणीय कालवर्ती इतिहास स्तु न वस्तुत स्तद् रूपं तां च शैलीं संश्रयन् समासाद्यते। पुरातने काले इतिहासो यस्मिन् रूपे यस्यां च प्रणाल्यां प्राणीयत तद्रूप प्रणालींभृदितिहासो रामायण-महाभारत-पुराणादि ग्रन्थ निवहो वर्तते। पर मेतेषु रामायण महाभारतादीतिहासेषु साक्षात्तयास्मदभिमत समयस्य विवरणं न विवृत मस्ति। किञ्च तेषां सन्निवेशितमिश्रणत्वात्, ततः सत्यस्य ज्ञेयस्य वा ज्ञान मतितरां दुष्प्रापं भवति। परं, पुरातनराजवंश धर्मादि विषयवर्णनपरत्वादपि तेषां, तेभ्योऽस्मत्कालस्याभीष्टस्य सामग्री समुपलभ्यते। अतः इह तद्विधा ग्रन्था अपि सहायकाः सिद्धयन्ति। विषय-वैशद्यं यत्र तानपेक्षते स्म तत्रैव ते सङ्केतीकृताः।

आधुनिकै र्विपश्चिद्भिर्ये प्राचीन भारतेतिहासा विरचिता ते मेगास्थनीज-हुएनसांग प्रभृति यात्रि लिखित भारत सम्बन्धि-विवरणानि, यवनेतिहासलेखकानां रचनाः प्राचीना, मुद्राः, प्राकृतनान् शिलालेखान् पुरातन प्राप्तवस्तुचिह्नान्यवलम्ब्य प्रणीता विद्यन्ते। तद्विधेष्वितिहासेषु ये सम्प्राप्ता स्तान् सहकृत्यापीह अभिमत विषयस्य प्रतिपादनं कृत मस्ति।

कौटल्य कृत अर्थशास्त्रं, वात्स्यायन रचितं कामसूत्रं, मनुयाज्ञ--वल्क्यपराशरादिकृताः स्मृतयः, शुक्रादि निर्मितानि नीतिशास्त्राणि, कालिदासादिकविकलितरघुवशादि काव्यानि चात्र साहित्य सामग्रया मन्तर्भावितानि। इयं सामग्री प्रत्यक्षतोऽप्रत्यक्षतश्चास्मदीयाभिप्रेत विषयस्योपरि स्फुटतया प्रकाशं निपातयति। अस्यां सामग्रयां मनु-याज्ञवल्क्यादिकानां स्मृतयस्तु एतादृश्योऽवश्यं विद्यन्ते यासु समये समयेऽनेक स्थलानि समवर्ध्यन्त। परं तानि संवर्धितानि वा समावेशितानि स्थलानि, तेषां तत्तत्समय-स्थिति-सूचकत्वात्,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्माकं कृते तूपकारकाण्यसिद्धयन्। साहित्यिकी सामग्री सामाजिक-राजनीतिक-धार्मिक स्थिति मधिकृत्य यादृश्या समीचीन रीत्या ब्रवीति न तादृशेन तोषावहेन प्रकारेण अन्या सामग्री व्याहरति। अस्माकं तु विचारोऽयं दृढीयान् यद् ये जनाः प्राचीनं भारतं विलोकयितुं साम्प्रतिकाना मांग्लभाषा निबद्धानामिति हासानामध्ययनं विदधति ते मुधैव प्रयस्यन्ति। त इमां साहित्यिकीं सामग्रीं सपुराणा मनुशीलयेयुः। तथानुष्ठाय ते नूनं स्वाभिमतवस्तु प्राप्तुं शक्नुयुः सामग्रीयं तदानीन्तन मनेहस श्रयति यदा शालिवाहन-गुप्तादीनां साम्राज्यस्य श्रीः सर्वतश्चकास्ति स्म।

अधिभारतं पुरातत्व शोधतः समुपलब्धानि प्राक्तनानि प्रतिमा-शिलालेख-तोरण-स्तूप-ताम्रपत्र-पत्र-मुद्रादीनि वस्तूनि स्वसमयस्य शैलीं कलां राजशासन स्वरूपं च मूकवाण्यां ज्ञापवन्तीव सन्तिष्ठन्ते। तेषां सर्वेषां सहायतया सुधीभिः स्वस्य देशस्य प्राचीनच्छटास्माकं पुरतः साधु निधीयते। अस्माभिरपि स्वाभीप्सित लाभाय ते सङ्केताः सहायकत्वेन वृताः सन्ति।

अस्मदीयोऽयं विषयः स्वीयं वैशिष्ट्यं निदधाति। तच्च वैशिष्ट्यं भारतीयानामेव न देशान्तरीयाणामपि सर्वेषां मानवानामप्यपेक्षणीय मस्ति। उपादेयत्वात् तस्य, तत् सर्वथा रक्षणीयनिधि रिव वर्तते।

अन्न-वसन-गेहादि पदार्था देहस्यैव रक्षां कर्तुं प्रभवन्ति किञ्च पुत्र-कलत्रादिभि र्मानसिक एव तोषः सञ्जायते परं येन चरित्रं संवर्धितं विद्योतितं च जायते; अथ च आत्मा किञ्च महत्तत्वमपि येन प्रशस्ततता मुपैति, विशदता मृच्छति तदस्ति केवलं सांस्कृतिकं वैभवम्। तस्मादस्याः सांस्कृतिक लक्ष्म्या महत्त्वं नैजमेय।

अस्मदभिमतकालगामिन्याः संस्कृत्याः सभ्यतायाश्च स्वरूपं बोद्धु मस्माभिरिह रूपक द्वारेण प्रयासोऽधः स्थित हेतुवशात् क्रियते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्य विषयस्य अनुसन्धानं, मन्येऽनुसन्धित्सव: पुराणमहाभारत-रामायण-काव्यादिमाध्यमेन तु कृतवन्तः परं रूपकद्वारेण तथा-करणस्य नोद्योगः प्रायेणान्वेषणकारिभि र्विहितः। भास-कालिदासादि रूपकाण्यप्येवं विधानि सम्प्राप्यन्ते यान्यवलम्ब्य वयं शुङ्ग-कण्व-शालि-वाहनादि समय प्रवाहिणीं संस्कृतिं सभ्यतां च विलोकयितुं क्षमामहे। अन्यच्च, रूपकं भवति सर्वविध कला कलितं तद् येन बन्धुर-विधिना वस्तूपस्थापयति न तेन सुन्दरतमप्रकारेण अन्यानि पुराणेतिहासादि साधनानि वस्तुनः समुपस्थापनं विदधति। अथ च तत्र कविः समग्रेणापि हृदयेन आत्मानं प्रतिष्ठापयति, तस्मात् स्वाभिप्रेत विषयस्य विमर्शणाय रूपकाणा माश्रयण मुचिततर मेव मतम्।

भारतीयं जीवनं किञ्च भारतीया संस्कृतिः परमपुरातनीति ऋग्वेदात् साधु सिद्ध्यति। अतः भारतीय-संस्कृतिसभ्यते स्तः पावनैतिहासिक तथ्यविभूषिते। उपनिषद्-गृह्य सूत्र-कथाख्यायिका दिसकल वाङ्मयाङ्गेषु विषयस्यास्य प्रच्छन्नरीत्या निरूपणं च विद्यते; अतएव विषयोऽयं वस्तुतो दृढ माधार मधितिष्ठति। स्वीय दीर्घ-कालीन परम्परायश्च समाश्रयणात् विषय एषः सांस्कृतिकीं महनीयतां जुषाणं पुरः समुपतिष्ठते तस्मादपि हेतो र्निश्चप्रचतया एतादृग् बरीवर्ति यस्य समुल्लेखः करणीय एव सर्वैं रवश्यम्। एतासां सर्वासां विशिष्ट-तानां सदभावात् वयं सहर्ष मिमं विषय माकलयितुं सम्प्रति यतामहे।

साम्प्रत मवनि मण्डले सर्वेऽपि देशाः स्वस्वसभ्यतां स्वां स्वां च संस्कृतिं सर्वत्र प्रसारगितुं नितरां संलग्नाः प्राप्यन्ते। यावान् एव प्रसारः कस्याः अपि संस्कृतेः सभ्यताया वा भुवि भवेत् तावान् एव तद् देशस्य संस्कृत्याः सभ्यतया वा उत्कर्षः समुपलभ्येतः-इत्येष विश्वासः क्रियते। प्राप्ते चोत्कर्षे बले वा अधिकतरं भूभागं स्वाधिकारे कर्तुं प्रभवेत्; देशान्तरस्य च जनतां सः सप्रसभं स्वसभ्यतां स्वसंस्कृतिं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मङ्गीकारयितुं प्रभविष्णुतां धारयेत् तस्मादस्माकं भारतीयानामपि कर्त्तव्यं विद्यते यच्चेदन्ये देशा एकान्त भौतिकीमपि आपात रमणीया मपि संस्कृति प्रसारयितुं संलग्नाः सन्ति तर्हि किमस्माकं मिदं कर्तव्यं न यद् वयं स्वां श्रेयः प्रेयो विधायिनीं शाश्वतिक-सुख वर्षिणीं संस्कृति प्रसारयेम ? कस्माद् वय मत्र सत्कर्मणि त्रपामहे ?

यस्य देशस्य यावदेव स्व संस्कृति-सभ्यतयोः सम्बन्धेऽवगच्छन्ति जनाः, यावदेव ते तेऽनुसरन्ति, तावदेव तस्य देशस्य शुभम् । संस्कृति-सभ्यतात्मकोऽवलेपो मानवं तदीयं देशमुत्थापयितुं प्रेरयति । तदीये मानसे उत्साहं, साहसं, कष्ट सहिष्णुताम् ओजो बलं च सञ्चारयति । मानवस्ततः स्व संस्कृतेः सभ्यतायाश्च रक्षणे सहर्ष मसूनपि उज्झति । कापि संस्कृतिः सभ्यता च तदैव भुवि चिरं स्थातुं प्रभवति, तदैव ते बलीयस्यौ भवतं स्तदैव तयोः सर्वत्र सर्वदा च सम्मान सञ्जायते यदां ते सेवमानानां मानवानां संख्या भवति भूयिष्ठा। कोऽपि देशो न तावत् स्वकीयाम् पूर्वजाम् प्रति स्वीयं श्रद्धाञ्जलिं समर्पयितुं क्षमते, न तावत् स तेषां मुन्नततमं गौरव, मनन्यगामिनीं कीर्तिं, पुण्यां प्रतिष्ठां, विशदं विश्वासं- मञ्जुल मादर्शं, भव्यां भावनां च पातुं प्रभवति, न तावत् सः नैज पताका मपि उच्चै स्तोलयितु मपि ईष्टे यावत् सः स्वीयां संस्कृतिं सभ्यतां च न रक्षति, न पुष्णाति, न लालयति च ।

रूपकद्वारेण स्वस्य देशस्य आचार-विचारादीनां समुत्थापनं प्रतीच्येषु देशेषु आदौ यवन-यूनान-देशश्चकार । प्रथमं रूपकेषु तत्रत्यानां देवानां लीलाः अन्याश्च धर्मनिष्ठा भावनाः विभाविताः अभूवन् । कस्मात् कारणात् तत्र नाटक कृद्भिः सः स विषयः परिगृहीत इत्यत्र यदा विमर्शो विधीयते किञ्च तात्कालिक नाटकप्रणयनोपरि दृक् प्रक्षिप्यते तदावगम्यते यत् तदानीन्तना स्तत्रत्याः पुरुषा धार्मिकभावनावन्तो

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देवभक्तिरताश्च आसन्। तस्मादेव हेतो स्तत्समयवर्तिषु दृश्यकाव्ये-ष्वपि सैव प्रवृत्ति रधिगम्यते। प्रथमादीशवीयाब्दात् प्राग्वर्तिन्याः पञ्चम्याः शताब्द्या ईशवीयां चतुर्थीं शताब्दीं यावत् यवन देशे प्रशंसनीयानां नाटकानां निर्माण मजायत। तदा तत्र सर्वत्र शान्ति र्व्यर्षीदत् अतः तात्कालिकेषु नाटकेष्वपि शान्तिशुभ्रं समीरणावरण मवलोक्यते। ततश्चेशवीयात् पञ्चमाच्छतकात्पञ्चदशशतकपर्यन्तं पश्चिमीयेषु भूभागेषु अशान्ते धर्मान्धतायाश्च समयः समवर्तत। तदानेक सभ्यतानां संघर्षः प्रवर्तमान आसीत्। रोम-राजास्तदा ईसामसीहीयं धर्मं विरुन्धानाः अलक्ष्यन्त। सा विषमा स्थितिरपि तदानीन्तनानां नाटकानां मध्ये बोद्ध्यते। पञ्चदशशतकानन्तरं तत्रत्यं समाज-गगनं छलच्छद्म-राग-द्वेष-कलहपांसु-पांसुलमभूत्। तस्मात् तादृशी अवस्थापि तत्समय विरचितेषु रूपकेषु चित्रिता प्राप्यते। शेक्सपियरस्य मेकवेथ-हेमलेट-ऑथेलो प्रभृति नाटकेषु सा स्थितिः सम्यगीक्ष्यते। तदा च तत्र जनता विविधाभिः समस्याभि राक्रम्यमाणा-सीत् तदा इब्सन-शा प्रभृतिभि र्यानि नाटकानि अलेखिषत् तेषु नाटकेषु ताः समस्याः केन न पाठकेन विलोक्यन्ते? तस्मिन् काले ये ये दोषाः सन्निविष्टाः अभूवन् ते सर्वेऽपि तेषु नाटकेषु गृहीताः सन्ति। कथन-स्यास्य केवल मुद्देश्य मेतद् यन्नाटककाराः स्वसमयस्य स्थिति मवश्य मेव स्वस्वनाटकेषु स्पष्टास्पष्टरीत्या समावेशयन्ति। ते स्वदेशस्य भावनां प्रवृत्तिं, रुचिं च यादृशी मवलोकयन्ति तादृशीमेव तत्र सन्नि-दधति। यवन देशो नियतिवादी देशोऽस्ति अत स्तत्रत्यानि रूपकाण्यपि नियतिवादीनि सन्ति। शेक्सपियरस्य देशो भाग्ये नैव आस्थां नि[illegible]-त्यत स्तत्रत्यं रूपकमपि तथाविधमेव। भावोऽयं यन् नाटकं मानवीयानां चरित्राणां प्रतिनिधित्वं विदधाति। समाजे यत् किमपि घटते तत् तत्र नाटकप्रणेतापि वर्णयति। अतः नाटकं तत् प्रशस्त

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुपादान मस्ति यदाश्रित्य कस्यापि देशस्य आत्मनोऽवलोकनं सुकरम्। तत्र जनता भवति प्रतिबिम्बितातस्तद् दर्पण इव वर्तते।

अस्मद् भारतस्य रूपकाण्यपि भारतीयाया भावनायाः, भारतीयस्य जीवनस्य, भारतीयस्य च चरित्रस्य प्रतिच्छायाः सन्ति। भारत मात्मवादि। त्याग-दया-सत्य-तपोऽहिंसा-शुचितेश्वरभक्तिप्रभृतिगुणाः इह सनातनादेव समयादत्रत्येन समाजेन सभाजिता स्तस्मादत्रत्यानि रूपकाणि इमान् सर्वानपि सद्भावान् परिव्रजन्ते।

भारतीयः प्राचीनो रूपककारः स्वकीये नाटकसंज्ञकरूपके बाहुल्येन किंवा कृत्स्नतया स्वसमयस्य स्थितिं घटनावलीं च न प्रत्यक्षतो विवृणीते परं रूपककारस्य नैजतत्समयवर्तित्वात्, तत्तत्स्थित्यन्तराले जीवितत्वा{ तत्तत्समविषमवातावरणेन स्पृष्टत्वाच्च, तस्य तादृशेऽपि राम-कृष्ण-दुष्यन्तादिनायकचरितवर्णनपरे रूपके तत्कालस्य(कविकालस्य) छाया ध्रुवं निपतत्येव; गम्भीरतया चेत् तदभ्यन्तरे दृक् क्षिप्यते तदा कविसमयगामिनी सामाजिकी राजनीतिकी आर्थिकीं धार्मिकी च स्थितिः स्फुटतया परिस्पन्दमाना सम्प्राप्यते। भारतीया रूपककारा वृत्तघटना-व्यवस्थादिषु न प्रगाढां रुचिं वा विशिष्टां प्रीतिं निदधति ते तु तत् तद्व्यतिकरजनयितृषु तत्वेषु वस्तुतो रतिं बिभ्रति।

भास मारभ्य कालिदासाश्वघोष-शूद्रकादिका ये रूपककर्तारः ईशवीयषष्ठशतकात् प्राक् प्रादुर्बभूवुः किं वा भवभूति-मुरारि-राजशेखर-कृष्णयति-दिङ्नाग-जयदेवादिकवय ईशवीयाच्छषष्ठशतकात् प्रत्यक् अजनिषत अथ च तेषामनन्तरमद्यपर्यन्तं ये रूपककृतः सञ्जाता वा सन्ति तेषां सर्वेषामपि दृश्यकाव्येषु सर्वभूतहितैकरता परमतत्वानुरागपरा भारतीयता स्पष्टतो विभाव्यते-इत्येतत् केन न सचेतसा संलक्ष्यते।

सिल्वन लेवी भारतीयं रूपक मधिकृत्य--'भारतस्य मौलिकता तदीयायां नाट्यकलायां कृत्स्नतयाभिव्यज्यते। तत्र भारतस्य रूढीनां

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सिद्धान्तानां च समवेतः सार आसीनः सम्प्रेद्यते। अथ च तत्र भारतीयायाः प्रतिभायाः सौन्दर्यं किंच भारतीयस्य साहित्यस्य नवनीत मुत्तरलीभवति" इत्येतद् ब्रूते।

भारतीय संस्कृतेः प्रधानतया आध्यात्मिकताप्रियत्वात् संस्कृत रूपकमपि सुखान्तं वर्तते। वस्तुतो दुःखान्ताः कृतय स्तत्रैव समुत्पद्यन्ते यत्र भौतिकता सर्वस्वत्वेन समुपास्यते। अस्मद्देशसम्भूतकवि मस्तिष्कात् कथं दुःखान्तं रूपकं समुत्पन्नं भवितु मर्हति? देशस्त्वयं गीतोपनिषदां देशः। देशस्य प्रवृत्तेः अनासक्तियोगवत्वादिह शृङ्गार प्रधानमपि यत् साहित्यं सृष्टमभूत् तदपि निवृत्तिपरकं विधाय कविभिः प्रगीतम्। यदा हि अत्रत्यं सकलमेव साहित्यं 'रामादिवत् प्रवर्तितव्यं न रावणादिवदित्येतां शिक्षां दातुं रचितं तदा तस्याङ्गभूत रूपकं भारतीयः कविः कथं प्रवृत्तिपरकं कर्तुं समुद्यतः स्यात्? रूपक हि साहित्यस्य सर्वेभ्योऽप्यङ्गेभ्यो रमणीयतमं नितान्त सौन्दर्य-सुन्दरं सर्वविधकलाकान्तम् पुन स्तत् शास्त्र सम्मता मनवद्यां दिव्यां भावनां परिपुष्णाति। एतद्विध वैचित्र्यवन्धुरत्वाद् भारतीयसंस्कृति जिज्ञासवो यावता सुखेन विनोदेन च सह भारतीयां संस्कृतिं सभ्यतां च ज्ञातुं रूपकतः प्रभवन्ति तावता सौष्ठवेनामोदेन च साकं नान्यस्मात् पुराणेतिहास शिलालेखादि साधनात् कदापि तां बोद्धुं शक्नुवन्ति।

भासकालिदासादिरूपकाणि स्वभारतं तथाविधं विलोकयितु मुत्सुकानि सन्ति यथाविधं तत् श्रीमद्भागवतादिग्रन्थानामनेहसि दृष्टं बभूव -

'यां रक्षन्त्यनिशं प्रतिबुध्यमाना देवा ऋषयो मुनयो ह्य प्रमादम्।
राजर्षयोऽपि ह्यनघाः साधुवर्याः सा नो माता भारती भू विभासताम्॥"

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तानि पुनाः—

(क) न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतोभान्ति कुतोऽयमग्निः।
तमेव भान्त मनुभाति सर्वं यस्य भासा सर्वमिदं विभाति ॥

(ख) नाय मात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य स्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥

इत्येतदभव्यभाव विभावित तपस्विभिः शोभितं स्वदेशं विलोकयितुं कामयन्ते; तानि काङ्क्षन्ति यत् तेषां भारतं भूयः--

"चारित्र्यं परमोधर्मश्चारित्र्यं परमं तपः।
चारित्र्यस्य प्रभावेण तम स्तरति दुस्तरम् ॥
चारित्र्यं नरवृक्षस्य सुगन्धि कुसुम शुभम्।
आकर्षणं तथैवात्र लोकानां रञ्जनं महत् ॥"

इत्येतत् तथ्यं स्वकीये व्यवहारे आचारे च परिणमयेत्। तानि भारतस्य तां संस्कृति मुपपादयन्ति यत्र--

(क) "कुर्वन्नेवेह कर्माणि जिजीविषत् शतं समाः"

(ख) "संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्"

(ग) "समानीव आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ॥

(घ) यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्ड मर्हति ॥
न जातु कामः कामाना मुपभोगेन शाम्यति।
हविषा कृष्ण वर्त्मेव भूय एवाभिवर्द्धते ॥
एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वं मन्यत्तु गच्छति ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतदादि सिद्धान्ताः परमश्रद्धापूर्वक माहताः सन्ति ।

यस्मिन् देशे श्रेयः सम्पादकानां ग्रन्थाना मेतावद् बाहुल्यं वर्तते तस्य देशस्य जनताया ईदृशं शोचनीयं पतनं प्रेक्ष्य चेतो नितरां दूयते। चिरन्तनात् समया दिहत्या जनता स्वस्य देशस्य वाङ्मयाध्ययने न मनः सन्निवेशयति, सा स्वकीयं ग्रन्थानां स्वाध्यायं त्यक्त्वा सम्प्रति देशान्तरीय साहित्यानुशीलनं विधाय नैजं मनः नैज मतिं च रमयति। सा स्वसाहित्ये जुगुप्साधियं निवध्नाति। तया सर्वथैव स्वदेशस्य विद्वांसः स्वदेशस्य ते ते महान्तो ग्रन्थाश्च विस्मृताः। एतस्य इदं कुफलं जातमस्ति यद् इदानीं न सा स्वसंस्कृति मभिजानाति न च स्वसभ्यतामपि वेत्ति । जनतायाः विस्मृतनैजाचार-विचारवत्त्वाद् देशोऽधुना नानाक्लेश कष्ट कदर्थनाभिः परिपीड्यमानो भूत्वा क्रन्दति।

स्वीयसंस्कृतिम्प्रति रुचे रनुरागस्य चाभावात् साम्प्रतं सम्प्राप्तमपि स्वातन्त्र्यमिदं व्यर्थतां गतं वर्तते। अविलम्बमेव या उन्नति रपेक्ष्यते सा वर्तमान समये तु देशादारादेव गता वर्तते । भारतीया स्तानि कुत्सित कार्याणि कुर्वन्तः सोत्साहं ससाहसं च प्राप्यन्ते यान्यनुष्ठाय देशस्य यश इदानीं क्लिश्यते तस्य सदाचार-सम्पच्च विपद्यते।

देशस्येदं चारित्रिकं पतनं नानोद्योगागारैं विशङ्कटैं वैज्ञानिकैं र्यन्त्रैः पुष्कलानां विभागानां प्रतिष्ठापनैं गुरुतमैश्च जलबन्धै र्नापनीतं स्यात् तदपसरणं तु देशात्मनि प्राणावायकतत्वेन भवितु मर्हति । आत्मबोधमन्तरेण, सदाचारपरिग्रहं विना च न परमार्थतो देशोत्थानं भवेत् । आत्मज्ञानमाचारपावनता च भारतीयायाः शिक्षापद्धते र्भारतीय भाषा द्वारेण प्रबलं प्रसारमेकान्ततोऽपेक्ष्यते, अपेक्ष्यते च भारतीय संस्कृति-सभ्यतोपदेशकस्य वाङ्मयस्याध्ययनम्।

सम्प्रति वैदेशिक संस्कृतेः प्रचण्डः प्रभावो वैदेशिक्या भाषाया

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिक्षारद्धतेश्च अन्धानुरागः प्रकृष्टतया देशस्योपरि आच्छादितो वर्तते। इयं देशान्तरीयसंस्कृति-भाषा-शिक्षापरकता भारतीयताविरोधिनीं भावनां सञ्चार्य भारतस्य यदनिष्टमाचरति तदस्माभिः सम्यग् दृश्यत एव। अभारतीय संस्कारेभ्यः शिक्षातश्च समुद्भूतोऽयं महानर्थको दोषः सद्य एव समूलमुन्मूलनीयः प्रियभारतैः।

अन्यथा अधिगता मिमां स्वतन्त्रतां वयं पातुं न समर्था भविष्यामः स्वीयां संस्कृतिं भाषां शिक्षां च विनाश्य आचार-विचारांश्च निहत्य जीवन-पद्धतिं च न्यक्कृत्य चेत् त्रातापि प्राप्तेयं स्वतन्त्रता तर्हि तदवाप्त्यर्थं कृत मायोधन व्यर्थम्। एवं सति तु अस्मदीया स्थिति र्मृतजनादपि शोचनीयतरा स्यात्। यदि भारतीयतैव हता तदा जगति जीवनं मुधैव। भारतस्य शोभा भारतत्वस्य संरक्षणे सन्तिष्ठते भारततां निहत्य देशान्तरीयश्रिया यदि भारत शोभायुतं कृतं तर्हि रामस्य पित्रादेश पालनं, कृष्णस्य गो-चारण, बुद्धस्य निर्वाणार्थं तपश्चरणं, महात्मनो गान्धिनः सत्य-पालनाय कष्टसहनं च व्यर्थतां सर्वाणि नीतानि स्युः। अस्माभिः श्रीभगवद्गीताया वाक्यमिदं न विस्मरणीयम्—

'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः"

यस्याः भारतीयमर्यादायाः कृतेऽस्मदीयैः प्राक्तनैर्भौतिक विभवा स्तृणाय मत्वा सर्वथा समुज्झिता स्तेषामेव हेतोर्वयभिदानीं पूर्वजत्रातं धर्मं मुञ्चामः। प्राचीनं भारतमर्थं कामं वा नाचीकमत इत्येतन्न, तस्य तद्द्वय मप्यभिमतमासीत् पर तौ तस्मै धर्माविरुद्धा वरोचत। अस्मत्कर्त्तव्यमपि यत् तौ धर्मसम्मतौ स्वीकर्त्तव्यौ।

अद्य वय परधर्ममादाय जीवामोऽत एव आस्माकीन संस्कृति र्विषीदति। परधर्ममद्य वयं प्रशंसामः स्वधर्मं च निन्दामस्तस्मादस्माकं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनमस्मानेव प्रति भारभूतं संवृत्तमस्ति। आत्मनो विस्मरणं दुरितं महत्। जीवनस्य लक्ष्य धनं, पदं, प्रभुत्वञ्च यद्यपि अस्ति परं तावदेव न तस्य लक्ष्यम्। न तानि सर्वाणि अन्त्यलक्ष्यत्वेन मतानि। अन्तिमं लक्ष्यमस्ति आत्मदर्शनम्। अत एव तु महर्षि याज्ञवल्क्यः प्राह—

"अयन्तु परमोधर्मो यद् योगेनात्म दर्शनम्"

यो मानव आत्मानं नान्विष्य स्वहृदयं नावदातं विधाय धनैश्वर्यादावेव रमते सः कदापि न साम्यवादी भवितुमर्हति; न सः कदापि आत्मवत् सर्वेषु भूतेषु व्यवहारमेव कर्तुं शक्नोति; न सः त्यागं परोपकार सेवां वा विधातुं पारयति; न स महान् वीर एव कदापि भवितुं क्षमः। भारतीय संस्कृत्यामेव तत् तत्वं विभ्राजते यन्मानवं सः कः; कस्तदीयो धर्मः; किमर्थं तदीयं जनुः; किञ्च तज्जीवनस्योद्देश्यम्—इत्येतदादि ज्ञापयति। अस्मत्संस्कृतिं लक्ष्यीकृत्य प्रो० हक्सले ब्रवीति—

"उच्चतमशिखरासीनाया आधुनिक्याः सभ्यतायाः अपि एतस्याः अन्तराले यथार्थोन्नतेरादर्श आहोस्विच्चिरजीवनस्य लक्षणं न मया मनागप्यवाप्तम्। नाहमेतदुदीरणे स्वल्पमपि सङ्कुचामि यच्चेद्वर्तमान सभ्यतायाः प्रयोजनं प्रकृत्या रुपरि अधिकार प्रतिष्ठापनं, कामार्थयोः सन्धुक्षणं, भौतिकताभावितविलासानां संवर्धनमेव च तर्हि हृदयेनाहं कामये यदिदानीन्तनी सभ्यतेयं समूलं सत्वरमेव संहृता स्यात्"। यां प्रतीच्यां सभ्यतां तदीया एव विद्वांस एवं शपन्ति तस्याः एव सभ्यतायाः सकाशात् वयमिदानीन्तनाः भारतीयाः शान्ति सुख मुदयञ्चाभिलषामहे क्रियद् वालिशत्वमिदमस्माकम्।

सहस्राब्दानन्तरं पुनः स्वतन्त्रता श्रीः स्वपावनचरणाब्जैरिमां भारतमेदिनी मनुग्रही तुं भगवतोऽनन्तयानुकम्पयावतीर्णास्ति। अतः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वविधान् अपि जाति-मत-सम्प्रदाय-प्रादेशिकता-भाषार्यत्व-द्रविडत्वादि-वादान् दूरीकृत्य सर्वेऽपि भारतीयाः समानाकृतिकाः समानमनस्काश्च भूत्वा संगठिताः सञ्जायन्ताम् । गतमनोमालिन्या भूत्वा तथा प्रयतन्तां येन भारतश्रीः पुनः प्रस्फुरेत्तरामस्मदीय पितृ-पितामहादिपूर्वजानां कीर्तिः संवर्धेततरां 'वसुधैव कुटुम्बकम्' इत्येषोदात्तभावना चैधेततराम् ।

भारतीया वयं पुनरपि स्वगतीतं सर्वलोकैकसुखदं तेजो लभेमहि-इत्येतदभिलषमाणा वयं प्रत्यूषस्मरणीयानां कविभास-कालिदासादि कानां सप्तमशतक प्राग्वर्तिनां समये शोभमानां संस्कृतिं भारतीय जीवनपद्धतिं च विलोकयितु मुमाधवचरणौप्रणम्योपसरामः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्वितीयः परिच्छेदः

रूपक–प्रकर्षः

कस्यचन देशस्य संस्कृतेर्जीवनस्य च दर्शनं रूपकेभ्यः साधुतया भवितुं शक्यमतोऽत्र तान्येवाश्रीयन्ते। परं प्रथममाश्रीयमाणानां तेषां रूपकाणां प्रकर्षः प्रकटीक्रियते।

मुनिर्भरत आह—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते[1] ॥

सकलानामपि कलानां सीमा काव्यम्। तत्रापि दृश्यकाव्यम्। तस्य सर्वासामपि कलानां संश्रयप्रदत्वात्। वास्तु-मूर्ति-चित्र-संगीत-काव्यकलाभिधाः सर्वाः अपि ललिताः कलाः रूपकं संसेव्य स्वकीयां सुषमां सम्पुष्णन्ति। यथा कुसुमाकर औपवनीं छविमुन्मादयति तथैव नाट्यमपि सर्वास्वपि कलासु तारुण्यं सृजति। मन्ये, तत् सर्वा अपि कलाः जीवयति। तस्मात् तद् उपजीविभूतं कलाश्च ताः उपजीव्यभूताः। सर्वास्वपि कलासु यद्यांशिकसुखप्रदत्वं दृश्यते, तदा तत्र सार्वभौमं सुखं तरलीभवदनुभूयते। तत्र दर्शकः काव्यस्यानन्दं, सङ्गीतस्योल्लासं, चित्रस्याह्लादं, मूर्तेः-प्रमोदं वास्तुनश्च हर्षं विनैवायासं विन्दति। तत्र सः सर्वासामपि कलानां स्थितिमेकस्मिन्नेव काले युगपदासादयति। तेन तस्य न प्रचुरः समयो व्यत्येति, नाधिकं धनमेव व्ययीभवति न च प्रयासमेव कमपि स ऋच्छति। स ततस्तज्जनितानि सुखान्येव न, कल्याणानामपि परम्परामश्नुते।

नाट्यकला परमानन्दप्रदायिनी, लोकोत्तरचमत्कारप्रकाशिनी, सर्वाङ्गीणामोदवर्षिणी, विगलितपरानुभूतिविभूतिविभाविनी भवन्ती निखिलमपि

१. नाट्यशास्त्रम्, अ. १, श्लो. ११३, चौ. सं. सी., पृ. ९.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

योगं सम्पूर्णान्यपि कर्माणि अभिव्याप्नोति। तत्र नृत्यं, वाद्यं, संगीतं, चित्रचारुत्वं, लोकवृत्तानुकरणं च विभ्राजन्ते। अतः न किमप्यन्यत् नाट्यकलां तुलयितुमलं जायते।

भुवनत्रयेऽपि यस्य कस्यापि पदार्थस्य सद्भावो भाति वा यस्य कस्यापि भावस्य विलासः कल्प्यते; किं वा या कापि घटना घटते, सः पदार्थः, स भावः सा च घटना रूपकेण प्रदर्श्यते। नाट्यकलाकारः सरित्सरसी-समुद्र-सानुम-त्कान्तार-कन्दरा-नगर-ग्राम-सौध-दुर्गादीनि सर्वाणि सर्वविधानि च वस्तूनि नाट्ये स्वकलाकौशलबलेन तथा प्रस्तौति यत् कृत्स्नमपि वस्तुजातं करतलामलकबन्नयनयोः पुरः परिस्फुरति। स यादृशं दृश्यं दर्शयितुमाकाङ्क्षति, तादृशमेव दृश्यं समुचितेषु नेपथ्येषु चित्रयते; स यादृशं वातावरणं प्रकटीकर्तुं कामयते, तादृशस्यैव वातारणस्य कृतेऽनुकूलान् सम्भारान् सञ्चिनोति, स यादृशमपि कार्यं जात माकलयितु मभिलषते तादृशस्यैव कार्यकलापस्य निमित्तेन युक्तान्युपादानानि संगृथ्नाति। वस्तुतस्तदीयेन व्यापारेण नाट्य-निकेतने सर्वेऽपि लोका अवतार्यन्ते।

नाट्यकला हि नूनं सर्वासामपि कलानां सम्राज्ञी। सा सर्वाः अपि कलाः शास्ति। समस्तमपि जगत् तामाराधयितुमनिशं नियोज्य इव आत्मानं प्रस्तवीति। लोकेषु नेदृग्धर्मोऽर्थो भावः, क्रीडा, कामोविनोदश्चेष्टा, वृत्तं, समीहितमाचारो वा नास्ति यो नाट्येऽनुकृतो वायोजितो न स्यात्। अत एव भरत नाट्यशास्त्रे समाम्नातम्—

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।
क्वचिद् धर्मः क्वचित् क्रीडा क्वचिदर्थः क्वचिच्छमः॥

क्वचिद्धास्यं क्वचिद् युद्धं क्वचित् कामः क्वचिद्वधः।
धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्॥

निग्रहो दुर्विनीतानां विनीतानां दमक्रिया।
क्लीबानां धाष्ट्र्यं जननमुत्साहः शूरमानिनाम्॥

अबुधानां विबोधश्च वैदुष्यं विदुषामपि।
ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम् ।
नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम् ॥
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।
उत्तमाधम मध्यानां नराणां कर्म संश्रयम्[1] ॥

नाट्यकलाकृत् सर्वे स्वस्वाभिरुचिपूर्वकं सुखमुपभुञ्जन्तु इत्येतद्धेतोः अखिलमपि ब्रह्माण्डमालोडयति, सर्वाण्यपि वेद-शास्त्र-पुराणेतिहासादिसाहित्य-सागरं मथ्नाति। तत्र यद्-यद् वल्गु तत् तदादाय रूपके परमोत्साहपुरस्सरं मनोयोगसहितं विलक्षणया मञ्जुलया च रीत्या सन्निदधाति। सकलान्यपि नानाविधानि कर्माणि, सर्वश्च शिल्पसमुदायः, सप्तानामपि द्वीपानामनुकृतिः, देव-दैत्य-ब्रह्मर्षि-राजर्षि-धनिक-निर्धन-कृपण-वदान्य-हास्यप्रिय-पण्डितापण्डितादि प्राणभृतां स्थावराणां च पदार्थानां समीचीनतयाभिनयनमनुकरणं प्रदर्शनं च नाट्यं विदधाति। आङ्गिकवाचिकादिभिरभिनयैः संसृतेर्निश्शेषावस्थास्तत् तादृशा प्रकारेणाभिव्यनक्ति यत् सर्वेऽपि विभिन्नरुचिभाजो नरा युगपत् स्वकीयं मनोऽनुकूलं रसं निपीय तत आत्म परितोषकरमतिशयहितावहं सुख मधियाति[2] ।

नाट्यात् परं न खलु किञ्चिदन्यत्। तद्द्वारेण सर्वं सुलभं जायते। अमूर्तानंपि पदार्थांस्तन्मूर्तीकरोति। अतीतमपि अनागतमपि वृत्तं तद् घटयितुमात्मनि शक्ति निदधाति। नाट्यं हि नूनं जगत्पतयेऽपि रोचते अत एव तु सः इमां संसृति-नाट्यशालां ससर्ज; स्वयं च तस्य सूत्रधारो भूत्वा तत्र नाना कौतुकानि दिवानिशं कारयन् सर्वमपि शास्ति। सत्यमेवेदं यत् समग्रेऽपि ब्रह्माण्डे यैः कैरपिपदार्थै विभावितै र्भूयते ते सर्वेऽपि कौतुक प्रभवस्य नटराजराजपरमेश्वरस्य विविधानि रूपाणि राजन्ते। एतस्यां विश्वनाट्यशालायां रतिशोकोत्साह-हास्य-क्रोध-भय-घृणाश्चर्य-निर्वेदाः स्थायिभावाः विबोधावहित्थावेग-दैन्यादिकाः सञ्चारिभावा यावन्तोऽपि विभाव्यमाना भवन्ति, तावन्तः सर्वेऽपि तस्यैव नाट्यस्रोतसः शम्भोः सात्विका अभिनयाः, नानावर्णविभाविभाविताशांशुककमनीयायाः प्रकृति-वनितायाः असंख्यातानि विचित्राणि रूपाणि तस्यैव नट-गुरो राहार्याभिनयाः किञ्च सौरमण्डल तद्गत ज्योतिष्मत्-पिण्डगतयोऽप्य

---

१. प्र. अ. श्लो. १०४—१०९. चौ. सं. सी.,

२. नाट्यशा., प्र. आ., श्लो. ११४—११६, चौ. सं. सी.।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

च चेतनाचेतनात्मकजगतः सर्वाः अपि चेष्टास्तस्यैव महामहानटस्याङ्गिकाः अभिनया विभासन्ते; सर्वविधाः वाचोऽपि तस्यैव नटेश्वरेश्वरस्य वाचिकोऽभिनयः। अत एव अभिनयदर्पणकारो नन्दिकेश्वर एवं स्तवीति तम्—

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।
आहार्यं चन्द्रतारादि तं नुमः सात्विकं शिवम्॥

ध्रुवं हि सः नाट्यप्रियः प्रियतमो जगन्नाट्यमन्दिरेऽवस्थितानां सामाजिकानां समक्षे सर्वानपि शृङ्गार-करुण-वीरादिरसान् साकारान् कृत्वा आकलयाञ्चकार। तथाहि सः कृष्णरूपं परिगृह्य शृंगारं, रामरूपं परिधृत्य वीरं, वामनरूपमादाय हास्यं, परशुरामरूपं स्वीकृत्य रौद्रं, नृसिंहरूपं परिधाय भयानकं, मत्स्यरूपमङ्गीकृत्य करुणं, कच्छपरूपमुररीकृत्यं अद्भुतं, वराहरूपमुपादाय बीभत्सं; बुद्धरूपं च संश्रित्य शान्तं रसं चक्षुर्ग्राह्यां दशां प्रापयामास। अत एव दशरूपककारो धनञ्जय इत्थं नटवरं परमेश्वरं नौति—

दशरूपानुकारेण यस्य माद्यन्ति भावकाः।
नमः सर्वविदे तस्मै विष्णवे भरताय च॥

अहर्निशं जगत्यां घटमानाः साधारणघटनाः अपि, जायमाना व्यवहाराः अपि जन-मनः प्रायेण प्रीणयन्ति पुनः कविता-गीति-नृत्यवादित्रालेख्य-वेश-सज्जा-नानोपस्करपरिच्छदादिकलितं रूपकं कथं न परमुत्मुकताभाजं प्रसादं मानवानां मानसेषु जनयेत्? नाट्याकर्षणन्तु भगवन्तमप्याकर्षति। सोऽपि निर्विकारत्व मपास्य नानाविधानभिनयान् अभिनेतुं तानि-तानि वर्ष्माणि वृणुते। मानवस्य कार्यकलापं तस्याकारं तस्य भावांस्तस्य च प्रकृतेर्विभिन्ना दशाः रूपकं चक्षुर्गोचरतां नीत्वा सम्यक् सहृदयान् प्रीणाति; तत् सान्द्रानन्दवर्षया प्रभावमेवंविधं दर्शकाणामुपरि क्षिपति यत् सर्वेऽपि सामाजिकास्तस्मिन्ननेहसि विस्मृतविषयान्तराः सञ्जायन्ते। तेषां के वयं, कुत्र वयमुपविशामः, किं वयं प्रेक्षामहे, अस्मत् सविधे के के निषीदन्ति'—इत्येतदादिसकलमपि, तदा स्मृतिसृतेरवस्रंसते। रसातिरेकात् तदीयानि सुख-दुःखानि तदीया रागद्वेषचिन्तादिभावा तिरोहिता भवन्ति। रङ्गमञ्चे नटा येषां रामकृष्णादिकानां चरित्राणि

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिनयन्ति तेषां सुख-दुःखादिभावास्तदीया भूत्वा तदानीं स्वस्वव्यापारं कर्तुं व्यवसिता भवन्ति। सामाजिकाः तदा स्वीयसत्तायां न विद्यमाना भूत्वा तत् तद्रामादिसत्त्वे प्रविष्टाः जायन्ते; स्वतां स्वसत्तां च निदधानाः अपि साधारणीकरणशक्त्या ते परताम्प्रति द्रागासादिता क्रियन्ते। भेदबुद्धिस्तदा पलायते, अपूर्वैव कापि अनिर्वचनीया स्थितिस्तदा समुत्पद्यते। रूपकं शृङ्गारेण यूनः, नीतिचर्चया धृतनीतिरसान्, व्यवसाय-वाणिज्योद्योगसम्बन्धिन्या वार्तया अर्थजीविनः, निर्वेदात्मकेन प्रसङ्गेन निर्विण्णान्, उत्साहोत्पादकैः संगरोदन्तैर्योधेयान्, धर्मप्रवचनेन स्थविरान्, शास्त्रीयैर्विनोदैः कोविदान्, हासेन च बालान् भूयोभूयः परिप्रीणाति। सर्वविधभावुकसुखप्रदायकत्वात् तस्य श्री शारदातनयः शंसति भावप्रकाशनेऽध्याये प्रथमे—

नानाशीलप्रकृतयः शीले नाट्यं प्रतिष्ठितम्।
यद् यत् स्वशिल्पं नैपथ्यं कर्म वा चेष्टितं वचः॥
× × × ×
सत्वभावेषु सर्वेषु बुधास्तुष्यन्ति सर्वदा॥

रूपकं प्रसभ जन-निवहं स्वां दिशां प्रति आवर्जयति। विदुषां भाषणेषु, पण्डितानां कथासु, मल्लानां द्वन्द्वयुद्धेषु, विविधविशिष्टतावतीसु प्रतियोगितासु प्रदर्शनी-कविसम्मेलनादिमहोत्सवेषु जनास्तावत् सुखं नाप्नुवन्ति यावद् रूपके। अतः सर्वापि जगती यावता हर्षेण रूपकं सभाजयति न तावता सर्वाण्यन्यान्यविनोदसाधनानि। रूपके सर्वविजयिनीं शक्तिं निवसन्तीं प्रेक्ष्यैव प्रेक्षावन्तस्तदेवमभिनन्दन्ति—

"प्रत्यङ्कमङ्कुरितसर्वरसावतारनव्योल्लसत्कुसुमराजिविराजिबन्धम्।
धर्मेतरांशुरिव वक्रतयातिरम्यं नाट्यप्रबन्धमतिमञ्जुलसंविधानम्"[1]॥

तत्राभिमतामानन्दनिस्यन्दितामनुभूयैव धनञ्जयो दशरूपके प्रथमप्रकाशे प्राह—

"आनन्दनिस्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः।
योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादपराङ्मुखाय॥"

१. सुभाषितरत्न भाण्डागारे, षष्ठसंस्करणे, नि० सा० प्रे०, पृ० ३३

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाटकीयं चारुत्वं वेधसो नैसर्गिकचारुत्वादपि ज्यायः। तस्य सृष्टौतु षडेव रसाः, परमिह नव रसा शोभन्ते। जगत्यां यद् दुखं तदिह सुखे परिवर्तते। इह सततं शुभमेव शुभं भासते। संसारे क्वचिद् विषमता क्वचिच्च समता परमत्र समतव राजते। लोकस्तु क्वापि विषमयः क्वापि चामृतमयः प्रतीयते। एतत्तु आनखचूडममृतमयमेव। संसारे ते-ते पदार्था इतस्ततो विकीर्णाः प्राप्यन्ते किन्त्वत्र तु सवं एव ते एकत्र समवेता भूत्वा विभ्राजन्ते। प्रकृत्यां यत् कालत्रितयेऽपि न सम्भवं तदिह सर्वदैव सम्भवम्। वस्तुतस्तु नाट्यश्रीः समेषामपीष्टकामधुक्। तस्मादेव सिद्धवाग्विभवः कालिदास आह—

"देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं।
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा॥
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते।
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्॥

(मालविकाग्नि० १, ४)

नाटकीय जीवनस्य चरमं परमपावनमुद्देश्यमतिशयदारुणविपद्व्यथा-प्रत्यूहाप्लुतार्णवान् मानवस्याप्रत्यक्षप्रकारेण समुद्धारणं, तदार्तिहरणं तद्धी-मलीमसताप्रमार्जनञ्च विद्यते। नाट्यशास्त्रे तस्येदमेव प्रयोजनं 'हितोपदेश-जनन' मित्यादिश्लोकेषु गीतम्।

विराटोपादानसम्भाराटोपेन विभ्राजमानं, नानाकलानिष्णाताभिनेत्रा-भिनयनदीष्णतया विद्योतमानं, नैकमनोभिरामदृश्यविसरेण दीप्यमानं, सकला-गम-निगम-विशारदानेकानुभूतिबन्धुर-शेमुषीश्रियाशोभमानमनन्तप्रसाधनाभोगेन-रममाणं रूपकं चिरन्तनात् कालात् तेषां नृणां कृते तु विशेषतः परमो-पकारकृत् सुहृदिव सिद्धमभूत् ये न तपश्चरितुं, न वेदादिशास्त्राण्यध्येतुं, न कठोरसाधनां साधयितुं न च तीर्थ-व्रतादिकमाचरितुं प्रभवन्ति।

सांसारिकप्रभूतसातनिमग्ना, नानागहनतमदुस्तरकुटिलकार्यनिकुरम्बेषु निलीनाः, भीषणमात्सर्य-स्पर्धादिदोषकर्दमे निपतिता महीपाला लक्ष्मीमन्तः पूरुषाश्च रूपकादायासमन्तरेण स्वश्रेयोऽप्यर्जयितु मर्हन्ति। अतः रूपकस्य

१. प्र० अध्याये, चौ० सं० सी०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नैजमुपयोगित्वम् अस्ति। अन्यत्र रुचेरभावादवकाशन्यूनत्वाच्च, श्रीमन्तो रूपकदर्शनोन्मुखा एव पुरा अवाप्यन्त, तस्मात् कवीनामपि परमङ्गलमतीनां प्रवृत्ती रूपकेष्वजायत।

रूपकस्याद्भुतमुपादेयत्वं महत्त्वं वैचित्र्यं च विभाव्य नन्दिकेश्वरः 'पाठ्यं चाभिनयं गीतम्' इत्यादिश्लोकैरूपावीणयत् स्वकीयेऽभिनयदर्पणे।

वस्तुतस्तस्य नाटकीयमहत्त्वस्य स्तवनं केन प्रकारेण कर्तुं सुशकं, यद्घटने चतसृणामपि श्रुतीनां योगः समुल्लसति। भरत आह नाट्यशास्त्रे—

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

एतासां विशिष्टतानामाकरत्वाद् रूपकस्य, भारतीयजनता तत् साहित्यस्याङ्गेषु उत्कृष्टतममङ्गमवगच्छति। प्रतीच्चप्रध्यां मतेनापि नाटकं साहित्यस्य प्रकृष्टतममङ्गम्। 'पोइटिक्स' इत्येतन्नामधेये ग्रन्थे अरस्तुस्तत्प्रशंसामां यदभिदधौ तदस्ति सर्वेषां विदितम्। शिक्षा-विनोदादेः सर्वोत्तमसाधनत्वाद् रूपकस्य पश्चिमीयमपि जगत् चरित्र-रीति-नीति-सभ्यता-संस्कार-वैज्ञानिकोदयादिकं सकलं दर्शयितुं प्रावर्तत। अद्य तत्र रूपकाणां प्राप्ता विशाला संख्या प्रतीच्यपण्डितानां रूपकेषु च गम्भीरामभिरुचिं स्फुटतया प्रथयति। अद्यतनं समग्रमपि जगत् सेक्सपियर-इब्सन-वर्नार्डशॉ-कालिदास-भवभूति-शूद्रकादिनाटककाराणां रूपकाणि दिवानिशं शयनाशनादिकमपि विस्मृत्य अधीयानं यदवलोक्यते तद् रूपकाणां श्लाघास्पदतां श्रेष्ठताञ्चोद्घोषयति। सर्वत्र भूयिष्ठानां रूपकाणां प्रचुरतराणां प्रेक्षासदनानां, पुष्कलानां नाटकीयप्रसाधनानां, महनीयानां नाट्यशास्त्र-नाटकानुशीलनानुसन्धानकारिणीनां संस्थानां, विविधानां नाटकीयपरिषदां च विद्यमानतां प्रेक्ष्य सुदृढतयाभिधातु मिदंमनो विवशीभवति, यत् सर्वमपि सभ्यमसभ्यं च जगत् नाटकमेवातितरां रमयति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तृतीयः परिच्छेदः

संस्कृत-रूपकम्

संस्कृत रूपकं स्वप्रकृत्या प्रवृत्त्या च भाषान्तररूपकेभ्यो भिन्नम्। तत् स्व-जनुरारम्यैव आदर्शवादि। प्रख्यातवंशानां राजर्षीणां वा धीरोदात्तादिकानां तेजस्विमानवानां चारुचरितान्यभिनीय विविधव्यापाराणां घटनानां च सजीवं चित्रणं विधाय च तत् तज्जीवन महत्तायाः किञ्च तत्तद्वस्तु-धर्मस्य समुन्मेषणं तदीयमुद्देश्यं न केवलं, श्रव्यकाव्यमिव सामाजिक-मनःस्थित-भावानां रसत्वेन निष्पादनं तदीयं प्रधानं लक्ष्यमस्ति। न तदन्विति त्रय्यां श्रद्धत्तेऽतो वैदेशिकेभ्यो रूपकेभ्यस्तदितरगामिनीं विशिष्टतां भजते।

संस्कृतरूपकस्येष्टोऽस्ति रसः। तत् साधनायै तत्रान्येषां तत्वानां सन्निवेशो विधीयते। 'अवस्थानुकृतिर्नाट्यम्' इति मन्वानेनापि संस्कृतनाटककारेण कथा-वस्तु-चरित्रचित्रणादितत्वेषु न गौरवधीराधीयते। रस साधनासरण्यां यः कोऽपि प्रत्यवायस्तेनेक्ष्यते तन्निरासाय तेनानारतमिष्यते। पात्रचित्रण-संविधानकादियोजानायां यदैव तेन कश्चिदेवंविधो भावोऽवलोक्यते यो रसानु-भूतावन्तरायः प्रतिष्ठाप्यते, तदैव क्षिप्रं तस्यापनयने तथानुष्ठीयते यथा भावुको रसस्यास्वादनं निर्बाधं विदध्यात्। रसोद्रेकं प्रति संस्कृतालोचकेषु अतितरामभि-निवेशोऽवाप्यते। 'काव्यानन्दोऽप्यभिनीयमानाद् रसादेव समुत्पद्यते' इत्येतदभि-नवगुप्तस्य गुरोर्भट्टतौतस्य मतमिह समुज्ज्वलं प्रमाणम्। भरतमुनिः स्पष्ट-माचष्टे-'न हि रसाद् ऋते कश्चिदप्यर्थः प्रवर्तते'। कथावस्तुनो वा पात्र-चरित्रादेः पर्युदासतया सन्निवेशनं नाधुनिकान् तोषयति। तेषां मतेन तथाकरणं नोचितम्। परं तन्न। भारतीयसंस्कृतनाटकस्य मौलिकताया रनवगमनादेव ते तथा मन्यन्ते। संस्कृतरूपककाराणां वा नाट्यशास्त्राचार्याणां तु मतमेतत् यन्नाति रसाद् वस्तुविच्छिन्नतां गमयेन् न च वस्त्वलङ्कारलक्षणः रसं वा तिरोदध्यात्। नाटककारेण सदा मध्यमो मार्गोऽवलम्बनीयः। उक्तञ्च दशरूपके—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा न तिरोदध्याद् वस्त्वलङ्कारलक्षणैः ॥

उपर्युक्त विवेचनेनेदं कदापि नावगन्तव्यं यत् संस्कृत रूपकेषु कथावस्तु उपेक्ष्यते । तत् स्वरूपं महत्त्वं च संस्कृतनाट्यशास्त्रेऽतिशय सूक्ष्मतयाऽऽम्नातम् । भारतीयैर्नाट्यरचना न कस्याः अपि क्षणिकभावनाया वशेन विधीयते । तदीयं प्रयोजनं प्राचां विदुषां मतेन नितान्तगम्भीरं व्यापकं सार्वभौमं च वर्तते । 'लोकवृत्तानुकरणं' नाट्यस्य स्वरूपमस्ति । लोकवृत्तस्य नानाभावसमन्वितत्वात् नानावस्थान्तरात्मकत्वाच्च भारतीया नाटकीयमितिवृत्तं कस्यचन सीमितस्य कुड्यस्याभ्यन्तरे वन्दीकृत्य न निधातुमीहन्ते । परं भारतीयाः प्राञ्चो नाटककारा नासन् अर्थगृध्नवो न च ते स्वानि नाटकानि द्रव्यार्जनाय लिलिखुः न ते तानि रूपकाणि स्वोदरपूरणायोपजीवित्वेनाकल्पयन् । अतस्ते तत्र तानि महनीयानि चरित्राण्येव प्राधान्येन जगृहुर्येषां प्रभावेण ते स्वमानसगतस्य कालुष्यस्यापनयनं सम्भवममन्यन्त । अत एव तेषां रूपकेषु आदर्शपुरुषाणां चरितानि सन्ति गृहीतानि । उदात्तभावानामुद्बोधने काम-क्रोध-लोभादिदुर्भावक्रीतकिङ्करभूतानां रागद्वेषादिदूषितचित्तानां पुंसामुपाख्यानानि नैव कदापि सहायकानि भवितुमर्हन्तीति दृढविश्वासात् न तानि ते आद्रियन्तेस्म ।

नाटकं लोकस्वभावमनुकुरुते । स्वभावस्तु लोकस्य न सदैकरसोऽवलोक्यते । कदापि स उदारः कदापि च कृपणः कदापि च सः कमप्यन्यमेवं भावं गाहते । मूलतो विशुद्धस्य स्वभावस्योपरि यावृता भवतिच्छाया तामपहर्तुं तं प्रयत्न तत् कुरुते येन तदीयं समीहितं सिद्ध्येत् ।

संस्कृतनाटकं नाट्तशात्रीयविधिविधानानि सादरमवज्जीवितस्यैकदेशगं चित्रणं न प्रस्तूय कृत्स्नमपि जीवनं सन्निदधाति । तदपि मानवगतां दुर्बलतामालिखति ।

अविमारके राजकुमारस्य हृदयं ये विकाराः आक्रमन्ते, अभिज्ञानशाकुन्तले शकुन्तलामालोक्य दुष्यन्तस्य मानसे या भावनोत्पद्यते, मृच्छकटिके मदनिकां वीक्ष्य शर्विलको यां दिशां नीयते, मुद्राराक्षसे मलयकेतुर्यामिर्देशनाभिरादिष्टः संवृत्तो रत्नावल्यामादौ वासवदत्ता सागरिकायां यामीर्ष्यां बबन्ध, वेणीसंहारे

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भीमो यैः क्रोध-घृणादिभावैराकम्प्यत, तत्सर्वमपि मानवीयं दौर्बल्यमेव तु विद्यते। परमेतत् सकलस्याप्यालेखनं रूपकस्योपसंहृतेः प्रागेव प्रणिधीयते।

"आत्मा निसर्गत आनन्दमय' इत्यतः पर्यवसाने नाटकं सुखान्तं कार्यमिति विमृश्य अत्रत्यानि नाटकानि बाहुल्येन सुखान्तान्येव कवयः प्राणैषुः। संस्कृत-नाटककारो नाटके दुःखस्य पराकाष्ठां प्रदर्श्यापि अन्ततस्तस्योपसंहरणं सुख एव विदधाति। भवभूते रुत्तररामचरिते मानव-परितापानां चित्रणं यावत्यां सीमायां पर्यवलोक्यते न तावत्यां क्वाप्यन्यत्रावाप्यते। परं संवरणं तत्रापि न दुःखे विहितम्।

संस्कृतनाटककारः स्वरचनायां मानवीयायाः सर्वविधाः अवस्थाः दर्शयति। नासावेतत्कार्ये प्रमाद्यति न च भवत्यनवहितः[1]। 'अवस्था या तु लोकस्य-' इत्येतदादिकं यन्नाट्यशास्त्रे कथितं तस्याक्षुण्णतया रक्षां कर्तुं संस्कृतरूपकेषु सम्यगीहाऽऽचरिता जायते।

दर्शक-मानसे रसस्योन्मेषणं भारतीयरूपककारस्य मन्तव्यं मुख्यमतोऽसौ कदापि प्रतीच्यरूपककर्त्तेव 'व्यापारं' नाटकस्य सर्वस्वतया नाङ्गीकरोति। भारतीय प्राच्यप्रध्यो देशस्य मर्यादा महिमा च सर्वथा प्राणैरपि रक्ष्येत-इत्येतं विचारं न जातु स्व-बुद्धि-पथादभ्रंशयन्। अतस्तेषामेकैकं कृत्यं स्वोपवर्तन-गौरवानुरूपमेवाभूत्। तेषां रूपकेषु कथावस्तुनो योदात्तता वीक्ष्यते किं वा तत्रौचित्यस्य सर्वथा संरक्षणं यदस्माकं पुर उपस्थाप्यते, तत्कारणमुपरिष्टा-दुक्तमेव। रूपककारो भरतस्य[2] वचो निध्यायन् एव प्रयतते स्वकृतिं कर्तुं सदा। सर्वथा स तथा प्रायस्यद् येन नायकस्य चरित्रं परमशुचितया चित्रितं विलोक्यैव दशरूपककृद् धनञ्जयो रूपकं चिकीर्षूनिदमुपदिदेश—

'यत् तत्रानुचितं किञ्चिन्नायकस्य रसस्य वा।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्[3]॥

पौराणिके किं वा ऐतिहासिककथानके चेद् रूपककारः क्वाप्यनौचित्यं प्रेक्षते, तदा सः तद् वर्जनपुरस्सरं कथां निबध्नाति। 'शाकुन्तले' नाटककारेण

१. भरतनाट्यशा., २१।१२१; २१।१२६.
२. भरत-नाट्यशा., ११४।६८.
३. दशरू. ३।२२.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्वाससः शाप-प्रसङ्गोऽत्र एवोपन्यस्तः । कथावस्तुनः सरसत्वेंऽनिवार्यतोऽभिमते सत्यपि औचित्याः अतिक्रमणं न कदापि वरं मतमभवत् ।

विविधानि दुःखानि सहमानाः अपि, अतिदारुणाः सर्वस्वविध्वंसिनीर्विपदो लभमानाः अपि ये स्वजीवनं सदाचारान्मनागपि नास्रंसयंस्तेषां चरित्रं प्रणीय संस्कृतरूपकाणि उच्चैरिदं घोषयामासुर्यत् तानि चारित्र्याङ्कने भृशं रुचिं निदधति ।

चरित्रचित्रणे विलोक्यापि तेषामीदृशीमवहितचित्ततां, तान्यधिकृत्येद मुदीरणं कियत् समुचितं यत् तत्र चरित्र चित्रणे कवय उदासत इति[1] ?

रूपकेषु न केवलं राजवंशोद्भूतानां चरित्राणि समुल्लिख्यन्ते अपितु तेषु सामान्यान्वयसमुत्पन्नानां जनानामपि वृत्तमालिख्यते । 'प्रख्यातवंशो राजर्षि र्धीरोदात्तः प्रतापवान्[2]' इति यदुदीरितं तत्तु नाटकाभिधे रूपकेऽभिलष्यते । प्रकरण-वृत्तप्रभृतिरूपकभेदेषु तु तादृशो नायको नापेक्ष्यते । प्रकरणाख्यरूपके गृह्यन्ते प्रायेण साधारणान्येव पात्राणि । भाणाभिधे रूपके च साधारणान्येव भवन्ति पात्राणि; न च तत्रैकस्यापि एतादृशस्य नुः सद्भाव आसाद्यते य इति-वृत्ताख्यातो वा पुराण-गीतो भवति । अन्यविधेष्वपि प्रहसनेहामृगादिषु रूपकेषूप-रूपकेषु च बहुविधानामुच्चावचानां पात्राणां सन्निधानादिदं निश्चप्रचभावेन निष्पद्यते, यत् संस्कृतदृश्यकाव्येषु सर्वविधानामपि पुंसां कलत्राणां च समावेशः क्रियतेऽथ च बहुविधानि चरित्राण्यपि व्यवस्थाप्यन्ते । शाकुन्तले धीवर-जानुक-सूचकादिकाः, मृच्छकटिके मदनिका-शर्विलक-चन्दनकादिकाः, मध्यमव्यायोगे केशवदासप्रभृतयः पात्राणि तदीयानि चरित्राणि चेह प्रमाणत्वेन देदीप्यन्ते ।

संस्कृतरूपकेषु गीत-नृत्य-वादित्रादीनां कलानां पर्यवलोकनेन सिद्धयतीदं यत् पुरातनतरं भारतीयजीवनं ताभिस्ताभिः कलाभिश्चारुतया विद्योत्यमान-मासीत् । भारतीयेष्वेषा कलानुरागिणी रुचिस्तदाप्रभृत्येवावलोक्यते यदात्र वैदिकोऽनेहा विजजृम्भे[3] ।

---

१. कीथः संस्कृत ड्रामा, पृ. ३०७

२. विश्वनाथः साहित्यदर्पणे, षष्ठे परिच्छेदे ।

३. अथर्वणि १२.१.४१.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रायेण द्विसहस्रवर्षाणि व्यतीतानि तस्य कालस्य, तदा भरतवसुधाया-स्तरङ्गिणीतटानि, अरण्यानि, क्षेत्राणि, सानुमतां कन्दराः, पत्तनानि, सकलाश्च ककुभः, नृत्य-गीतवादित्रादिस्वनैरहोनिशमगुञ्ज्यन्त। कला-केलिनिरतचेतसां मृगीदृशां समवायो यन्मङ्गलं व्यातनोत् तेनात्रत्यानां जीवनं स्वस्थेन विनोदेन, पुनीतेन सौहृदेन सुरभितं सद् विललास। भरतकृतं नाट्यशास्त्रं, वात्स्यायनकृतं कामसूत्रं, पतञ्जलिकृतं महाभाष्यं, कालिदासकृतं मेघदूतं विक्रमोर्वशीयमथ चान्यानि रूपकाणि मञ्जुलामोदमुदितस्य जीवनस्य प्रतिभूवद् विद्योतन्ते।

ईसवीय षष्ठशतकं यावदत्रत्याभिनयादिकलाः कृत्स्नतया विकमिता अभूवन्। पाणिनिः स्वकीयाष्टाध्याय्यामभिनयकलाकारौ शिलालिकृशाश्वसंज्ञकौ स्मरति। तत्कृतमिदं स्मरणं स्पष्टतयैव इहत्याया नाट्यकलायाः प्राचीनतरमितिहासमुन्मीलयति। भास-कालिदास-शूद्रकादिकवीनां रूपकेषु, भरतस्य नाट्यशास्त्रे च तासां कलानां शाब्दं चित्रं पर्यवलोक्यते याद्य अजन्तासाञ्चीप्रभृतिस्थानेषु राजन्ते।

संस्कृतरूपककाराः स्वरूपकेषु पद्यान्यधिकतमसंख्यायां विनिवेशयन्ति। तानि च ते स्थूलकायानि कुर्वन्ति। तानि ते गम्भीरशैल्यां विरचय्य मननार्हंग्रन्थमिव सृजन्ति-इत्येष आक्षेपो हि क्रियते कतिपयैः प्रतीच्यैः। परं किं शेक्सपियरस्य नाटकानि न सन्ति पद्यबहुलानि? चेन्नाटकस्य मननार्हता वा स्थूलता दोषस्तर्हि आंग्लः कविष्टामस हार्डी विपुलकायस्य स्वीयस्य 'डाइनास्ट' संज्ञकनाटकस्याकारमधिकृत्य कस्मात् सविस्तरमलिखद् यद् रङ्गमञ्चोपरि अभिनेयं नाटकं भवत्यपकृष्टमूल्यम्। उत्कृष्टं तु तद्, यद् रङ्गमञ्चप्रयोजनेन न लिख्यते। वस्तुतस्तदेव नाटकमुत्तमं यदावृतकपाटे प्रकोष्ठेऽध्ययनाय प्रणीयते।

संस्कृतनाटककारः संसारस्यासीमसौन्दर्यानुभूति मवलम्ब्य स्वीयानि पात्राणि विशिष्टव्यक्तित्वात् तरलजीवनाद् यथार्थता-धरातश्च न कदापि स्रंसयति। तदीयं परम्परात आगतमपि पात्रं न कदापि वैरस्यं जनयति। न च तदीयं पात्रं कल्पनालोकस्य पात्रं भवति। तद् भवति भूतलस्यैव पात्रम्। दुष्यन्तो भरतभुवः सम्राडवश्यमस्ति परं सन्नपि सः तादृशः, पुरुषः एव न च पुरुषादितरः। कविनासौ स्वनाटके मानवसुलभगुणदोषवानेव चित्रितः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ।।"

(ख) "अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ।"

(ग) "कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् ।।"

इत्यादिगीर्भिर्नाटककृत् तस्मिन् महीपतौ मनुज-सुलभ-दुर्बलतायाः स्थितिं स्पष्टमेवोद्घाटयति । तथ्यमिदं यत् संस्कृत-रूपकेषु पात्राण्यसाधारणानि भूत्वापि भूलोकस्यैव पात्राणि भवन्ति न च द्युलोकस्य । एवं विधायां स्थितौ कथमिदं वक्तुं सुशकं यद् रूपकेषु अनैसर्गिकता जागर्ति । वस्तुतस्तत्र सर्वत्र मानव एव अङ्कितोऽस्ति न च त्रिदशः । चन्द्रगुप्तं, राक्षसं वा चाणक्यं को देवं ब्रुवीत ? राम उपमानविहीनो ना च तत्र मानवत्वेनैव चित्रितो न च नाकौकारिव ।

(क) "क्षुभिताः कामपि दशां कुर्वन्ति मम सम्प्रति ।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ।।'

(ख) "एषा वशिष्ठशिष्याणां रघूणां वंशनन्दिनी ।
कष्टं सीतापि सुतयोः संस्कर्तारं न विन्दति ।।"

इत्येतदादिश्लोकेषु रामः किं मानवादितरः ? न सः मानव-सुलभ-दौर्बल्यभाक् ?

संस्कृतरूपकेषु गृहीतं कथावस्तु परम्पराक्षुण्णम् । न संस्कृतरूपककारो नव-नव-कथाग्रहणेऽभिरुचिं दर्शयतीत्येषा कथापुरातननिष्ठता वैरस्यं जनयतीति ब्रुवाणान् प्रति प्रसन्नराघवकारः सत्यं प्राह—

'स्वसूक्तीनां पात्रं रघुकुलतिलकमेकं कलयतां,
कवीनां को दोषः स तु गुणगणानामवगुणः ।
यदेतैर्निश्शेषैरपरगुणलुब्धैरिव जगत्,
ह्यसावेकश्चक्रे सततसुखसंवासवसतिः ।।'

रामायणे महाभारते च सकलानामपि वेदशास्त्रादीनां सारः सुबोधायां भाषायां सुललितया रीत्या श्रीवाल्मीकिव्यासमहर्षी सन्निहितवन्तौ । तत्र तौ भारतीयाचारविचारमर्यादारीति-नीतिकर्त्तव्यधर्मादिविषयान् सम्यक् सविस्तरं च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रतिपादितवन्तौ। गच्छता कालेन तावुभावपि ग्रन्थौ जनतायाः कृते वेदशास्त्रोप-निषदादिभ्योऽपि प्रियतरौ संवृत्तौ। सर्वेषामपि जनानां प्रवृत्तिं तत्र वीक्ष्य कवयो रूपककाराश्च तयोरेव ग्रन्थयोः कथाः अपि प्रमुखतया स्वस्वकृतिषु ग्रहीतुं प्रावर्तन्त। प्रचुरतराणां रूपकाणां राम-कृष्ण-कथापरकत्वे कारणमिदमेव जातम्।

वध – युद्ध-विप्लव–मृत्यु–घृणा–जुगुप्सापरकदृश्यवर्जनपुरस्सररूपक–प्रणयनं नाट्यशास्त्रिणां मतमतः संस्कृतरूपकेषु न तत्-तत् प्रदर्श्यते। कल्पना श्रीस्तत्र वीक्ष्यते परं याथार्थ्यं न क्वापि अपलप्यते। न संस्कृतरूपककारो हृत्प्रमोदा-धायिनां तत्वानां कामपि कणिकां स्वशयात् स्रसयति। सः सांस्कृतिकस्नेह-स्निग्धे सुजनतासस्यश्रीश्यामले श्वसनावरणे स्वरूपक-स्रजं सृजति। न स यवन (यूनान) नाटककार इव हिंसा-नृशंसतादिदोषदारुणघटनानां सन्निवेशं तत्र विदधाति।

यद्यप्यनेके संस्कृत रूपककर्तारो नाट्यशास्त्रोक्तान् नियमान् निर्देशांश्च अवन्त एव वीक्ष्यन्ते परं कतिपये सन्त्येतादृशोऽपि रूपककर्तारो ये तान् नियमान् निर्देशांश्च अक्षुण्णतया पालयन्तो नावाप्यन्ते। अतः "रूपकाणि सर्वाण्यपि परम्परानुसृतसृतिसेवीनि वा मृदुलपक्षगृहयाणीत्ये" तन्निगदन मलीकम्।

भासकृतमूरुभङ्ग नाम रूपकं शोकपर्यवसायि वर्तते; बालचरिते कंसस्य प्रतिमायां च दशरथस्य निधनं रङ्गमञ्चे घटमानं दृग्गोचरीभवति। मृच्छ-कटिक-वेणीसंहार-नागानन्दादिरूपकेषु शोकावहानि दृश्याणि बहुविधभावनानां च शबलता स्थाने-स्थाने परिस्फुरन्ति। परं सत्स्वपि तथाविधतावत्सु तेषु, तानि प्रतीच्यानि रूपकाणीव कर्कशेण निराशावादेन, भीषणहिंसानां निशितेन श्रृङ्खलेन, प्राणापहारिणीभिः शठताकुलाभिः क्रिया-प्रतिक्रियाभिश्चिन्तनीयै-रमानुषिकैः कृत्यैः रागद्वेषयोः प्रचण्डेन ताण्डवेन, क्रव्यादानां भयङ्करेण च गर्हितव्यापारेण नाच्छन्नानि भवन्ति। नचात्रत्यानां नाटकानां दृष्टिर्देशान्तरना-टकानां दृष्टिरिव ऐहिकताप्रेक्षिणी। 'मानवगतदौर्बल्य-प्रदर्शनेन जगदुत्थापयितुं शक्य' मित्यत्र सा विश्वसिति। सा मानवे मानवतायाः स्वरूपमेवावलोकयितु-मभिलषते। नोपक्रोशमलीमसं जीवनं तस्यै रोचते। सा कर्मवादे श्रद्दधानापि नियतौ विमर्शं निधत्ते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतीयं दर्शनं सुखदुःखयोर्मध्ये न भेदमीक्षते। तदुभयमपि सममेवाव-गच्छति। तदीयः प्रभावः कृत्स्नस्याप्यवशिष्टस्य साहित्यस्य भारतौकसो नृसामान्यस्य चोपरि नितरां निपतितोऽस्ति; तेन तादृशाणां दृश्याणां सन्निवेशमिहत्यानि नाटकान्यपेक्षन्त एव न, यादृशाणि वैदेशिकाणि नाटकान्याकाङ्क्षन्ति।

संस्कृतरूपकेषु समुत्कर्षशाली मनोऽभिरामोऽभिनवोऽभिनयो विलसति। ईशवीयाब्दारम्भात् प्रागर्वाक् च भारतेऽभिनयशिक्षाप्रदायिन्यः संस्थाः पुष्कला अशोभन्त। तस्मात् सर्वविधाभिनय-गति-प्रचार-मण्डल-भावाभिव्यञ्जनादि-विधास्विहाद्भुतं वैचक्षण्यमवालोक्यत। भरतस्य[1] नाट्यशास्त्रमत्र प्रकृष्टं प्रमाणम्। इहत्याभिनयो मनोविज्ञानानुकूल आसीत्। आग्नेयपुराणे[2], नन्दिकेश्वरस्य अभिनयदर्पणे मन्दारमरन्दादौ हि अभिनयकलायाः विशदं विवेचनं विभाति।

उत्पादयन् सहृदये रसज्ञानं निरन्तरम्।
अनुकर्तृस्थितो योऽर्थोऽभिनयः सोऽभिधीयते॥
विभावयति यस्माच्च नानार्थान् हि प्रयोगतः।
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः॥

इत्यभिनयलक्षण माकर ग्रन्था निरूपयन्त आङ्गिकवाचिकाहार्यादिचतुर्णामप्यभिनयानां वर्णनं विदधतोऽवाप्यन्ते। अभिनयदर्पणस्तु केवलमाङ्गिकाभिनयमधिकृत्य परमोयोगिनीं विवेचनां प्रस्तवीति। तत्रोक्तम्—

आस्येनालम्बयेद् गीतं हस्तेनार्थं प्रदर्शयेत्।
चक्षुर्भ्यां दर्शयेद् भावं पादाभ्यां तालमादिशेत्॥

करसञ्चालनेन साकं रसोन्मेषस्य क्रमिकसम्बन्धाधायकमिदं पद्यमभिनयस्य मौलिकत्वमुद्भावयति—

यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततो मनः।
यतो मनस्ततो भावो यतो भावस्ततो रसः॥

भारतीयाभिनयस्यैषा प्राचीनता प्राचीनभारतस्य कलानुरागितां विभावयन्ती संस्कृतरूपकस्य तां सुषमामुच्चैरुद्घोषयति यामद्यतनानि अभारतीयानि रूपकाणि अद्यापि नाधियातुमशकन्।

१. नाट्य शा० द्वि० सं० पृ० १४५. २. अध्यायः ३४१, श्लो० १.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतरूपकाणां पूर्णतागततायास्तु दीर्घः कालो व्यतीतः। न तदीयं किमप्यङ्गमपूर्णं न्यूनं वा कुरूपम्। तेषां सकाशे कान्ताः प्रेक्षागृहाः, रमणीयो रङ्गमञ्चो, ललितो वेशविन्यासो, भास्वराणि आभरणानि, सकलोऽपि परिच्छदः पेशलो व्यराजन्त। भरतस्य नाट्यशास्त्रं[1] तस्य सर्वविधसमृद्धिशालित्वं स्पष्टतयाभिव्यनक्ति।

संस्कृतरूपकाणि सार्वजनीन संस्कृतेः सन्देशहराणि सन्ति। तत्र धर्मकामयोः, धर्मार्थयोः, प्रणय-कर्तव्ययोः, स्वार्थ-परमार्थयोः समस्याः साधु समाधीयन्ते। धर्मार्थकामाः सममेवसेव्याः, योह्येकसक्तः, स जनोजघन्यः, इत्येषास्ति तेषां सद्धारणा।

अनासक्तिभाविता पुरुषार्थमयी सपर्या, समन्वयकारिणी च मनीषा भारतीय संस्कृतेर्मेरुदण्डः। संस्कृतकवयो रूपकेषु विश्वजनीनमध्वानं प्रतिष्ठापयन्तो विविध समविषमपरिस्थित्यरालगर्तंगतस्य मानवस्य मानस-गीतं चित्रयन्ति। कामस्य का शक्तिः? अर्थस्य किमुपादेयत्वम्? धर्मस्य सुहृत्त्वं किम्? इत्येतदादिकं समग्रं ते समीचीनतया समादधति।

मानव-मानसं कदापि धर्मः कदापि चार्थ आवर्जयति। कामस्तु प्रतिपदं तदनुधावति। मानवो धर्म-प्रेरितो भूत्वा किं किं न दुःखमसह्यं सहते। अर्थेन कामेन वा निपीड्यमानो भूत्वा कानि कानि न गर्हणीयानि कार्याणि कर्तुमात्मानं नियोजयति-इत्येतत् सकलं रूपकेषु प्रेक्ष्यते। ज्ञान-कर्म-भक्तीनां सामरस्ये सत्येव जगन्मङ्गलमुपैति इत्युपदिशत् संस्कृतरूपकं ज्ञापयति यत् स्वच्छन्दमुच्छ्रङ्खलं च प्रेम अन्ततोगत्वा भवत्यहितावहम्। कर्त्तव्य-रक्षया अधिकारः प्राणिति। धर्माविरुद्धः काम एव श्रेयस्करः।

संस्कृतरूपकेषु दाम्पत्यप्रणयस्य विशद मुदात्तमनवद्यञ्च सौन्दर्यं विलोक्यते। तत्रोच्यते—

"व्यतिषजति पदार्थानान्तरः कोऽपिहेतुः,
न खलु वहि रूपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं,
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥"

---

१. भरतनाट्यशास्त्रम्, अ० २.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिज्ञानशाकुन्तले श्रेयसः प्रेयसश्च संघर्षः कविना मधुरमाकलितः। शकुन्तलोपस्थितं श्रेयोऽवज्ञाय दवीयसि प्रेयसि प्रीयते। तदुदर्कं च सा सत्वरमश्नुते। जनाकीर्णायां सभायां भवति सा तिरस्कृता।

संस्कृतरूपकेषु आचरणस्य शुचितायाः श्रेष्ठतायाश्चोपरि सततं मुख्यतया ध्यानं दीयते। इदमेव एतावदेव च न, शब्दानां सौष्ठवे, अर्थानां गाम्भीर्ये, भाषायाः लालित्ये, वर्णनस्य वैशद्ये, वस्तुसमुपस्थापनसम्बन्धिचातुर्ये, भावानामभिव्यञ्जने च संस्कृत रूपकं विश्वस्य रूपकेषु नैजं विचित्रमनुपमञ्च श्रेष्ठत्वं विभर्ति नास्तीत्यत्र मनागपि संशयः। सर्वविधविशिष्टतावत्वादेव तस्य, तत् "काव्येषु नाटकं रम्यम्"; "त्रिवर्गसाधनं नाट्यम्" इत्यादि प्रशंसानामास्पदं सञ्जातम्। वस्तुतः साहित्याङ्गेषु रूपकं नाम अङ्गं मूर्धन्यमङ्गम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चतुर्थः परिच्छेदः

रूपकोद्भवः

रूपकोत्पत्तिमधिकृत्य प्राचीनतमं मतं नाट्यशास्त्रस्य प्रथमेऽध्याये[1] समुपलभ्यते। तत्रोक्तं यद् देवाभ्यर्थितो वेधाश्चतुर्भ्योऽपि वेदेभ्यः पाठ्यगीताभिनयादिविषयिणीं सामग्रीमादाय नाट्यवेदं नाम पञ्चमं वेदं ससर्ज। ततश्च स भरतं नाम मुनिं तदीयं च सुतशतकं तदभिनयनकर्मणि नियुयोज। तस्मिन् महीयसि महति कार्ये नारदादिगन्धर्वा विश्वकर्मप्रभृत्यनेकदिवौकसः स्वकीयं योगं प्रददुः। परं नाटकोद्भवसम्बन्धिन्यामस्यां कथायां नाधुनिकं जगत् श्रद्धत्ते। तस्य तु विश्वासोऽयं यदिदानीं नाटकस्य यद् विकसितं रूपमवलोक्यते तद्रूपासादनाय अवश्यमेव दीर्घः कालोऽपेक्ष्यते। यतो विस्तृत-सूक्ष्म-सुक्लिष्ट-सर्वाङ्गीणसिद्धान्तानां विवेचनं न स्वल्पसमय-साध्यम्। पूर्णतया विकासंगते साम्प्रतिके रूपके दृश्यमानानां नृत्यगीताभिनयसंवादाख्यतत्वानां केन प्रकारेण रूपके सन्निवेशो जातः? सा का प्रेरणा या नृत्यगीताद्युद्भावने हेतुत्वं जाता इत्येतद्विधानां प्रश्नानां समाधानस्य मूलेऽवश्यं तद् रहस्यं निगूढं वर्तते यस्योद्घाटने सति रूपकोत्पत्तिविषयकं ज्ञानं सुलभं भवितुमर्हति।

मानवो निसर्गतो विनोदप्रियः प्राणी वर्तते। सः सदा गम्भीरो भूत्वा नैव स्थातुं शक्नोति। कामपि प्रसन्नतां यदासावनुभवति तदा तस्या अभिव्यक्तयै स उत्सुको जायते। नर्तनेन, गीतेन, हसनेन च स नैजमाभ्यन्तरमानन्दं प्रकटीकरोति। एतेन सिद्ध्यतीदं यत् नृत्य-गीतादिकं तु तत्प्रकृत्यामेव वसति। न स तां-तां विशिष्टतां कुतोऽप्यन्यस्मात् परिगृह्णाति। सा तु तदर्थं प्रकृत्यैव वा परमेश्वरेणैव प्रदत्तास्ति। यथा नृत्यादौ तदीया प्रवृत्तिः स्वाभाविकी तथैव अनुकरणेऽपि तदीया प्रवृत्तिः प्राकृतिकी। एता एव सकला विशिष्टताः किं वा नैसर्गिक्यः प्रवृत्तयोऽवश्यमेव नाटकस्योत्पत्तौ हेतुत्वेन मता भवितुमर्हन्ति।

---

१. जग्राह पाठ्यम् ऋग्वेदात्—नाट्यशास्त्रम्, १. १७

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानवः परमेश्वरकृतायां सृष्ट्यामस्ति सर्वोत्तमो मर्त्यः। भगवता तस्मै सा शक्तिः प्रदत्तास्ति यया सः स्वकीयां जीवन-यात्रां सर्वथैव मङ्गलमयीं विधातु-मात्मानं च सर्वविधसुखैश्वर्यादिसमृद्धिमन्तं च कर्तुं प्रभवति। उत्थानार्थं यत् सः कामयते तदीया धी-कामधेनुस्तस्मै तत्-तत् सहर्षं प्रयच्छति। पुरुषार्थपरः पुरुषो, मन्ये, तत्कृपा-वशात् यथावसरं तस्मिन् मनोरथेऽपि सफलतामविन्दत् यं स आत्मानं प्रीणयितुमचीकमत। गीताभिनयनृत्यसंवादकलादिकलितनाट्य-विकासने सः सर्वकलाधिराजनटेश्वरेश्वरात्मनो नैसर्गिकप्रवृत्तित एव कृतकृत्यतां लेभे-इत्येतत् प्रतिभाति मे। नूनं भगवतो भरतस्य "वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना, एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना" इत्येतस्मिन् वचसि एष उपरि विचिन्तितो भावो निगूढार्थो भूत्वावतिष्ठते। अस्तु, नाटकस्य यद् वर्तमानं रूपं दृग्गतं भवति तत् केन प्रकाररेणोपनतमभूदित्यत्र भौतिकतापरा प्रज्ञा किं-किं वक्तीत्येतद्ज्ञातुं प्रयास इह क्रियते।

ऋग्वेदे एतादृशानि षोडशसूक्तानि प्राप्यन्ते यानि संवादात्मकानि सन्ति किञ्च सूक्तद्वयमेतद्विधमपि वर्तते यदस्ति वचोविच्छत्यात्मकम्।[1] विचारवतां विचारोऽयं यदिमानि सूक्तान्येव भारतीयरूपकस्याद्यरूपत्वेन विवभुः। तेषां सूक्तानां पाठो यज्ञावसरेऽभ्युपागम्यत-इति मैक्समूलर उत्प्रेक्षते। प्रो० सिलवाँ लेवी च मैक्कसमूलरस्य मतमेतत् परिपुष्णाति। स इदमपि मन्यते यत् तदानीं यज्ञेषु कदाचिदभिनयोऽपि नैजमादिमं रूपं दधानोऽवातिष्ठत[2]। श्री एदरः किञ्च हर्तेल एतदुत्प्रेक्षेते यद् ऋग्वेदस्थानि संवादात्मकानि सूक्तानि एव नाटकोपज्ञानि सन्ति। हर्तेलो वक्ति यत् सूक्तानि समवेतस्वरेण तदा अगीयन्त गच्छता कालेन स विधिर्नाट्यकलायाः स्वरूपमबिभ इति प्रतीयते। यूरोपीयेषु विद्वद्वरेषु प्रो० गौल्डनर आदरास्पदं विद्वान् सञ्जातः सोऽपि सम्वादसूक्तमुद्दिश्य ब्रूते यत् तेषु बहूनि गीतात्मकानि, अनेकानि सम्वादरूपाणि बहुलानि च वीरगीतिरूपाणि विद्यन्ते। प्रो० कीथो वैदिकसंवादसूक्तमुद्दिश्याचष्टे यत् तेषु सूक्तेषु तां विधां जुषमाणायाः कवितायाः स्वरूपमवाप्यते या विधा वैदिककालावसाने सति

१—दी हिस्ट्री एण्ड दी कल्चर आफ दी इण्डियन पीपुल, खं० २, परि० १६, पृ० २५७.

२—कीथः संस्कृत ड्रामा, पृ० १५-१६.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वयमपि अवासासीत् । मैकडानलो नृत्यं नाटकस्याद्यं रूपं मन्यमान आमनति—'नाटक'मित्येतत् पदं 'नट्' इत्येतस्माद् धातोर्निष्पद्यते । धातुश्चायं 'नृत्' धातोरेव प्राकृतं रूपं विद्यते । अग्रे च स आह—'प्रथमं नृत्यमाङ्गिकमासीत् ततश्च तत्र मूकानुकृतिः प्रविवेश ततो गीतानि तत्र समाविविशुः । इत्थं च कालान्तरेण तानि सकलानि तत्वानि नाटकीये रूपे पर्यवस्यन्ति स्म । परमिदमभिधानं कल्पनामात्रम् ।

वैदिकवाङ्मयस्य मान्या परम्परागता व्याख्या नोक्तमुदीरणं परिपोषयति । सामवेदस्य मन्त्राणां गेयतत्ववत्त्वात् श्री एदरप्रभृतिविपश्चितां कथनं न युक्तं प्रतीयते । ऋग्वेदस्य सूक्तानि भवन्तु नाम नाटकवीजभूतानि परं न तानि नाटकस्य मूलरूपत्वेन स्वीकर्तुं शक्यानि । नाटकस्य मैकडानल-कृता व्युत्पत्तिर्न युक्ता । संस्कृतव्याकरणे 'नट्', 'नृत्' इत्येतावुभावपि धातू पृथक्-पृथग् वर्तेते । नाट्यनृत्यनृत्तपदानि हि सन्ति भिन्नार्थकानि । नाट्यं वाक्यार्थाभिनयरसाश्रयम्; नृत्य भावाश्रयम्, नृत्तं च ताललयाश्रयं भवति[1] । एवं स्थिते कथं स्यादिदं मतं यन्नाटकं नृत्यस्याद्यं रूपम् । नाटकमित्येतत् पदं तु नट्' अवस्कन्दने इत्येतद्धातोर्निष्पद्यते वस्तुतो मेकडानलो भ्रमेण गृहीतः । वैदिकाः संवादाः नाटकीयाः संवादाः न, अपि तु ते कर्मकाण्डपराः सन्ति संवादाः' इति कीथस्य मतं न युक्तं यतस्तेषां संवादानां कर्मकाण्डे वा पौरोहित्यकर्मणि क्वापि न प्रयोगो जायते । प्रो० विण्डिशः, ओल्डनवर्गः, पिशेलश्च संवादसूक्तानि काव्यत्वविधां बिभ्रतीति वदन्ति । ते भणन्ति यत् तत्रत्यानि भावुकतोद्भावानि पद्यानि तु अवाशिष्यन्त परं तत्सम्बद्धानि गद्यानि विलुप्तान्यभूवन् । ते कदाचित् पद्यात्मकं सूक्तं काव्यस्य तत्वत्वेन गद्यात्मकं सूक्तं नाटकस्य तत्वत्वेन उदपश्यन् । परं सापि कल्पना न परम्परासम्वादिनी । एतन्मतपोषणाय निहितान्याख्यानकानि न यथायथमिह सङ्गच्छन्ते ।

भारतीय नाट्यकस्य जन्म पुत्तलिकानृत्याद् वभूवेत्येतन्मतं पिशेलस्य रिजवे निराचकार[2] । पिशेलस्यायमपि विचारो यच्छाया नाटकतो भारतीयं नाटक-

---

१—दशरूपके प्रथमप्रकाशः ।

२—ड्रामाज एण्ड ड्रामेटिक डान्सेज (रिजवे) पृ० १५९-१६१.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुद्बभूव । डॉ० कोनोऽपि[1] मतस्यैतस्य पक्षे दृग्गोचरीभवति । परं नैतन्मतं युक्तम् तस्याप्राचीनत्वान्महत्वरहिताच्च । तानि स्वप्नवासवदत्त-शाकुन्तलादि रूपकेभ्योऽर्वाग्वर्तीनि सन्ति । संस्कृतनाट्यलक्षणग्रन्थेषु छायानाटकस्योल्लेखो न प्राप्यते ।

छायानाटकेषु 'दूताङ्गदं' नाम नाटकं पुरातनतरम् । शाकुन्तलादिनाटकानां रचना ततश्चिरपूर्वं सञ्जाता । पुनः केन विधिना तद् रूपकाणां जनयितृत्वेनाभ्यवपत्तुमर्हति ? छायानाटमित्येतत्पदमपि बोधयति यत् तदस्ति नाटकस्य नाटकात्मकं लघुरूपम् ।

गुर्जरशास्तारमाह्निलवाडचालुक्यकुलजातंकुमारपालमभिनन्दयितुं द्विसप्तत्यधिकैकादशशततमेशवीयाभ्यर्णे त्रिचत्वारिंशदधिकद्वादशशततमेशवीयाब्दे च वसन्तोत्सवे देवपट्टनस्थशिवालयस्य पुनः समुद्धारावसरेऽभिनीतमभूदिदन्नाटकम् । इत्येतच्छ्रूयते ।

अन्यच्च, 'सलेक्ट स्पेसिमेन्स ऑफ दी थियेटर ऑफ दी हिन्दूज' इत्येतन्नामधेयस्य ग्रन्थस्य द्वितीये खण्डे श्री विल्सनश्छायानाटकं नाटकस्य रूपरेखात्वेनामंस्त । डॉ० लेवी महाभागश्च 'थियेट्रे इण्डियन' निबन्धे इमामेवमतिं ससङ्कोचं निबबन्ध । पिशेलोऽपि स्वयं 'गार्हिगिश गेले हर्टे आन ऑररेगेन' पुस्तके छायानाटकमर्द्धनाटकत्वेनाभ्युपागमत् । 'डस अल्टिन डिशेशाटेन्रा पापेलाभिधानैकलघुकायलेखे यत्र छायया नाटकं दर्श्यंते तच्छायानाटकमिति निर्दिष्टम् ।

वीराणां शुभस्मृतिं चिरस्थायिनीं कर्तुं रूपकाणि प्राणीयन्त-इत्येष डाक्टर रिजवे महाशयस्य विचारः । 'ड्रामाज एण्ड ड्रैमेटिक डान्सेज आफ नॉन यूरोपियनरेसेज' इत्येतन्नामके ग्रन्थे नाट्योत्पत्तिसम्बन्धीन् अन्यान् सर्वान् वादान् प्रत्याख्याय 'एशिया' महाद्वीपे रामकृष्णादिकानां लीलायाः अनुकार मवलोक्य भीमार्जुनप्रभृतीनाञ्च पुण्यचरित्रस्य गीतीर्निशम्य सः (रिजवे) आत्मानमिमं निश्चय मगमयद् यद् वीराणां सपर्यायै तान्यनुकरणानि गायनानि च वर्तमाननाटकानां स्वरूपमस्रजन् । परं नाट्यशास्त्रस्य नाटकानां चावलोकनेन तदीयं

१.—शेडोप्ले. डा. कोनो-डास इण्डीशे ड्रामा ४५-४६.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्कथनं सत्यं नैव सिद्धयति । अपरं च तन्मतं त्विदं योरोपीया विद्वांसोऽपि ग्राह्यं न मन्यन्ते । डॉ० कीथः प्रकृत्यां दृश्यमाणानां परिवर्तमानां पेशलानि रूपाणि मूर्तीकृत्य तेषां प्रदर्शनं जनसमक्षे कृतं स्यादित्येष उत्कटोऽभिलाषो[1] नाटकानि अजीजनदिति मन्यते । परं विचारं स्वकीयमिमं स्वयमेव प्रत्याचख्यौ ।

यवनीयनाटकानामुत्पत्तिः 'मेपोल' इत्येतन्नामकादुत्सवाज्जातेति केचन कोविदा मन्यन्ते । एष उत्सवो 'मे' मासे प्रथमेऽहनि खसेषु (योरपदेशे) समायोज्यते । नयपालेऽपि मेपोल मह इव इन्द्रध्वजोत्सवो मान्यते । तमेवेन्द्र-ध्वजोत्सवमालोक्य प्रतीच्या भारतीयनाटकानामुत्पत्तावुत्सवः कारणमिति च विचारं प्रकटीकृतवन्तः ।

प्रथमन्तु मेपोलेन्द्रध्वजोत्सवयोर्मध्ये न किमपि साम्यम् । उभयोरपि क्षणयोरुद्देश्ये, भावे, क्रियायां च विपर्यासः । पुनश्च नाट्यसाहित्यानुशीलनेने-दमेव सिद्धयति यन्मङ्गलमयेषु पर्वसु नाटकानामायोजनमनुष्ठितं[2] वभूव । एवं स्थिते उत्सवस्य नाटकहेतुत्वं कथमङ्गीकर्तुं शक्यं स्यात् ।

भारतीयं रूपकं यूनानीय नाट्यस्यानुकरणमिति वेबरमहानुभावस्य विचारः । स भारतीयेषु नाटकेषु यवनी-यवनिकादिपदान्यवलोक्य 'यूनानीय-जनानां सन्निकर्षे भारतीया यदा आजग्मुस्तदा तेभ्यस्ते नाट्यकलामग्रहिषु-रिति स्वमतं चक्रे। वेबरस्येदं मतं विण्डिशविज्ञोऽप्यपोषयत् । श्री सिल्वन-लेवी, डॉ० कीथश्च 'बाह्यप्रभावमन्तरेण भारतीयनाटकानामीदृशो विकासो न सम्भव इति विचार्य वेबरोदीरणमंशत उपपादयाञ्चक्रतुः श्री ई० व्रान्देने चोपरिष्टादुक्तं मतं सत्यमवगम्य भारतस्य प्रत्ननाटकानां मिलिन्द (मिनेण्डर) समयगामिनां यूनानीय प्रहसनानां चान्तराले साम्यं प्रादीदृशत् । परमिहेदं न विस्मरणीयं यद् यूनानीयरङ्गमञ्चेषु न यवनिका प्रयोगः प्राप्यते । तत्र

१—थियोरी ऑफ वेजीटेशन स्प्रिट, कीथ-संस्कृत-ड्रामा ४५—४८ ।

२—(क) "......अयं ध्वजमहः श्रीमान् महेन्द्रस्य प्रवर्तते......" भरत नाट्यशास्त्रम्, १।५४—५५ ।

(ख) "द्रष्टव्ये नाट्यनृत्ये च पर्वकाले विशेषतः"—नन्दिकेश्वरोऽभिनय-दर्पणे ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तच्चर्चापि न। संस्कृतरूपकेषु 'यवनीति' पदं प्रेक्ष्य संस्कृतरूपकाणामुपरि यवनदेशस्य नाटकानां प्रभाव इत्येष भ्रमोजातः। भारतभूभुजामवरोधेषु यवनीकिशोरिकाः किंकरीत्वेन न्ययुज्यन्त। अतोऽभिज्ञानशाकुन्तलादौ यवनीति पदं प्रयुक्तमवाप्यते। भारतीयानि रूपकाणि यूनानीय रूपकेभ्यो वस्तुतो भिन्नानि सन्ति। तेषामुभयेषामन्तराले विपर्यस्तता विद्यते। यूनानीयानि नाटकानि दुःखान्तानि भवन्ति परं भारतीयानि न। यूनानीयेषु ग्राम्यगीतानि भान्ति परं भारतीयेषु न तानि गोचराणि जायन्ते। यूनानीयेषु समवेतगीतेः प्राधान्यमभिनेतॄणां च क्रमश उत्तरोत्तरोपचितिः संलक्ष्यते परं नात्र तद्विधता मनागपि। यूनानीयानि नाटकानि अन्वितित्रयीं भजन्ते इहत्यानि तु रूपकाणि ततोऽतिदूरे सन्तिष्ठन्ते। यूनानीयेषु करुण-भयानक-हास्यरसा एव लभ्यन्ते परं भारतीयेषु त एव न अन्ये च रसा राजन्ते। भारतीयरङ्गमञ्चोऽपि यूनानीयाद्-रङ्गमञ्चाद्भवति भिन्नः। न यूनानीया रङ्गमञ्चास्त्र्यस्रचतुरस्र-विकृष्टभेदभाजः। परं भारतीयास्तु तत्तद्भेदजुषो भवन्ति।[१] इत्थं भारतीयानि रूपकाणि यूनानीयेभ्यो नाटकेभ्यः पृथगेव वीक्ष्यन्ते। पुनः कथमिदं वक्तुं सुशकं यत् तत्र यूनानीय-रूपक-प्रभावः।

संस्कृतरूपकोद्भवमधिकृत्य प्रो० आर० टी० जागीरदारस्य विचारः सर्वेभ्योऽपि विचारेभ्यो भिन्न एव। 'दी ड्रामा इन दी संस्कृत लिट्रेचर' इत्येतस्मिन् ग्रन्थे पञ्चमे परिच्छेदे सः संस्कृतनाटकानामुत्पत्तेर्हेतुर्धर्मभावनास्तीत्येतन्मतं कीथविदुषो निरस्यन् वक्ति—

"संस्कृतनाटकानां जनुः प्रति कारणं वेदविरोधिनी प्रवृत्ति र्वेद्या। भरतो वैदिकसाहित्योद्गीतां भूताभिधानामार्यशाखास्वन्यतमामालम्बते स्म। सैव शाखा नाट्यकलां विततान। वैदिककर्मकाण्डकोविदाः पुरोहिता नाट्यकलायां जुगुप्सामभिव्यक्तीकृतवन्तः। पुरोधसां बलीयसो विरोधस्येदं दुष्फलं बभूव यन्नाट्यकलानुरागिणी जातिः शूद्रत्वमनीयत। तथ्यमेतद् भवति नाट्यशास्त्रा-(३४, ३६) देवोन्मीलितम्। कृतनाट्यानुरागाभूत-भरत-जातिः सप्तसिन्धु-प्रदेशं हित्वा दक्षिणप्रदेशमियाय। तत्र च कश्चिदनार्यो नरेन्द्रस्तयाऽऽश्रीयत। स च भूत (भरत) जाति-परित्राता नृप आसीन् नहुषः"।

१—नाट्यशास्त्रम्, द्वितीयाध्याये श्लो० २५।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाट्यशास्त्रस्य पञ्चमवेदत्वेनाङ्गीकरणं देवेन्द्रादीनां नाटकार्थं ब्रह्मण: प्रार्थनञ्च न कथमपि पुरोधसां नाट्यकलायां जुगुप्सां प्रमाणीकरोति । आश्चर्यं महत् पुनः कथं श्री जागीरदारस्तथाविधां धियं तत्र निबद्धमुद्यतोऽभवत् । नाट्य-शास्त्रस्य चेद् गाम्भीर्येण निष्पक्षभावेन चाध्यमनमनुशीलनं च कृतं भवेत् तदा स्पष्टतया तस्य सार्वजनीनत्वं सार्ववर्णिकत्व सिद्धयति । न तत्र वर्तते एकापि पंक्तिरेतादृशी यस्याः सकाशादार्यजातिम्प्रति विद्वेषभाग् भावना लब्धा स्यात् । या जातिः कस्यामपि जात्यां द्वेष्टि सावश्यमेव स्वीयान् द्वेषपूर्णान् भावान् स्व-साहित्ये प्रच्छन्नतयाऽप्रच्छन्नतया वा अभिव्यनक्ति । हन्त, यन्नाट्यशास्त्रं पूर्णतया विश्वजनीनं किञ्च यत् सर्वथा भेदभावविहीनं भवत सर्वेषामभ्युदय एव स्वजनुषः साफल्यं मनुते यच्च चतुर्वेदसम्भूतं तदेवाधिकृत्य 'वेदविरोधीति निगदनं कियद्. युक्तं वा अयुक्तम् !

'सूत्रधार' इत्येतत् पदमादाय श्री जागीरदारो ब्रूते—"सूत्रधार एव संस्कृत-नाटकानां जन्मदाता । पुत्तलिकां सूत्रेण यो नर्तयति स एव न सूत्रधारः । तदी-यानि बहूनि कर्माणि आसन् । स्थण्डिल-वेदिकादिमापनं, शिल्पकार्यं, वंशावली-गौरव-गाथोद्गिरणं, लोक-कथाकीर्तनं, सङ्गीतकार्यानुष्ठानं, पुराणादि-पठन-पाठनम्-इत्येतदादीनि तदीयानि पुष्कलानि कार्याण्यभूवन् । स न केवलं 'सूत्रधार' इत्येतां संज्ञामभजदपितु सः 'सूत' इत्येतेन नाम्ना व्यश्रूयत । 'स्थपति' रित्येष च तस्य व्यपदेशो बभूव । मन्ये, नाटकीया प्रस्तावनात एव 'स्थापना' इति च कथ्यते" ।

प्रो० पिशेलोऽपि 'सूत्रधार' इत्येतस्मिन् पदे विचारमिममभिव्यानग् यत् पुत्तलिकानर्तनकारी सूत्रद्वारेण पुत्तलिकां नर्तयत्यतोऽसौ 'सूत्रधार' इत्युच्यते । स एव नाटक-सञ्चालनकार्यकारित्वाच्च 'सूत्रधार' इत्यभ्यधीयत ।

वस्तुतः, सः वस्तु, नेतारं, रसं च सूत्रयति तस्माद्धेतोः नाट्शास्त्रे 'सूत्रधार' इति न्यगद्यत । शारदातनयो भावप्रकाशे प्राह—

"सूत्रयन् काव्यनिक्षिप्तवस्तुनेतृकथारसान् ।
नान्दीश्लोकेन नान्द्यन्ते सूत्रधार इति स्मृतः ।।"

प्रो० जागीरदारस्य मतमेतदपि यत् नाट्यकलाया जनको महाकाव्यो-त्तरकालवर्ती सूत एव । परं रामायण—महाभारत—बौद्धग्रन्थ—जैनग्रन्थादिषु

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाट्यकलाया उल्लेखः स्फुटतया प्राप्यते पुनः कथं कथनमिदं विश्वासार्हं स्याद् यज्जागीरदारः प्रकटीकृतवान् । नृतत्वविदः सङ्गीत—काव्य—नाटकानामाद्य-बीजान्यादिमजातीनां कर्मकाण्डपद्धतिषु अमार्गयन् । ताः पद्धतयस्तैः 'टोटेम' इत्येतेन पदेन व्यपदिश्यन्ते । अफ्रीका—पालेनेशिया—न्यूजीलैण्डादिदेशानां प्राक्तनजातयः समये-समये नृत्याभिनयपूर्वकं मिलित्वा गायन्त्योऽद्यापि दृश्यन्ते अपि किमिदं न सत्यं भवितुमर्हति यद् यदा सभ्यसमाजो गीतं नृत्यम् अभिनय-जातं च कलाकलितं विधाय परिश्चकार तदा तदेव गीतादिकं शास्त्रीयायां भाषायां काव्यं वा रूपकमित्येतां महनीयां संज्ञा प्रत्यपद्यत ।

वेदोपनिषद्ब्राह्मणादिषु शोभमानाः संवादाः आख्यानकानि च पुरातनकाल-गामिभारतीयानां प्राप्तनाट्यतत्वसंस्तवत्वं ज्ञापयन्ति । अनुमीयते, यत् तत्-तत्स्थितेभ्यो नाट्यतत्वेभ्योऽस्मत्पूर्वजा नाट्यकलाविषयिणीं धियमासादितवन्तः ।

तदेवं नाटकस्य विकासविषये बहवो विभिन्नाश्च विचाराः श्रूयन्ते । वस्तु-तस्तु विकास-सिद्धान्ता भारतीयानां सन्ति नैजाः, अभारतीयानां च नैजाः । उभयत्रापि महद्वैषम्यं वर्तते ।

सृष्टेरादौ मानवस्य नैसर्गिक्यः शक्तयो नूनं नासन् पूर्णतया विकसिताः । ताः अवश्यमेव स्वविकासाय समयमपेक्षाञ्चक्रिरे । शनैः-शनैरेव कालान्तरेण मानवः स्वस्यां भाषायामिमां सर्वविधभावोद्भावन-क्षमतां, नृत्ये, एतां दृश्यमानां कलानदीष्णतां, गीतिषु ईदृशीमाश्चर्यावहां निष्णाततां चासादयितुं शशाक या साम्प्रतिके युगे वीक्ष्यते । परं नात्र मनागपि संशीतिर्यत् सुखेषु क्षणेषु समागतेषु मानव आदावविकसितानुन्मीलिततत्तच्छक्तिकः सन्नपि स्वीयां मानसिकीं प्रीति-मवश्यमेव प्रकाशयितुमौत्सुक्यं प्रकटीकृतवान् । अतः सः आनन्दातिरेकाद् रोमाञ्चितो मुदितमनाश्च भूत्वा यामप्यविकचितां भाषां, यदपि प्रकृतिसुलभं नृत्यं, यदप्यसंस्कृतं गीतं तदानीमुपयुयोज सैवाविकासं प्रपन्ना भाषा, तदेव निसर्गतः प्राप्तं नृत्यं, तदेव स्वर-तालादिविहीनं गीतं नाट्यकलायारुद्भवस्याद्यं रूपमभूदिति चेदुक्तं भवेत् तदा कदाचिन्नानुचितं स्यात् ! तदीयाः अविकसिता-स्तास्ताः शक्तयः स्वविकासस्य तदा द्वितीयं धरातलं, मन्ये प्राप्तवत्यो यदा सुरानाराधयितुं, नवसस्योत्पत्तिं सम्भावयितुं, पुत्रावाप्तिकामनापूर्तिप्रभृतिमङ्ग-ल्यमनेहसमभिनन्दयितुं नटनार्यौ मिथः संयुताः सत्यः सोल्लासं नृत्ये,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गीते, संवादे च कयापि बलवत्याभ्यन्तरिक्या शक्त्या प्रेरिता भूत्वा प्रावर्तन्त। नारीषु प्रकृतिर्नृत्यादिगुणान् प्रकृष्टतया स्रजन्ती वीक्षिता भवत्यतः प्रतीयते यल्लोकः प्रथमं नार्यामेव विकसितायां वाविकसितायामवस्थायां तांस्तान् नृत्यादि गुणान् द्रष्टुं शशाक।

तृतीयं धरातलं तु तद्ज्ञायते यत्र कथावस्त्वपि किमपि सन्निविष्टमभूत्। नाटकोद्भूतेः क्रमः कदाचिदीदृगेव भूत्वा पल्लवितः सञ्जातः। अतीतकाले संवृत्तायाः कस्याश्चन असाधारण्या हृन्मर्म्मस्पर्शिन्याः घटनायाः पुण्यां स्मृतिमायुष्मतीं विधातुं यदनुकारात्मकमुपादानमुपाददुः कलाप्रियाः धीमन्तस्तदेव नाटकमजीजनदिति चानुमिमते मतिमन्तः केचन।

अनुकारप्रियता तु प्राणिषु निसर्गत एव निषीदति। इयमेव प्रकृतिस्था प्रवृत्तिः प्रथमं तिर्यञ्चां विरावादिकमनुचकार। ततश्च सैव प्रवृत्तिरुपहासार्हं मानवमुपहसितुं च प्रावर्तत। तदनु कियत्कालानन्तरं मानवः स्वकीयमिममनुकरण प्रियं स्वभावमेवंविधेष्वपि क्षेत्रेषूपायुङ्क्त येषां सकाशादात्मोत्थानं, शिक्षायाश्चाधिगमनमपि भवितुमर्हति। सोऽनुकरणीयचरितानां मानवनां चरितमनुकर्तुं यानि कान्यपि साधनान्यशिश्रियत तेष्वन्यतमं साधनमिदमपि स उपाददात् यदसौ अनुकार्यस्य रूपमिव नैजमपि रूपमजघटत्। अनुकार्यो यादृशानि वसनान्यवस्त सोऽपि तादृशानि वस्तेस्म। एतावदेव न, स तदीयं समग्रमपि कथित-चलित-हसितादिक्रियाकलापं तथैव प्रदर्शयितुमीहाञ्चक्रे यथा स तत्र ददर्श। एषैव रणरणनप्रवृत्तिर्नाटकमसूत। सैव (प्रवृत्तिः) तथाचेष्टत यथा तत् (नाटकम्) सम्यग् विकसितं पल्लवितं च स्यादित्येतच्च कतिपये प्रेक्षावन्त उत्प्रेक्षन्ते।

आदौ स्वर-रूप-वेषादेरनुकृतिस्ततस्तत्र घटनाविशेषस्यान्तर्भावः कृतोऽभवत्। ततश्च कस्यचन महापुरुषस्य जीवनलीलान्तर्भाविताभूत्, तदनन्तरं भावानां चेष्टानां च तत्र सन्निवेशः समादृतो बभूव—इत्येतद्विध एव दीर्घदीर्घतरकालसञ्चितः सम्भारः, सुयोगं शुभावसरं चाधिगम्य रूपकावतारणस्य प्रभविष्णुतामभजदित्येतदप्युह्यते।

यथा-यथा रूपकं समुन्नतामवस्थामरुरोह, तथा-तथा तत्र सा-सा कलापि प्रायुज्यत, यया-यया जनसाधारणोपि तत्रानुरज्येत्। इमां धियमुपाददपि तत्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरा रङ्गशालां नाजुषत । देवनिकेतनेषु चत्वरेषु विस्तृतेषु जनसञ्चारक्षेत्रेषु तदर्थमस्थायि-नाट्यवेश्म अस्थाप्यत । समयान्तरेण यदा तस्य कृते स्थायिनाट्य-गृहमपि विनिर्मितमजायत तदा तत्र सरसाः संवादाः हृदयहारिणीकथनप्रणाली, मनोनन्दिनी-तत्तद्भावाभिव्यञ्जना, मञ्जुलमुद्रा, मधुरा नृत्यवाद-गायनादिक-लास्तत्तत्स्थिति-समय-प्रतिष्ठापकानि नयनाभिरामाणि चारूणि अभिमतभाव-नाभिमतानि दृश्याणि च गम्भीरतरया सुषमया सह सुजन-रसिकनिवहं सेवितुं प्राक्रमन्त-इति च तर्क्यते प्रधीभिः ।

नाट्यविषयिकायाः अभिरुचेर्निर्माणे यानि तत्वानि साहाय्यं चक्रुस्तानीमा-न्युह्यन्ते—

१—मानवस्यान्तःकरणमधिवसन्ती नैसर्गिक्यनुकरणनिष्ठा ।

२—संवृत्तानां चारित्राधायिकानां मनस्तोषिणीनां घटनानां प्रत्यक्षतया दिद्रक्षा ।

३—महापुरुषचरित्रानुकारे स्पृहा ।

४—चेतसो विभिन्नक्रीडनकेषु रुचिः ।

५—धार्मिकोत्सव-पर्व-प्रभृतीना नियोजने संवर्द्धमाना श्रद्धा ।

६—कलानां समुत्थापनाय परिपोषणाय प्रचारणाय च भावुकहृदये सन्नि-हिता प्रणयिता ।

७—राज-रञ्जनेन द्रव्यार्जनकामना ।

८—साहित्यसेवायामनुरागः ।

९—स्वस्वराष्ट्रस्य कलानां प्रदर्शनोत्कलिका ।

१०—मानसस्य हास्ये विनोदे च स्पृहा ।

११—जनविशिष्टेन विधीयमानान् अन्यायात्याचार दुराचारांश्चाभिव्यङ्क्तुं साहसं, निर्भीकिता चातुर्य्यञ्चापेक्ष्यन्ते । पुमानभिलषते कमप्येतादृशं निरापद्मुपायं येन स निन्दनीयं कर्म सर्वविदितं विदध्यादित्ये-षोत्कन्ठा ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१२—विविधजनपद-प्रदेश-देशाणां सभ्यतां, भाषां, वेषं, व्यवहारान्, पद्धतीः, स्थानानि, दृश्याणि, आचारान्, विचारांश्च वेत्तुं, वीक्षितुं ग्रहीतुं च वलीयानभिलाषः ।

भारतीयानां नाट्यानुरागितायाः इतिहासः परमपुरातनः। 'हिन्दू-सुपरियरिटी, दी लैण्ड ऑफ दी वेदाज' प्रभृति ग्रन्थाश्चात्र साक्षिणः। परमस्माकं पुरस्तु परमप्रमाणभूतं भरतस्य नाट्यशास्त्रं, मेव स्वयं राजते। विदुषामाभिधान मिदं यद् नाट्यशास्त्रं खैस्ताब्दस्य यदारम्भोऽपि नासीत् तदैव तद् विरचितं वभूव। चेदस्मिन् विषये डॉ० कीथस्य[1] विचारो गृह्येत तदापि तत् १७०० वर्षदेशीयं सिद्धयति। नाट्यशास्त्रस्याध्यनेन च स्पष्टमिदं प्रमाणितं जायते, यत् तज्जन्मतः प्रागेव भारते नाटकानां प्रचार आसीत्। आग्नेयपुराणे नाट्यस्योल्लेखोऽवाप्यते। प्राचीनभारतस्य संस्कृतिसभ्यतयोर्मार्गणे धृतोत्साहानां विचक्षणानां व्याहरणमिदं यत् पुराणेभ्योऽपि पुरातनतरं शास्त्रमिदम्। जातस्य तस्य प्रायेण ३५०० समाः समतीताः कालिदासो विक्रमोर्वशीये रूपके (२, १८) भरतं स्मरतिस्म। मत्स्यपुराणे (२४, २७-३२) भरतस्य चर्चा समुपलभ्यते।

एतत् सर्वं विज्ञापयति यदवश्यमेवास्माकं पुरातनतरे भारते[2] नाट्यकला पूर्णतया प्रेङ्खमानैधमाना चासीत्। अतीत-भारतस्य पुरातनसामग्र्याः अनवाप्तिवशात् कामं भरतस्य भरतकृतनाट्यशास्त्रस्य वा भरतात् प्राग्वर्तिनामाचार्याणां च तिथिः समयो वा न निर्णीतः स्यात। अत्रत्या जना राजानश्च प्राचीनतरे युगे नाट्यद्वारेण नैजं मनो भृशमनन्दयन्[3]। प्रेक्षागृहाः राजभिरिहत्यैः स्वीय एव प्रासादेऽकारयन्त। प्रेक्षागृहसम्बन्धिनी ईहा नूनमस्माकमग्रे जैनसाहित्यस्य राजप्रश्नीयागमग्रन्थगतं तत्प्रकरणमुपस्थापयति यत्र महावीरस्य जीवनचरितं नृत्यप्रधाने नाट्येऽवतारितं वर्तते। एतस्मिन् नाट्ये रङ्गमञ्चस्य प्राक्तनीं पद्धतिं गृह्यनृत्यस्य चानेकभिन्नभिन्नानि रूपाणि प्रदर्शितानि सन्ति। जैनधर्मस्या-

---

१—कीथः—संस्कृतड्रामा, पृ०१३. विण्टरनित्ज—ए हिस्ट्री ऑफ इण्डियन-लिट्रेचर, खं १ पृ० ५१८-५२७.

२—एलार्डाइस निकलः वर्ल्ड ड्रामा, पृ०६२९.

३—मालविकाग्निमित्रम्, प्रथमोऽङ्कः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तिपुराणत्वात् तद्धर्मस्य ग्रन्थानां प्राचीनत्वं सिद्ध्यति किञ्च तदीयप्राचीनग्रन्थेषु[1] नाट्यचर्चाया दर्शनान्नाटकस्य प्राक्तनतरत्वमनायासेनैव स्पष्टतया निष्पद्यतेऽथ च नाट्यसाहित्यस्य समुत्कर्षशालितायाः नाट्याभिरुचेश्च चञ्चत्स्वरूपं सम्यगेवालिखितं भवदुपतिष्ठते । एतस्य विषयस्यात्यन्तप्राचीनतानेकैः प्रमाणैरधिगम्यते । रामायण - महाभारत- हरिवंशपर्वाष्टाध्यायी[2]- -महाभाष्य[3]–कामसूत्रा[4]–दिग्रन्था भारतस्य नाट्यप्रियतां परमप्रसन्नतयोद्घोषयन्तः श्रूयन्ते । रामायणाख्यो ग्रन्थो हि खैस्ताब्दोदयात् प्राग्वर्तिनि सप्तमाष्टमशतकाभ्यर्णे प्रणीतो बभूवेत्यतत् प्रतीच्य प्रधी-याकोवी-मतम् । चेत् तदभिमतमतं मत्वैव रामायणकाल उररीक्रियेत तदापि भारतस्य नाट्यकलाया विकासो देशान्तरनाट्यकलायाः समुद्भवात् प्रागेव सञ्जात इति निश्चीयते ।

"एतेन नटनर्तक-गायक-वादक-वाग्जीवन-कुशीलव-प्लवक-सौभिक-चारणानां स्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः" इत्येतस्मात् कौटिल्यकृतार्थशास्त्रोद्धरणाच्चावबुध्यते यत् तदीयः कालो (अर्थशास्त्रकालः) नाट्यकलायाः कमनीयया कान्त्यावृतो भवन् विललास । ललितविस्तरावदानजातकसद्धर्मपुण्डरीकमहावंशादिग्रन्थेषु च नाट्यविद्यायाश्चर्चा चकास्ति ।

समालोचितसंस्कृतरूपकेषु प्रतीच्य—समालोचकपण्डितेषु श्री डा० ए० बी० कीथो विशेषतो विश्रुतः । 'संस्कृतड्रामा' इत्येतत्संज्ञकस्तदीयो ग्रन्थ इदानीं प्रामाणिकेषु ग्रन्थेषु गण्यते । सः "संस्कृतरूपकाणां विकासः परकीयमवलम्बनं वा साहाय्यं परिगृह्य न संवृत्तो न च तत्र कस्यापि राष्ट्रान्तरस्य नाट्यपद्धतीनां परिग्रह" इति मन्यमानोऽपि 'भारतीयेषु रूपकेषु यूनानीयनाट्यकलायाः प्रभावो वर्तते' इत्येतन्मन्यते । सः भारतीयसंस्कृतनाटकस्य मौलिकतां तदीयां नैजविशिष्टतामंगीकुर्वाणोऽपि यूनानीयं नाटकं भारतीयान्नाटकाद्गरीय इति व्याहरति । भारतीयानि रूपकाणि लक्ष्यीकृत्य तदीयविचाराणां सारोऽयम्—

१—अष्टाध्यायी ४. ३. ११०; ४. ३. १११.

२—मेकडानल : ए हिस्ट्री आफ सं० लि०;

३—कामसूत्रम्, १. ४. २८. ३१.

४—दी कैम्ब्रिज हिस्ट्री आफ इण्डिया, भाग १, अ. ६.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"भारतीयानि रूपकाणि यूरोपीयानि रूपकाणीव न जनसाधारणस्य कृते विनिर्मितान्यभूवन् । तेषां प्रणयनं वर्गविशेषस्यैव सेवायै सञ्जातम् । ब्राह्मणा भवन्त्यादर्शवादिनो न ते चरित्रस्य याथार्थ्यं तत्वतः प्रदर्शयितुं पारयन्ति । ते मानवप्रकृतेः श्रेष्ठपक्षमेव अंकन्ते न च निकृष्टम् । संस्कृतरूपकेषु नेदृशमेकमपि रूपकं, यत्र मानवस्य आख्यानकं गृहीतं स्यात् । तत्रत्यानि पात्राणि परमोच्च-कुलजातानि सन्ति । तत्र ब्राह्मणानामेवोत्कर्षो विजृम्भमाण आस्ते । ब्राह्मणानां सिद्धान्तोऽयं यत् प्रतिपुमान् कृतपूर्वकर्म-निघ्नतया जनुर्गृहणाति सुखं दुःखञ्चोपभुनक्ति । एतस्मादेव हेतोर्भारतीयेषु रूपकेषु तासां शक्तीनामङ्कनं न दृकपथेऽवतरति याः स्वैरं यदृच्छया च स्वकीयं तेज उपादाय चकासति ।[1] यूनानीयेषु रूपकेषु नैवंविधा दुरवस्था संलक्ष्यते । तत्र मानवस्य सत्यं यथार्थं च चित्रं चित्रितमवाप्यते । तत्रानेकसद्गुणसम्पन्न-ऐश्वर्यवान् उच्चान्ववायसम्भवो महाभागोऽपि दुर्दमनीयेन चक्रेणाक्रम्यमाणो विफलताभिर्दह्यमानोऽरातिना व्यापाद्यमानः क्लेशैः क्लिश्यमाणः संघर्षैर्दूयमानः कुपथं नीयमानो भूयोभूयो दृश्यते । परं संस्कृतरूपकेषु न महामानवो विपदर्णवे निपतितोऽवलोक्यते । अस्वाभाविकतायां संस्कृतरूपकाणि भृशं स्निह्यन्ति । पात्राणां चरित्र-चित्रणं तु तत्र तेनैव वर्त्मना कृतं वर्तते, येन नाटककारस्याभिमतो रसो न बाध्येत । दशग्रीवः सर्वेष्वपि रूपकेषु दम्भीवावलेपकारीवाकलितः । नासौ कथमपि श्लाघनीयचरित्रस्य रामस्य पुर आत्मान मुपस्थापयितुं प्रभवति । संघर्षस्य तथ्यानुभूतिं कारयितुं न संस्कृतनाटककाराः प्रभविष्णवो विलोक्यन्ते । आदर्श-वादिप्रकृतिमत्वाद् रससृष्टिदृष्टिमत्वाच्च तेषां रूपकाणि उपरिनिर्दिष्टाभिरप्रिय-ताभिः शरव्यीकृतानि सन्ति । वस्तुतः संस्कृतरूपकाणि श्रव्य-काव्यविधाया-मुपपादितानि सन्ति । रूढि-पालनं तत्र सर्वत्र प्राप्यते । वात्स्यायनस्य कामसूत्रे राजशेखरस्य च काव्यमीमांसायां सुख-सम्पद्भुजां महीभुजां यो निवहः समुल्लेखितो वीक्ष्यते संस्कृतरूपककारस्तस्यैव कौटुम्बिको जनः । न संस्कृतरूपकप्रणेता भुवं गायति स तु स्वर्गमेवोपश्लोकयति । तदीयो हृदय-विहगो न कदापि वसुन्धरां स्पृशति सः शश्वद् विहायस्येवोत्पतन्नवलोक्यते ।"

१—संस्कृत ड्रामा, पृ० २७ कीथः,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतरूपकेषु श्री कीथो यद्व्यङ्ग्यरजोव्यकिरत् तत्रैकतस्तदीयं वैदग्ध्यसौरभमपरतश्च तद् द्रष्टेरेकदेशगामित्वावकरोऽपि व्याप्तोऽवाप्यते। संस्कृतरूपकमात्मन्यन्यदुर्लभा याः विशिष्टताः विचित्रताश्च अभिव्याप्नोति न तासु श्री कीथः कृती स्वां दृशं स्नपयितुं प्रायस्यत्। संस्कृतरूपकेषु यूनानीय-नाटकगतान् गुणाननवाप्य न तेन कुत्सा-कर्दमस्य क्षेपः कर्तव्यः। प्राच्य-प्रतीच्ययोर्नाटकयोरन्तराले विद्यमानाः भिन्नतास्तद्देश-संस्कृति-सभ्यता-सम्भूताः सन्ति। यत् सौन्दर्यं भारतीयाय रोचते न तदभारतीयाय। यां भावनामेके आद्रियन्ते तामेव भावनामितरेऽत्यर्थं जुगुप्सन्ते। यन्माधुर्यं तत्वदर्शिनं प्रीणाति तदेव जगद्विषयासक्तमुद्वेजयति। एतत् तथ्यं विदन्नपि विद्वान् कीथ संस्कृत रूपकाण्याक्षिपदिति विस्माययति विपश्चितां वृन्दम्। कीथ महाभागस्य या दृष्टिर्गुणानपि दोषानिव प्रेक्षाञ्चक्रे सा यूनानीयरूपकाधिष्ठितदोषानपि कथं न प्रेक्षितुमशकत्? क्षुद्रस्वार्थ-जनितान् दुर्व्यवहारान् विद्वेष-मात्सर्य-कामुकतादि दुर्गुणोत्पादितान् दुराचारान् दारुणहिंसात्मककुकृत्यसमुद्भावितान् करुणारावांस्तेषु-तेषु पाश्चात्येषु रूपकेषु निशम्य कस्मान्न सोऽशोचीदिति न ज्ञायते। ते दोषास्तु तदीयैर्बन्धुभिरपि अतितरामनिन्द्यन्त। तन्नाटकानां तच्छ्रेयः परिपन्थी पन्थास्तु सर्वैरपि अनिन्दि। दोष-दर्शनात्तु निष्पक्षभावेनोभयोरपि गुणानां वीक्षणं वरम्। चेद् दोष-गुणयो-र्द्वयोरपि प्रदर्शने रुचि र्जागर्ति तदपि समुचितं परं गुणाः गुणाः एव, दोषा दोषा एव विभावनीयाः।

अस्तु तावत्। 'सर्वोपदेशजननं नाट्यमेतद् भविष्यति' इत्येतां भरतनाट्य-शास्त्रकृता प्रतिज्ञा सर्वथैव रक्षिता स्यादित्येतदुद्देश्यं पुरो निधाय संस्कृतरूपककारो नैजं रूपकं रचयति। पुनः कथमिदं सम्भवं यत् संस्कृतरूपकं वर्गविशेषार्थं प्रणीतं भवति। अभिज्ञानशाकुन्तलमुद्राराक्षसादिरूपकाणि यत् सत्यमुपस्था-पयन्ति किंतत् सत्यं नास्ति सार्वजनीनम्? संस्कृतरूपकेषु सन्त्युभयाभिसारिका-धूर्तविटसम्वाद—भगवदज्जु—वीणावासवदत्तादिकानि एतादृशान्यनेकानि विनोदकारीणि रूपकाणि च यैः नितान्तसाधारणा अपि जनाः सुगमतया स्वमनः प्रियां सामग्रीमपि आसादयितुं शक्नुवन्ति। एकतश्चेद् रूपककाराः कतिपयेषु रूपकेषु उच्चोच्चतरान्ववायसम्भूतमानवानां चरित्राणि निधाय तत्र

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गम्भीरं वातावरणं स्रजन्ति तु तदभिन्नेषु रूपकेषु ते सामान्यकुलोत्पन्नानामपि चरित्राणि वृत्तानि च समुपस्थापयन्त स्तथा यतन्ते येन वातावरणं विनोदात्मकं स्वान्त—प्रमोदास्पदं स्यात् ।

आदर्शपथाधिगमनायैव प्रतिजनो जगति विद्यामधीते, काव्यानि पठति, नाटकानि पश्यति, कथाश्च शृणोति । यदि एतेषां साधनानां सकाशादपि मानवः सन्मार्गं, श्रेयः प्रेयस्करमादर्शं न लभते तदा तत्प्राप्तिः कुतस्तेन क्रियेत् ? चेत् तेभ्योऽपि तत्प्रयोजनं न सम्पन्नतां गतं स्यात् तदा तु तेषां सद्भावो मुधैव ।

हन्त, संस्कृतनाटकानां सुखान्तत्वमपि पश्चिमीयान् दुनोति । सुखान्तत्व मुद्दिश्य संस्कृतनाटककाराणां प्रवृत्तेः कारणमेतत्—भारतीयदृष्ट्या दुःखं हि अज्ञानाज्जायते । यावन्मानवोऽज्ञानाक्रान्तो वर्तते तावत् सः स्वकीयात् स्वरूपादतितरां दूरेऽवतिष्ठते । नाज्ञानवतोजनस्य नैजे रूपेऽवस्थानं भवितुमर्हति । स्वरूपावस्थानात् सकलानि सर्वविधानि च दुःखानि समुत्पद्यन्ते । यदैव आत्मज्ञानभानुरुदेति तदैव तत्क्षणे एव अज्ञानतमः पूर्णतया विनश्यति । मानवीयात्मन आनन्दमयत्वात् यावन्मानव आनन्दं नाश्नुते तावदुद्विग्नोऽधीरोऽशान्तश्च भूत्वेतस्ततो भ्रमति । तस्मात्कारणात् भारतीया रूपककारा अपि मानवात्मनः स्वरूपस्य आनन्दमयतां दृष्टौ निधाय स्वकीयानां रचनानां पर्यवसानमपि आनन्द एव विधातुं प्रयतन्ते । दुःखचिन्तादिकास्तु भावा न तत्प्रकृत्यङ्गानि, ते तु भावा बाह्याः । यथा जलं न तिक्तं नाम्लं न च कट्वादिकं; तत्र तिक्तादिकता तु कुतोऽप्यन्यतः समागत्य संलीयते एवमेव मानवो निसर्गतः—आत्मतः—नास्ति शोक--द्वेष—रागादिवान् । सर्वथैव स निर्गुणः । ईदृशमुत्कृष्टतमं भावमुपचिन्वाना अपि संस्कृतनाटककारा दुःखं, शोकं, घृणां, द्वेषं, चिन्तां विविधांश्च अन्यानपि सर्वान्, भावान् जीवनस्य विभिन्नां च कुरूपतां समीचीनतया जानन्ति । अत एव तु ते जीवनस्य द्वन्द्वानि, सर्वविधमपि संघर्षं स्वकृतिषु प्रतिष्ठापयामासुः । परं प्रेक्षालयाद् दर्शकाः "अदृष्टं हि बलीयः नियतिरन्ततो गत्वा अन्यायं मूलत एवोन्मूलयति; सत्यं, सदाचारो धर्मो वा अन्ततो विजयते" इत्येतान् सद्विचारानादाय स्वगृहान् गच्छन्तु इति विचिन्त्य ते रूपककाराः स्वानि नाटकानि सुखान्तानि कुर्वन्ति किञ्च तत्रान्यायस्य पतनं दुष्टानां च निग्रहं दर्शयन्ति । अपकारस्य फलं न वरं जायते कुनीत्याश्रयणेन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्षयोऽवश्यं भवतीति विचारं संस्कृतरूपकं जनमात्रस्य मानसे समुत्पादयति परं प्रतीच्यानि रूपकाणि क्रूरतयाः दुराचारस्य च जयं प्रदर्श्य जनानां हृदयेषु अन्यथा भावान् समावेशयन्ति।

मनोविज्ञानमाह यन्मानवस्य संसारे सूक्ष्मवैशिष्ट्यस्यापि चित्रणं कियदपि मर्म्मभागं स्पृशेत् परं काव्यस्य संसारे तद् वस्तु-चित्रात् परं नान्यत्। तत् प्रयोगार्हं तदैव भवितुमर्हति यदा कवेर्मूलवर्तिन्या भावनायाः अङ्गंभूत्वा काव्येऽवतरेत्। जायेत च तत् तादात्म्यमिव। मानवस्य प्रकृतेर्याथार्थ्येण अन्वेषणं यत्कुरुते तदस्ति विज्ञानम्। प्रतीच्याः मीमांसकाः कामं तत्काव्यस्य सर्वस्वत्वेन मन्यन्तां परं सत्यं त्विदं यत् तत् काव्यं तदैव परिष्वजेत यदा तत् कविप्रौढोक्तिमयं भवद् आत्मानं प्रस्तुवीत।

देवता --स्वर्गादिकानाञ्चावतारणा न तावन्नाटकेऽनौचित्यं जुषते। अनुचितता तु तदैव मता भवेद् यदा देवतादिकानां विद्यमानता अमान्या सिध्येत्। किंवा कल्पनया सा अगम्या वा भावनयाऽविभाव्या जायेत। कल्पना-प्रसूतस्य-सकलस्यापि वर्ण्यस्य मूले यदेकं तत्वं दीप्यते तदस्ति सत्यम्। कवि स्तदेवास्वादयितुं तदीयमेव सौन्दर्यं निष्पादयितुं सहर्षं प्रयस्यति।

भारतीया रूपककारा वस्तुविषयिणीं कल्पनां तदवतारणां च प्रति भवन्त्यावर्जितचेतसः। परं तत्सम्बन्धिन्यां नामरूपरेखायां न ते स्तोकमप्यनुरज्यन्ति। पश्चिमीयरूपककाराणां चेतांसि तु बाह्यरूपनामादौ प्रीतिं बध्नन्ति तत्रैव तानि रमन्ते। प्राच्य-प्रतीच्यरूपकयोर्मध्ये एष महान् भेदो दृश्यते।

कवेः कल्पना, काव्यानुभूतिश्च सौन्दर्याय कल्प्येते। तच्च सौन्दर्य्यं चरित्र-चित्रणादिभवनमधिवसति। सन्ति कवेः कल्पनाः अनन्ताः; तासां गतिश्चास्त्यप्रत्याहता। रूपाणि च सन्ति तदीयानि विविधानि। अतस्ता वस्तुनश्चरित्रस्य चाङ्कनं संख्यातीतेषु रूपेषु बहुविधासु रीतिषु विभिन्नासु च गतिषु कर्तुं शक्नुवन्ति। एवं स्थिते वस्तुचरित्रादिसम्बन्धिनी रूपरेखा न सम्भवितुमर्हति।

आधुनिकः कालोऽस्ति यथार्थतावादी कालः। सम्प्रति काव्यनाटकयोः रीतिर्यथार्थवादमाश्रित्य विज्ञान-वसुन्धरामधितिष्ठासन्ति। भारतीयं संस्कृत-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाटकं यथार्थतां न तेन विधिनाभिव्यङ्क्तुमुत्सहते यस्मिन् विधौ प्रतीच्यानि रूपकाणि रज्यन्ति । परजीवनोज्जासनादिनितान्तजघन्यकर्माणि न मानतायाश्चिह्नानि । तानि तु राक्षसीयान्येव लक्षणानि । दुराचरणानां प्रदर्शनेनैव न यथार्थतायाश्चित्रणं सञ्जायते । एतादृशं याथार्थ्यं न भारतीयरूपकाणामभिमतम् । तथाचरणेन तु हानेरेव महती सम्भावना । येषु देशेषु नाटककारैस्तथाविधा यथार्थता प्रदर्श्यते तत्र किं मानवता मोदमाना केनापि साम्प्रतमीक्ष्यते ? गुणेभ्यो गुणाः सम्भवन्ति न च दोषेभ्यो गुणानामुद्भवो भवितुमीष्टे । कार्यगुणाः कारणगुणमनुबध्नाति । विषंहि मृत्यवे कल्पते न च जीवनाय । येभ्यस्तत्वेभ्यो मानवस्य कृत्स्नापि प्रकृतिः दृग्गोचरीभवितुं शक्नोति तानि तु संस्कृतरूपककाराः कदापि नोपैक्षिषत । धूर्त-चोर-द्यूतकारादीनां कार्यकलापो दशविधान्यपि मनस्तोषकराणि लास्यानि भाणे, हास्यवचोविलासः प्रहसने, मायेन्द्रजाल-संग्राम-क्रोधोद्भ्रान्त्यादिचेष्टितानि रौद्ररसप्रधाने डिमे, उद्धतता व्यायोगे, वाताग्न्यादिविद्रवाः धर्मार्थकामकम्रः शृङ्गारो नगरोपरोधायोधनादिविषयकाणि दृश्याणि च समवकारे, प्राकृतनेतारः स्त्रीपरिदेवितानि अङ्के, अनुचितकार्यविधायकतादिकोद्योगाः ईहामृगे रूपककृद्भिः सर्वथैवोल्लिख्यन्त एव । पुनः कथं संस्कृत रूपकेषु मानव उपेक्ष्यत इति वक्तुं सुशकम् ? साधारणानामपि जनानां मनोवृत्तयः क्रियाः प्रक्रियाश्च तदीयाः सम्यक् मूर्ता भूत्वा समुपस्थिताः स्युरित्येतद्धेतोरिह रूपकस्य दशविधत्वमङ्गीकृतम् । तथा कृत्वापि अत्रत्या मनीषिणो न तुतुषुस्तेऽत्र उपरूपकाण्यपि ससृजुः । अस्मद्भारते रूपकोपरूपकाणां सर्वथैव चिरात् प्रचलन मासीत् तानि च समये समयेऽवश्यमेवाभिनीततां गमितान्यभूवन्-इत्येतत् सत्यमेव प्रतीयतेऽन्यथा तेषामुल्लेखोऽहि साहित्य शास्त्रे-आकरेषु-कथं कृतो वर्तते ।

यस्मिन् साहित्ये नाटिका-त्रोटक-गोष्ठी-सट्टक-नाट्यरासक-प्रस्थानक-उल्लापकाव्य—प्रेङ्खण-रासक-संलापक-श्रीगदित-शिल्पक-विलासिका-दुर्मल्लिका प्रकरणिका-हल्लीश-भाणिकानां प्रणयनं साधारणतमानां च मनांसि रञ्जयितुं तांस्तांश्च सर्वविधान् उच्चावचांश्च भावान् समुपस्थापयितुं महान् उत्कटोऽध्यवसायोविहितस्तत् साहित्यम्प्रति कथनमिदं कियद् युक्तं यत् तत्र सामान्या जनाः सामान्याश्च भावा उपेक्ष्यन्ते किं वा तत्र मानवो न चित्रीकृतः । एतावन्तो

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रूपकोपरूपकभेदास्तु सर्वविधभाव-समग्रसमाज-चरित्रादिचित्रणाय तु कस्मिन्नपि साहित्यान्तरे न विलोक्यन्ते। आकरग्रन्थदर्शनात् तेषां प्रचुरत्वं स्पष्टमेव विदितं सञ्जायते। तेषामिदानीं यत् तावद्विपुलत्वं न प्राप्यते किञ्च तत्र निर्दिष्टानां विलासिका-प्रकरणिकादिकां सम्प्रति दर्शनं न यज्जायते तत्रापराधस्तु तस्य कालदेवस्य यः केनापि कविनेत्थमुपढौक्यते—

भ्रातः कष्टमहो महान् स नृपतिः सामन्तचक्रं च तत्
पार्श्वे सा च विदग्धराजपरिषत् ताश्चन्द्रबिम्बाननाः।
उद्वृत्तः स च राजपुत्र निवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः॥

नात्र संशयो यन्नाटकानां जगति संस्कृतनाटकानि सर्वोच्चस्थानासीनानि भूत्वा देदीप्यन्ते। अस्य संसार-महीरुहस्य बीजं समग्रस्यापि ज्ञानस्य, सर्वासामपि शक्तीनां कलानां च स्रोतः, कृत्स्नापि सृष्टिस्तस्यैव विस्तारस्तस्यैव च रूपम्। मानवोऽपि तस्यैव रूपान्तरमङ्गान्तरं वा। सोऽपि तस्मादेव प्राणिति, तस्मादेव स ज्ञानं प्रकाशं वा लभते, तस्मादेव स मेधामश्नुते, तस्मादेव सोऽद्भुततत्वान्-नाट्यकलायामपि प्रकाशमलब्ध। अत एव तु महर्षिर्भरत आह—

"श्रूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मितः" (ना० शा० १ अ०)

भारतीयरूपकाणामुदभवे विदुषां विचारानुन्मील्य इदानीं यवनादिदेशाणां नाट्योत्पत्तिमधिकृत्य विपश्चितां ये सन्ति विचारास्तेषामतिसमासेन निरूपणं क्रियते।

यूनानीयानि नाटकानि लक्ष्यीकृत्य स्वकीये नाट्यशास्त्रे अरस्तुर्यदवोचत् तस्याशयोऽयम्—दुःखान्तं प्रहसनं च धर्मोत्सवादुदपद्येताम्। तयोरेकतरं (दुःखान्तम्) स्तोत्रेभ्यः किञ्चान्त्यं (प्रहसनम्) अश्लीलगीतिभ्यो जनुर्जग्राह।

अरस्तुर्येभ्यः स्तोत्रेभ्यः दुःखान्तस्याविर्भावं प्रतिपादयामास तानि स्तोत्राणि यूतानस्य 'दि अनुसस्' इत्येतदाख्यस्य देवस्य वरिवस्यायामगीयन्त। प्राञ्चो यूनानसम्भवा 'डायोनिसस्' देवतां सश्रद्धं सभक्ति चानर्चुः। सा शोक-चिन्ता-विनाशिनी शत्रुञ्जया देवीति तत्रत्यानां विश्वासोऽभूत् तस्याम्। तस्याः सपर्या-समारोहः कुसुमाकरे प्रावर्तत। एथेन्स—ऐटिका वास्तव्या नरनार्यस्तदीया-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मर्चां विधाय आत्मनि नवजीवनस्य सञ्चारमनिशमन्वभूवन्। तत्सपर्यावसरे प्रयुक्ताभ्यः समवेत भावेन गीताभ्यो गीतिभ्यस्तत्रत्यस्य नाटकस्योद्भवः सञ्जात इत्येषा हिजनश्रुतिः। 'ट्रेजडी' शब्दस्यार्थो भवत्यजगीतिरिति। उपरिनिर्दिष्टे समारोहे अज- वलिदान प्रथासीदतः महोत्सवोऽसौ ट्रेजडी—अजगीतिः—इत्येतं व्यपदेशमभजत्। 'कामेडी' इत्येतत्पदं ग्रामगीतिपरकम्। इहामोद-प्रमोदयोः प्राधान्यमासीत्। ईसाजन्मतः प्राक् षष्ठे शतके यूनाने 'वैंस्पिसो' नाम कश्चिद् विद्वान् सामूहिकं गीतं संलापगर्भितं चकार। जनता च ततः स्वदेवताया लीलाः अभिनयात्मिकायां रीत्याँ विलोकितवती। इत्थं तत्रत्ये साहित्ये एका नूतनैव प्रणाली प्रावर्त्तत। ट्रेजडी रूपकमभिनेतुं खैष्टाब्दजन्मतः प्राक् पञ्चम्यां शताब्द्यां 'थियेटर आफ डायोनिसस्निर्मितं बभूव।' तत् प्रेक्षा-सद्म एथेन्स नगरे 'ऐक्लोपोलिसाभिधशिखरिणि स्थितिमाससाद। यूनानीयानां कलापक्षपराय-णत्वात्, तद्देशस्य गाथाः ललित-तरेषु नाटकेषु प्रवेशं प्रापुः। तत्फलञ्चेदमभूत् यत् खैष्टाब्दारम्भात् पूर्वमेव तत्र-स्थायिरङ्गमञ्चस्यापि परम्परा प्रचचाल।

अत्रेदमपि स्मरणीयं यद् यूरोपीयेषु जनपदेषु नाट्यविषयिका मीमांसा द्वाभ्यां रीतिभ्यां भवति स्म। एका तु सा, यामवलम्ब्य दार्शनिकैर्विद्वद्भि नाट्य-साहित्यस्याधारभूताः सिद्धान्ताः व्याख्याताः। अन्या च सा यामाश्रित्य रङ्ग-शालायाः अभिनयकलायाश्च कोविदमण्डलं रूपकाणां व्यावहारिकं मूल्य मानङ्क। द्विविधमपि विमर्शणं महनीयम्। प्लेटोप्रणीतेषु पुस्तकेषु एरिस्टोफेन्स कृतासु च कृतिषु नाटकस्य स्वरूपं तत्प्रभावश्च साधुप्रतिपादितो वर्तते। तद् विषयिका विचारधाराः सन्ति गम्भीराः, परं न तत्र कोऽपि क्रमबद्धः सिद्धान्तोऽभिव्यक्ति गतः। आचार्योऽरस्तुरवश्यं स्वस्थापनानां निर्देशं नियमिततया विस्तृततया च रीत्या चकार। दुःखान्तस्य रूपं निरूपयता तेनाभ्यधायि यद् दुःखान्ते नाटके कथान-कस्य वैपुल्य मभिप्रेतं भवति। तदीयेन नियोजनेन क्रियान्वितिमूलेन भाव्यम्। नायकेन च यातनाभोगिना भवितव्यम्। नाट्यवस्तुनि रुचिरतामुत्पादयितुं भाग्यविपर्यासोऽपेक्षणीयः। वस्तुविन्यासेन गुरुतरेण भाव्यम्। न च चरित्र-चित्रणस्य गरीयस्कता वा भयकरुणयोर्बलीयस्कतापेक्ष्यते।

प्रतीच्येषु देशेषु काव्यशास्त्रस्य प्रणयनं खैष्टाब्दात् प्राक् प्रायेण ३३० तमे सम्वत्सरे बभूव। तदा 'एसकिलस—सोफोक्लीज—यूरिपिडीज' प्रभृतिनाटक-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कारा यावनं दुःखान्तसाहित्यमेधयामासुः। अरस्तु स्तेषां महाकवीनां रचनाः परिभाव्य स्वनाट्यशास्त्रं प्राणैषीत्। तस्मात् तदीयास्तद्विषयका विचाराः सर्वाङ्गसमुल्लसिताः सन्ति। वर्तते तस्य तत्र नैजत्वम्। काव्यशास्त्र प्रणयनानेहसं यावत्, यावनं सुखान्तं च नाटकं विचकास। कदाचिदरस्तुस्तस्मादेव हेतोस्तत् सविस्तरमुल्लिखितुमवसरमवाप। अरस्तोः परस्तात् विचारवन्तो जना विस्तृततरेण सुबोधतरेण च प्रकारेण सुखान्तस्य मौलिकान् सिद्धान्तान् प्रतिपादयाम्बभूवुः।

रोमस्य प्रथितः साहित्यशास्त्री होरेस ईशवीयाब्दप्रवर्तनात् प्रागेव प्रथमे शतके बभूव। प्राचीनतराणां नाट्यशास्त्रप्रणेतृणां मध्ये तस्यापि स्थानं महत्त्वं भजते। 'ए पिसिल टु पिसीज' ग्रन्थे सः ससम्मानं स्मृतः। तद्विचारेषु न तादृशी मौलिकता लभ्यते यादृशी आरस्तवेषु विचारेषु। परं पुरातनान् सिद्धान्तान् स नवेनैव प्रकोरेण समस्थापयत्। 'नाटकं पञ्चस्वङ्केषु निबद्धव्यं न ततोऽधिकेषु। चरित्र चित्रणस्यौचित्ये सर्वविधभावेन नाटककारेण दत्तावधानेन भाव्यम्। वयोव्यवसायकालदेशानुरूपाणि पात्राणि कल्पनीयानि। वस्तु-संघटना च सुव्यवस्थिता विधातव्या सा च प्रभाववर्षिणी सृष्टव्या-इत्येतदादिनूत्नविचारान् सः प्रकटीचकार। स यूनानीयं साहित्यं दार्शनिकं च चिन्तनं प्रति महतीं श्रद्धां निदधौ। यूरोपीय नवजागरणानेहसमारभ्य अष्टादशशतकावसानं यावत् तस्य नाट्याधिकृता विचारा नितरां मान्यतामगुः।

मध्ययुगावतारणातः प्रागेव रोमसाम्राज्ये विघटन-विप्लवाप्लवनेन रङ्गशालासु नाटकानां प्रदर्शनमबाध्यत। प्रायेण तदानीमधियूरोपं नाटकानां सद्भाव एव नादृश्यत। दशमे शतके देवागारेषु नाटकं जन्मग्रहीतुमशकत्। उन्मेषशालिनीं प्राथमिकीं दशामुत्तीर्य नाटकं षोडशे शतके पूर्णतामाच्छंत्। पुरोधसस्तेषां (नाटकानाम्) प्रगतिपथे प्रत्यवायान् जनयामासुः परं तानि पुर उपसस्रुरेव। मध्ययुगेऽपि नाट्यशास्त्रप्रणयनाय प्राक्रमन्त केचन लेखकाः परं तद्विवेचनायां नोल्लेखनीयं वैशिष्ट्यं वर्तते। प्रायः सर्व एव होरेसस्य विचारान् पर्यपूपुषन्। डानेटस-डायोमिडीज-जान आफ सेलिसवरी-डाल्टे प्रभृतिप्रध्यस्तत्प्रभाव गमिताः स्फुटं संलक्ष्यन्ते। सिसरो-होरेस-प्रेरिता भूत्वा लेखकास्ते सुखान्तनाटकमधिकृत्य स्वां मीमांसां सविस्तारं प्रकाशयामासुः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शेक्सपियरस्य सुखान्तानि नाटकानि मध्ययुगाद्दृतां मान्यतामादाय विरचितान्यभूवन् । तत्र नायको हि कृच्छ्रतया मुक्तिमधियाति । मध्ययुगे सति संवृते पुनः सामाजिकी दृष्टिरस्तुदिशमन्ववर्तत । तदीयं काव्यशास्त्रमरबसीरियात आहृतमभूत् । यूरोपीयासु च भाषासु तदनूदितं बभूव । वस्तुतो नाट्यशास्त्रिणां मध्ये स एव मूर्धन्यो भूत्वा अचकासत । इटलीदेशस्यापि भूयांसो विद्वांसोऽस्यां दिशि तमानर्चुः । तदभिमतं रूप-सौष्ठवं सर्वे सनिर्वन्धं जगृहुर्नाटके । फ्रान्सदेशस्य प्रध्योऽपि नाटकं प्रति तानेव विचारानुद्भावयामासुर्ये अरस्त्वनुयायिभिरिटलीवास्तव्यैर्विचक्षणैराकलिताः । इङ्लैण्डेऽपि नाट्यशास्त्रसम्बन्धिनोविचारास्तथैव प्रावर्तन्त यथा इटली-फ्रांसदेशयोर्मध्ये ते प्रसस्रुः । सर फिलिपि सिडनी नाट्यान्वितीः पोषयामास । असौ न नाटकस्य सुखान्ततां न च दुःखान्ततामियेष । ततश्च वेन जान्सन महोदयस्य विचाराः सन्त्युल्लेखार्हाः । सः पुरातनसाहित्योद्भटपण्डितः प्राक्तनान् सिद्धान्तान् प्रसभमन्वमंस्त । स्वयुगे सः पुनः अरस्तु-होरेस-प्रतिपादितान् नियमोपनियमान् प्रतिष्ठापयितं वलवत् प्रयासमनुतस्थौ । स नाट्यशास्त्रस्य पुराणीरभ्युपत्तीर्व्याख्याय वहूनि रूपकाणि प्रत्नेनविधिना विरचय्य नैजकालवर्तिनां लेखकानां पुरो निदर्शनं प्रातिष्ठिपत् । १५० वर्षाणियावद् यूरोपीयेषु सर्वेष्वपि प्रदेशेषु नाटकेषु चिन्तन मेकेनैव दृष्टिकोणेन भवत् समलक्ष्यत ।

सप्तदशे शतके तत्रत्यंलेखकवृन्दं स्वकथनं पोषयितुमरस्तु-होरेसयो र्वचांसि समुद्धरदवाप्यते । कार्निल-मीलियर-रासीनवो प्रभृति लेखका अरस्तो र्होरेसस्य च सिद्धान्तान् समभिजह्रुः । प्रायः सर्वेऽपि नाटकीयमुद्देश्यं विश्लेषयन्तो नैतिकीं शिक्षां मनोविनोदिनो वृत्तादपि उत्कृष्टतरं मत्वा होरेस-मतमभ्यार्चिपुः । वस्तुसंगठनंप्रति नाट्यवस्तुनः सुग्रथितत्वे ऋजुत्वे च तद्युगसम्भवाः समालोचका नाट्यप्रणेतारश्च फ्रान्सीया स्वाभिरुचिं निदधुः । रासीनः स्वभूमिकायां सुव्यवस्थितं सुबोधं च कथानकं प्रशशंस । अन्वितित्रिकयोगपुरस्सरं रूपकेषु घटनानां सन्निवेशनं तत्र च विविधदृश्यानां परस्परं सम्यग् गुम्फनं सर्वेषां तदानीन्तने समयेऽभिमतमभूत् ।

आर्ट पोयटिके ग्रन्थे 'वो आलो' शास्त्रीयस्यानेहसः प्रियं सौष्ठव-सुन्द सरलमादर्शमोजोमयैः शब्दैः श्लाघमानस्तं प्रास्तौत ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तदशशतकोत्तरार्धसमयादष्टादशशतकस्य तारुण्यं यावद् यूरोपीयं नाट्यशास्त्रं कर्कशान् नियमान् नाटकीयं विकासम्प्रति बाधकत्वेन मेने। आचार्यो ड्राइडन:, डॉ० जानसनश्च शास्त्रीयस्य समयस्य सम्मानं कुर्वन्तावपि नैजविचारान् स्वतन्त्रता निदधतु:। नाट्यशास्त्रे किश्चतन्नीकाशानामन्येषांच विचारा: श्रद्धास्पदतां नीता अभूवन्। इमे विपश्चित: काव्यप्रतिभां मुख्या ममन्यन्त।

दीप्यमानेष्वपि कठोरेषु ततृतन्नियमेषु शेक्सपियरो लोकसंग्रहे भावमांसल-साहित्यिकप्रचलने च स्पृहयति स्म। तदीयैषा प्रवृत्तिर्नाट्यलोचनात्मकं विन्दुं परिवर्तयामास। फ्रान्सीयो लेखक उदारचेता डिडराटश्चांग्लनाटकानां भावना-प्रियत्वे प्रीयमाण: प्रतिस्थलं नाटकीयं नैतिकं लक्ष्यं सविशदं व्याचष्ट। अत-स्तस्मिन् समये नैतिकतापोषीणि नाटकानि प्रचुरसंख्यायामसृज्यन्त।

ईशवींयाब्द १७६७ त: १७६९ मिताब्द पर्यन्तं जर्मनीयो विपश्चित् लेसिंग 'हेम्वर्ग' नाम नाट्यशास्त्रं प्रणिनाय। स मूलतोऽरस्त्वनुगामितामाशिश्राय। नवां शास्त्रपरां सृतिं कृत्स्नतयाऽस्वीकुर्वाणोऽसौ नाट्यशास्त्रक्षेत्रे अरस्तुमधि-कारित्वेन विवेद। नैतिकतापोषित्वात्, स: तादृशानि नाटकानि सभाजयाम्ब-भूव यत्र नायक: सदाचारं धार्मिकं विश्वासं पातुमात्मानं जुहोति। लेसिंगस्य नाट्यशास्त्रे व्यावहारिकताया: पुटस्त्वस्त्येव परं तत्र विवेकलसितं सन्तुलनमपि प्राप्यते अतस्तदीयं नाट्यशास्त्रं नाट्यजगति सम्माननीयं पदमध्यास्ते।

जर्मन्यां शिलरे गेटे—इत्येतन्नामधेययोर्विद्वद्वरयो: विचारा: प्राचीनतां नवीनतां चाश्चन्ति। वर्णनात्मकं काव्यं नवीनं प्राचीनत्वे प्राचीनं च नवीनत्वे विपरिणमयतीति तौ प्रोचतु:। तयो: कथनं यन्मुक्तके काव्ये मानसिकावस्था भवन्ति विनिद्रा; परं नाटके ता भवन्ति सक्रिया:। रोम-नाट्यशास्त्री विक्टर ह्यूगो वक्ति यत्समयस्य परिस्थितीनां च परिवर्तनेन सार्धं काव्यादर्शोऽपि परिवर्तते।

आंग्ल नाट्यालोचकेषु कोलरिजो गम्भीरो नैजविचारोद्भावयितासीत्। अविश्वास-निग्रहणमधिकृत्य प्रवर्तमाना तदुक्तिर्नाटकीयभ्रान्तिविषयकस्य सिद्धान्तस्यास्यालम्बनत्वेनोदीर्यते। हैजलिट: सुखान्तं नाटकं सुसंस्कृतजना नुपकरोतीति मन्यते। गच्छता कालेन मेरेडिथो वर्गसा च तद्विचारमुन्मील-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

याम्बभूवतुः । काण्ट हीगल-शापेनहावरादिका जर्मनीया दार्शनिकाः नाटकानि लक्ष्यीकृत्य यत् किमप्यलिखंस्तत् सौन्दर्यं दृष्टौ सन्निधाय प्रकटीचक्रुः । एकोनविंशतिशतके परिस्थितयो विपर्यस्यन् । रोमीयाभिव्यञ्जना अश्लथत यथार्थता पीनतामवहत् । फ्रान्सीयलेखका द्वयो र्निवहयोर्विभक्तावभूताम् । प्रथमस्य निवहस्य नेता सार्सी आसीत् । नाटकेषु चमत्कारपूर्णघटनानां सन्निवेशने तदीयाभिरुचिरदृश्यत । द्वितीयनिवहस्य नेतारो ड्यूमास-फिल्सजोलादिसंख्यावन्तः सामाजिकीः समस्याः लक्ष्यीकृत्य यथार्थवादिनां नाटकानां परम्परां प्रतिष्ठापयामासुः । अस्यामेव परम्परायाम् इब्सन-स्टिड्वर्ग-वर्नार्डशादिधीमन्तः शोभन्ते । वर्नार्ड शा रोमानीयविचारधारामाक्षिपन् नाटकानि हि आनन्दविधायकानि तत्वान्येव न सन्ति; सन्ति तानि सामाजिकाभ्युत्थानस्य कृते श्रेष्ठानि साधनानीति प्राचकथत् । यूरोपस्य प्रायः सर्वेष्वपि भागेषु सम्प्रति यथार्थवादिरूपकाणां प्रचलनं यत्प्राप्यते तत्र कारणमिदमेव । तत्रैकान्यापि परम्परास्ति । सा कोलरिज—श्लेगलयोर्विचारान् संवदति । वेगनर-मेटरसिक-टी० एस० ईलियट प्रभृतिविदुषां प्रवन्धेषु काव्यत्मकप्रतीकवादिविधिविषयिणी नाट्यरचना सम्पोषितास्ति । यूरोपामेरिकाराष्ट्रयोरभिव्यञ्जनावादीनि रूपकाण्यपि अस्यामेव परम्परायां सन्निविष्टानि भवन्ति । एतेन यूरोपीयस्य नाट्यसाहित्यस्य रूपं स्थास्नुतां न गतमस्तीति स्फुटीभवति ।

नाटकीया श्रीः वस्तुतः प्रेक्षागृहेष्वेव समीचीनतया दृष्टिपथमारोहतीत्येष विचारो गार्डन—ब्लेग—स्टेन्लेवेस्को—ग्रेनविली—वार्करादीनां प्रधीवराणां वर्तते । परमेतद्विचारविसंवादिमतमपि जागर्ति तत्र । तेषां मतेन प्रेक्षागृहाः सन्ति नापेक्षिताः । अभिनयार्थं तु अन्तःकरणमेवोचिततरं रङ्गमन्दिरम् । एवंविधायाः विचारधारायाः परिपोषकेषु क्रोचे" अग्रणीर्विपश्चिदस्ति । तदीये सौन्दर्यशास्त्रे हि कलायाश्चरमपरिणतिः प्रसादे वर्तते । तदेवं नाट्यसिद्धान्तानां जगति यूरोपीयेषु देशेषु डमर एव महानवलोक्यते । तत्र भरतकृतं नाट्यशास्त्रमिवैकमपि सर्वाङ्गपूर्णनाट्यशास्त्रमद्यापि नोपलभ्यते । अरस्तोः पेरि पोइटिक्स ग्रन्थस्यापूर्णाङ्गतां प्रेक्ष्य स्काट जेम्सः स्वीये विश्रुते ग्रन्थे दी मेकिंग आफ़ लिट्रेचरे (५७—५८ पृष्ठयोः) भृश मनुशयात्मकमुद्गारमभिव्यानक् । भारतीया नाट्यसिद्धान्ताः स्थेयांसः सन्ति । तेषां स्थास्नुतास्मात्कालात्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चिरं[1] प्रागेव, यस्य कालस्य गतस्य सहस्रं समा व्यतीताः, विश्वेन विलोकिता। भरत नाट्यशास्त्ररचनातः प्रागपि नाट्यसिद्धान्त विषयिण्यो रचनाः सञ्जाताः इत्येतत् तथ्यं नाट्यशास्त्राध्ययनात् तर्क्यते। नाट्यशास्त्रस्य प्रथमेऽध्याये भरत मुनितनयानामेका विस्तृता नामावली प्रदत्तास्ति। तत्र कोहल-दत्तिलाभिधानौ स्त उल्लिखितौ। तत्कृतरचनोद्धरणानि अभिनव भारत्याष्टीकायां प्राप्यन्ते। निर्दिष्टायां नामावल्याम् अश्मकुट्ट—नखकुट्ट—वादरि—वादरायणानामपि नामानि दृश्यन्ते। सागरनन्दिविश्वनाथयोर्ग्रन्थेषु कतिपयान्युद्धरणानीदृशानि प्राप्यन्ते यानि तत्कृतरचनासम्बन्धीनि वर्तन्ते। एतेन तेषां नाट्यशास्त्र-प्रणेतृत्वमनुमीयते। नाट्यशास्त्रविषयकाणि पुस्तकानि भरतानन्तरमवश्य मेवाचार्यैः प्राणीयन्त परं सम्प्रति न तानि लभ्यन्ते। अर्वाक्तनेषु ग्रन्थेषु तत्र त्यानि उद्धरणानि यत्रतत्र अवश्यं दृष्टानि भवन्ति। किञ्च तत्र केषांचन आचार्याणां वा तत् कृतानां ग्रन्थानां नामोल्लेखः सम्प्राप्यते।

अधस्तेषां विदुषां निर्देशः क्रियते येषां रचनाः साम्प्रतं नोपलभ्यन्ते। सागर-नन्दिनो नाटकलक्षणरत्नकोशे चारायण—कात्यायन—राहुल—गर्ग—हर्ष—विक्रम—मातृगुप्तानामुल्लेख उद्धरणानि च दृश्यन्ते। अभिनवगुप्तपादाचार्यस्य अभिनवभारत्यां नन्दिकेश्वर—तुम्बरु—विशाखिल—सदाशिवकृतरचनाना मिङ्गितानि वीक्ष्यन्ते। शकलीगर्भ—घण्टकयो रप्युल्लेख आप्यते। कात्यायन राहुल—हर्ष—विक्रमकृतकृतीनामुद्धरणानि च वीक्ष्यन्ते। अभिनवगुप्ते भट्टशंङ्कुक—भट्टनायक—लोल्लटानां च मतानि सविस्तरमुल्लिखन् प्राप्यते। भट्टलोल्लट—शङ्कुकौ नाट्यशास्त्रस्य टीकाकारौ प्रतीयेते। शारदा तनयस्य भावप्रकाशने पद्मभूव्यास—नन्दिकेश्वराञ्जनेय— द्रौहिणि प्रभृतीनां नाट्या-चार्याणां नामानि दृग्गोचरीभवन्ति। रसरत्नदीपिकायां नन्दिकेश्वरस्य नाट्या-र्णवादुद्धरण मवाप्यते। ग्रन्थान्तरेषु रुय्यककृतयोर्नाटकमीमांसा—नाटक-प्रकाशयोः किञ्च मोहनदासकृतनाटकावतारस्य स्मरणं कृतमस्ति।

नाट्यशास्त्र सम्बन्धिन इमे ग्रन्थाः साम्प्रतमपि प्राप्यन्ते—

ग्रन्थः	ग्रन्थकारः
१—नाटकलक्षणरत्नकोशः	सागर नन्दी

१—प्रो० भोलानाथ शर्मा : भरत मुनिकृत नाट्यशास्त्रम्, पृ०—१

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२—दशरूपकः धनञ्जयः
३—नाटकदर्पणः रामचन्द्रगुणाचन्द्रौ
४—भावप्रकाशनम् शारदातनयः
५—नाटक-परिभाषा शिङ्ग-भूपालः
६—रसार्णवसुधाकरः ,,
७—नाटकचन्द्रिका रूपगोस्वामी

अधोलिखिता ग्रन्था नाट्यशास्त्रं गौणरीत्या निरूपयन्तो लभ्यन्ते—

१—शृङ्गारप्रकाशः भोजः
२—सरस्वतीकण्ठाभरणम् ,,
—प्रतापरुद्रयशोभूषणम् विद्यानाथः
४—साहित्यदर्पणः विश्वनाथः

संस्कृतसाहित्येतिहासस्य किञ्च आकरग्रंन्थानामवलोकेनन नाट्यशास्त्र-विषयकस्य साहित्यस्य विपुलत्वं स्पष्टतया विदितं भवति परं सम्प्रत्येतावदेवोपनतं भवति। इदमपि यदस्ति तन्नाट्यस्य सर्वेष्वप्यङ्गेषु विशदं प्रकाशं क्षिपति। तत् ससारं गभ्मीरं पूर्णतयालोडितनाट्यरत्नाकरमतोऽविपुलं सदपि विपुलमेव भूत्वा विजृम्भते। न केवलमिह सिद्धान्तग्रन्थानां संख्या महती समुद्वभूव; अपि तु उदाहरणग्रन्थाः (रूपकाणि) अपि शतशो विरचिता बभूवुः। श्वीलरो रूपकाणां पञ्चशती संस्कृतसाहित्ये शोभते,इत्युल्लिखति। अस्मिन्नपि उपेक्ष्यमाणसंस्कृते काले प्रत्यब्द मजस्रं स्वकीय एव देशेऽनवाप्तशरणांयां देवगिरायां रूपकाणां प्रणयनं भवति। पञ्चाननतर्करत्नस्य अमरमङ्गलं, हरिदास सिद्धान्त वागीशस्य वङ्गीयप्रतापं किञ्च मेवाडप्रतापनाटकम्, मथुराप्रसाद दीक्षितस्य भारतविजयोऽथ च कपिलदेव द्विवेदिनः परिवर्तनं, विद्याधरशास्त्रिणश्च कलिपलायनमन्यानि च बहूनि तत्-तद् विद्वल्लिखितानि अद्यतनानि रूपकाणि संस्कृतानुरागिणां मनीषिणां पुरः शोभन्ते। सुदूरभूतकालो यदि भास-कालिदासाश्वघोष-शूद्रकादि रूपककाराणां रूपकाण्यजनयत् तदा समीपवर्ती भूतकालोऽपि प्रबुद्धरौहिणेयत्रिपुरदाह-हास्य चूडामणि-हम्मीरमदमर्दन-सौगन्धिकाहरण-विदग्धमाधवजानकीपरिणय प्रभृति बहुलानि रूपकाणि ससर्ज। तदेवं सुरभारतीसमुपासकाः अजस्रं रूपकादिविविधरचनाः कुर्वन्तो दृष्टिपथमवतरन्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रूपककारं भासमारभ्य आधुनिकसमयसञ्जातरूपककारान् यावत् संस्कृत-रूपकाणि स्वकीयायाः परम्परायाः स्वनाट्यसिद्धान्तानां च गरिमाणं सर्वथैव वर्द्धयन्त्येवासाद्यन्ते। तानि नैजामेवानन्यगां विशिष्टतामादाय रूपकाणां लोके विद्योतन्ते। कथनस्यास्येहोद्देश्यमिदं भारतीयनाट्यशास्त्रस्य संस्कृतनाटकस्य च पूर्णतांगतस्य तु चिरन्तनः कालोऽतिक्रान्तः। परं देशान्तरीयं नाट्यशास्त्रं नाटकं च साम्प्रतिकेऽपि काले न सिद्धान्ततः स्थिरतां प्राप्तं पर्यवलोक्यते।

श्रूयते यद् यूनानीयानां नाटकानां प्रभावाद् रोम देशे नाटकं विचकाशे। लिवीविचारानुसारेण इत्रूरियावास्तव्यानां विनोदमयीभिर्गीतिभिः 'सतुरा' नाम नाटकीयं रूपं प्रादुरभूत्। तत्र वेणुवाद्यवादनपूर्वकमभिनयनमपि प्रायुज्यत। केचन निगदन्ति ३६४ तमेशवीयाब्दात् प्राक् रोमदेशेऽसंख्यनर संहारकरोगानलः प्रजज्वाल तदा रोमवासिनस्तं शमयितुमित्रूरियास्थान् लूदिन आजुहुवुस्ते यन्नृत्यंसाभिनयमदीदृशंस्तस्मादेव तत्र नाटकस्य जनुरभवत्। चीन (दरद) देशे नाटकानाँ प्रचार ईशवीयाब्दारम्भात् प्रागप्यासीदिति लौक वादः प्रचलति : तत्रानेक जनश्रुतयः श्रूयन्ते। केचन कथयन्ति वानृते नाम चीनीयः सम्राट् नाटकमाविश्चकार। अपरे वदन्ति युवेन सुंगो नाम सम्राट् नाटक-बीजमवपत्। परं नृत्य-गीति-संयोगाच्चीनीय नाटकाना मुत्पत्तिः सञ्जातेत्यत्र समेषा मप्यैकमत्यम्। जापानीय नाटकस्योद्भवो लोकविनोदनाय सर्वजनहिताय चायोजितेभ्य उत्सवेभ्यः संवृत्तः। पुरातनेऽनेहसि तत्र देवतानां पुरः 'कगरा' भिधं संगीत-मिश्रं सुरस्तवं प्रायुज्यत। अनुमीयते यत् ता गीतय एव तत्रत्यायाः नाट्यकलायाः कारणम्।

जापानीयेषु नाटकेषु काव्यशक्तेः प्रायेणाभावः तत्रत्येषु नाटकेषु समादृताः कथाः सन्ति पौराणिक्यः। षष्ठशतकावसाने राष्ट्र-हिताय दरद देशात् 'हादा-कावत्स्' नामाभिनेताऽऽमन्त्रितोऽभूत्। असौ त्रिंशन्नाटकान्यरचत्—इत्येषापि जनश्रुतिर्जापानीय नाटकोद्भूतिं शरव्यीकृत्य श्रवणसरणिमासेधति। परं जापानीयजनताया विश्वास एषः—८०५ तमेशवीयवत्सरे ज्वालामुखशिखरि-स्फोटः क्षमा मवेपयत्। तदानीं तां पातुं संवासो नाम नृत्यं प्राचलत्। तदेव नृत्यं नाटकमजीजनत्। परं ११०८ तमेशवीयेऽब्दे 'इस्सोनो जेनजी' नाम्नी काचित् सुभ्रू नाट्यमभिव्याञ्जीदित्येतन् मतं हि उपर्याम्नातं मतं विसंवदति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वस्तुतस्तु सर्वेषा मपि विचारोऽयं यज्जापानीयं नाटकं 'सरुवाका कागवुरो' अवातारयत् । अतः स एव तस्यश्रेयसः पात्रम् ।

यवद्वीपे (जावा), मलयद्वीपे (मलाया), सुवर्णद्वीपे (सुमात्रा) च नाटकस्य यद्रूपमवलोक्यते तदाधारो भारतीयकथा-साहित्यमेव । पुरातनेकाले भारतीयाः शान्तिदूता अनारतं भारताद् दवीयसो देशान् भारतस्य विश्वजनीनां संस्कृतिं धर्मं च प्रचारयितुमगुः। तत्प्रभावादेव तत्रत्यानि रूपकाणि पौराणिकानि धर्म्याणि च सन्ति । लोकरञ्जनकारिणोयावद्वीपकाव्यस्य द्वे रूपे प्राप्येते । तत्रैकतरं 'पण्टुनम्' इत्युच्यते । तद् आख्यानमिव भवति । तदितरच्चरितमित्याख्यया प्रथते । तच्च गी-सवादात्मकं वर्तते । ताभ्यामेव यवद्वीपे नाटकमुदपद्यत, तत्रोदात्तचरित्रमहीपानां विबुधानाञ्चवर्णनं कृतमभूत् । एशियाखण्डे (विष्णुक्रान्ते) विद्यमानेषु फारसारबतुर्किस्तानदेशेषु पुरातने समये नाट्यसाहित्यस्यात्यान्ताभाव एवादृश्यत । अद्यत्वेऽवश्यं तेषूपवर्तनेषु तदीयं द्विविधं रूप मीक्ष्यते । प्रथमं धार्मिकं द्वितीयञ्च लोकप्रियप्रहसनात्मकमस्ति । अद्यतनेषु फारसीयेषु (पारसीकेषु) भूभागेषु किञ्च तुरुष्क (तुर्किस्तान) देशे, वनायु (अरब) देशे च रूपकेषु प्रतीच्यः प्रभावोऽपि संलक्ष्यते ।

मिश्रदेशो यद्यपि प्राचीनः परं पुरा स नाट्यकलानभिज्ञएवासीत् । तत्रत्यो यावान् एव रहस्यात्मको विचारस्तावान् सर्व एव 'ओसिरिस' देवतायाः प्रसादेनलब्धोऽभूदित्येतद् विश्वसन्ति मिस्रदेशीयाः । तत्रत्या ग्राम्यजनताप्रोक्ताया एव देवतायाः सपर्यायां यात्रासमारोहान् अयूयुजत् । स यात्रोत्सव एव तदीयमनोविनोदनसाधनमासीत् । न सा नाटकेऽभिज्ञतां दधौ । परं निःसंशयम् अश्वक्रान्त (यूरोप) भूभागान्तर्गतेषु जर्मन (क्रौञ्च) ब्रिटेन (आवर्तन) रूस (ऋक्ष) प्रभृतिदेशेषु अद्यत्वे लभ्यमानायाः नाट्यकलायाः सम्भूतिर्यवन (यूनान) देशस्य नाटकेभ्योऽभवत् ।

नागलोकस्य (अमेरिकायाः) नाट्यकलापि नवीनैव । विश्रुतो विद्वान् के० कुकः अमेरिकादेशस्यादिवासिनां नृत्येषु नाटकस्याव्यवस्थितानि अनियमितानि छिन्न-भिन्नानि च तत्वानि संप्राप्यन्ते । दक्षिणसमुद्रस्य द्वीपेषु कानिचनेदृशाणि प्रदर्शनानि प्रेक्ष्यन्ते येषु नृत्य-गीत-संवादानामपि समन्वयो भाति' इति वक्ति ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तदीयेनैतेन कथनेनेदं ज्ञायते यत् तद्विचारेण सैव सामग्री तत्रत्याया नाट्य-कलाया जन्मनि कारणम् ।

एतदखिलं विवरणं मानवमात्रस्य नाटकीयभावनावत्तामनुमापयति । नूनं तद्विधाया भावनाया अभिव्यक्तिः पुरातनेऽनेहसि क्वचिन्न्यूना, क्वचिदधिका, क्वचिद् विपर्यस्ता, क्वचित् प्रच्छन्ना च भूत्वा भातिस्म । नेदृशं किमप्यधिष्ठानं यत्र तदीयं तत्वं सन्निहितं न स्यात् ।

नाट्यतत्वस्य व्यवस्थितं गुणाभिरामं श्रेयःपेशलं स्वरूपं यस्मिन् वाङ्मये आदावुदियाय तदस्ति संस्कृतवाङ्मयम् । इदं तदेव यत्रवेदाः समुल्लसन्ति । यानधिकृत्य समग्रस्यापि वसुधामण्डलस्य सर्वेऽपि विज्ञा एकस्वरेणशंसन्ति यद् ऋग्वेदात् पुरातनतमोनान्यो ग्रन्थः कश्चित् । इदं संस्कृतवाङ्मयं न केवलं सर्वदेशगुरोर्भारतस्याभिजनानां प्रातिभिकजीवनस्येतिहासं शाश्वतकालाद् गोपा-यति, प्रत्युत् उदीच्येषु त्रिविष्टप-दरद-यवद्वीपादिदेशान्, अवाच्येषु लङ्काम्, प्राच्येषु मलयप्रायोद्वीपं, प्रशान्तमहासागरस्थानि दविष्ठानि द्वीपान्तराणि प्रतीच्येषु तरुष्कादीन् देशान् अधिवसतां संख्यातीतनानाजानपदानां बौद्धिक प्रवृत्तिष्वपि खलु पुरा प्राज्यं प्रभावं ववर्ष । सर्वाङ्गीणं महोविभृदेतत् संस्कृत-साहित्यं व्यापकतायां सांस्कृतिकतायां च संसारस्य समग्रमपि साहित्यमतिशेते । अस्य वेदान्त-दर्शनोपनिषद्गीतादिषु विश्वबन्धुत्वभावना विभाति । सानवधिकास्ति दिक्कालाकाशेषु न तदीयः परिच्छेदः । सा चिरपुरातन्यपि नित्यनवीना, ह्यस्त-न्यपि अद्यतनी । तस्यामेव मानवताज्योतिरादिकाले समुन्मिमील । तस्या एव सकाशात् भूलोकः संस्कृतिं सभ्यतां च जग्राह । अद्यापि सा ससम्मानं दूरस्थान्तिकस्थदेशैः पुनः-पुनः परामृश्यते ।

संस्कृतसाहित्यस्य पुरातनतमत्वात् तदीयमङ्गभूतं रूपकमपि प्राचीनतरम् इति निष्पद्यते । तत्तद्देशाणां रूपकेषु या धर्मभावना विलोक्यते सा भारती-यानां रूपकाणामेवोत्कृष्टतरा दानश्रीरिति विदाङ्कुर्वन्तु विद्वांसः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चमः परिच्छेदः

अभिमतानां रूपकाणां प्रामाण्यम्

रूपकाणां विकास इह देशान्तरेषु च केन विधिना समजायत; तदीयस्य स्वरूपस्य विषये प्राचामर्वाचाञ्च कानि कानि मतानि साम्प्रतं प्रवर्तन्ते; अस्मद् भारतेऽन्यत्र च रूपकस्येतिहासः कीदृक् प्राप्यते इत्यादिकं विविच्य किञ्च तदीयां महनीयतां च प्रतिपाद्य स्वाभिप्रेतानां खीष्टीय प्रथम शतकात् प्राग् वर्तिन्याः शताब्द्याः खीष्टीय षष्ठशतकावसानपर्यन्तं विरचितानां भारतीयसंस्कृतरूपकाणां प्रामाण्यमधिकृत्येदानीं विमर्शो विधीयते।

संस्कृतवाङ्मयस्य यानि प्राचीनतमानि रूपकाणि सम्प्रत्युपलभ्यन्ते तानि खैष्टाब्दात् १००-१५० वर्षेभ्यः प्राग्वर्तीनि न विद्यन्ते परमेभ्योऽवाप्तेभ्यः प्रकाशितेभ्योऽप्रकाशितेभ्यश्च रूपकेभ्योऽपि पुरातनतराणि रूपकाण्यवश्यमेव अराजन्त इत्यत्र नास्ति संशयः। आकरेभ्यस्तेषां नामानि, कतिपयांश्च श्लोकान् वा उद्धरणानि च कानिचन सम्प्राप्य एष निश्चयो मनसि स्थानमाददाति यदवश्यमेव भास—कलिदासादिभ्योऽपि पूर्वं रूपककारा भरतभुवं भूषयामासुः परं साम्प्रतं तेषां रूपकाणि न प्राप्यन्ते। कालगतेः प्राबल्यात् वैदेशिकशासनस्य दुर्दैदयाद्, भारतौकसां नैजमातृभूतां संस्कृतभारतीं प्रति प्रमादाच्च बहुलानि प्राचीनतमानि रूपकाणि तथैव विनष्टान्यभूवन् यथा विशालसंस्कृतभाण्डागारस्य भूयिष्ठानि ग्रन्थरत्नानि विलुप्तान्यभवन्।

यानि रूपकाणि पुरातनतमत्वेनेदानीं मतानि सन्ति तानि रूपकाणि भास—कालिदासाश्वघोष—शूद्रक—विशाखदत्तादीनां रूपककाराणां वर्तन्ते। इमानि सम्प्राप्तानि रूपकाणि कदा रचितान्यजायन्त? तत्तद्रूपकस्य कः कर्ता स च कदा सम्बभूवेत्यादि विषयः सप्रमाणं विमर्शणमपेक्षते अतस्तदर्थमेव प्रयत्यते।

भासः—

महाकविकालिदासकृत-मालविकाग्निमित्रे 'प्रथितयशसां भाससौमिल्लककविपुत्रादीना' मित्येतयदादि वाक्यदर्शनाद् भासस्य कालिदासान् प्राग्र्वर्तित्वं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किञ्च तस्य यशस्वित्वमपि स्पष्टतया प्रकटीभवति । कालिदास ईशवीयाब्द प्रवर्तनात् प्रागेवोद्बभूवेत्येतद्धि शोधकार्यरतमतीनामाधुनिकानां मतिमतां मतम्[१] । तेन भासस्य स्थित्या कालिदास—स्थितितः ५०-६० वर्ष पूर्वन्त्ववश्यमेव भवितव्यमित्यनुमीयते । भासस्य स्थितिमधिकृत्य ए० बी० कीथस्य विचारोऽयं यदसौ तृतीयेशवीय शतकाभ्यर्णे बभूव । अस्तु तावत् । कालिदासात् सः प्राग् बभूवेत्येतत्तु कालिदासस्यैव लेखन्या सिद्ध्यति । अतस्तदीयां स्थितिं लक्ष्यीकृत्य अत्रैतावानेव विचारः पर्याप्तः कालिदासः कदा बभूवेत्येष विचारोऽग्रेकृत एव स्यात् ।

भासकृतानि यानि रूपकाणि साम्प्रतं प्राप्यन्ते तान्याधृत्य विदुषां जगति महान् विवादः श्रुतो भवति । के[२]षाञ्चन कोविदानां मतेन स्वप्नवासवदत्तादीनि त्रयोदशापि रूपकाणि भासस्यैव सन्ति । स्वमतपक्षे तेषां कथनमिदं यत् तेषु सर्वेष्वपि रूपकेषु भाषा—बन्धादेः साम्यं दृश्यते अतः एकस्यैव कवेस्तानि रूपकाणि सन्ति । अपरे विद्वांसो न तानि भासकृतानि मन्यन्ते तन्मतेन मत्तविलास प्रहसनकर्ता युवराजो महेन्द्रविक्रमो वा आश्चर्यचूडामणेः रचयिता शीलभ्रद स्तानि प्राणैषीत् । एतन्मतावलम्बिनां विपश्चिता विश्वासो यदिमानि रूपकाणि ध्रुवं सप्तमाष्टमशतकाभ्यर्णे कृतान्यभूवन् किञ्च एषां कर्ता कोऽपि दाक्षिणात्यः कविः प्रतीयते[३] । प्रो० सिलवां लेवी, प्रो० विण्टरनित्सः, प्रो० सी० आर० देवधरश्च इत्यत्रैव श्रद्दधते । अन्येषां मनीषिणां विचारोऽयं वर्तते यदिमानि त्रयोदशापि रुपकाणि सन्ति तु भासस्यैव परमिदानोन्तने समये यद् रूपं बिभ्राणानि तानि लभ्यन्ते तद्रूपं मौलिकं रूपं

१—सीताराम चतुर्वेदी : कालिदास ग्रन्थावली, राजबली पाण्डेकृत 'विक्रमादित्य' लेखः ।

२—ए० बी० कीथ : संस्कृत ड्रामा का भाषान्तर रूप (डा० उदयभानु सिंह कृत) प्र० सं०, पृ०—८८ ।

३—वार्नेट : वुलेटिन आफ स्कूल आफ ओरण्टियल स्टडीज III, पृ० ३५, ५२०—'२१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न, अपि तु रङ्गमञ्चोपयुक्तं संक्षिप्तं रूपं वर्तते-इत्येतत् प्रतिभाति[१]। इतरे तु अधः स्थितकारणवशात् तेषां त्रयोदशानामपि रूपकाणां कर्तृत्वं भासमेव गच्छन्तीति आमनन्ति—

(अ) तानि सर्वाणि रूपकाणि 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इत्येतस्माद् वाक्यात् प्रारब्धानि जायन्ते। एवं विधता नान्यत्र दृश्यते। बाणोऽपि भासस्य इमां विशिष्टतामुपन्यस्यति।

(आ) तेषां रूपकेषु 'स्थापना' इत्येतत् पदं प्रयुक्तं प्राप्यते न च प्रस्तावनेति पारिभाषिकं पदम्।

(इ) स्थापनायां रूपकस्य रूपककारस्य च नाम-निर्देशो न, यदा हि तदुत्तरकालवर्तिरूपकेषु तन्निर्देशः प्राप्यते। (एतेन तेषां रूपकाणां प्राचीनतरत्वं च सिद्ध्यति)।

(ई) प्रतिरूपकं भरतवाक्यं प्रायेण 'इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः' इत्येतेन वा एतदाशयजुषा श्लोकेनोपसंह्रियते।

(उ) सर्वेष्वपि रूपकेषु एकविधैव संघटनावाप्यते किञ्च केषुचन रूपकेषु मङ्गलाचरणात्मके श्लोके मुद्रालङ्कारो दृश्यते।

(ऊ) तेषु रूपकेषु भरताभिमतसिद्धान्तानां पूर्णतया निर्वहणं संगमनं च नोपलभ्यते।

तेषु रूपकेषु स्थिताभिराभि र्विशिष्टताभिस्तेषां कर्ता एक एव कविरिति निश्चीयते।

अलङ्कारग्रन्थेषु भासस्य रूपकेभ्यः कतिपयान्युद्धरणानि उद्धृतान्यवलोक्यन्ते। वामनः स्वप्नवासवदत्त—प्रतिज्ञायौगन्धरायण—चारुदत्तेभ्यो रूपकेभ्योऽनेकान्युद्धरणानि गृह्णन्नवेक्ष्यते, प्रतिज्ञायौगन्धरायणं पर्यालोचयन् भामहस्तस्मात् पंक्तिमाददान ईक्ष्यते। बालचरिते चारुदत्ते च स्थितं 'लिम्पतीव तमोऽङ्गानि'······इत्येतदादिश्लोक मुदाहरणत्वेन निदधानो दण्डी सम्प्राप्यते

१—थोमस : जर्नल आफ रायल ए० सो०, १९२८, ८७६ एफ एफ।
,, दासगुप्त : हिस्ट्री आफ संस्कृत लि०, खण्ड १, पृ०—१०७-१०८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिनवगुप्तो 'भारत्यां' 'लोचने' च स्वप्नवासवदत्तास्योल्लेखं कुर्वन् लभ्यते। राजशेखरश्च स्वप्नवासवदत्तास्य भासकर्तृकतां स्वीकुर्वन् अधिगम्यते। एतत् सर्वमेकतस्तेषां स्वप्नवासवदत्तादीनां सर्वेषां रूपकाणां भास एव लेखक इत्येतत् किञ्चान्यतो भासस्यलोकप्रियत्वमपि प्रमाणीकरोति। यस्य कवेर्नामं प्रथितं संस्कृत—सुधीसंसारादृतं भवति अथ च यः कविर्भवति पुरातनः स एव कविः संस्कृतपण्डितानां जगति गणनीयो जायते—इत्येतत् सम्प्रत्यपि दृश्यते। सन्ति वर्तमानेऽनेहसि अनेके संस्कृतकवयः परं संस्कृतपंडिता भारवि-भवभूति—माघादीन् एव पाठयन्तः पठन्तश्च प्राप्यन्ते न च ते अम्बिकादत्त व्यास···क्षमाराव पण्डित—हरिदास सिद्धान्तवागीशादीनां रचनाः अध्यापयन्तो लभ्यन्ते न च ते रुचिविशेषं दर्शयन्तश्चाधिगभ्यन्ते—इत्येतादृशी प्रकृति-प्रवृत्तिश्च ज्ञापयति यद् भामहदण्डिप्रभृतिविद्वद्वराणामाचार्याणां कालाद् भासस्य कालोऽवश्यमतिपुरातनः। यं भासं कालिदासोऽपि सादरं स्मरति तस्य पुरातनतरतायां को नाम सुधीः संशयीत ? केचन सुधियस्तु भासस्य रचनासु अपाणिनीयान् प्रयोगान् अथ कालिदासप्रयुक्तं प्राकृतभाषातोऽपि पुरातनतरीं प्राकृतभाषां तत्र प्रयुक्तां प्राप्य पाणिनेश्च प्राचीनोऽसावित्यप्यनुमिमते।

भासकवेः पुरातनतायाः पक्षे इदमपि विदुषां कथनं यत् प्रतिज्ञायौगन्धरायणस्थ 'नवं शरावं सलिलस्य······' इत्येतत्पद्यस्य कौटलीयार्थशास्त्रे दर्शनात् भासस्य कौटल्यात् प्राचीनतरत्वं सिद्ध्यति। प्रतिमानाटके भासो वृहस्पतिकृतमर्थशास्त्रमुल्लिखति तस्मात् कतिपये विज्ञास्तत्समये कौटल्यार्थशास्त्रस्यासद्भावमपि तर्कयन्ति। वस्तुतो वहिरङ्गान्तरङ्गोभयविधसाधनेन भासस्य समयः खैस्ताब्दप्रवर्तनात् प्राग्वर्त्येव अभ्यूह्यते।

भासप्रणीतेषु त्रयोदशस्वपि रूपकेषु सप्तरूपकाणि महाभारतीयकथाविषयकाणि सन्ति। रूपकद्वितयं रामायणकथानिष्ठमस्ति। अन्ये च द्वे उदयनकथामवलम्बेतेऽवशिष्टे च द्वे कल्पितकथां भजेते।

तेषां रूपकाणां नामानीमानि—

१—पञ्चरात्रम्, २—मध्यमव्यायोगः, ३—दूतवाक्यम्, ४—दूतघटोत्कचम्, ५—कर्णभारम्, ६—ऊरुभङ्गम्, ७—बालचरितम्, ८—प्रतिमा,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

९—अभिषेकनाटकम्, १०—स्वप्नवासवदत्तम्, ११—प्रतिज्ञायौगन्धरायणम्, १२—अविमारकम्, १३—चारुदत्तम् ।

भासेन स्वकीयेषु रूपकेषु क्वचित् क्वचित् कथावस्तुनि परिवर्तनं कृतमस्ति; तद्विहितं तत् परिवर्तनं यत्र तत्र चमत्कारपूर्णमपिजातमस्ति । तत्-परिवर्तनेन तस्य प्रतिभायाः पेशलता तद्गतमौलिकतोद्भावनप्रभविष्णुता च दर्शकाणां पुर उपतिष्ठेते । तस्य रूपकाणि वीक्ष्य विदितं जायते यत् तदीयं प्रमुखं लक्ष्यं रूपकस्यैव प्रणयनमासीदतः स तत्र श्लाघनीयां सफलतां प्राप्तवान् । स्वजनुः समयादेव तद्रूपकाणि लोकप्रियतापरां कीर्ति विन्दमानानि प्राप्यन्ते[1] ।

अथ भासकृतरूपकाणां कथावस्तूनि अतिसंक्षेपेण लिख्यन्ते :—

(१) पञ्चरात्रम्—

(रूपकस्यास्य कथा महाभारताद् गृहीतास्ति परं नाटकं सुखान्तं विधातुमनाः कविर्मूलकथायामनेकानि परिवर्तनानि विधाय स्वकीयाया मनोज्ञायाः कल्पनायाः मञ्जुलं संस्तवं प्रयच्छन् तत्र दृश्यते ।)

१—(क) प्रथितयशसां भास-सौमिल्लकविपुत्रादीनाम्·········मालविकाग्निमित्रे कालिदासः ।

(ख) सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशोलेभे भासो देवकुलैरिव ॥ (हर्षचरिते बाणः)

(ग) सुविभक्तं मुखाद्यङ्गैः व्यक्तलक्षणवृत्तिभिः
परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः (दण्डी)

(घ) भासनाटकचक्रेऽपि······दाहकोऽभून्न पावकः ।। (राजशेखरः)

(ङ) भासो हासः—(जयदेवः)

(च) अस्य नाट्यप्रणयनचातुरी नूनं किमपि लोकोत्तरसौष्ठवमवगाहते—
(संस्कृतसाहित्य विमर्शे आचार्यः द्विजेन्द्रनाथः)

(छ) भास का कवित्व सदा नाटकीयता का सहायक बनकर आता है—
(संस्कृतकविदर्शने डॉ० भोलाशङ्कर व्यासः)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यज्ञस्यावसाने यज्ञाङ्गदक्षिणात्वेनाचार्यायद्रोणाय तदीप्सितस्य कस्याप्यर्थस्य दानं दुर्योधनः प्रत्याशुश्राव। द्रोणः पाण्डवेभ्योऽर्धराज्यसंविभागेन स्वाभिलषितमर्थमशंसत्। ततः शकुनिच्छन्दानुवर्ती दुर्योधन "श्चेत् पञ्चरात्राभ्यन्तरेऽज्ञातवासिनां पाण्डवानां प्रवृत्तिरुपलभ्यते तर्हि अर्धराज्यं दास्यामि" इत्यपूर्वं समयं परिकल्पितवान्। अत्रान्तरे विराटनगरादागतेन प्रणिधिनोरुसत्वस्य कीचकशतस्य निगूढवधे निवेदिते भीमसेनादन्यो न कोऽपि भवितुमर्हतीति निश्चित्य विराटनगरे पाण्डवोदन्तस्योपालम्भनीयतां सम्भावयतो भीष्मस्य प्रेरणया द्रोणेन स्वीकृतः समयः। यज्ञानागमनापराधं चापदिश्य विराटस्य गो-ग्रहणं कर्तुं भीष्म-द्रोण-दुर्योधनादयः समराय तन्नगरीं प्रतस्थिरे। तत्र वृहन्नला-वेषच्छन्नात्मनार्जुनेन सर्वेऽपि कौरवाः पराजिताः समराजिरमपास्य प्रदुद्रुवुः। ततश्चाज्ञातवेषेण निवसतः पाण्डवान् विज्ञाय सत्कृत्य च विराटेन गोग्रहणविजयशुल्कार्थे दत्ता उत्तरा स्वपुत्रार्थेऽर्जुनेन प्रतिगृहीता। तत उत्तराभिमन्युविवाहकार्यं निवेदयितुं युधिष्ठिरेण स्वपितामहाय प्रेषितो विराटपुत्रः। इत्थं च पञ्चरात्राभ्यन्तरे पाण्डवानां प्रवृत्तिमुपलभ्य यथाप्रतिज्ञं दुर्योधनः पाण्डवेभ्योऽर्धराज्यं ददौ।

महाभारतादिह नामानि काश्चंश्च घटनारेवाहृताः। समस्तमपि रूपकं वस्तुतः कविकल्पनाप्रसूतमेव।

मुख्यानि परिवर्तनानि सन्तीमानि :—

(क) नाटकारम्भे दुर्योधनानुष्ठितयागस्य वर्णनं वर्तते। ततश्चद्रागेव गा गृहीतुं दुर्योधनादयो विराटनगरीं प्रतिष्ठन्ते। एवंविधं कथानकं महाभारते नावाप्यते। तत्रोत्तरगोग्रहणात् प्राग् दुर्योधनो न कमपि यज्ञमनुतिष्ठन् वर्णितः।

(ख) अभिमन्यु दुर्योधनस्य मखं विलोकयितु मायाति, ततश्चासावुत्तरगोग्रहणाय प्रतिष्ठते; कौरवाणां च पक्षमादाय स्वपित्रासह युध्यते-इत्येतत् सर्वं न महाभारते दृष्टं भवति।

(ग) महाभारतानुसारं राजा विराट उत्तरगोग्रहणसमये स्वराजधानीं नाधिवसतिस्म। स भीमादिना सार्धं दक्षिणगोग्रहणाय गत आसीत्। उत्तरो वृहन्नला (अर्जुनः) च उत्तरगोग्रहणार्थं यातावास्ताम्। परं रूपकेऽस्मिन् वर्णितं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद् विराट: स्वराजसौधे तदोपस्थित आसीत्। स तदोत्तरकौरवयोरन्तराले प्रवर्तमानस्य वार्ताश्रवणे संलग्न आसीत्। रणाजिराद् भीमकृताभिमन्युहरणं चात्रोल्लिखितम्।

(घ) महाभारते पाण्डवा उत्तरगोग्रहणव्यतिकराद् द्वि-त्रिदिनाभ्यन्तरे प्रकटीभवन्ति परमस्मिन्नाटके गोग्रहणाहन्येव धर्मराज आत्मानं प्रकाशं नयति।

(ङ) दुर्योधनो नैजप्रत्याश्रुत्यनुरूपं पाण्डवेभ्योऽर्धं राज्यं प्रदाय द्रोणेन सह कृतं समयं परिपालयति। अधिमहाभारतं दुर्योधनस्य चरित्रं नेदृशं चित्रितम्। तत्र तु स आह:—"सूच्यग्रं नैव दास्यामि विना युद्धेन केशव!"

नाटके कवि: महाभारतीयमुख्यमुख्यतथ्यान्युपेक्षमाणो नवनवायामुद्भावनायां प्रवर्तते। तत्कृतास्ता: उद्भावना: वस्तुत: सन्त्यपि स्पृहणीया:। ता: पाठकानां दर्शकाणां च पुर आदर्श-प्रभावं क्षिपन्ति।

भासो दुर्योधने एतादृशमुदारं सौहृद-मधुरं चरित्रं प्रदर्श्य समाजमध्ये सद्बन्धुतां सञ्चारयितुं ताञ्चोन्नमयितुं प्रयस्यति। नाटकान्ते तदीयो राजसिंह-प्रशासनाभिलाषश्च तात्कालिकीं राजनीतिक-परिस्थितिमपि कदाचिदा-लोचयति।

(२) मध्यम व्यायोग :—

एकमेवाङ्कंविभर्ति रूपकमिदम्। एतदीया कथेयम्—

कदाचित् कश्चित् स्थविरो महीसुर: सपुत्रकलत्रो हिडिम्बावने भीम-सूनुना घटोत्कचेनारुद्ध:। "मन्मातुर्हिडिम्बाया: उपवासपारणायै त्रिषु पुत्रेषु त्वमेकतमं पुत्रं प्रयच्छ" इत्युक्त: स ब्राह्मणो द्वितीयं पुत्रं मध्यमनामानं विसर्जयामास। अथ पिपासामपनेतुं कमपि दवीयांसं कासारं प्रपन्नोऽसौ मध्यमो घटोत्कचेन मातुराहारकालात्ययशङ्कया नामग्राहमुच्चैराहूत:। तदाह्वानं निशम्य पाण्डव-मध्यमो भीमोऽहमाहूये इति सन्तर्क्य तत्स्थानमाजगाम यत्र स ब्राह्मण उपस्थित आसीत्। तेन ब्राह्मणेनाभयं याचितो भीम:। ततो भीमो वृद्धं विप्र-सुतं पातु-मात्मानमेव हिडिम्बाहारत्वेनाकल्पयत्। ततश्च भीम: स्वपुत्रं परीक्षितुमना: प्रावोचत्—"घटोत्कच, शक्तश्चेद् बलान्मां नय"। पराभवितुमशक्नुवता राक्षसेन पूर्वसमयं स्मारितो भीमस्तमनुसरन् हिडिम्बाया: सविधे प्रापद्यत। हिडिम्बया

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भार्योचितसमुदाचारेण भीमः सम्भावितः। घटोत्कचोऽपि मातृवाक्येन तं स्वपितरमभिज्ञाय अभ्यवादयत्। भीमश्च तं परिष्वज्याशिषानुजग्राह।

आपन्ना ब्राह्मणाः उद्धरणीया—इत्येतद्विधा व्यञ्जना कदाचिदस्मिन् कथावस्तुनि विद्यते। कथेयं तदा बलिप्रथा प्रवर्तमानासीदित्येतदप्यनुमापयति।

(३) दूत-वाक्यम्—

अत्रैकोऽङ्कः। व्यायोगविधया विनिर्मितमिदम्। महाभारत-समरात् प्राक् पाण्डवहिताय दुर्योधन-सभायांकृतं दौत्यं कृष्णस्य रूपकेऽस्मिन् वर्णितम्। कविनेह द्रौपदी-केशांशुकावकर्षणात्मकचित्रपटव्यतिकरः,सुदर्शन-शार्ङ्ग-कौमोदिकी-पाञ्चजन्य-नन्दकायुधानामपि सम्भावना श्रीकृष्णस्य नमस्यायै सम्यगालिखिता। नैवंविधां घटनां महाभारतमुपन्यस्यति। एतयोरुभयोरपि वस्तुनः समावेशनं विधाय कविना कथावस्तु नाटकीयया शोभयालङ्कृतम्। अन्यथा तन्न दर्शकहृदयमावर्जयितुं शक्नुयात्। चित्रपटं प्रणिधाय रूपककारेण सामाजिकानां चेतांसि प्रीणयितुं सफलेहानुष्ठिता।

दुःशासन-परामृष्टाया पाञ्चालतनयायाः, गाण्डीवमौर्वीमाकर्षतो गुडाकेशस्य, परुषरागजुषोर्नकुल-सहदेवयोः, प्रगल्भामर्षवशात् सभास्तम्भं तुलयतो वृकोदरस्य च सन्निवेशमालेख्येन कारयित्वा रूपककारोऽतिलाघवेन श्लाघनीयेन प्रावीण्येन मनोऽभिरामयादिशया सामाजिकानां समक्षे न केवलमतिक्रान्तां घटनां प्रस्तवीति अपितु दुर्योधन-शकुनिप्रभृत्याचरितं दुष्कृत्यमपि समुन्मीलयति। एतावदेवानुष्ठाय न स विरमति दिव्यसुदर्शनाद्यायुधानामप्याभां विभाव्य भगवतः श्रीकृष्णस्य सामर्थ्यं तदीयमनन्तमहिमानञ्च वितनोति। कविकृतोऽयं महीयान् प्रयासः पाण्डवानां सच्चरित्रचारुतां, दुर्योधनस्य दुहृदयतां, भीष्मद्रोणादीनां सत्पक्षेऽनुरक्ततां, धृतराष्ट्रस्य व्यामोहपरतां, भगवतः श्रीकृष्णस्य च निर्भीकत्व-शूरत्व-विवेकित्व-राजनीतिज्ञत्वादिविविधसद्गुणानपि युगपदेव विवृणोति।

कविः समाजेऽन्यायं सद्बन्धुषु बन्धूनामेव दुर्व्यवहारं कदापि नोचितं मन्यते। स एकतस्तु स्वसंस्कृतेराधारभूतां महाभारतीयां कथां सर्वत्र देशे प्रसारयितुमाकाङ्क्षति; अपरतश्च सः समाजस्थं किं वा बन्धुजनस्थं मालिन्यमपहर्तुं कामयते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४) दूतघटोत्कचम्—

एतस्मिन् रूपके रूपककारेणाभिमन्योर्निधन, श्रीकृष्ण-प्रेरितस्य दूतत्वं नीयमानस्य घटोत्कचस्य दुर्योधन-सकाशेगमनं, "तिष्ठ त्वं सह पाण्डवैः प्रतिवचो दास्यामि ते सायकं" रित्येतत्सन्देशस्य च श्रीकृष्ण-सेवायां सम्प्रेषणं वर्णितम्। एषोऽपूर्वः सन्दर्भः कविना स्वयमेवोत्प्रेक्ष्य संगुम्फितः। दुर्योधनघटोत्कचयोः परिसम्वाद इह वीररसमभिव्याप्य देदीप्यते। हरिवंश-विष्णु-भागवत-कथा-वस्तुना सह नैतदीयं कथावस्तुसाम्यं वहद् दृश्यते।

महाभारतादिपुराणकथाः प्रगृह्य रूपकाणां प्रणयनं कविवर्तिकालस्य पुराण-प्रियत्वं प्रथयति किं वा तत्कालगामिनः संस्कृतविपश्चितः पौराणिकतामथवा ब्राह्मणधर्मं प्रौढ़तरं कर्तुं कृतसङ्कल्पा आसन्नित्यभ्यूहयते।

(५) कर्णभारम्—

अस्मिन् रूपके ब्राह्मणच्छद्मने शक्राय कर्णस्य कवच-कुण्डलार्पणमुपनिवद्धम्। अत्र कर्णस्य दानशीलं चरित्रं निरूप्य दानस्योत्कृष्टतां सन्दिशति रूपककारः।

(६) ऊरुभङ्गम्—

भीम-दुर्योधनयोर्गदा-युद्धमिह वर्णितम्। गदायुद्धे भीमोभवत्यनीतिपरः। अतः क्रुध्यति भीमाय हलायुधः परं श्री कृष्णस्तत्कोपं संवृणोति। अत्र रूपके अश्वत्थाम्नः प्रचण्डं चरित्रमुत्थाप्य रूपककार एकां नूतनामेवोद्‌भावना मुत्ससर्ज। तत्फलमिदं भवति यन्मरणोन्मुखोऽपि दुर्योधनो विजयाशां प्रकटी-कुर्वन्नवाप्यते।

'अभिषेके' यथा वालीं रङ्गमञ्चे म्रियमाणो वीक्ष्यते तथैवेहापि दुर्योधन उपरममाणोऽत्र नोक्ष्यते। दुर्योधन-चरित्राङ्कने कविः कृत्स्नतया साफल्यमश्नुते असुन्दरं चरित्रं निदधानोऽपि दुर्योधनः क्षत्रियोचितयशस्करनिधनं विन्दमा-णश्चात्रोपलभ्यते।

कविदृष्टिर्गुणानुरागास्ति। यानि पात्राण्यन्यत्र दोषवन्ति समलक्ष्यन्त तान्येव पात्राणि कवि-लेखनी गुणवन्ति विधाय सर्वेषामपि पुरः प्रस्तवीति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कविः समाजस्य गुणान् तानितानि च वैशिष्ट्यानि प्रदर्श्य तदीयाभ्युदये मतिं निवध्नाति ।

(७) बालचरितम्—

अस्मिन्नाटके वालस्य श्रीकृष्णस्य जनुरारभ्य कंसस्य व्यापादनं यावत् कथावस्तु गृहीतमस्ति । परं नात्र तथा श्रीकृष्णस्य चरितं कीर्तितं यथा भागवत्-विष्णुपुराण-हरिवंशादौ गीतम् । इह श्रीकृष्णो वसुदेवस्य सप्तमः सूनुरभिहितः ।[1] श्रृङ्गाररसो नः क्वचिद्प्यास्वाद्यते । अरिष्टस्येह निधनं मञ्च एव प्रदर्श्यते । इतिवृत्तदृष्ट्या बालचरितमपूर्वं रूपकं प्रतिभाति । स्वप्ने कंसस्य चाण्डालयुवत्याः दर्शनं, मञ्चोपरि राजलक्ष्म्याः शापस्य चाकारं निधायावतरणं दर्शका इह पश्यन्ति । दूतवाक्यमिवेहापि कृष्णस्यायुधानि मञ्चेऽवतरन्ति । अरिष्टनेमि वृषरूपं निदधानोऽपि मानव इव व्यवहरति ।

वस्तुतो नाट्यकलादृष्ट्या न सफलं रूपकमिदम् ।[2] नात्र व्यापाराणामन्वितिः प्राप्यते । डा० कीथोऽस्मिन् रूपके कवेः प्रतिभायां मौलिकतामीक्षते । रूपकस्यानेकसांस्कृतिकभावोद्भावित्वे न संशीतिः । जनतायां सांस्कृतिका भावाः संवर्धन्तामित्येतद् विमृश्य कविश्चकार कृतिमिमामित्यनुमीयते । कविर्हि यस्मिन् भावे रुचिं पुष्णाति स तमेव भावं वर्धयितुं भृशमिच्छति । स्वकीयामिच्छां यादृशसाहित्यद्वारेण सफलतामासादयन्तीं सः पश्यति तादृशस्यैव साहित्यस्य सः सृष्टिमपि कुरुते । भासः स्वकीययस्य देशस्य पौराणिक्याः संस्कृतेः प्रसारणार्थमेव स्वानि रूपकाण्यररचदिति तर्क्यते ।

(८) प्रतिमा—

रूपकमिदं रामायणात् कथावस्तु प्रगृह्णाति । तत्रापि तत्रत्याद्यकाण्डद्वयात् । परं रामायण-गृहीते तस्मिन्नितिवृत्ते कवेः कल्पनाकलिता प्रतिभा बहूनि भव्यानि परिवर्तनानि विभावयाम्बभूव । तेनैतद्रूपकस्थकथावस्तु नैजकथा-

---

१—बालचरित-द्वितीयाङ्के, ५३२ तमे पृष्ठे, ओरण्टियल बुक एजन्सी, पूना, द्वितीय-संस्करणम् ।

२—डे : हिस्ट्री ऑफ संस्कृत लिट्रेचर, पृ० ११५ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वस्त्विव संवृत्तम् । तैः कल्पनाप्रसूतैरुपक्रमणैर्मूलकथानकमतितरां नाटकीयया आभया समुल्लसितीक्रियते ।

कविकल्पना-सृष्टानि चित्राणि सन्तीमानि :—

(क) मातुलसद्मनो निवृत्तस्य भरतस्य दिलीप-रघुप्रभृतिप्रतिमाभि; साकं संस्थितस्यस्वपितु र्दशरथस्यापि प्रतिमायाः प्रेक्षणम् ।

(ख) रामस्य कुशलतायाः अवगमनाय सुमन्त्रस्य वन-प्रस्थानम् ।

(ग) दशाननस्य विपिने रामकृतसपर्यायाः स्वीकरणम् । रावणं पुरोहित-त्वेन अभ्युपगम्य तत्पौरोहित्ये रामस्य स्वपितृ-श्राद्धाचरणम् ।

(घ) रामस्य साहाय्याय भरतस्य लङ्काप्रयाणविनिश्चयः ।

(ङ) रावणं व्यापाद्य सीतासहितस्य रामस्य पुनस्तपोवनदर्शनाय विमानादवतरणम् । मातृभिः पौरैश्च समं भरतस्य रामावलोकनाय अरण्य-गमनम् ।

(च) भरताल्लक्ष्मणस्य ज्यायस्कता (कविना पद्मपुराणानीतमिदं तथ्यम्) नाटकस्यास्य कथा—

श्रीरामाभिषेकोपक्रमे प्रवृत्ते सति मन्थराकृतोपक्षेपद्वारेण प्रवृत्तस्याभिषेका-रम्भे प्रत्यवाय-निपातः । कैकेयीवचनाद् राज्ञा रामो निर्वासितः । परं पुत्र-वनगमनशोकाद राजा पञ्चत्वं गतः । अथ मातुलगृहात् प्रतिनिवृत्तो भरतः प्रतिमागारे प्रपितामहादिप्रतिमानां मध्ये प्रतिष्ठापितां प्रतिमां विलोक्य विदित-पितृनिधनोदन्तो निर्भर्त्सयाञ्चक्रे स्वमातरम् । ततश्च सः रामं द्रष्टुं वनमियाय । यदा राममयोध्यां प्रतिनिवर्तयितुमसौ न प्रबभूव तदा तदीयपादुके गृहीत्वा-ऽयोध्यां निववृते । तत्र चारण्यवासमनुभवति रामे मायाभिक्षुणा लङ्काधिपतिना सीता अपहृता । सुमन्त्र-निवेदित-सीतापहारो भरतो रामसाहाय्याय लङ्कां गन्तुं मतिं बबन्ध । रामः कपिसैन्यसहायो भूत्वा रावणं हत्वा सीतां च गृहीत्वा पुनः आश्रमपदमाससाद । एतां प्रवृत्तिमुपलभ्य मातृभिः प्रजाभिश्च सह भरत आश्रमपदं पुनः प्रत्यपद्यत । ततश्च भरताद् प्रतिगृहीतराज्यो रामो राज्येऽभ्य-षिच्यत् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामवत् प्रवर्तितव्यं न रावणवदित्येतं रामायण दत्तमुपदेशं पुनः स्मारयितुं कविर्मन्ये नाटकमेतदररचत्। इच्छति स यत् तदीया मातृभूमिर्भूयो राम इव सदाचारवती भवेद् येन संसारस्तां पुनः सादरमभिवादयेत्। स्वदेशोत्थापनाय कवय ईदृशमेव साहित्यं सृजन्तीति सर्वविदितम्।

(९) अभिषेक नाटकम्—

एतस्मिन् नाटके किष्किन्धा-सुन्दर-युद्धकाण्डसम्बन्धिनी कथा गीतास्ति। बालि-सुग्रीवयो र्युद्धं सकृदेव वर्णितम्। बालिनो व्यापादनस्य कारणं नात्र निर्दिष्टम्। मृत्युश्च तदीय इह मञ्चोपर्यैव प्रदर्शितः। न च ताराया विलापोऽत्र कारितः। यदैव यवनिका-पृष्ठतस्ताराया: क्रन्दनं श्रुतं भवति बाली तां मञ्चागमनान्निवारयति। न स इच्छति यत् तदवसानं सा प्रेक्षेत। नाटकान्ते दशरथानुमत्या रामो राज्येऽभिषिच्यमानश्च दृष्टो जायते।

नाटकस्यास्य वैशिष्ट्यमिदं यद् दर्शक-मानसे तत् कौतूहलं जनयति।

(१०) स्वप्नवासवदत्तम्—

मगधेश्वरस्य दर्शकस्य राजकुमारी पद्मावती वत्सराजस्य उदयनस्य महिषी भवितेत्येतत् सिद्धादेश प्रत्ययाद् वत्सराजस्य मन्त्री योगन्धरायणो रुमण्वदाद्य-मात्यैः सह सम्मन्त्र्य वासवदत्तां नामास्य परिणीतपूर्वां महिषीं महासेन-दुहितरं लावाणकग्रामदाहे दग्धामात्मानं चैनामभ्यवपत्तुकामं तस्मिन्नेवाग्नौ पतितमपदिश्य परिव्राजकवेषधारिणीं वासवदत्तां गृहीत्वा 'इयं मे स्वसा प्रोषितभर्तृकामिमामत्रभवत्या कञ्चित् कालं परिपाल्यमानामिच्छामि' इति सम्प्रार्थ्य एनां पद्मावत्या हस्ते न्यासीकृत्य मपक्रान्तः। अथ वासवदत्ता—विरहार्तो वत्सराजोऽन्येन प्रयोजनेन मगधेशस्य भ्रातुर्दर्शकस्य राजधानीं राज-गृहं प्राप्तः सन् तेन राज्ञा अभिजनविज्ञान—वयोऽनुरूपं दृष्ट्वा स्वयमेव दत्तां पद्मावतीं महिषीत्वेन प्रतिजग्राह।

अथान्येद्युश्शिरोवेदनया दुःखितां पद्मावतीमाश्वासयितुं समुद्रगृहकं गतो वत्सराजस्तामनागतामवलोक्य शय्यायां तां प्रतिपालयन् अशयिष्ठ। अस्मिन् अन्तरे वासवदत्ता तत्रागता। सा च पद्मावती शेते इति विज्ञाय तस्मिन् पर्यङ्के वत्सराजस्य सविधे संविष्टा सती वत्सराजमुत्स्वप्नायमानं निशम्य झटित्युत्थाय

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वप्नवचोऽनुसारं किमप्येनमाभाष्य शय्याप्रलम्बितं चास्य शयं शय्यायामारोप्य सहसा निश्चक्राम । वत्सराजोऽपि प्रबुध्य संभ्रमेणानुधावन् एनां द्वारपक्षेण ताडितो रुद्धगतिर्बभूव । ततः किमयं भूतार्थो वा मनोरथ इति नाज्ञासीत् । एतदनन्तरं दर्शकस्य सहायतया द्विषदमारुणिमवस्कन्द्य स्वविषयान् वत्सान् लभमान उदयनो रणरणकखिन्नो वासवदत्तायाश्च चित्रफलके आलिखितां प्रतिकृतिं पद्मावत्या सह यावत् पश्यति

तावत्-तयाभिहितम् 'आर्यपुत्र, अस्याः प्रतिकृत्या सदृशीहैव प्रतिवसति, स हि मम कन्याभावे केनापि विप्रेण मम स्वसेति न्यासो निक्षिप्त' इति । ततस्तया सह आगतां वासवदत्तां प्रत्यभिज्ञाय यौगन्धरायणस्य स्वामिहितरतजीवनस्य नीतिविजृम्भितं बुद्ध्वा परमप्रीतस्ताभ्यां पत्नीभ्यां सह सुखमनुबभूव ।

उदयनस्य कथा पुरातनी । सा लोके लोक-गीतिर्भूत्वा भारतस्य सर्वास्वपि दिशासु, मन्ये चिरमगुञ्ज्यत । कुशलरूपककारेण तत्र स्वप्नस्य मधुरामुद्भावनां विधाय किञ्च तां रूपकतायां परिणमय्य वस्तुतः सा मधुरा गीतिर्मधुरतरायां निमज्जितास्ति ।

एतत्स्वप्नवासवदत्तं रूपकं विनिबध्य कविर्लोकप्रियासु कथासु नैजाभिरुचिमाकलयन्, जनो वस्तुतः प्रेम्णि जीवतीति ज्ञापयन् 'यस्मिन्, कालेऽसौ स्थितिं चकार तस्मिन् काले लोकः तादृशीपु रसवतीसु कथासु विशेषतोऽनुरागं हार्दिकं निदधाविति च सन्दिशति ।

(११) प्रतिज्ञायौगन्धरायणम्—

अस्मिन्नपि रूपके कलाललितोदयनस्य स्वामि-भक्तस्य च यौगन्धरायणस्येतिवृत्तं विभाति । कथानकमेतदीयमिदम्:—

एकदा आखेट-व्यसनी वेणुवन्नागवनमगमत् । तत्र प्रद्योतोपन्यस्तं वनगजप्रच्छादितगात्रं कपटकरेणुं परमार्थहस्तिनं विज्ञाय वीणया तं वशीकर्तुं यावद्यतते तावत् सहसा कपटहस्त्यधिष्ठातृभिः प्रद्योतस्य योधैः सः परिवार्य प्रधर्षितः । सालंकायनो नाम प्रद्योतस्यामात्यस्तमुज्जयिनीमानिनाय प्रद्योताय च समर्पयामास । प्रद्योतश्च स्वकन्यां वासवदत्तां गन्धर्वासक्तां ज्ञात्वा वत्सराजाद् गृहीतां घोषवतीं वीणां तस्यै प्रदाय तमन्तःपुरेऽवरुरोध । तत्र चान्योन्यदर्शनेन समुत्पन्नकामौ

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वासवदत्ता-वत्सराजौ प्रच्छन्नं गान्धर्वेण विधिना सम्पादितोद्वाहौ सुख-मनुभवन्तौ स्थितौ । अथ यौगन्धरायणः स्वस्वामिनि परकृतप्रतारणं प्रणिधिमुखान्निशम्य तत्र च बन्धनेऽपि स्वामिनमवन्तिराजतनयावशीकृतमानसं ज्ञात्वा विषण्णः स्वस्वामिनो घोषवत्याश्च वासवदत्तया सह प्रत्यानयनं प्रत्याश्रौषीत् । अथ च काले सर्वान् स्वीयान् पुरुषान् युद्धाय सन्नाह्य दत्तसमयानुरोधेन स्वामिनि वासवदत्ताद्वितीये करेणु-भद्रवतीमधिरुह्य उज्जयिन्या निष्क्रान्ते शत्रुभिर्युध्यमान एव गृहीतो यौगन्धरायणः । गुणग्राहिणा प्रद्योतेन तु पूर्वाभिप्रेतजामातृलाभ-प्रीतेन सत्कृत्य कौशाम्बीं प्रेषितः ।

रूपकस्यास्य कथा गुणाढ्य-कृतवृहत्कथास्थितां कथा मनुहरति । एतद्-रूपकं किञ्च स्वप्नवासवदत्तं हि भासकविरचितरूपकेषु श्रेष्ठे रूपके मते स्तः । उभयत्राप्युदयनस्य वृत्तं गीतमस्ति । उदयनो बुद्धानेहसि सम्बभूवेतीतिहासविदां विचारः[१] । श्रूयते यन्महात्मनो बुद्धस्य समये पाण्डवानां वंशधरा वत्सेषु राज्यं चक्रिरे; तेषां राजधानी कौशाम्बी बभूव । उदयनो वत्सराजः कलासु ललितासु च कुशलतां जगाहे; शौर्य्ये सः विपुलां कीर्तिमलभत । उदयनानन्तरं तदुत्तराधिकारिणोऽनेकेऽशासिषुः । ततश्च राज्यं मगधेष्वन्तर्हितमजायत् ।[२]

अवन्तिराजः प्रद्योतो महांच्छूरः प्रकृत्या च मन्युमानासीत् । तदीयो राजवंशः ख्रैष्टाब्दात् पूर्ववर्तीनि ४०० वर्षाणि यावत् प्रावर्तत् । ततश्च मगधराजः शिशुनागः स्वकीये राज्ये तद्वंशस्य राज्यं न्यलीलयत्[३] ।

विशाखदत्तस्य मुद्राराक्षसमिव यौगन्धरायणनाटकमपि राजनीतिकगति-विधिभिरुद्ग्रथितं वर्तते । परं मुद्राराक्षसं शुद्धं राजनीतिकमेव । न तत्र प्रणय-कथायाः कणिकापि । अत्र रूपके तु राजनीतिः प्रणयश्च वाससि तन्तव इव स्यूतौ स्तः । स्वप्नवासवदत्ते घटनाचक्रं विशिष्टवैदग्ध्यपूर्वकं विनिबद्धमस्ति । न तत्र कार्यान्वितिर्ध्यानपथाद् अवस्रंस्येते । सर्वत्र रसोद्रेकः, कथाप्रवाहः, औत्सुक्यवर्द्धिनी वर्णनरीतिः, अवदातः संवादः, हृद्यं च वातावरणं प्रतिलक्ष्यते । नाटकस्यास्य च लोककथा कवेः प्रतिभया शक्रशरासनमिव नयनानन्दिनी

१—दी कैम्ब्रिज हिस्ट्री ऑफ इंडिया, खण्ड १, प० १३, पृ० २७७ ।
२, ३—महावीराधिकारिणः भारत का चित्रमय इतिहास ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संवृत्तास्ति। पद्मावती वासवदत्ता च द्वेऽपि नायिके स्वस्वचरित्रं परमकमनीयतया परिपुष्णीतः। नूनं स्वप्नवासवदत्तमतिशयभावभव्यं भवदक्षुण्णप्रभावपेशलतां बिभर्ति।

जैन-बौद्धग्रन्थेभ्यो हि स्वप्नवासवदत्तस्य प्रतिज्ञायौगन्धरायणस्य च कृते कथावस्त्वादत्तमिति केचनन्निगदन्ति। तन्न। जैनकथानां यत् साहित्यिकं रूपमाप्येते साम्प्रतं तदीशवीयद्वादशशतकवर्ति वर्तते। बौद्धकथानामपि काल ईशवीयं चतुर्थं किं वा तृतीयं शतकं जुषते। भासस्तु अखैस्तकालिकः। उदयनवृत्तं यथा चोपरि प्रोक्तं वृहत्कथांतःपरिगृहीतमिव प्रतिभासते। पैशाचीभाषा निबद्धेयं वृहत्कथाधुना नोपलभ्यते। परं तदीयानि संक्षिप्तानि त्रीणि संकलनानि प्राप्यन्ते। तानि सन्तीमानिः—

(१) वुद्धस्वामिनो वृहत्कथाश्लोकसंग्रहः, (२) क्षेमेन्द्रस्य वृहत्कथामञ्जरी, (३) सोमदेवस्य कथासरित्सागरः।

आसु तिसृष्वपि रचनासु उदयन-चरिते भिन्नत्व मवलोक्यते। कथासरित्सागरस्यैवोदयनकथा भासवर्णितोदयनकथायाः सन्निकाशे आत्मानं प्रापयति। कथासरित्सागरे एतादृशानि बहूनि पद्यानि सन्ति यानि भासस्य प्रतिज्ञा-स्वप्नयो र्वर्णनं संवदन्ति ; किन्तु कथासरित्सागरकारः सोमदेव इव भासो वृहत्कथां सर्वांशतो नानुससार। कथायां नाटकीयं सौन्दर्यं रसं च समुत्थापयितुं भासः कथाक्रमे नैकानि परिवर्तनान्युपयुयुजे। तदित्थम् —

कथासरित्सागरे[1] प्रद्योतो मगधानां राजाभिहितो भासस्तु दर्शकं मगधाधीशं प्रतिपादयति। भासः पद्मावतीं दर्शकस्य भगिनीं मन्यते परं कथासरित्सागरे सा प्रद्योतस्य दुहितृत्वेन समाम्नातास्ति। अपहृतस्य राज्यभागस्य लाभाय वासवदत्ता न्यगूह्यत इत्येतद्भासो वदति परं नवराज्याधिगमनाय सः सर्व उपक्रमः कृतोऽभूदिति सोमदेवो भणति। वासवदत्ताया भ्राता गोपालकः कूटप्रबन्धसाहाय्यकृदासीदिति सोमदेवस्य मतं परं भासस्तदभ्युपगततन्मतं नाभ्युपगच्छति। वस्तुतः कथासरित्सागरवर्णितोदयनवृत्ताद् भासस्योदयनवृत्तं बहुत्र विपरीतमेव। एवं प्रतीयते भासः कस्याश्चन ग्रन्थस्थायाः कथायाः आश्रयमगृहीत्वा-

---

१—कथासरित्सागरः, पृ० ४८, तृतीयलावाणावलम्बके।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जनतायां प्रचलितां दन्तकथामुपयुयोज। नूनं भासोऽवन्तिकावास्तव्यस्य एकैक-जनस्य कण्ठमधिवसन्तीं रसनायां विचरन्तीं वा उदयनकथां नैजनाटकस्य कथावस्तुत्वेनाजहार।

(१२) अविमारकः—

चण्डभार्गवर्षेर्वर्षभोग्यशापात् सपुत्रकलत्रः श्वपाकत्वमवाप्तः सौवीरराजः कुन्तिभोजनगरे प्रच्छन्नमुवास। तस्यात्मजो विष्णुसेनोऽविरूपधृतोऽसुरस्य मारणादविमारक इति नाम्ना ख्यातो बभूव।

असौ कदाचित् स्वमातुलस्य कुन्तिभोजस्य दुहितरं कुरङ्गीमुद्यानगतामञ्जनगिरिसंज्ञकमदान्धद्विपराजसंरम्भात् पर्यत्रायत। ततः प्रभृति प्रवृद्धानुरागयोः कुरङ्ग्यविमारकयोर्घटनाय कुरङ्ग्याः धात्री कदाचिद् रात्रावेनं सुगूढं कुरङ्ग्याः अन्तःपुरं प्रावेशयत्। तत्र च सोऽविच्छिन्न सुखसम्भोगेन तया सह कालं निनाय। एवं च सम्वत्सरेऽतिक्रान्ते विदितवृत्तान्तेन कुन्तिभोजेन सुरुद्धे कन्यापुरे अविघ्नेन निर्गत्य कतिपयदिवसप्रोषितः स मदनेनान्तर्दह्यमानो जीवितुमसमर्थो दावाग्नौ पतितोऽप्यात्मानमविकलमायुष्यमालोक्य मरुत्प्रपाताय कमपिमहीध्रमारुरोह। अत्रान्तरे तस्मिन्नेव शैले कश्चिद् विद्याधरः सप्रेयसीको विश्रमितुमवततार। प्रणिधानतो विदितवृत्तान्तः स दयमानस्तस्मै अङ्गुलीयकमदत्त यद् वामेतराङ्गुल्या धृतं धर्तारं तत्स्पृष्ट-स्पृष्टश्चान्तर्हितं विदधाति, वामाङ्गुल्या धृतं तु पुनः धर्तारं प्रकृतिस्थम्। ततस्तद् दक्षिणाङ्गुल्या धारयन् स्ववयस्कविदूषकेण सह कन्यापुरः पुनः प्रविश्य तया सार्धं स्वैरं चिरं रममाण उवास। कुन्तिभोजस्तु जामातृत्वेन चिरमभिलषितस्य अविमारकस्य प्रवृत्तिमलभमानो भागिनेयान्तरं काशिराजपुत्रं जयवर्माणं प्रति कुरङ्गीं दित्सति स्म। अथ कालेन सौवीरराजं स्वनगर एव प्रच्छन्नं प्रतिवसन्तं ज्ञात्वा गूढपुरुषैरेव अन्विष्योपलभ्य च यावदुदन्तं तं तस्मादेव शृणोति, तावत् तत्र देवर्षिनारद आजगाम। तेन च कथितं यथा कुमारोऽविमारकः कुन्तिभोजस्य सोदर्यां काशिराजस्य महिष्यामग्नेरुत्पन्नः। तया च स्वभगिन्यै सौवीरराजमहिष्यै सुचेतनायै मृतसुतायै प्रसूतिकाल एव समर्पितः। सोऽयमविमारकोऽधुना विद्याधरेण प्रीत्यान्तर्धानकार्यमात्रमङ्गुलीयकं दत्तं धारयन् कन्यापुरं प्रविश्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुरङ्ग्यां यथेष्टमभिरममाणः सुखमास्ते । अथ अविमारकः कन्यान्तपुरान्निर्गत्य देवर्षिनारदमभिवाद्य मातुलेन स्वपितृभ्यां च सङ्गतस्तैराशीभिरभ्यनन्द्यत ।

उपरिनिर्दिष्टाविमारककथा कामसूत्राद् गृहीतास्ति । अविमारककथायाः प्रणयभावस्निग्धत्वात् कवि-समये कदाचित् लोके कथितत्वं श्रुतत्वं च नीतासीदतः कविस्तां दृश्यकाव्यत्वेन जगौ । रूपकमेतदतिशयभावावेशाविष्टम् । डॉ० कीथः प्रणयकथाधारकमिदं सुन्दरं रूपकं मन्यते ।

अस्माद् रूपकात् कविसमयवर्तिन्याः सामाजिकस्थित्याः खलु पर्याप्तः प्रकाशः प्राप्यते । तदानीं नगराणि सुभव्यानि सुपरिष्कृतघण्टापथानि आलोकालोकितानि विशालविशालतरप्रासादरम्याणि विलसितदीर्घिकोद्यानानि वादनयन्त्रसुमधुर-ध्वनिपूरिताम्बराणि शुशुभिरे इति विदितं सञ्जायते ।

(१३) चारुदत्तम्—

चारुदत्तरूपकस्य कथोज्जयिन्याः सार्थवाहस्य वसन्तसेनाया गणिकायाश्चा-दर्शप्रेम्णा विनिबद्धास्ति । मृच्छकटिककार इदमेव रूपकं विपुलीकृत्य प्रणिनायेति प्रतीयते । चारुदत्ते यादृशी प्रणयकथा गीतास्ति ध्रुवं तादृश्य एव पुष्कलाः प्रमकथाः गुणाढ्यविरचितायां वृहत्कथायां राजमाना आसन् । सोमदेवकृतकथा-सरित्सागरमधीत्येदमनुमानं परिपोषणमुपैति । सोमदेवो 'वडकहा'तो भृशं प्रभाव-मवापेति प्रतिलक्ष्यते ।

सुभाषितग्रन्थेषु कतिपयानि पद्यान्येवंविधान्याप्यन्ते यान्यधिकृत्य प्रसिद्धि-रेषा यत् तानि भास-लिखितानि विद्यन्ते । परं तानि तत्कृतिषु न दृश्यन्ते । सम्भवमिदं तानि कवेस्तासु कृतिषु व्यराजन्त याः सम्प्रति नोपलभ्यन्ते[१] । भासेन त्रिंशत् कृतिभ्योऽप्यधिकाः कृतयोऽक्रियन्त-इत्येषानुश्रुतिरप्यस्त्यतस्तत् तर्क्यते । सुभाषितग्रन्थस्थानां श्लोकानां भासस्य स्फुटरचनान्तर्गतत्वमप्युन्नीयते । कृष्णचरिते प्रोक्तं यद् भासो विंशतिरूपकाणि लिलेख । अर्थद्योतनिकायामुक्त यद् भासो नाट्यशास्त्रमपि रचयामास । चेदिदं सत्यं तदा सम्भवमेतद् यत् तानि सुभाषितग्रन्थस्थानि पद्यानि नाट्यशास्त्रीयाण्येव स्युः ।

१—ए० डी० पुसालकरः टू सेवन्टीन्थ सेंचुरी वर्क्स ऑफ भास, पूना ओरण्टियल वाल्यूम ८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भासस्य प्रभाव उत्तरकालीनेषु स्पष्टतः प्रतिभासते। अश्वघोषो बुद्धचरिते 'काष्ठादग्निर्जायते मथ्यमानादित्यादिपद्यमनुकुर्वन् प्राप्यते। शूद्रकस्य मृच्छकटिके भासस्य च चारुदत्ते वस्तु-भाव-भाषा-वर्णनानि साम्यवन्ति दृश्यन्ते। चारुदत्तस्यानेके श्लोका यथायथं प्राप्यन्ते मृच्छकटिकेऽपि। केचन श्लोकाः स्वल्पमेवान्तरं जुषाणा उभयत्र विलोक्यन्ते। भवभूते रुत्तररामचरिते द्वितीयेऽङ्के आत्रेय्याः उक्तिषु स्वप्नवासवदत्तस्थब्रह्मचारिणो वचसां छाया प्रतिलक्ष्यते। मालतीमाधवे अविमारके च दण्डकप्रयोगः सादृश्यमेव गृह्णाति। भट्टनारायस्य वेणीसंहारस्थितानां पात्राणां वैचित्र्यमौद्धत्यं च पञ्चरात्रगतानि पात्राणि स्मारयतः। कालिदासस्तु भासं स्वीयादर्शत्वेनाभ्युपपद्यते। प्रतिमायाः स्वप्नस्य च कतिपयानि रुचिराणि तत्वानि शाकुन्तले शोभितैस्तत्वैः सह मनागपि न व्यभिचरन्ति। दुर्वाससः शापो, मारीचाश्रमे शकुन्तलादुष्यन्तयोः संगमनं च कालिदासोऽविमारके चण्डभार्गवस्य शापमथ च आश्रमे नारदमेलनञ्च स्मृत्वैव कदाचिदलेखीदिति तर्क्यते। एवमेव स भासस्याभिषेकबालचरितयोः सकाशात् कतिपयान् भावानुपाददानो वानुकुर्वाणो वीक्ष्यते। वस्तुतः कालिदासस्योपरि भासस्य प्रभावः प्रतिलक्ष्यते। वीणावासवदत्ताया यज्ञफलस्य च लेखको भास इति केषाञ्चन विदुषां मतं परं ते भासप्रणीते नैव प्रतीयेते। तत्र सन्ति कारणानीमानिः—

वीणावत्सराजस्य वस्तुविन्यासो न तथाविधो यथाविधो भासेन स्वप्नवासवदत्तादिषु त्रयोदशसु रूपकेषु विन्यस्तः। प्रकथनविधापि तत्र स्वकीयामन्यामेव विभां निदधाति। पात्राणि च रूढिसम्मतानि प्रतिभान्ति।

डॉ० कुन्हनस्य च मतेन न तद् भासकृतम्[1]। पं० कालीप्रसाद शास्त्री च यज्ञफलं न भासस्य मन्यते। तदीयाया भाषायाः स्वप्नवासवदत्तादिप्रयुक्तभाषातो विपर्यस्यति। तद्रचना प्रमाणीकरोति तस्य खैस्तद्द्वादशशतकान्न प्राग्वर्तित्वम्[2]।

१—ए न्यु ड्रामा ऑफ भास, प्रोसीडिंग्स ऑफ सिक्स ओरण्टियल कान्फ्रेन्स, १९३०, पृ० ५१३।

२—ए० एस० पी० अय्यरः भास पृ० ८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वीणावासवदत्तास्य कथा प्रतिज्ञायौगन्धरायणकथेवास्ति । यज्ञफलस्य कथा तु रामायण-बालकाण्डस्य कथास्ति । तत्र च वैदिक यागस्य महत्त्वमपि प्रतिपादितं कविना ।

कालिदासः—

विदुषामेको वर्गः कालिदासस्य समयमधिकृत्य वदति यत् स ईशवीय-एकादशे शतके सम्बभूव । स्वविचारस्य पक्षेऽयं विद्वद्वर्गोऽधोलिखितहेतुद्वयं निदधाति—(१) कालिदासस्य कृतिषु 'यवन' पदं प्राप्यते । यवना भारत मीशवीयसप्तमशतके विविशुःस्तस्मात् कालिदासस्य समयो यवनागमनोत्तारकालवर्त्येकादशशतकं सिद्धयति । (२) परम्परायाः कथनमेतद् यत् कालिदासो धाराधीशस्य भोजस्य राजसभामलञ्चकार । भोजस्येशवीयैकादशशतकगामित्वात् कालिदासस्यापि कालः प्रोक्तशतकान्तर्वर्ती सिद्धो भवति ।

हेतुद्वयमिदं न युक्तम् । यवनशब्दस्य यूनानीयजनेष्वपि प्रयुक्तत्वात् कालिदास-व्यवहृतस्य तस्य शब्दस्य यूनानीयजनपरकत्वमपि सम्भवमतः प्रथमो हेतुरयुक्त एव । द्वितीयस्यापि हेतोर्न सङ्गतत्वं प्रमाणीभवति । कालिदासश्चेद् भोजमशिश्रियत तदा सः कथं न भोज ममरीकर्तुं तमुद्दिश्य काव्यमरचयत् किञ्च आचार्य भामहो, य ईशवीये षष्ठे शतके समजायत,[१] कालिदासं निर्दिशति । एतद् व्यतिरिच्य विक्रमोर्वशीयस्य कनारीभाषायां कृतोऽनुवादो, य ईशवीयनवमशतकेऽभूत्, ज्ञापयति यत् कालिदास एकादशशतकात् प्राग्वर्तीति । इत्थं कालिदासस्यैकादशशतकवर्तित्वं निरस्तं भवति ।

कालिदासस्येशवीयषष्ठशतकवर्तित्वे श्रद्दधाना स्वकथनं पोषयितुमिमा युक्तीः प्रददति—

(क) पार्श्वाभ्युदयस्य कर्ता जिनसेन ईशवीयनवमशतके सञ्जातः । स मेघदूतमनुकर्तुमुपचक्रमे । अतः कालिदासस्य तत्पूर्ववर्तित्वं सिद्ध्यतीति श्रीपाठकस्य विचारः ।

(ख) कविः पोम्नेशवीय ९४५ तमेऽब्दे उदपद्यत । सः कालिदासमुल्लिखति तेन, ज्ञायते यत् कालिदासस्ततः प्राग्बभूव ।

३—बलदेव उपाध्यायः भारतीय साहित्य-शास्त्र, प्र० खं०, पृ० ४३ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(ग) अमरकोशस्य टीकायां क्षीरस्वामी कालिदासमुल्लिखन्नवाप्यते। सः क्षीरस्वामी ७५० तमेशवीयाभ्यर्णेऽन्यवसत्। एतेन च कालिदासस्य तस्मात्प्राग्वर्तित्वं प्रकटीभवति।

(घ) कुमारिलभट्टः ७२० तमेशवीयाब्दस्थितएकतन्त्रवार्तिके कालिदासं संस्मरति।

(ङ) ६५० ईशवीयाब्दाभ्यर्णसमुदभूतो बाणः स्वकृतौ कालिदासमुल्लिखति।

(च) चतुस्त्रिंशदधिकषष्ठशतकवर्तिन्यंहोलशिलालेखे कालिदासस्य नाम प्राप्यते।

(छ) ईशवीयषष्ठशतकीयः कविर्दण्डी कालिदासं निर्दिशति।

(ज) एकस्मिन् शिलालेखे कालिदासस्य नामेशवीयषष्ठशतकस्थितवराहमिहिरस्य नाम्ना सहाङ्कितमस्ति।

(झ) मेघदूतटीकां कुर्वन् मल्लिनाथो दिङ्नागः कालिदासस्य विपक्षीति ब्रवीति। दिङ्नागस्य गुरुर्वसुबन्धुरीशवीयस्य ५४० तमाब्दस्य पार्श्वेऽजनि।

(ञ) यवनदेशे ईशवीय द्वितीयशतकासन्ने समुदितस्य ज्योतिर्विज्ञानस्य पारिभाषिकशब्दावल्यां कविकालिदासोऽभिज्ञतां सम्यग् निदधावतः कालिदासस्य स्थितिर्द्वितीयशतकादर्वाग्वर्तिनीति सिद्ध्यति।

(ट) ईशवीयाष्टमशतकर्निमितगौडावहोग्रन्थे कालिदासो रघुकार इत्येतेन संस्तवेन सादरं स्मृतः।

(ठ) तस्मिन्नाख्याने कालिदास ईशवीय ५७५ तमाब्देऽभिषिक्तस्य लङ्कापतेः कुमारदासस्य समकालीन इत्येतद्वर्णितम्।

(ड) बीजगणितपण्डितः श्री के० बी० पाठको दृढतया हूणानामीशवीय-५३० तमाब्दप्रागवर्तित्वं प्रत्याख्याति यदाहि कालिदासो रघुवंशे हूणानामुपरि रघुविजयं वर्णयति। कालिदासस्य वामोऽत ईशवीयषष्ठशताब्द्यां स्थिरीभवति।

येषां विद्वद्धौरेयाणां मतेन कालिदास ईशवीयाब्दप्रवर्तनात् प्रागेव प्रथमे शतके भारतं व्यभूषयत् तेषां कथनानि सन्तीमानिः—

(अ) डॉ० पिटर्सनः शंसति 'कालिदास ईशवीययुगारम्भस्याभ्याशे तस्थौ। न च स तदतिक्रमकारीति''।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(आ) कालिदासः स्वीकीये रघुवंशे पञ्चदशसर्गेऽग्निवर्णं वर्णयामास। अग्निवर्णो नृप ईशवीययुगपूर्ववर्तिन्यष्टमशतके शास्तिस्म भुवम्। कालिदासोऽस्यैव नृपस्य कालेऽजनिष्टेति हिपोलिटो मन्यते।

(इ) सर विलियम जोन्सः कालिदासमीशवीययुगपूर्ववर्तिनि प्रथमे शतके प्रतिष्ठापयति।

(ई) लोकवादोऽयं यत्कालिदासो युगप्रवर्तकमहाराजविक्रमादित्यस्य राजसभाया नवरत्नेष्वन्यतमरत्नं वभूव। स च विक्रमादित्य ईसामसीहजन्मतः सप्तपञ्चाशदब्दपूर्वमभवत्।

(उ) मेरुतुङ्गाचार्यस्य पाठावल्यां प्रतिपादितं यत् विक्रमादित्यः शकयुगात् प्राग्वर्तिनि काले, तस्मिननेहस्यशिषद्, यस्यातीतस्य १३४ वर्षाण्यतिक्रान्तान्यजायन्त।

(ऊ) श्री एस० वीअल आचष्टे यत् कश्चिच्चीनदेशीयो यात्रीशवीयाब्दारम्भात् ६७ वर्षपूर्वमश्वघोषस्य काव्यं बुद्धचरितं स्वंदेशमनैषीत्। तदीयकाव्यस्य भावाद्यभिव्यक्तिपद्धतिस्तादृश्येव यादृशी कालिदासकृतिषु वीक्ष्यते। अतः कालिदासस्य समय ईशवीयाब्दारम्भात् प्राग्गाम्येव निर्णीयते।

(ऋ) कालिदासो मालविकाग्निमित्रेऽग्निमित्रं नायकत्वेन वृणीतेस्म। अग्निमित्रस्य समकालीनत्वात् कालिदासस्यानीशवीययुगाभ्यन्तरवत्वमेव सिद्ध्यति।

(लृ) विद्वान् आप्टे हूणानां भारतागमनमीशवीयसम्वत्सरप्राग्वर्ति प्रथमशताब्द्यां मन्यते। अस्ति सः कलिङ्गेतिहासस्यानुसन्धाता। तद्विचारोऽयं यत् कालिदासो नूनमीशवीयाब्दावतारणातः प्रागेव जातः।

उपरिस्थितानि मतानि न कमपि निश्चितं कालं निदधति। अतः अमुकः कालः कालिदासस्येति न वक्तुं सुशकम्। विद्वांसः प्रायेण निश्चयमिमं गमिताः सन्ति यत् कालिदास ईशवीयाब्दान् प्राग्वर्तिनः प्रथमशतकादीशवीय पञ्चाशदुत्तरचतुश्शततमाब्दं यावद् विजृम्भितेऽनेहस्युदपद्यत[1]।

१—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० ३, पृ० ३०३, परि० १५, एवम् प्रो० एस० के० डे : पुसिन मेमोरियल वाल्यूम, खं० १ पृ० १६०—२।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतं शाश्वतादेव समयात् स्वीयां रुचिं प्राधान्येनाध्यात्मिकतायामेव रमयदासाद्यते। अत्रत्याः परमार्थं बोद्धुमनिशमयतन्त। तस्यान्वेषणाय तस्य लाभाय च ते कठोरतमान्यपि दुःखानि सहर्षं सेहिरे। घोराणि तपांसि महान्तं चोत्सर्गमकार्षुः। इहत्यानां साधारणानामपि जनानां मतमिदमेवाश्रूयत यद् यावता देहयात्रा चरितुमर्हेत् तावानेव भौतिकः पदार्थः संग्राह्यः। भोगार्थं तत्संग्रहणं नाधिकं युक्तम्। एवंविधविचारविभावितत्वात् तेषां, ते देहे, गेहे, सम्पदादौ च नातितरामासक्तिं निदधुः। तेषां विचारोऽयमासीत्—'स धर्मः श्रेष्ठः, येनामृतत्वं लब्धं स्यात्'। अतस्ते धर्मस्य चरमं फलं मोक्षं मेनिरे। अर्थावाप्त्यां ते तस्य परमार्थतया सार्थकतां नामंसत। अर्थस्य प्रयोजनं तन्मतेन धर्म आसीन्न च कामोपभोगः। ते विशश्वसुर्यदिन्द्रिय-तर्पणं न कामस्योद्देश्यम्। तत्प्रयोजनन्तु जीवननिर्वहणमेव। जीवनस्यापि फलं तत्वजिज्ञासैव; बहूनि कर्माण्यनुष्ठाय नाकाद्यवाप्तिर्न च तत्फलम्। प्रथमं तु देशस्यैतादृश्याः आध्यात्मिक संस्कृत्याः वातावरणे कविकालिदासादिकाः श्वसन्तिस्म पुनस्ते स्वयमेव प्राप्तविद्याप्रसादा आसन् अतः कथं ते नामग्रामजीवनकालादिकीर्तनप्रलोभेनाकृष्टा कर्तुं शक्या आसन्। वस्तुत, एवं स्थिते तेषां पराभूतभौतिकाकर्षणानां कवीनां कालनिर्णयनं न सम्भवम्। ते स्वान्तःसुखाय यानि काव्यान्यररचंस्तेषामध्ययनेनानुशीलनेन च यापि सामाजिकी राजनीतिकी धार्मिक्यार्थिकी छाया दृग्गोचरीभवति तामेवाश्रित्य तेषामनेहसोऽनुमानं कर्तुं शक्यं जायते।

कविकृतिस्थितां सामग्रीमेवावलम्ब्य प्रमुखतया, विद्वांसस्तत्समयमुद्दिश्य केचन् यान् विचारान्[१] प्रकटीचक्रुस्ते उपरि नितान्तसमासेन वर्णिता एव।

---

१ (क) कीथः संस्कृत ड्रामा, पृ० १४४—१४५।

(ख) न्यु हिस्ट्री ऑफ इण्डियन पीपुल, खं ६, पृ० ४०५।

(ग) पं सुरेन्द्रनाथ शास्त्रीः विक्रमोर्वशी-भूमिका, पृ० ११।

(घ) पं० सीताराम चतुर्वेदी : कालिदास-ग्रन्थावली, राजवली पाण्डेय-कृत 'विक्रमादित्य' लेखः।

(ङ) प्रोसीडिंग्स एण्ड ट्रान्स० ऑफ आल इण्डिया ओरण्टियल कान्फ्रेन्स अक्टू०, १९४६, नागपुर वि० वि०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कविकालिदासस्य रघुवंशाद् ज्ञायते यत् तदा, यदा रघुवंशप्रणयनमभूत् जनपदानां छटा भारते भासमानासीत्। अभिज्ञानशाकुन्तलस्य मृगयाप्रसङ्गं, पञ्चमाङ्के नौव्यसनेन विपन्नस्य समुद्रव्यवहारिणो वणिजश्चर्चां चाधीत्य तत्-तद् ग्रन्थनिर्माणसमयस्य विविधाः स्थितयः समुपस्थिता जायन्ते। तदानीं जनता धनेन धान्येन च सुखिता भूत्वा जीवनं निनाय। धनिकानां सविधे सर्व-विधा अपि भौतिक्यः सम्पदः शुशुभिरे। देश उत्तमोत्तमपुरोपवनसरोवापीच-तुष्पथापणादिभिः समुल्लसितोऽदृश्यत। नृपाः प्रायेण तदा प्रजारञ्जनधर्मे स्वां दृष्टिं प्रमुखतया न निधाय विलासेषु दत्तावधानाः समजायन्त। राज्ञामवरोधोऽनेकसुन्दरीभिर्महिषीभिः समाकुलोऽवाप्यत। तेषु यद्यपि धर्मभीरुत्वमवर्तत परं तद् वर्त्मापि ते व्रजन्तोऽवालोक्यन्त यत्र छन्दत्वं परिपुष्यति। कालिदासो दुष्यन्तस्य वनवासिन्यां शकुन्तलायामनुरक्तिं परिष्वङ्गं च समुल्लिख्य सम्भवतः स्वसमवर्तिनां महीशानां प्रवृत्तिं दर्शकाणां समक्षे सन्निदधाति। एवमेव विक्रमोर्वश्यां मालविकाग्निमित्रे च निहितकथावस्तु च तस्यानहसो वसुधाधिपानां शृङ्गारप्रियतामेवाप्रत्यक्षतयाभिव्यनक्ति। एतावदेव न, स्वीकीये रघुवंशेऽपि एकोनविंशे सर्गे विलासिनं राजानमग्निवर्णं चित्रीकृत्यासावुच्चैर्घोषयति स्वसमयस्थितानां भूपानां सुखभोगासक्तत्वं कामुकत्वं च। रघुवंशे समागतः 'अथ तेन दशाहतः परे' (८।७३) इत्येतदादिश्लोकः सूचयति यत् कालिदासकाले क्षत्रियस्य दशाहेनैव शुद्धिः समपद्यत परं मनौ तेषां शुद्धिर्द्वादशाहेन प्रोक्तास्ति। मनुस्मृतेः रचना ईशवीयद्वितीयशतकेऽभूदिति अनुसन्धातृणां मतमेतेन सिद्ध्यति यदाधुनिककाले मनुस्मृतेर्यद्रूपं दृश्यते तद् रूपं सा कालिदासोदयानन्तरमवाप। अथ च—

"एशे अम्हाणं शामी पत्तहत्थे लाअशाशणं पडिच्छिअ इदोमुहे देखीअदि" (शाकुन्तले पष्ठेऽङ्के)।

इत्यादिपङ्क्तिभिर्भवति विदितं यत्कालिदाससमये कुम्भीरका मृत्युदण्डमलभन्त कदाचित्। गुप्तकाले[1] न स दण्डः प्रायुज्यत। कालिदासस्य समये सर्वत्र सङ्गीत-नृत्य-नाट्यवादित्रादिशिक्षाप्रदात्र्यो महनीयाः संस्थाः समतिष्ठन्त;

१—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० ३, परि० १६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिल्पकला तदोन्नतासीत्; नार्योऽपि तदानीन्तन्यस्तत्तत्कलासु कुशलतामगाहन्त। भरतस्य नाट्यशास्त्रं हि स्पष्टमेव स्वसमयगामिनो भारतस्य नानाकलानदीष्णतां ज्ञापयति। नाट्यशास्त्रमीशवीयाब्दप्रवर्तनात् प्रागेव प्रणीतमभूदिति साम्प्रतिकैः सुधीभिः "परं तदीयमिदानीन्तनरूपमीशवीये द्वितीये वा तृतीये शतकेऽपूर्यत" इत्येतत्कथनपूर्वकमङ्गीक्रियते। इदं सर्वं विवेचनं कालिदासस्य गुप्तकालात्प्राग्भवत्वं साधयति।

अयोध्यायां रानूपालीस्थाने शिलालेख एक आस्ते। तेन ज्ञायते यदश्वमेधयाजी पुष्पमित्र ईशवीयाब्दात् १८४ शरत्पूर्वमजनिष्ट। तदाग्निमित्रं प्रति पुष्पमित्रप्रहितं तदेव पत्रं मालविकाग्निमित्रेऽङ्कितं प्राप्यते। यस्मादेतदनुमीयते यद् रघुवंश-कुमारसम्भव-मेघदूताभिज्ञानशाकुन्तल—मालविकाग्निमित्र-विक्रमोर्वशीयकृतिकर्ता कालिदासः शुङ्गसाम्राज्यस्य समयं स्वस्थितिगरिम्णा समवर्धयत्।

कालिदासस्य जन्मस्थानमधिकृत्यापि बहूनि मतानि श्रूयन्ते। केषाञ्चनमतेन सः काश्मीरजः[1], अन्येषां विचारेण सः कामरूपवास्तव्यः[2], इतरेषां विमर्शेण स मालवीयो[3]ऽपरेषां धारणया स आम्रकूटाभ्यर्णे[4] उवास।

वस्तुतः कालिदाससदृशानां कवीनां ज्ञानं सार्वभौमं विस्तृतं च भवति। ते शास्त्रैः देशाटनेन, सतां सान्निध्येन, राजसभाभ्यश्च बहुविषयकं गम्भीरं ज्ञानमुपार्जयन्ति। न केनापि मापदण्डेन वा तुलया मातुं वा तुलयितुं शक्यास्ति तेषां ज्ञानश्रीः। तेषामधीतिस्तेषामनुभूतिस्तेषामसामान्यप्रतिभा च तेषु तां व्युत्पन्नतां तामप्रतिहतगतिकां सर्वविधवस्तुभावविषयकवर्णनक्षमतां च जनयन्ति यासामुपरि यदा दृक्पातः क्रियते तदा वस्तुतः शेमुष्यपि कमपि निश्चयं विधातुं न पारयति। कदाप्येष प्रत्यय उत्पद्यते यदसावुज्जयिनी[5]मधिवसतिस्म,

---

१—श्री डॉ० लक्ष्मीधर कल्ला, ।

२—श्री साधुरामः ।

३—डॉ० भोलाशङ्कर व्यासः संस्कृत-कवि-दर्शन, पृ० ७७ ।

४—श्री चन्द्रवली पाण्डेयः ।

५—प्रो० सुरेन्द्रनाथ शास्त्री : विक्रमोर्वशी—भूमिका, पृ—५१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदाप्येष विश्वासो जायते यदसौ काश्मीरदेशमध्यासाञ्चक्रे कदाप्येष विस्रम्भो हृदि समुत्तिष्ठति यत् सः अयोध्यामधितस्थौ, कदापि चैषास्था सञ्जायते यत् स आम्रकूटम् (छिन्दवाडाम्) अध्यास्त। परं तस्य काव्येभ्यस्तस्य शिवभक्तत्वसिद्धेस्तदीया जनुर्भूः काश्मीर प्रदेश इति प्रतीयते। परं सम्भवमेतत् ततः स आगम्योज्जयिनीमनुजग्राह। अथ च स उज्जयिनीशस्य[1] राजसभामलञ्चकारेति तर्क्यते।

अभिज्ञान शाकुन्तलकथावस्तु—

पुरुवंशसम्भवो महाराज दुष्यन्त आखेटप्रसङ्गेन विपिनं गाहमानः कण्वाश्रमं प्रपेदे। तत्र स बालतरून् सिञ्चन्तीं प्रियंवदानसूयासहितां शकुन्तलां वीक्ष्य तस्यां प्रणयं बबन्ध। गान्धर्वेण च विधिना स तामुपायंस्त। ततश्च स्वनामधेयाङ्कितमङ्गुलीयकं तस्यै समर्प्य 'अचिरेणैव त्वं राजधानीं प्रति नेया स्याः' इति प्रत्याश्रुत्य स आश्रमात् स्वां राजधानीं निववृते। एतस्मिन्नेवान्तरे दुर्वासाः

"विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव"।

इत्येतच्छापेन तां शशाप। शापोदन्तं विज्ञाय क्षिप्रं प्रियंवदा शकुन्तलां शापादुन्मोचयितुं दुर्वाससं सानुनयं स्तवीति स्म। अनुनीतो मुनिः 'अभिज्ञानाभरणदर्शनेन शापो निवृत्तः स्यान्मदीय' इत्येतदुदीर्य अन्तर्दधे। इतश्च सोमतीर्थादागतः कण्वो योगदृष्ट्या सर्वमपि दुष्यन्त-शकुन्तलाविषयकप्रेमावगम्य शकुन्तलामभिनन्द्य च तां गौतमीशार्ङ्गरवशारद्वतैः सह दुष्यन्तस्य सकाशे प्रस्थापयामास। पथि दुष्यन्तप्रदत्तमङ्गुलीयकं शकुन्तलाकरादेकस्मिन् सरसि अस्रंसत। शापवशाद् राजा विनाभिज्ञान-साहाय्यं शकुन्तलामभिज्ञातुं न शशाक। नृप-न्यक्कृतां शकुन्तलां ततो ललनाकारं किमपि ज्योतिरुत्क्षिप्य तामुत्पपात। गच्छता कालेनासादिताङ्गुलीयकः कश्चिद् धीवरो रक्षिभिर्गृहीतः। अङ्गुलीयकं तस्माद् धीवरात् प्राप्य राष्ट्रियो राज्ञः समक्षे तन्निधाय सर्वमपि तदङ्गुलीयकवृत्तं न्यवेदयत्।

अङ्गुलीयकं वीक्ष्यैव तत्क्षणं राज्ञो हृदये शकुन्तलायाः स्मृतिरजागरीत्। स भृशमदूयत। एतदन्तर एव शचीशोऽसुरान् जेतुं स्वं सारथिनं क्षोणीन्द्र-

---

१—डॉ० कपिल द्विवेदी : अभिज्ञान शा, पृ० ३५, भूमिकायाम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्याभ्याशे प्राहिणोत् । सम्पादितमहेन्द्राज्ञः सः सुरलोकान्निवर्तमानो मारीचाश्रमे भगवन्मारीचदर्शनाय अवततार । तत्र सः स्वसुतं शकुन्तलां च स्वदयितां ददर्श । ततश्च सुत-पत्नीसमन्वितो भूत्वा मारीचमहर्षेः शुभाशिषमाज्ञां च लब्ध्वा पुरमाजगाम ।

शाकुन्तलस्येदं कथावस्तु महाभारतात् पद्मपुराणाच्च गृहीतमस्ति। परं तत्रत्या सा कथा स्वीययानुपमप्रतिभया मञ्जुलया च कल्पनया अद्भुतायामेव रसरुचिरायां नवीनतायां परिणमय्य स्वकीये रूपके गीतास्ति कविवरेण्येन । एतावदेव न, तत्र तादृशानि परिवर्तनानि परिवर्धनानि च समुत्पादितानि कविवरेण यादृशैर्भारतीया मर्यादा भारतीया च संस्कृतिः भास्वरमुत्कर्षमासादयितुं सदवसरमश्नुते ।

महाभारते शकुन्तला स्वजन्मकथां स्वयमेव ब्रवीति परं कालिदासस्तदीयां कथां तत्सखीभ्यां श्रावयति । एवं विधाय स भारतीयकन्याया लज्जाभरणप्रकृतिं रक्षति । महाभारतस्य शकुन्तलोद्वाहात् पूर्वं नृपस्य पुरः समयं प्रस्तौति–

'मयि जायेत यः सूनुः स भवेत् त्वदनन्तरम् ।
युवराजो महाराज सत्यमेतद् ब्रवीमि ते' ।।

परं कालिदासस्य शकुन्तला न समयं कमपि निदधानाभिलक्ष्यते । वयं तु तां "तद् यदि वा मनुमतं तथा वर्तेथा यथा तस्य राजर्षे रनुकम्पनीया भवामीति" स्वसख्योर्ब्रुवन्तीं शृणुमः । कालिदासस्य शकुन्तला शालीनस्वभावा सरलहृदया लज्जावती कुमारिकास्ति । परं महाभारतस्य शकुन्तला प्रगल्भा, स्पष्टभाषिणी, निर्भीकतरुणीव भासते । महाभारते साऽऽश्रम एव कुमारं सूते; तत्र यदा प्रसूतः शिशुर्द्वादशवर्षदेशीयो जायते तदा सा तेन सह पतिभवनमुपैति परं कालिदासः प्रसवात् प्रागेव शकुन्तलां पत्युः सविधे प्रापय्य भारतीयां मर्यादामतितरामवति । महाभारतस्य दुष्यन्तो लोकापवादभयाद् 'गान्धर्वेण उदूढेयमिति स्मरन्नपि तां प्रत्याख्याति । परं कालिदासो दुर्वाससः शापमङ्गुलीयकञ्च परिकल्प्य दुष्यन्तस्य चरित्रं गोपायति ।

पद्मपुराणस्य कथावस्तु शाकुन्तलनाटककथां प्रायेण संवदति । धीवराङ्गुलीयकप्राप्तिः, सांयात्रिकस्य श्रेष्ठिनो निधनं, देवेन्द्रस्य दुष्यन्तामन्त्रणं, मारीचा-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रमे गमनं दुष्यन्तस्य तत्र च सिंहशावकेन सह क्रीडतः स्वशिशोर्दर्शनमित्येताः घटनास्तथैव सन्ति यथा शाकुन्तले। पद्मपुराणेऽनसूयायाश्चित्रणं न दृश्यते।

डॉ० विण्टरनित्जस्य कथनमिद यत् कालिदासः पद्मपुराणाच्छाकुन्तलस्य कृते कथावस्तु जग्राह। परं पद्मपुराणे शाकुन्तलोपाख्यानं कालिदासादर्वाग् गृहीतमभूदिति प्रतिलक्ष्यते। यतस्तत्रानेकस्थलेषु शाकुन्तलस्य पदावली अविकलतया समुद्धृतास्ति। अत एव बहूनां विपश्चितां धारणेयं यत् पद्मपुराणस्य शकुन्तलोपाख्यानं शाकुन्तलनाटकं सहकृत्य प्रणीतं बभूव। पद्मपुराणे तदुपाख्यानं पुरा नावर्तत तत्तु पश्चादेव तत्र विनिवेशितम्। पुराणानां प्रायेण मौलिकतया तु ईशुमसीहजनुषः पूर्वमेव जातं परमिदानीं यस्मिन् रूपे तानि लभ्यन्ते तद् रूपं हि ईशवीयात् तृतीयाच्छतकात्[1] १००० तमशतकपर्यन्तं निष्पादितमभवत्—इति डॉ० हाजरामहाभागस्य मतम्।

मालविकाग्निमित्रम्—

अत्र अग्निमित्रमालविकयोः प्रेमकथास्ति कीर्तिता। राजमहिष्याः किङ्करी मालविका नैजानुपमेन रामणीयकेन राज्ञः स्वान्तमावर्जयति। अतस्तस्यां महिष्यसूयते। राजा स्वप्रणयपात्रमालविकां प्रणयिनीत्वेन स्वीकर्तुं भृशमीहते। एतस्मिन्नन्तरे मालविकाया राजवंशप्रसूतत्वं विवृतत्वमेति। ततश्च भूरमणः स्वाभीप्सिते साफल्यमधियाति। इत्थं मालविकाग्निमित्रौ दाम्पत्यसुखमासादयतः।

रूपकमिदमस्त्यैतिहासिकम्। अग्निमित्रो मौर्यनरेशवृहद्रथस्य सेनान्याः पुष्पमित्रस्यात्मज आसीदितीतिहास आह। नाटकीयकथा जीवनस्य व्यापिकां समस्यां न स्पृशति। सा प्रणय एवात्मानं रमयति। परमितिवृत्तस्य पात्रोपादानात् तदीयमैतिहासिकं महत्त्वमस्ति। सा कवेः कालनिर्धारणेऽपि सहायिका भवति किञ्च सा तदानीन्तनानां नृपाणां विलासप्रियत्वं समाजस्य च जातिकुलाभिजातत्वादि-विचारपातित्वञ्च प्रकटीकरोति।

१—दी हिस्ट्री एण्ड कल्चर आॅफ दी इण्डियन पीपुल, खं०, परि० १५, पृ० २९८—२९९।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विक्रमोर्वशीयम्—

विक्रमोर्वशीयस्येतिवृत्तं पौराणिकं वर्तते। ऋग्वेदे, शतपथे, मत्स्यपुराणे च एतस्य रूपकस्य कथोपलभ्यते। नाटकीया कथा समासतयेयम्—

हिमालयप्रदेशाच्छिवमभ्यर्च्य निवर्तमानोर्वशी दानवैरगृह्यत। तदीयाः सख्यस्तस्यां गृहीतायामुच्चैश्चुक्रुशुः। अन्तिक एव विचरन् राजा पुरुरवा अप्सरसां क्रोशं शुश्राव। स दानवेभ्य उर्वशीं जुगोप। पुरुरवसोऽलौकिकशौर्य्ये उर्वश्या मन आससञ्ज। सा तस्मिन् अन्वरज्यत्। नृपोऽप्युर्वश्यामावर्जितो बभूव। उर्वशीलिखितप्रेमपत्रमौशीनर्याः करगतमजायत। अतः सा राजन्यकुप्यत्। राजा च तामभ्यपत्तु मन्वनयत्। प्रसादं नीतौशीनरी उर्वश्यां कृतं राज्ञः प्रणयमभ्यनन्दत्। पुरन्दरोऽपि तावत्कालं पुरुरवसः सन्निधौ स्थातुमुर्वशीमन्वजानात् यावन्न सा स्यात् सुतवती। परं राजोर्वश्यां जातस्य सुतस्याननानवेक्षणाय चादिश्यत। उर्वशी-पुरुरवसोरहानि सुखेन व्यतीतानि भवितुमारभन्त। एकदा कुपिता भूत्वोर्वशी कुमारकार्तिकेयस्य वनमाविशत्। कुमारनियमानुसारं तत्र सा लतात्वं प्राप्ता। उर्वश्याः विश्लेषेण राजात्यन्तं दुदुवे। स तदर्थमतितरां विललाप। अन्ततः सङ्गमनीयमणिसामर्थ्यात् पुनः सः स्वप्रियतमां प्राप। यदा स राजधानीं निववृते तदीयं सङ्गमनीयमणिं कश्चिद् गृध्रो जहार। परमसौ गृध्रो नाराचेनाहतीकृत्यावनौ निपातितः। गृध्रोपरि क्षिप्तोऽसौ शर आसीत् पुरुरवसस्तनूजस्य। तत्र तन्नाम प्रेक्ष्य पुरुरवाः स्वसुतेऽवाप्तसंस्तवो जातः। तं समयं यावत्तु सोऽविदितसूनुमत्त्व एवासीत्। ततश्च तन्मानसं पुत्रदर्शनाय परमौत्सुक्यवदजायत्। परं सुतस्तत्पितृलोचनगोचरो न स्यादित्येतदर्थमुर्वशी तं च्यवनाश्रमे सुगूढं न्यगूहत। सुतशरस्य नृपनयनपथपातितत्वात् सा भृशं चिखेद। तत्रान्तराले राजा महेन्द्रेणाभ्याहूतो बभूव। आमन्त्रणेन सह शक्रः 'यावदायुस्ते उर्वशी सहधर्मचारिणी भवतु इत्येतं सन्देशं प्रहिणोति। ततश्च कुमारस्यायुषो यौवराज्याभिषेको भवति। सर्वस्तरतु दुर्गाणीत्येतदादिभरतवाक्यानन्तरं समुपसंहृतं भवति त्रोटकम्।

एतदतिपुरातनं वैदिकाख्यानं कविः स्वीययोत्कृष्टतरया प्रतिभयाभिरामं विधाय रूपकेऽचीचित्रत्। यच्च तदीये रूपके उर्वशीरूप-परिवर्तनं, कार्तिकेय-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नियमः, भरतमुनेः शापः, पुरुरवसः परिदेवितं, पञ्चमाङ्कगतं च वृत्तं कृत्स्नं परिवीक्ष्यते तत्सर्वं कविकल्पनाप्रसूतं वर्तते ।

ज्ञायते यत्कविकालगामिनः सामाजिकजनाः पौराणिकाख्यानानामभिनयने रुचिविशेषं निदधुस्तस्मात् कविर्लोकमाराधयितुं रञ्जयितुं च तद् वृत्तं रूपकत्वे परिणमयितुं प्रययास । कवेस्त्रीण्यपि शाकुन्तलादिरूपकाणि बोधयन्ति यत् कविसमयवर्तिनि समाजे नारीणां सम्मानं ह्रासोन्मुखतामुपेतमासीत्; पितृतर्पणश्राद्धादौ जनताया आस्थासीत् ; अनपत्यता महादुर्भाग्यतेव मताऽभवत्; बहुविवाहप्रथापि प्रचलितासीत् ; जनाः पुराणेषु शिव-विष्णुप्रभृतिदेवेषु भक्तिधियं निबबन्धुः ।

कविकालिदासस्य मधुरकोमलप्रसन्नशैली कविवृन्दं नितरामप्रीणात् । अश्वघोषादिकवयस्तां कृत्स्नतयानुचक्रुः । एतत्त्ववश्यं यत् कालान्तरे कवयो रामायणमहाभारतपुराणविषयिण्याः संस्कृत्याः कीर्तने रतिं तथैवादीदृशन् यथा कालिदासः परं न ते स्वपाण्डित्यप्रदर्शनस्य किञ्चालङ्कारादिमञ्जुलताऽऽकलनस्य च दुर्जयं मोहं संवरीतुं शेकुः । इदमेव कारणं कदाचिद् बभूव यत्ते तद्[1]-यशोऽधिगन्तुं नापारयन् ।

अश्वघोषः—

बौद्धमतावलम्बिषु महाकविषु अश्वघोषोऽत्युच्चपदमध्यास्ते । एष कविकुलालङ्कारभूत ईशवीयप्रथमशतके[2] राज्ञः श्रीकनिष्कस्य[3] गुरुर्भवंस्तद्राजसभायां राजकविरासीत् । साकेतमण्डलमस्य जन्मस्थानमासीत् । श्रुति-शास्त्रकुशले विप्रवंशेऽयं जनुर्जग्राह । माता चास्य सुवर्णाक्षी परमविदुषी महिला बभूव । सौन्दरानन्दस्य पुष्पिकायाः किञ्च त्रिविष्टपभाषानूदितबुद्धचरिताधारे प्रणीतं श्री डॉ० जान्स्टनकृताङ्ग्लानुवादात्मकपुस्तकमस्य साकेताधिवासितां

१—पुरा कवीनां गणनाप्रसङ्गे······अनामिका सार्थवती बभूव ।

२—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० २, परि १६, पृ० २५८ ।

३—४७२ तमखीष्टाब्दे चीनभाषायामनूदितयोः संयुक्तरत्नपिटक-धर्मपिटकनिदानयोः अयं कनिष्कस्य गुरुत्वेन स्मृतः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुवर्णाक्षीसुततां च प्रमाणीकरोति[४]। त्रिविष्टपादिविषयप्रसृतबौद्धमहायानसम्प्रदायस्य प्रवर्तकेषु प्रमुखोऽयं मनीषी। एतदीयं महिमानं सावहितमवन्तो बौद्धग्रन्थाः प्रेक्ष्यमाणा भवन्ति। साम्प्रतमप्येतदीया मौलिकानूदितरचनाः सर्वथा सन्ति सुरक्षिताः। एकस्याः जीवनकथायाः सकाशादेतस्य भवति विदितं यदयं भरतभूखण्डवासस्य पार्श्वभगवतः शिष्य आसीत्। तस्मादेवायं बौद्धदीक्षायामभूद्दीक्षितः। अयं महापण्डितो माध्यमिकशून्यवादस्य प्रवर्तक आसीदित्यत्र विप्रतिपत्तिर्ग्रन्थेषु प्राप्यते। केशाञ्चन विदुषां कथनमिदं यन्नागार्जुनो माध्यमिकशून्यवादं प्रवर्तयामास। अयश्च विपश्चिदिन्द्रो महायानसम्प्रदायप्रवर्तयिता बभूव। परं नेहैकमतत्वमासाद्यते। केचन तु वदन्ति यदयं महायानस्यानुयायितामपि नागात्। उक्तसम्प्रदायस्त्वस्माद् विद्वद्वरादर्वागुदियाय। एतन्मतपक्षपोषका धीमन्तो महायानश्रद्धोत्पादसंग्रहाभिधबौद्धग्रन्थस्य प्रणेताश्वघोष आसीदिति न स्वीकुर्वन्ति। विण्टरनित्सादिकोविदाः सन्त्येतस्यैव मतस्य परिपोषकाः। परं प्रो० ती० सुजुकी निर्दिष्टस्य ग्रन्थस्य प्रणेतारमश्वघोषमेवाभ्युपयान्ति।

अश्वघोषो बौद्धधर्मस्य गूढतमान् राद्धान्तान् मधुरया ललितया च भाषया सामान्यानपि नरान् बोधयितुं नितरां प्रायतिष्ट। एकतस्त्वयमत्युच्चकोटिमाटीकमानः कविरपरतश्चागाधपाण्डित्यविभूषितो दर्शनारण्यपञ्चाननः।

अश्वघोषस्य रचनाः सन्तीमानि—(१) सौन्दरानन्दकाव्यम्, (२) बुद्धचरितकाव्यम्, (३) शारिपुत्रप्रकरणम्, (४—५)................नाटकद्वयम् (छिन्नभिन्नत्रुटितरूपं बिभृत् सम्प्रति लभ्यते तत्)।

सौन्दरानन्दकाव्ये बुद्धदेवानुजनन्दस्य स्वप्रेयस्या सुन्दरी देव्या सह बौद्धधर्मदीक्षाग्रहणोदन्तः कयापि हृदयस्पर्शिन्या गिरया सम्यग् गीतः।

बुद्धचरिते बुद्धमहात्मनः पूतं चरितमतितरां मनोज्ञतयोपश्लोकितम्। भाषास्ति मधुरावदाता च। श्रूयते यदिदं काव्यमष्टाविंशतिसर्गोपनिबद्धमस्ति। परं सम्प्रति सप्तदशसर्गात्मकमपूर्णमेव रूपं दधानमवाप्यते।

४—डॉ० कीथः ए हिस्ट्री ऑफ संस्कृत लि०, पृ० ५७।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अश्वघोषस्य साम्प्रतं पूर्णापूर्णानि त्रीणि रूपकाण्युपलभ्यन्ते। ईशवीये १६२० तमे वर्षे एशियाखण्डस्थतुरफानाख्याधिष्ठाने विदुषालूडर्स महाभागेन तान्यवाप्तानि। तत्रैकतमं शारिपुत्रप्रकरणं षड्भिरङ्कैरूपनिबद्धं वर्तते। तस्मिन् शारिपुत्रस्य मौद्गलायनस्य बुद्धोपदेशग्रहणविवरणं विभाति। नाट्यनियमानुसारं तत् प्रकरणं नाम रूपकं भवितुमर्हति। शास्त्रीय एव तत्र दृश्यमानो विभिन्नभाषाणां प्रयोगः। परं पर्यवसाने भरतवाक्यं नोपलभ्यते। अवशिष्टरूपकद्वितयं खण्डितमेवादितोऽन्ततो मध्यतश्च। तयोरेकतरं प्रबोधचन्द्रोदय इव वर्तते। तत्र बुद्धिधृतिकीर्तिप्रभृतिकल्पितपात्राणि सन्त्युपन्यस्तानि। इतरच्च मृच्छकटिकमिव प्रतीयते। तत्र मागधवती नाम वारसुन्दरी कौमुदगन्धसंज्ञकश्च विदूषकश्चित्रितः। शारिपुत्रप्रकरणस्य कथा शृङ्गाराच्छान्तरसं प्रयान्ती दृश्यते।

रूपकयोर्द्वयोस्त्रुटितत्वात् ते स्तोऽज्ञाताभिधाने सम्प्रति। त्रयाणामपि रूपकाणां भाषा संस्कृतास्ति। शारिपुत्रप्रकरणमस्ति 'हेटेराड्रामे'ति कीथ डॉक्टर आह। सः सौन्दरानन्दं तदीयं प्रथमं[1] काव्यमित्युत्प्रेक्षते। रूपकप्रयुक्तप्राकृतभाषा साहित्यिकप्राकृतभाषातः पुरातनतरीति चोपरिनिर्दिष्टनामधेयस्य विदुषो विचारः[2]।

अश्वघोषस्य शारिपुत्रप्रकरणमधीत्य स्फुटतयैव ज्ञायते यत् कवेः काले जनतायां भूयांसो जना बुद्धधर्मासक्तमनसोऽविद्यन्त। सहस्रेभ्योऽपरा नरनार्यः सादरं बौद्धवादान् अश्रौषुः। बौद्धभिक्षवस्तदानीं जननिकुरम्बमुपदिशन्तोऽवालोक्यन्त; जनास्तदापि बौद्धाः भवितुं दीक्षां ग्रह् णन्तः प्राप्यन्त। यदा कमपि सम्प्रदायं मतं वा प्रति कविर्जनतायाः प्रवृत्तिं प्रेक्षते किंवा यादृशं सामाजिकं समीरणावरणं स लभते तमेव सम्प्रदायं मतं च, तादृशमेव परिवेशमपि सः स्वकीये ग्रन्थे संग्रथ्नाति। शारिपुत्रप्रकरणे मौद्गलायनदीक्षाग्रहणवृत्तं विलोक्यैषा विचारणा मनसि समुत्तिष्ठति।

अन्यस्मिंश्च द्वितीयेऽज्ञातनामके रूपके बुद्धिधृत्यादिपात्राण्यवबोधयन्ति यत् तदानीन्तने समये तादृश्या मनोरमरीत्या नृणां मनःसु ज्ञानज्योतिः प्रज्वालनाय

१—डॉ० कीथः हिस्ट्री ऑफ संस्कृत लि० पृ० ५७।

२— ,, ,, ,, पृ० ८८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सरसः प्रयासोऽपि विहितोऽभवत् । ज्ञानप्रसारार्थमेवंविधः पन्थाः कवेः प्राग्वर्तिकाले उपनिषत्प्रधाने स्वीकृतोऽभूत् किञ्च काव्यजातकादिप्रमुखेऽप्यनेहसि पर्यगृह्यत ।

तृतीयस्मिंश्चाविदिताभिधे मृच्छकटिकानुहारिणि रूपके कृतो वारवनिताविदूषविटचेटादीनां सन्निवेशः कविकालगामिसमाजस्य संगीतनृत्यादिषु महतीमभिरुचिमभिव्यनक्ति । एषा स्थितिः शूद्रकदण्डयादिकवीनामनेहस्यप्यवलोक्यते ।

शूद्रकः—

संस्कृतसाहित्ये शूद्रकस्य यशः सर्वत्र प्रसृतमाप्यते । सोमदेवस्य कथासरित्सागरे[1] दण्डिनो दशकुमारचरिते, बाणस्य हर्षचरिते कादम्बर्यां च[2], शिवदासस्य वेतालपञ्चविंशतिकायां, कल्हणस्य राजतरङ्गिण्यां, स्कन्दपुराणे[3] चास्य मेधाविनो वेदविदांवरस्य सिंहोरुसत्त्वस्य नृपस्य नाम कीर्तितं वर्तते । अन्ये[4] चानेके स्वस्वकृतिषु अस्यानवद्यं चरितं चरित्रं च चारुतया चित्रितं कुर्वाणाः प्रेक्ष्यन्ते । मृच्छकटिकस्यारम्भ एवास्य प्रशंसां वयं शृणुमः । भूयसां विदुषां गीतां तदीयां कीर्तिं निशम्य चेतः प्रसभमिमं प्रत्ययं प्रयाति यदवश्यमेव शूद्रको नाम कोऽपि महीश इमां महीं पुरालञ्चकार यत्र हि महोरुसत्त्वता विश्वविस्मयकरी शास्त्रेषु पारावारीणता प्रजानां रञ्जने भरणे च विपुलक्षमता बहुविधबहुलगुणनिधिता च विरेजिरे । अन्यथा कस्मात् यत्र-तत्र-सर्वत्र कविभिरभिनन्द्यमानः सः समुपलभ्यते ?

१—'तस्माच्च शूद्रकाख्योऽभून् नृपतिः प्राज्यविक्रमः', कथासरित्सागरे, ११ शे तरङ्गे, पृ० ४१४ ।

२—'राजा शूद्रको नाम', कादम्बर्यां, पृ० ६ ।

३—स्कन्दपुराणे, कुमारिका खण्डे, शूद्रकः ।

४—(अ) राजशेखर-सङ्केतित-रामिल-सौमिलकृता शूद्रककथा ।
(आ) भोजकीर्तितनामधेया पञ्चशिखप्रणीता प्राकृतकाव्यरूप शूद्रककथा ।
(इ) भोजेन अभिनवगुप्तेन चानुस्मृतं विक्रान्तशूद्रकं नाम नाटकम् ।
(ई) काव्यादर्शोपरि कृतायां टीकायां वादिवधोल्लिखितं शूद्रकचरितम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हन्त, एतावन्महदनन्यगं यशो विन्दमानोऽपि सोऽधिपः शूद्रकोऽस्माकमविदित एव। न वयं सः कदा बभूव, कुत्र च बभूव, कमन्वयं सः स्वजनुषा गरिमाणं महिमानञ्च निनाय इत्येतदादिकं तमधिकृत्य विद्मः। तदीयः संस्तवो नैकविधः। कोऽपि किमपि ब्रवीति; कोऽपि च किमपि। तद्विषये कतिपयानां विद्वद्वराणां विचारा इह निधीयन्ते।

विदुषः श्री चन्द्रवली पाण्डेयस्य कथनं यद् वासिष्ठीपुत्रः पुलुमावि[1]रेव शूद्रक आसीत्। डॉ० स्मिथ आन्ध्रवंशाधिपतिं सिमुक मेव[2] शूद्रकत्वेन निर्धारयति। प्रो० स्टेनकोनो वक्ति यत् २४८ तमे खैस्ताब्दे सञ्जातः शिवदत्तसंज्ञः क्षितिप एव शूद्रक आसीत्। दशकुमारचरितप्रणेता दण्डी एव शूद्रक इति सुधीशः श्री पिशेलोऽनुमिमीते[3]। कोऽपि शालिवाहननृपतेर्मन्त्री एव शूद्रक इत्येतां संज्ञामबिभः[4]। स मन्त्री एव गच्छता कालेन प्रतिष्ठानस्य राजा बभूवेति मन्यते। वस्तुतः शूद्रकस्य व्यक्तित्वं विवादास्पदतां गतमस्ति। कविः कल्हणः शूद्रकं विक्रमादित्यात् प्राग्भवमवगच्छति, परं कल्हणः कतमं विक्रमादित्यं निर्दिशतीति न विदितम्। चेदयं स विक्रमादित्यो यो डॉ० राजवलीपाण्डेयकृत-शोधानुसारं कालिदासादिकवीनामाश्रयप्रदो मालवगणमुख्यो विक्रमसम्बत्सर-प्रवर्तकस्तदा तु शूद्रक ईशवीयाब्दप्रवर्तनात् प्राक्तनः सिद्ध्यति। यदि डॉ० स्मिथस्य विचारः स्वीक्रियते तदा तस्येशवीयाब्दात् प्राग्वर्तिन्यां तृतीयस्यां शताब्द्यां सञ्जातत्वं सिद्धं भवति। मार्समेनाख्यप्रतीच्यपण्डितप्रणीतभारतेतिहासा-नुसारं मगधशासकः शिवरुक्नामा राजमन्त्री १९१ तमेशवीयेऽब्दे शूद्रकेण व्यापादित-इत्येतेन शूद्रक ईशवीयद्वितीयशतकवर्ती प्रमाणीभवति। डॉ० फ्लीटो-विमृश्यति यत् शूद्रकस्य सूनुः अश्वसेन आन्ध्रान् पराभूय २४८-४९ तमेशवीयाब्दे चेदिसम्बत्सरं प्रावर्तयत्—इत्येतेन तदीया विद्यमानता तृतीयशतकगामिनी निष्पद्यते। स्कन्दपुराणोक्तौ यदि श्रद्धीयते तदा सः १००० तमेशवीयादूर्ध्व-

---

१—श्री चन्द्रवली पाण्डेयः शूद्रक, पृ० ३८।

२—स्टेनोकोनोः इण्डियन ड्रामा, पृ० ५७।

३—ए० ए० मेकडानलः ए हिस्ट्री ऑफ संस्कृत लिट्रेचर, पृ० ३६१।

४—हिन्दी-विश्व-भारती, पृ० २८९९।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वर्त्येव तर्क्यते पुराणानां रचनाया उपरि[१] निर्दिष्टेशवीयशतकं यावदेव सम्पन्नत्वात् । अवन्तिसुन्दरीकथायां वर्णितस्य शिवस्वातिमहीपस्य समयेऽयमजनीति केषाञ्चन कोविदानां विचार—इत्थमेष एकाशीतितमख्रैस्ताब्दाभ्यर्णे सम्बभूवेति मतो जायते । (परं पुराणोक्ततिथिमाधृत्य तु शिवस्वातेः समयः ख्रैस्ताब्दपूर्ववर्तिन्यां चतुर्थ्यां वा पञ्चम्यां शताब्द्यां निर्णीतो जायते) श्री जेकोबी महाभागः प्राह यदसौ ख्रैस्तचतुर्थशतकान्न प्राक्तनः । मृच्छकटिकस्य सामाजिक्याः स्थितेरुपरि दृष्टिं निधाय डॉ० भोलाशङ्कर व्यास आचष्टे[२] यत् तादृश्यवस्था गुप्तशासनानन्तरं संवृत्ता, तस्मान् मृच्छकटिककारः शूद्रक ईशवीयस्य पञ्चमशतकस्योत्तरार्द्धे वा षष्ठस्य शतकस्य पूर्वार्द्धेऽभूदिति । श्रीमन्तः एम. ए. मेहेन्द्रदले महाभागाः आहुर्यत् तदीया स्थितिः कालिदासात् पूर्ववर्तिनीति[३] । शूद्रकः स्वरचनायां नवमेऽङ्के वृहस्पतेर्मङ्गलविरोधित्वं दर्शयामास परं वराहमिहिरेण अनयोर्ग्रहयोर्मित्रत्वं प्रतिपादितम् । वृहज्जातकाद्ज्ञायते यत् तादृशी धारणा वराहमिहिरात् प्रागवर्तत । एतेन शूद्रकस्य वराहमिहिरात् पूर्ववर्तिता सिद्ध्यति । वराहमिहिरो गुप्तकाले जातः[४] । तेन शूद्रको गुप्तशासनोदयात् प्रागेवेशवीये द्वितीये वा तृतीये शतके प्रादुर्बभूवेति उह्यते ।

अमुको राजा एव वस्तुतः शूद्रक आसीदथवामुकस्य नृपस्य मन्त्री एव शूद्रक आसीदित्येतदादिविचारा न मानसं परितोषयन्ति । न कस्मिंश्चिदपि प्रत्ने नरेन्द्रे शूद्रकमन्तर्भाव्य वा तत्र शूद्रकमारोप्य नैव तत्तन्नरेन्द्रादिकं शूद्रकं मन्तुमभिलषामहे । न च सम्प्राप्यमानेभ्य इतिहासेभ्यः शूद्रकनामकस्य कस्यचन नृपतेरसिद्धत्वात् तस्यासद्भावमपि स्वीकर्तुमुद्यताः स्मः प्रायेण भूयिष्ठाना

१—दी हिस्ट्री एण्ड कल्चर आफ दी इण्डियन पीपुल, खं० २, परि० १५, पृ० २६८ ।

२—संस्कृत-कवि-दर्शन, पृ० २८४ ।

३—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० २, परि० १६, पृ० २६४ ।

४—अङ्गारकविरुद्धस्य……धूम्रकेतुरिवोत्थितः । मृच्छकटिकम्, ९।३३ ।

५—दी हिस्ट्री एण्ड कल्चर, खं० ३, प० १५, पृ० ३२१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मितिहासानां जाति-देश-सम्प्रदाय धर्मादिविषयकपक्षपातरजोभिराविलत्वात्। संस्कृतवाङ्मये शूद्रकस्योल्लेखो जीवितजागरितश्रेष्ठनृपरूपत्वेन सविस्तरं कृतः प्राप्यते। शूद्रककथा रामिलसोमिलौ लिलिखतुरित्येतद् राजशेखरो ब्रवीति; बाणभट्टः स्वरचनयोर्मध्ये शूद्रकमुल्लिखति, दण्डिकल्हणसङ्काशा महान्तः कवयः शूद्रकं वर्णयन्ति । शूद्रकवध-विक्रान्तशूद्रक-शूद्रकचरिताभिधानां ग्रन्थानां प्रणयनमेव शूद्रकमुद्दिश्य सञ्जातम्, परम्परापि शूद्रकस्यपक्षे दृग्गोचरी-भवतीत्येवं स्थिते 'शूद्रको वस्तुतः कल्पितपात्रम्' इत्यत्र धीः न सर्वथा विश्वसिति । अवश्यमेव तन्नामधेयः कोऽपि भुवि कदापि बभावित्येतच्च सादर-मङ्गीकर्तुं मन उत्सहते । कालस्य नृशंसत्वात् प्रचुरसाहित्यिकैतिहासिकसाम-ग्र्याश्च विध्वस्तत्वाच्च सम्प्रति बहव ईदृशोविद्वांसः कवयो राजानोऽन्ये चानेके कलाकोविदाः सन्ति येषां विषये पूर्णतया वयमनभिज्ञाः स्मः । पुनर्यदि वयं शूद्रकमद्य नो जानीमस्तदा किं नाम आश्चर्यम् ? अतः यावत् विश्वसनीयं किमपि शूद्रकविरुद्धं प्रमाणं नैव भवत्युपनतं तावत् शूद्रकोनाम न कोऽपि राजा बभूवेत्येतत् वक्तुं न सुशकम् ।

डॉ० पिशेलो[1] नाम प्रधीः कामं दण्डिनं शूद्रकं मन्येत, मृच्छकटिकस्य कर्तृत्वेन च दण्डिनमङ्गीकुर्यात्; डॉ० सिलवांलेवी[2] च कामं मृच्छकटिकं शूद्रकस्य रचनां न स्वीकुर्यात् किञ्च डॉ० कीथोऽपि[3] मृच्छकटिकं शूद्रककृतं नावगच्छेत परं सुपुष्टप्रमाणानवाप्त्यामपि यावत् तेषां-तेषां तत्तत्कथनं स्वीकार्य्यं भवति तावदिदमप्युदीरणं मान्यमेव भवितुमर्हति यत् शूद्रको नाम एव कश्चिद् भूपतिर्निजव्यक्तित्वभृन् मृच्छकटिकं प्रणिनाय । यदा हि वामनाचार्यः स्वकीय-काव्यालङ्कारवृत्तौ मृच्छकटिकस्य श्लोकद्वयमुद्धृत्य शूद्रकमेवोक्तस्यरूपकस्य प्रणेतृत्वेनाङ्गीकुरुते, यदाहि

शूद्रकेणासकृज्जित्वा स्वेच्छया खड्गधारया ।
जगद्भूयोऽप्यवष्टब्धं वाचा स्वचरितार्थया ।।

१—मेकडानलः ए हिस्ट्री ग्रॉफ सं० लि०, पृ० २६१ ।

२—ली थियेटर इण्डियन, १८९०, पेरिस ।

३—डॉ० कीथः संस्कृत-ड्रामा, पृ० १२८—१२९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतेन श्लोकेन दण्डी शूद्रकमुपश्लोकयन् प्राप्यते तदा सम्भावनैषैव दार्ढ्यमुपैति यच्छूद्रक इत्येतन्नामको व्यक्तिविशेष आसीत् । स मृच्छकटिकं नाम रूपकं चारुदत्तरूपकमवलम्ब्य आर्यक-पालका-दिवृत्तेन च संवर्ध्य प्राणैषीत् । चारुदत्तस्य चारुचरित्रं मन्ये, शूद्रकं भृशमप्रीणादतोऽसौ भासकृतस्य चारुदत्तस्य कलेवरमवीवृधत् किञ्च चारुदत्तस्योदारं महनीयं च चरित्रं मुदोद्गीयात्मानमतूतुषत् ।

मृच्छकटिके वर्णितां सामाजिकीमवस्थामधीत्य, तत्र प्रयुक्ताः प्राकृतभाषाः-शौरसेनी-मागधी-चाण्डाली-प्राच्यावन्तिकादिकाः—विलोक्य, तत्र च समागतानि पदानि —णाणकप्रावारककार्षापणसुवर्णादीनि—प्रेक्ष्य वसन्तसेनायाः प्रासाद-विशिष्टताम्, अधिकरणानां स्थितिं, चारुदत्तस्य सार्थवाहकतादिकं च तद् तद्विधमवाप्य मृच्छकटिकस्य शूद्रकस्य वा पुरातनतरता निःसन्दिग्धतया सिद्ध्यति । गुप्तकालात् प्राक् किं वा मौर्यसाम्राज्य-पतनानन्तरं भारतीयराजनीतिकास्थितिर्न[1] तोषावहाऽभवदित्यत्र भारतेतिहासः साक्षी । प्रायेण २५० वर्षाणि यावदत्र राजशक्तिर्नितरां शोचनीयतां गताभूत् । शासनानां बाहुल्येन, केन्द्रीयशक्तेरभावाच्च सर्वत्राराजकत्वमेवादृश्यत । मृच्छकटिके एवंविधायाः दुःस्थितेः स्पष्टमेवदर्शनं जायते । अतः प्रतीयतेयच्छूद्रकः सातवाहनयुगे-ईशवीयद्वितीय-शतकस्याहोस्वित् तृतीयस्यशतकस्यान्तराले सम्बभूव ।

मृच्छकटिकस्य कथावस्तु—

पुरा उज्जयिन्यां विप्रवंशसम्भवोऽनेकसद्गुणराजिरम्यश्चारुदत्तो नाम शील-समुदाचारदाक्षिण्यौदार्यसुन्दरः कश्चित् सार्थवाहः प्रतिवसतिस्म । सः पूर्वं महाधनिक आसीत् परं याचकातिथिसाधुदीनदरिद्रेभ्योऽहर्निशमतिशयसम्पदां प्रदत्ततया दरिद्रतां प्रपेदे । तस्मिन् सद्गुणाकरे गुणानुरागिणी वसन्तसेना नाम वेश्यान्वरज्यत् । चारुदत्तगुणानुरक्तां तां राज्ञः श्यालः शकारो बलात् स्ववशे कर्तुमयतत परं तत्कृतः कुप्रयत्नो हि सः सफलो न भवितुं शशाक । एकदा सः सविटचेटः प्रदोषवेलायां तां गच्छन्तीं धर्तुं प्रायस्यत् परं सा सहसैव ससा-

१—लूनियाः भारतीय सभ्यता तथा संस्कृति का विकास, पृ० २०५ ।
,,—दी केम्ब्रिज हिस्ट्री ऑफ इण्डिया, खं० १, परि० २३, पृ० ५२७ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ध्वसमनावृतद्वारमेकं निकेतनमाविशत् । तन्निकेतनं चारुदत्तस्यैवासीत् । शकारस्तमसो निविडतया बलिप्रदानाय बहिः समायातां चारुदत्तस्य सेविकां रदनिकां वसन्तसेनां मत्वाधरत् । परं तदन्तराल एव चारुदत्तस्य सुहृन् मैत्रेयस्तद्घटितं सर्वं व्यतिकरमवगम्य शकारं भृशमभर्त्सयत् । 'मम हस्ते वसन्तसेना देयान्यथा मरणान्तिकं शात्रवं भविष्यतीति संतर्ज्य शकारो यथेष्टदिशं ययौ । अध्वनो भयसङ्कीर्णत्वाद् वसन्तसेना स्वीयानि स्वर्णाभरणानि चारुदत्तस्य सकाशे निधाय मैत्रेयेण सह स्वसदनं निववृते ।

दुर्नियतिवशात् शर्विलको नाम कश्चिद् ब्राह्मणश्चौर्यकर्म परिजग्राह । स वसन्तसेनाया दास्यां मदनिकायामनुरक्तो बभूव । अतः स तां प्राप्तुं वसन्तसेनाया दासतातश्च तामुन्मोचयितुं धननिमित्तेन चारुदत्तस्य सदनं प्रविवेश । तत्र स निक्षेपत्वेन धृतानि वसन्तसेनाया भूषणानि जहार । स तु येन प्रयोजनेन धनं तदचूचुरत् तत्र सफलो बभूव परं वसन्तसेनाया आभरणहरणात् चारुदत्तो नितान्तं चिखेद । भर्तारं लाञ्छनात् पातुं चारुदत्तस्य भार्या धूता स्वीयां महर्घरत्नावलीं वसन्तसेनायाः सविधे मैत्रेयद्वारेण प्राहिणोत् । वसन्तसेना तु पूर्वमेव शर्विलकात् स्वान्याभरणानि प्राप । द्यूते भूषणानि चारुदत्तेन हारितानीति मैत्रेयमुखाच्चारुदत्तस्य सन्देशमाकर्ण्य वसन्तसेनायाश्चारुदत्तपरकं प्रेम पूर्वतोऽप्यधिकतरां वृद्धिमगात् । सा रत्नावलीमादाय एकमपि क्षणं नातिक्रम्य अभिससार । तस्मै तद्रत्नावलीं समर्प्य स्वानि भूषणानि च सौवर्णीं शकटीं निर्मापयितुं समर्पितवती यया शकट्या चारुदत्तस्य सुतो रोहसेनः क्रीडेत् ।

एकदा दुर्दैवात् वसन्तसेना प्रवहणस्य विपर्यासाच्छकारहस्तायत्ता बभूव । सा तत्कृतं प्रेमप्रस्तावं यदा तिरश्चकार तदा तेन सा प्रसभं बाहुभ्यां ग्रीवायामापीडयत । अथ तां विपन्नां विनिश्चत्य उद्याने तृणलतादिभिराच्छाद्य तां, सः स्वगृहं पलायितः । तत्रैको भिक्षुस्तां तथाविधामवस्थां नीतां विलोक्योचितोपचारैरुपचचार । तेन सा प्राप्तजीवनाभवत् ।

स भिक्षुः पुरा चारुदत्तस्य संवाहक आसीत् परं दरिद्रे सति चारुदत्ते स द्यूतकारो बभूव । द्यूतादपि, गच्छता कालेन स निर्विण्णतां गतः । एकदा वसन्तसेना नैजं वलयं प्रदाय तस्य, तं माथुरकाद् द्यूतकरादमूमुचदतः स वसन्त-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सेनोपकृतोऽप्यासीत् तस्यैव प्रयासात् तदानीं वसन्तसेना जीवनं पुनः प्राप्तु मशकत् ।

शकारश्शठस्ततस्थानादधिकरणमियाय । तत्र वैरं निर्यातयितुं लेखयति स्म यच्चारुदत्तेन पुष्पजीर्णकरण्डोद्याने वसन्तसेना व्यापादिता । दुर्भाग्यप्राबल्यात् तदा सर्वे व्यतिकराश्चारुदत्ते विरुद्धा भूत्वा घटिता अतः स आगस्कृत् प्रमाणितोऽभूत् । सः शूलमारोपयितुं यावदेवानीयत तावदेव तेनैव भिक्षुणा सह तत्र सम्प्राप्ता वसन्तसेना । समुन्मीलितं चाभूत् सकलमपि शकारस्य दुष्कर्मपूर्णं रहस्यम् । एतस्मिन्नन्तरे इतस्तु परमार्थतोऽपराधी शकारोऽगृह्यत ततोऽन्यायपर पालको भूपोऽप्यार्यकगोपालदारकेण कथाशेषतां नीतः । परं गृहीतोऽपि शकार उदारचरितेन चारुदत्तेनोन्मोचितः किञ्च तस्याः परमदारुणाया विपदश्चोन्मुक्तो भूत्वा चारुदत्तो वसन्तसेनां स्वपत्नीत्वेन स्वीचकार ।

मृच्छकटिके एकतो रूपकारेण सत्यस्य प्रेम्णश्च महान् विजयोऽपरतश्च तात्कालिकी कृत्स्नापि समाजिकी च स्थितिः समीचीनतयाङ्कितास्ति ।

विशाखदत्तः—

"आज्ञापितोऽस्मि परिषदा यथाद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराज पदभाक् पृथुपुत्रस्य कवेर्विशाखदत्तस्य कृतिर्मुद्राराक्षसं नाम नाटकं नाटयितव्यम्" इत्येताः प्रस्तावनास्थिताः पङ्क्त्यो ज्ञापयन्ति यन् मुद्राराक्षसस्य प्रणेता विशाखदत्तो नाम रूपककारः प्राप्तराजसम्मानस्योच्चकुलस्य सुत आसीत् । तद्वंशस्य पूर्वजा उत्कृष्टेषु राजपदेषु आसीना बभूवुः । तस्य पितृ-पितामहौ यथाक्रमं महाराजपदवीं सामन्यपदञ्चोपबुभुजतुः । वटेश्वरदत्तः पृथुश्च इत्येतौ कुत्रत्यावास्तां कदा चोद्बभूवतुरित्येतदादिकं किमपि न विदितं वर्तते । उक्तयोर्महाभागयोः सम्बन्धे इतिहासे न कापि सामग्री समुपलभ्यते । एवमेव मुद्राराक्षसं नाम नाटकं कदा निरमीयत इत्येतदपि न निश्चितम् । एतं विषयमधिकृत्य अनेकमतानि श्रूयन्ते । विशाखदत्तो मुद्राराक्षसे यद् भरतवाक्य-मलेखीत् वर्तमानसमयोपलभ्यमानेषु पुस्तकेषु तस्य बहवः पाठाः प्राप्यन्ते । पाठभेदवशात् सुधियो विशाखदत्तस्य कालं लक्ष्यीकृत्य नैकान्यनुमानानि समुत्थापयन्ति । भरतवाक्ये रन्तिवर्मेति नाम विलोक्य केचन विशाखदत्तं कालि-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दासात् प्राग्वर्तिनमनुमिमते । 'चन्द्रगुप्त' इत्येतत् पदं तत्र प्राप्य श्री कोनो प्रभृतिप्रध्यस्तं चन्द्रगुप्तकालीनं मन्यन्ते । दन्तिवर्मेतिपाठवशात् केचन बुधास्त-मवगच्छन्त्यष्टमशतकवर्तिनम्[१] । अष्टमशतकवर्तितामानिनां कथनमस्ति यद् दन्तिवर्मा पल्लववंशस्यावनीश आसीत् तस्मान्मुद्राराक्षसस्य कालः स एव प्रतीयते । 'अवन्तिवर्मे'तिपाठाधारात् विपश्चितामिदं मतं यदवन्तिवर्मनाम-धेयौ द्वौ नृपौ बभूवतुः । तयोरेकतरस्तु मौखरीवंशे समजायत ; अपरश्च काश्मीराधिपतिरासीत् । मौखरीकुलोद्भूतस्यावन्तिवर्मणः समयस्तु ईशवीय-सप्तमशतकगामी विद्यते परं काश्मीरनरेशोऽवन्तिवर्मेशवीयं नवमं व्यद्योतयत् । अतः विशाखदत्तस्य स्थितिः सप्तमशतकवर्तिनो किं वा नवमशतकाश्रयिणी प्रतिलक्ष्यते । श्री तेलङ्गमहाभागस्याभिधानमेतद् यद् रूपककाराभिमतोऽवन्ति-वर्मा तु सः प्रतीयते यो राज्ञो हर्षस्य भगिनीपतिग्रहवर्मणः पितासीत् । श्री मेकडानलः[२] श्री रैप्सन[३]श्चेदमेव मन्येते । परं याकोबी महोदयस्य[४] विचारोऽयं यदवन्तिवर्मा काश्मीराधिपः कविना निर्दिष्टः । स्वविचारपक्षे स भणति यद् रूपके चन्द्रग्रहणघटना वर्तते । सा हि घटना २।१२।८६० खीष्टीयदिनाङ्केऽघटत तस्मादिदं नाटकं नवमेशतके विरचितमभूत् । डॉ० कीथो यद्यप्येतस्मिन् विषये स्वीयां निश्चयात्मिकां सम्मतिं नाभिव्यनक्ति परं तदीया सम्भावनेयं यद् विशाखदत्त ईशवीयान्नवमाच्छतकात् प्रागेवाभवत् । डॉ० जायसवालः श्री स्टेनकोनो-मतं परिपुष्णन् वदति यदिदं नाटकमीशवीयाच्छ-ष्ठात् प्रागेव प्रणीतमभूत् । प्रो० शारदारञ्जनस्यापि मतमिदमेव[५] यन्मुद्राराक्षसे विशाखदत्तो गुप्तसम्राजंचन्द्रगुप्तद्वितीयं विक्रमादित्येत्येतत्प्रशस्तिविभ्राजितम्प्रति सङ्केतं कुरुते । स मौर्यचन्द्रगुप्तचित्रणच्छलेन स्वाश्रयदातारं विक्रमादित्यमेव वस्तुतः श्लाघते । 'पाटलिपुत्रम्' इत्येतत्पदं नाटके व्यवहृतमथ च बौद्धक्षपण-

---

१—एम० कृष्णमाचार्यः हिस्ट्री ऑफ संस्कृत लिट्रेचर, पृ० ६०५ ।

२—मेकडानलः हिस्ट्री ऑफ सं० लि० पृ० ३६५ ।

३—जी० आर० ए० एस० १६००, पृ० ५३५ ।

४—वीना ओरण्टियल जर्नल, २, पृ० २१२ ।

५—एस० रेज़ इग्सट्रक्शन टू हिज एडीशन ऑफ मुद्राराक्षस, पृ० ९-१४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कानां चर्चा ज्ञापयति रूपकस्यास्येशवीयपञ्चमशतकाभ्यर्णवर्तित्वम् । डॉ० विण्टरनित्सः स्वकीये 'हिस्टॉरिकल ड्रामाज इन संस्कृत-लिट्रेचर' प्रबन्धे लिखति यद् देवीचन्द्रगुप्तरूपकस्योपलब्धेभ्योंऽशेभ्यः कवितिथिनिर्धारणे सहायतावाप्यते । देवीचन्द्रगुप्ते चन्द्रगुप्तद्वितीयकृतं शकानामवस्कन्दनं, बन्धोः कुमारगुप्तस्य क्राथनं, तदीयस्य राज्यस्यायत्तीकरणं तत्पत्न्या ध्रुवदेव्या सहोद्वाहकार्यं च वर्णितं दृश्यते । ज्ञायते, यच्चन्द्रगुप्तस्य तानि महान्ति अभिनन्दनीयानि कार्याणि कवेः शौर्यप्रियं मानसं नूनमप्रीणयन् ; तस्मात् सः रूपकं तत् प्रणिनाय । तद् रुपकं किञ्च मुद्राराक्षसमेकस्यैव कवेः कृती स्तः । देवीचन्द्रगुप्तस्य नाटकस्याभिनयनं चन्द्रगुप्तद्वितीयस्य काले संवृत्तमित्येतत्कथनं न युक्तं प्रतिभाति । एतेन मुद्राराक्षसप्रणेतृविशाखदत्तस्येशवीयषष्ठशतकवर्तित्वमेव निश्चयपथमधिरोहति । श्रीकृष्णमाचार्योऽप्यस्मिन् विचारेऽभिरुचिं प्रकटीकुर्वन् दृश्यते ।

केचनालोचकाः कस्यचन कवेः शैलीमाश्रित्य अमुकः कविरमुककाले जात इत्येतद्विधं विचारं निबध्नन्ति ; केचंश्च विचारकाः कस्यचन कवेः कालनिर्धारणम्प्रति कमपि राजानं प्रधानत्वेन मन्वाना 'अमुकः कविः अमुकनृपतिसमये सञ्जात इत्येतादृशीं धारणां संग्रथ्नस्ति । परं कवीनां प्रकृतिस्तु परमस्वतन्त्रा प्रायेण प्राप्यते । न ते कस्यापि शैल्याः न च कस्यापि नृपस्याश्रयणमेव स्वीकुर्वन्ति । तस्मान्निश्चयपूर्वकं कापि शैली वा नृपाश्रयश्च न कस्यचन कवेः स्थितिकालं बोधयितुं प्रभवति ।

मुद्राराक्षसनाटकस्य चन्द्रगुप्तपरकत्वात् भरतवाक्ये चन्द्रगुप्त इति पाठ एव युक्तः प्रतिभासते । एतस्य पाठस्य युक्ततरतां नाटकस्योपसंहृतिस्थले 'भो राजन् चन्द्रगुप्त,..........' तथापीदमस्तु वाराहीमात्मयोनेः.........इत्येतदादीनि वचांस्यपि निष्पादयन्ति । कवेः शौर्य-गुरुभक्त्यादिगुणानुरागित्वमनुपदमेवोक्तमतः कवि र्भरतवाक्यापदेशेन चन्द्रगुप्तस्यैव शुभं कामयमानः प्रतीयते । पाठस्यैतया युक्ततरतया तु मुद्राराक्षसकारस्यावन्तिवर्मादिनृपतिकालवर्तित्वादिविषयिण्यूहापास्ता भवति ।

म्लेच्छैरुद्विज्यमानेत्याद्यन्तिमश्लोकगतपङ्क्तिमाधृत्य केषाञ्चन मतिमतां कथनमेतद् यन्म्लेच्छाक्रमणारम्भे रूपकमिदं रचितमभूत् । तेन कवेः स्थिति-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काल एकादशस्य वा द्वादशस्य शतकस्याभ्यन्तरे प्रतीयते । परं 'म्लेच्छ' इत्येतत् पदं न केवलं यवनवाचकम् । तत् निकृष्टक्षुद्रास्पृश्यादिवाचकमपि । अस्मिन्नेव रूपके 'अहो अविवेकिता म्लेच्छस्य मलयकेतोः' ; 'म्लेच्छेन कालोचित' मित्यादिस्थूलेषु म्लेच्छ इति पदं न यवनार्थे प्रयुक्तम् । पुनः कथं म्लेच्छैरुद्विज्यमाना' इत्यत्र प्रयुक्तो म्लेच्छशब्दो यवनवाचक एवेति सप्रत्ययं वक्तुं सुशकम् । अस्य रूपकस्य रचन मेकादशशतके जातमिति मतं त्वस्मादपि हेतोः श्लथतां सेधति यद् दशरूपकेऽपि मुद्राराक्षसस्योल्लेखोऽवाप्यते । दशरूपकस्येशवीयदशमशतके विरचितत्वाद् रूपकस्यैतस्यैकादशशतककालीनत्वं तु केनापि प्रकारेण न सङ्गच्छते । रूपकसमावेशितकथोत्थापितवातावरणं वीक्ष्य किञ्चोपरिकृताखिलविवेचनेन तु रूपकस्य रचनाकालोऽथवा रूपककारस्य विशाखदत्तस्य स्थितिसमयः सप्तमशतकादूर्ध्ववर्त्येवोह्यते खलु ।

सम्प्रति कथावस्तु समासेन निधीयते—

राजनीतिज्ञचक्रचूडामणिचाणक्यस्य बलवत्तरेणाजय्येन साहाय्येन चन्द्रगुप्तो मगधसिंहासनं स्वायत्तीकर्तु मीष्टे । स्वविजयोपलक्ष्ये कौमुदीमहोत्सवस्यायोजनाय सम्राट् चन्द्रगुप्तः पाटलिपुत्रस्य पौरानादिशति । सोऽमन्दानन्दसन्दोहसुस्निग्धान् सुवर्णस्वप्नान् विभावयन् विलोक्यते परं चाणक्यस्य चेतश्चिन्ताकुलमेव सन्तिष्ठते ।

तस्मिन् कौमुदीमहोत्सवे व्यापृतान् विजयोन्मत्तान् सकलानपि मानवान् विलोक्य महामात्यस्य राक्षसस्य मलयकेतोश्च सेना प्रत्यूहं संवर्ध्य सर्वामपि मुदं दलयितुमर्हतीत्येषा चिन्ता चाणक्यमाचार्यं मुहुर्मुहुराक्रमते । भवति सः कोपक्लान्तः । परं क्षिप्रमेव तदीया जागरूकता, सतर्कता, कर्तव्यकुशलता, दूरदर्शिता, क्रियाविधिपटीयस्कता चोद्वेलन्ति । केन विधिना चन्द्रगुप्तस्यारातयो विजेतव्याः; कथङ्कारं च नन्दानां महाभक्तो राक्षसो हि स्ववशे कार्य इत्येतस्मिन् गम्भीरविचारार्णवे स निमज्जति । स राक्षसस्य साङ्ग्रामिकीं शक्तिमेव न वेत्ति परमेतदपि जानाति यद् विद्रोहिणि मेधाविनि राक्षसे सति सन्तिष्ठमाने न चन्द्रगुप्तस्य सिंहासनं स्थिरतां गन्तुमर्हति । राक्षसस्यायत्तीकरणं तदीयस्वामिभक्तेश्छत्रच्छायायां च चन्द्रगुप्तस्य प्रापणं सुतरामेकान्ततोऽपेक्ष्येते—इत्येत्तं निर्णय-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मसावात्मानं प्रापयति। ततश्च सः कूटराजनीतिचक्रं चालयितुं सोत्साहमुपक्रमते। तदीयाः स्पशाः राक्षसस्य परमस्नेहपात्रतां नीता भवन्ति। ते मलयकेतोः सव्यापसव्यशया भूत्वा चाणक्यस्य मनोऽभिलाषान् क्रियासु परिणमयन्तो लभ्यन्ते। ते सर्व एव कृत्स्नतया चाणक्याङ्गुलिसङ्केते दारुपुत्तलिकाः इव नृत्यन्ति। राक्षसश्च स्वकीयानुपायान् चाणक्यस्य निशितायाः प्रतिभायाः पुरोऽपार्थान् प्रेक्ष्य चाणक्यचन्द्रगुप्तयोरन्तराले द्वैधीभावमुत्पादयितुं पाशमस्यति। परं तद्व्यवहृता उपायाश्चाणक्येन समूलमुच्छिद्यन्ते। कृतकं कलहं कृत्वा स विपक्षस्थितान् सम्यग् विप्रलभते। राक्षसश्चाणक्यस्य कूट-कार्यकलापं तत्वतो वेत्तुं न पारयति। फलञ्चेदमुद्भवति यत्कौमुदीमहोत्सवमधिकृत्य चाणक्यचन्द्रगुप्तयोर्मध्ये प्रवृत्तः कृत्रिमः कलहः स्वलक्ष्यं वेधयति। राक्षसो येन येन साधनेन चाणक्यं पराजेतुमीहते तत् तत्साधनं चाणक्यो नैजममोघायुधवन्मन्यते।

राक्षसस्य मुद्रां करायत्तां विधाय चाणक्यस्तस्यैव लेखाध्यक्षेण कूटपत्र लेखयित्वा तत्पत्रद्वारेण राक्षसमतितरामुद्वेजयति। पाटलिपुत्रावरोधस्य कथा तु दूरे क्षिप्यत एव परं युगपदेव राक्षसस्य महत्वाकाङ्क्षा सैन्यशक्तिश्च समूलमधरीक्रियेते। राक्षस आत्मसमर्पणं कर्तुं विवशः स्यादित्येतदर्थं सः पाटलिपुत्रस्य धनकुवेरं चन्दनदासं राजविद्रोहागसि शूले समारोपयितुं घोषणां कारयति। राक्षसश्चन्दनदासं पातुमात्मानं चाणक्याय समर्पयति। परमेतावता चाणक्यो न तुष्यति स धीमन्तं स्वामिभक्तिगुण-गौरवगरिष्ठं राक्षसं तावन्न जहाति यावत् सः चन्द्रगुप्तस्य मन्त्रित्वं नोररीकरोति। सः स्वकीय एतस्मिन प्रयासेऽपि सफलो भवति। तदेवं चाणक्यः स्वनीत्यां विजयते।

मुद्राराक्षसे गृहीतस्य कथावस्तुनस्तत्वानि विष्णुपुराणाच्छ्रीमद्भागवतात् पुरातनेतिहासेभ्य आहृतानि सन्ति। कविना स्वकीयेन अगाधेन पाण्डित्येन प्रकृष्टया राजनीतिशास्त्रनिष्णाततया अद्भुतेन दृश्यकाव्यप्रणयनवैदग्ध्येन च पौराणिकमपि कथावस्तु प्रति तद् दिव्यं सौन्दर्यं प्रदत्तं यद् विलोक्य राजनीतिज्ञानां विद्वद्वराणां नाट्यतत्वविदामपि च मनांसि तस्य पुरस्तान्नतमस्तकानि सञ्जायन्ते। कविर्नन्दमौर्यसाम्राज्यविषयकमुपाख्यानं नाटकीये वपुषि सन्निधाप्य यन्महनीयं स्तुत्यं कार्यं चकार तत्प्रति सकलमपि विद्वज्जागत् सादरं कृतज्ञतामावहति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विशाखदत्तो मुद्राराक्षसं देवीचन्द्रगुप्तं राघवानन्दं च लिलेख—इत्येतत् संस्कृतसाहित्येतिहासात् ज्ञातं भवति। राघवानन्दस्य तु साम्प्रतं समुपलब्धिर्भवत्येव न। सुभाषितग्रन्थेषु तस्य कतिपये श्लोकाः तत्र तत्रावश्यं प्राप्यन्ते। देवीचन्द्रगुप्तरूपकमपि न पूर्णं लभ्यते। तदीयाः केचन एव अंशाः सम्प्रति दृश्यन्ते। सम्भवमस्ति एते रूपके नैजं पूर्णं रूपं परिगृह्य क्वापि स्थिते स्यातां परं नास्मद् दृष्टिपथं गते स्तः। सदुक्तिकर्णामृतेऽधोलिखितः श्लोको विशाखदत्तरचनात्वेन गृहीतोऽस्ति—

रामोऽसौ भुवनेषु विक्रमगुणैर्यातः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम्।
वन्दीवैष यशांसि गायति मरुद् यस्यैकवाणाहत-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥

इत्येतेन श्लोकेन राघवानन्दस्य रामकथापरकत्वं सिद्ध्यति। नाम च तदीयं तदेव प्रकटीकरोति।

परं कवेर्विशाखदत्तस्य राजनीतिप्रियत्वात् वीररसानुरागित्वाच्च तस्य राघवान्दकर्तृत्वे मनः संशेते। न सा कृतिस्तत्प्रकृतिसंवादिनी। उभयत्रापि सरण्याभिर्न्नभिन्नत्वात् ते द्वेऽपि कृती एकस्यैव कवेरित्यत्र चित्तं सहसैव स्थैर्यं न व्रजति।

देवीचन्द्रगुप्तं तु रूपकमेतादृशमवश्यं प्रतिभाति यद् विशाखदत्तीय-लेखनीकादम्बिनीतो वृष्टं भवितुमर्हति। तत्र वीररसः प्रवहति। तदीयं कथावस्त्वप्योजोमयम्। तत्र वीरतायाः कापुरुषतार्दनकारिणो गुणस्य च मनोज्ञं भव्यं च स्वरूपं विलोकितं भवति तस्मादनुमीयते यत् तद् विशाखदत्तस्यैव कृतिरस्ति। तस्मिन् रूपके वर्णिता घटनापि कविकालसन्निधिसेविनी वर्तत इत्येतस्मादपि हेतोस्तस्य विशाखदत्तकर्तृत्वं सिद्ध्यति। देवीचन्द्रगुप्ते वर्णितं यत् समुद्रगुप्ते सत्युपरते तत्तनूजो रामगुप्तः सिंहासनमध्यास्त। सः सम्राट् स्वभावेन क्लीब आसीत्। कस्माच्चिच्छकनरेशकृतादाक्रमणाद् भीतो भूत्वा सः स्वमहिषीं ध्रुवदेवीमपि शत्रवे प्रदातुं सन्नद्धोऽभूत्। परं तदनुजश्चन्द्रगुप्तः परमनिर्भीकः साहसी वीरवरेण्य आसीत्। तस्य कापुरुषत्वे नितरां जुगुप्सावर्तत। सः कूट-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नीतिमवलम्ब्य अरिं शकपतिं जघान। स्वीयं ज्येष्ठबन्धुं रामगुप्तं च हत्वा स राज्यं स्वाधिकारे चकार। तदीयमद्भुतं साहसमसामान्यं च शौर्य्यं वीक्ष्य ध्रुवदेवी तं स्वभर्तृत्वेनाभ्युपजगाम। सत्यमेव वीरभोग्या वसुन्धरा। ऐतिहासिकया दृष्ट्या रूपकं देवीचन्द्रगुप्तं महत्त्वपूर्णमस्ति।

ईशवीयं षष्ठ शतकं यावत्[1] बहून्यन्यान्यपि रूपकाणि विरचितान्यभूवन्। परं तेषां मध्ये बहूनां तु कर्तृत्वमपि न निश्चितम्। कियन्ति च एतादृशानि विद्यन्ते येषां रचनाकालोऽपि सन्दिग्धः। अपरेषां तु कियतां पद्यानि सुभाषितेषु विलोक्यन्ते न तानि स्वतन्त्रं नैजं रूपं बिभ्रति। वस्तुतो देशस्यास्मदीयस्य विद्यानुरागित्वाच्छास्त्रव्यसनित्वात् काव्य-नाटकाख्यायिकादिषु धृताभिरुचित्वाच्चात्र सततमनुक्षणं विविधानां रचनानां प्रणयनमभूत्। तत्र बहूनि च रूपकाण्यपि लिखितान्यभवन्। परं मुद्रणसामग्र्याः अभावात् ग्रन्था हि हस्तलिखिता एव भूत्वा समतिष्ठन्त। सम्प्रत्यपि पुरातनं तत् हस्तलिखितं प्रचुरं साहित्यमितस्ततो विकीर्णं दृग्गोचरीभवति। प्रभूतं साहित्यं कालेन विनाशितं; ततोऽपि गण्डस्योपरि पिटकोऽयं संवृत्तो यद् भारतीयाः स्वयमेव स्वभाषायां साहित्ये-चोपेक्षाशीलस्वभावाः सञ्जाताः। एतद्धेतोः संस्कृतवाङ्मयस्य भूयांसि रत्नानि विलुप्तान्यभवन्। अत्र केवलं तान्येव रूपकाणि परिगृहीतानि यानि सरलतयावाप्तान्यजायन्त किञ्च येषां रूपकाणां शोधनीयत्वमिहापेक्षितमासीत्।

१—चन्द्रशेखर पाण्डेयः संस्कृति साहित्य की रूपरेखा, पृ० २२४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

षष्ठः परिच्छेदः

राजनीतिक-स्थितिः

अस्मदनुसंधेयानां रूपकाणामनेहाः शतकानां सप्तकमभिव्याप्य विभ्राजते। स ईशुमसीहजनुषः प्राग्वर्तिनः प्रथमाच्छतकात् प्रारब्धो भूत्वेशवीयषष्ठशतकावसानेऽन्तमभ्युपैति। तस्यानेहसोऽन्तराले बहूनि बहुविधानि च राज्यानि देशीयानि वैदेशिकानि चादृश्यन्त। तस्मात् तदानीं राजनीतिकी स्थितिर्विसंस्थुलासीत्[1]। परं तादृशी उपप्लवाप्लुता स्थितिर्गुप्तशासनं[2] यावन्नोदियाय तावदेव स्फूर्च्छन्त्यस्फूर्जत्। यदा च गुप्तसाम्राज्यमपप्तत् तदा पुनश्च भारतं चिन्तनीयया निपातनकारिण्या राजनीतिकावस्थयाऽग्रस्यत्। तदेवं भासकालिदासाश्वघोषशूद्रकविशाखदत्तादिकवीनां कालस्य राजनीतिकस्थितिर्वस्तुतो न तोषावहा न चासीदतौषावहैव। गुप्तसाम्राज्यस्य श्लाघास्पदत्वान् मनोज्ञत्वाच्च तस्याः (राजनीतिस्थितेः) तोषावहत्वं किञ्च तदितरशासनस्यातथाविधत्वाच्च तस्याः अतोषावहत्वमित्युदीरितम्।

"इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः"॥

इत्येवंविधायाः कामनाया अवतारणा कस्यचन कवेश्चेतसि तदानीमपि भवितुमर्हति यदा राष्ट्रे राज्यमेकातपत्रं न दृश्यते, यदाहि शासनं देशे तेजस्विताभास्वरमरिमर्दनक्षमं नावाप्यते, यदा च शास्तरि प्रजारञ्जनशीलगुण उपरमते। मन्ये, भासस्य कालेऽवश्यमेव राजनीतिस्थितेरसमीचीनत्वाद् देश आसीदशान्तोऽत एव तु सः राजसिंहस्य प्रशासनमभिलषते। मौर्यसाम्राज्यनिपातो[3] हि देशस्य राजनीतिकदशाया दुर्बलत्वं स्पष्टमेव सूचयति।

१—दी केम्ब्रिज हिस्ट्री ऑफ इण्डिया, खं० १, परि २१, पृ० ४६५।
२—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० ३, परि ३, पृ० १९।
३— " " खं० २, परि० ४, पृ० ६१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अल्पशक्तिजुषां निस्तेजस्कानां भूपानां स्थितिः, सर्वत्र सञ्चरमाणा स्वच्छन्दता, वैदेशिकप्रभावस्य समुन्मीलनं, स्वदेशस्थनृपतिषु विद्यमानं पराक्रमणनिवारणाक्षमत्वञ्च सर्वदैव कवींस्तथाविधोद्गारोद्गिरणाय नुदन्त्येवेति सर्वविदितम् । गुप्तसाम्राज्यपतनानन्तरं देशो हि पुर्नविगठनकारिण्या शक्त्या निपीडितोऽभूदित्येतत् "लोहिताक्षविजयधर्मणोरपि दायादमसहमानयोः अतिमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यती"त्यादिकं वाक्यं मुद्राराक्षसकारो यदुद्गिरति तत् स्फुटतयाभिव्यनक्ति ।

इदं कस्य नामाविदितं यद् भारते सहस्रेभ्योऽपि पराणि वर्षाणि तावत् धर्मप्राणानामादर्शचरित्राणां महीमहेन्द्राणां हरिश्चन्द्रेक्ष्वाकुदिलीपरघुयुधिष्ठिरादीनां परम्परा द्योतमाना भवन्ती समग्रमपि लोकंकेन विधिना प्रजाः शासनीया इत्युपादिशत् । तस्मादत्रत्यानां नृपाणां शोणिते स्वपूर्वजानां संस्काराणवः सततं सञ्चरमाणा एव अदृश्यन्त परं कालान्तरेण तेषां सकाशे प्रथमन्तु तथाविधानां तत्वदर्शिणां ज्ञानविज्ञानपारावरीणानां त्यागतपःपरिपूतान्तःकरणानाममात्यानामभावः प्रायेण बभूव यथाविधानां सध्रीचींनतां तदीयाः पूर्वजाः अवापुस्ततोऽप्युपरि कारणमिदमपि प्रास्फुटत् यत् तेषु राष्ट्रियभावना नश्यत् ; स्वशास्त्रस्वाध्यायानुरागोऽश्लथत ; प्रजावत्सलता च कृशतामगच्छत् । अतः सर्वत्र लघुलघुतरराज्यानि वर्षाभ्व इव व्यकीर्यन्त । भावनायाः अनुदारत्वाद्राजानो न केन्द्रीयशक्तिनिघ्नतामसहन्त । सर्वेऽपि स्वकीयमेव राजाधिराजत्वमचीकमन्त । मन्त्रिणः स्वयमेव नृपा भवितुमीहाञ्चक्रिरे । ते राजसु प्रायेण न विमलमाचारं व्यवाहरन् । मालविकाग्निमित्रमस्यां दिशायां पर्याप्तं प्रकाशं क्षिपत् प्राप्यते पतञ्जलेर्महाभाष्यादपि तदानीन्तनस्य समयस्य कलहाकुलत्वं विदितं जायते । पुराणेषु च कतिपयानि तस्य कालस्य राज्ञां सङ्कीर्णमनस्कतां बोधयन्ति । उक्तं तत्र काण्वायननानां राज्यं मगधेषु कानिचन एव अब्दान्यजीवत् । तेषामाधिपत्यमान्ध्रैरुन्मूलतां नीतम् । अस्मदनुसन्धीयमानकालस्यासंख्यातानि राजकीयानि कार्षापणादिकानि पाटलि[१]पुत्रमथुरापाञ्चालदिस्थानेषूत्खननात् प्राप्तानि च तानि तानि द्रव्याणि भास-कालिदासादिरूपक-

---

१—दी हिस्ट्री एण्ड कल्चर······इण्डियन पीपुल, खं० २, परि० ६, पृ० १००

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काराणां कालस्य नानाराज्याकीर्णत्वं ज्ञापयन्ति । तस्य कालस्य कुनृपवत्ता नास्माकीनान् कालिदासादिकवीन् अप्रीणादतस्ते पुनरपि स्वीये भारते राजर्षि-धरारमणदिदृक्षया दुष्यन्तादिनृपवर्णनव्याजेन "अध्याक्रान्ता वसति रमुनाप्या-श्रमे सर्वभोग्ये रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति" (शाकु०, २।१५) इत्यादिभावानुद्भावयन्ति । भासोऽपि, शङ्के, एतयैव भावनया प्रेरितः सन् "भारतानां कुले जातो विनीतो ज्ञानवान् शुचिः" इत्याचष्टे ।

हन्त, यद् भारतं मौर्यसाम्राज्यस्य सुखदायां छत्रच्छायायां सर्वथा ऐक्य-सूत्रेण संगठितं सुदृढञ्चासीत् सांस्कृतिकेनोत्थानेन यदुच्छ्रितमवालोक्यत ; विश्वस्य मान्यैः शासकैः समं राजनीतिकं च सम्बन्धं प्रतिष्ठाप्य यत् समृद्ध-मासीत् ; यदीयं सौहृत्सुखमुपभुञ्जानः सीरियायाः सिल्यूकसः, मिश्रस्य टाल्मी, मेसोडोनियाया अण्टीगोनसः, लङ्कायाश्तिसा, नयपालस्य च राजात्मानममंसत; धन्यम्; यदीयाश्च चराः प्राणिमात्रमाराधयितुं तदार्तिश्चापनेतुं दविष्ठानपि भूभागान् विचेरुः ; यश्च साद्यस्केन संसारेण वाणिज्ये, विज्ञाने, साहित्ये, कला-कलापे च श्लाघनीयां समृद्धिं समासादयन् सम्यगदर्शि स एव देशो मौर्यसाम्रा-ज्यसप्तसप्तावस्तमिते द्वैधीभावध्वान्तेन शुङ्गकण्वादिकाले ग्रस्तो बभूव । सर्वतः खद्योता इव क्षोदीयस्यः कुत्स्सिताः शक्तय उत्पतितुमारेभिरे । देशस्य राज-नीतिकं तेजस्तनीयसीं स्थितिमुवाह । तदीयं प्राक्तनं संगठनं शतशो भूत्वा विददार । वैदेशिकं च राजकुलं भारतभुवमवष्टभ्य¹ समुत्तस्थौ । भारतस्यैवा-र्भका स्वामेव भारतमातरं मात्सर्यस्पर्धाद्वेषलोभकलहादिदोषहेतिततिभिः प्रहर्तुं प्रचक्रमिरे ।

१—(अ) "कथं कार्यविनिमयेन······प्रतिकूलकारी च मे वैदर्भः"
(मालविकाग्निमित्रे प्रथमेऽङ्के)

(आ) योऽसौराजयज्ञदीक्षितेन······उभयोः सेनयोर्महान् आसीत् सम्मर्दः ।
(तत्रैव पञ्चमेऽङ्के)

(इ) उपलब्धवानस्मि प्रणिधिभ्यः······ ; "कौलूतश्चित्रवर्मा·········
चित्रगुप्तः प्रमार्ष्टुं ।
(मुद्राराक्षसे प्रथमेऽङ्के)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुष्पमित्रस्य समये यवनाधीशो मिनेण्डरो भारतमाचक्राम परमसौ तमजयत्। इतिहासोऽवगमयति यत् तदानीन्तनः कालो राजनीतिकभारते परां चिन्तां गाहमानो व्यलोकि। तस्मिन् काले ब्राह्मणवादः प्रादुर्भवन् बौद्धधर्मश्चास्तं गच्छन् विलोकितोऽभूत्। शुङ्गवंशस्य पुष्पमित्रो यवनान् पारेसिन्धुं यद्यपि प्राद्रावयत् परं न सः कलिङ्गचेदिशक्तिमथ च शालिवाहनीयां प्रभुतां पराभवितु मशकत्।

यद्यपि शुङ्गानां शासनसमये धर्मसाहित्यकलानां विकस्वरता अवालोक्यत[1] परं राजनीतिशक्तेः कृशतरत्वाद् देशे कस्याञ्चनाशायां शकः कस्याञ्चन काष्ठायां यवनाः कस्याञ्चन दिशायां कुषाणाः पार्थियानाः (पल्लवाश्च) प्राप्यन्त। वैदेशिका इमे यद्यपि भारते राज्यानि प्रतिष्ठापयासासुः परमेते पूर्णतया भारतीयतामप्यङ्गीचक्रुः। एतदीया अनेक उत्कीर्णलेखा नासिकादिस्थलेषु प्राप्यन्ते। वाह्यतत्वानां समुद्भवादशान्तिः स्वभावतयैव प्रसरणस्यावसरं लभते भारतेऽप्यतो राजनीतिकक्षेत्रेऽव्यवस्था[2] समागता विप्लवस्य वातावरण[3] मिव तदा विततता जगाम। खैस्ताब्दोदयात् प्राक् चत्वारिंशद्वर्षपर्यन्तं भारतस्यैकस्मिन् भागे काण्वं कुल शासदहश्यत। न तदा तस्य किमप्युल्लेखनीयं कार्यं दृष्टमभूत्। भासस्य 'परचक्रं प्रशाम्यतु' (अभिषेके) इत्यत्रैव सङ्केतं कुर्वत् प्रतीयते। वायु (अ. ४५), मत्स्य (अ. १४४), ब्रह्माण्ड (अ. ४९) वामन (अ. ३३), मार्कण्डेय (अ. ५७), गरुड (अ. ५५) पुराणानां, दिनेशचन्द्र सरकारकृतपुराणगतजनपदसूचीना मथ च इण्यिन हिस्टॉरिकल क्वार्टरली (वर्ष० २१, पृ० २९७-३१४) पत्राणा मनुशीलनेन च विदितं जायते यद्स्मदीयान्वेषणीयकालः पौराणिकः काल आसीत् अथ च सोऽनेकजनपदसमाकीर्णो बभूव। कम्बोजजनपदतः सुदूर दक्षिण भागपर्यन्तं, प्रातीच्यसिन्धु सौवीरकच्छतः प्राच्याङ्गवङ्गकलिङ्गान् यावत् जनपदानां महती श्रेणी विततावाप्यत। कालिदासस्य "अविश्रमोऽयं लोकतन्त्राधिकारः" किञ्च—

१—सत्यकेतु विद्यालङ्कारः भारतीय सं० और उसका इतिहास, पृ० २५८।

२—केम्ब्रिज हिस्ट्री आफ इण्डिया, खं० १, परि० ११, पृ० ४६३।

३—बी. एन. लूनियाः भारतीय सभ्यता तथा संस्कृति का इतिहास, पृ० १७०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम् ।
यूथानि सञ्चार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः"[१]

"ततः परान् पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः" ।।[२]

इत्येतदादीनि वाक्यानि तस्य युगस्य जनपदवत्तां किञ्च सङ्घात्मकतां च प्रति नूनमिङ्गितं विदधानानि लक्ष्यन्ते ।

सत्यंत्विदं यत् प्राचीनस्यभारतस्य राजनीतिकं जगद् धर्मनेतृभिः सञ्चालितमासीत् जैन-बौद्धसाहित्यं पुराणानि च सन्त्यत्र साक्षीणि । देशस्योत्तरदक्षिणभागावुभावपि नानाराज्यवन्तावास्ताम्[३] । शालिवानशासनं हित्वान्यान्यखिलानि राज्यान्यल्पाल्पभूभागव्यापीन्याप्यन्त ।

शालिवाहनान्वयशासनं २२५ तमेशवीयाब्दस्य सन्निधावस्तमियाय । समुद्रगुप्तस्य प्रयागस्थस्तम्भलेखेन ज्ञायते यदान्ध्र (शालिवाहन) साम्राज्य उपरते दक्षिणभागो बहुललघुलघुराज्येषु विभक्तो बभूव । तेषुराज्येषु पल्लवस्थानां नरेन्द्राणां राज्य मुन्नयनं गच्छदध्यगम्यत ।

(अ) "फलयोग्य मवाप्य सायकानां विधियोगेन विपक्षतां गतानाम्"

(अ) "अश्वैः सार्धमजस्रदत्तकविकैः क्षामैरशून्यासनैः"

इत्यादीनि मुद्राराक्षसस्य सप्तमाङ्के स्थितानि च वाक्यानि तात्कालिकीं राज्यसङ्कुलतामपरोक्षतयोद्भावयन्ति ।

खैस्ताव्दारम्भात् प्रागर्वाक् चावाच्ये भारते क्वचिद् गाङ्गाः, क्वचित् पाण्ड्याः[४], क्वचिच्चोलाः क्वच्चिान्ये[५] भूपतयो धृतशासनसूत्राः समलभ्यन्त ।

१—अभिज्ञान शाकुन्तलम्, पञ्चमोऽङ्कः ।

२—मालविकाग्निमित्रम् ५ माङ्कः ।

३—कैम्ब्रिज हि० ऑफ इण्डिया, खं० १, परि० २२, पृ० ४६१ ।

४—दी हि० एण्ड कल्चर······पीपुल, खं० ३, परि० १३, पृ० २६७ ।

५— " " " "

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्समयस्य शिलालेखेभ्यो भवति विदितं यत् तदानीं दक्षिणभारते राजनीति धर्मेण प्रमुखतया समाच्छन्नासीत् । राजानो यज्ञार्चनादिधार्मिकेषु कृत्येषु रुचिं भृशं जगृहुः । आसंस्ते साम्प्रदायिकधिषणाः । शैवानां वैष्णवानां शाक्तानां च प्रायेण बाहूल्य मभूत् । पौराणिका बौद्धेषु बौद्धाश्च तेषु द्वेषधियं निबबन्धुः । नृपाणां पण्डित-पुरोहित-तर्जनीस्थत्वात् प्रायेण राज्यस्यशक्तिः साम्प्रदायिकेषु कलहेषु क्षीणा बभूव । एतद्विरोधाद् यातायातानां किञ्चान्येषामपि लोक-कार्याणामुपरि कुप्रभाव एव निपतन् प्राप्यत । न राजानो जन-हितेषु नैजं ध्यानं स्थापयितु मशकन् । प्रादेशिकतावादो जातिवादश्च अहरहः प्रचण्डतामगमताम् ।

न धार्मिकता तत्कालवर्तिनीदृश्यासीद् यत्र संहतिर्वृद्धिं प्रपद्यते राष्ट्रियता च वर्धते । तस्मादीशवीये प्रथमे शतके देशोऽवनतिविधायिनी मेव प्रकृतिं परिष्वजमानोऽदर्शि । शकयवनादिका निर्बाधमेवागमनस्य वासस्य चानुकूलं वातावरणं प्रापुः । भरतकृते नाट्यशास्त्रे ईदृगाभास आप्यते यदाधारे तत्समयवर्तिनां महीपतीनां शैथिल्य मदूरदर्शित्वञ्च तदनुमितं भवति यदत्र स्वत्वप्रतिष्ठापनाय येषां चेतसि साहस मजीजनत् ।

"यौऽसौ राजयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तार माबिश्य वत्सरोपात्तनियमो निरर्गलस्तुरंगो विसृष्टः, स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनेन प्रार्थितः । तत उभयोः सेनयो र्महानासीत्संमर्दः"—इत्येता मालविकाग्निमित्रे पञ्चमाङ्के स्थिताः पङ्क्तयश्च उपरिस्थित मनुमानं द्रढयन्ति ।

परं तावतां देशान्तरवासिनांहि आगमने सत्यपि इहत्याया जनतायाः शान्तिः स्वस्थैव भूत्वा समतिष्ठत । अत्र हेतुरयमेव तर्क्यते यत् तत्कालीना जना राजनीत्यां न रुचिं मदीदृशन् । वैदेशिका देशं केन्द्रयशक्तिरहितं, जनता मुदारां धृतजात्युपजातिवादमनस्कां, किञ्च देशस्य ग्रामान् पुराणि च समृद्धिमन्ति, भुवं च सस्यश्यामलां विलोक्य मुमुहुः । ते देशस्य प्रतिभां शास्त्रज्ञतां तस्य च नैसर्गिकीं श्रियं प्रेक्ष्य तद्भक्ता अजायन्त । देशस्य सद्गुणावली तेषां मनस्येवंविधं प्रियं प्रभाव मपीपतत् यत् ते तस्य हितायैव अचेष्टन्त । कुषाणादिक्षितिपा देशोदयाय यद् यच्चक्रु स्तत् तद् भारतीय इतिहासः समुदं गायन् श्रूयते । साम्प्रतं तस्य कालस्य लभ्यमाना मुद्रास्तेषामभारतीयानां नृपाणां भारतीयसंस्कृति-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सम्यतानुरागित्वं स्पष्ट मभिव्यञ्जन्ति। एवं प्रतिभाति तदा न जना न च नृपा राजनीत्यां रुचिं निदधुस्तेऽतो न तं प्रयत्नं कृतवन्तो येन कस्यापि देशस्य राजनीतिकं बल मेधते। मन्ये, तत्कालवर्ती देशो राजनीति मपि सरलहृदयां साध्वीं महिला मिव द्रष्टु मियेष।

मृच्छकटिकं नाम प्रकरणं तस्य युगस्य राजनीते र्वराकीं दशामपि साधु समुपन्यस्यति तन् नृपस्य पालकस्य कुशासनं तद् विरोद्धु मुत्थितां क्रान्तिञ्च निधाय तत्समवर्तिनीं शासनगतस्वच्छन्दता मव्यवस्थां च सम्यक् प्रदर्शयति। तदानीं न्यायालयाः नासन् पर्याप्त समुचितसम्भारसामग्रीकाः न च ते तदनुरुपोचितव्यवस्थाभाजः। पर मधिकरणेषु न्यायपतयो निष्पक्षा न्यायप्रिया धर्मशास्त्र-राजशास्त्राद्यनेकशास्त्रनिष्णाताः स्वधर्मे स्वकर्त्तव्ये च सावधानाः सदाचारसुन्दराः समवाप्यन्त।

(क) "यथा यथेदं निपुणं विचार्यते तथा तथा सङ्कटमेव दृश्यते।
अहो सुसन्ना व्यवहारनीतियो मतिस्तु गौ पङ्कगतेव सीदति" ॥९।२५

(ख) व्यवहारः सविघ्नोऽयं त्यज लज्जां हृदि स्थिताम् ॥
ब्रूहि सत्य मलं धैर्यं छल मत्र न गृह्यते॥ ९।१८

(ग) तुलनञ्चाद्रिराजस्य समुद्रस्य च तारणम्।
ग्रहणञ्चानिलस्येव चारुदत्तस्य दूषणम् ॥ ९।२०

(घ) वेदार्थान् प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता।
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता॥
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो।
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः॥ ९।२१

(ङ) "इह हि द्विविधो व्यवहारः"; "वाक्यानुसारेण अर्थानुसारेण च⋯" "वसन्तसेना आर्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः" इत्येतदादिश्लोका वाक्यानि च मृच्छकटिकस्य, तत्समयस्याधिकरणिकानां विशिष्टताः स्पष्टं दर्शयन्ति। अधःस्थिते तत्रत्ये श्लोके मृच्छकटिककारः स्वयम् अधिकरणिकमुखेन कीदृशास्तदा अधिकरणिका बभूवु रित्यत्र प्रकाशं क्षिपति—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्समयस्य न्यायाधिकरणश्रीः शूद्रकेण निर्वर्णिता—

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्खाकुलं,
पर्यन्तस्थितचारचक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटञ्च राजकरणं हिंस्रैः समुद्रायते ।।६।१४।

पुरातने भारते स्थूलतया न्यायाणिकरणस्य द्वैविध्यमदृश्यत । प्रथमविधास्तु न्यायालया राज्यद्वारेण प्रत्यक्षतो नियन्त्रिता भूत्वा विरेजिरे । द्वितीयविधाः स्थानीयसंस्थानामधीनतायां मुख्यतया समस्थाप्यन्त । पारस्परिककलह-विबादा-दिकानां निर्णयनं वादिप्रतिवादिवर्गः स्थानीयैः आप्तैः जातीयसभाभिश्चाकारि । स्थानीयाः पुमांसो विवादकलहद्वेषादिबीजं प्रायेण साधु विदन्ति; किञ्च पारस्प-रिक सहयोग-मेलन-व्यवहारादिभिः कृतो निर्णयः स्थायी शान्तिसन्तोषावहश्च जायते; तत्रत्यजननिर्णीताभियोगेषु भूतार्थतावस्थानमधिकतरमात्रायां समाविष्टं भवितुमर्हतीत्येतादिकं विमृश्यालोच्य च द्वितीयविधानां न्यायालयानां संस्था-पनान्यभूवन्निति मन्ये । एतादृशानां न्याया'लयानां प्रायेण प्रतिग्रामं स्थितिः समवाप्यत ।

धर्मशास्त्रेषु कुलधर्म--जातिधर्म--श्रेणीधर्म--देशधर्मादिस्थानीयधर्माणां च विचारो दृश्यते । तत्र राज्ञामपि कर्तव्याणि समुल्लिखितानि वर्तन्ते तेन सिद्ध्यति यदाधुनिकमनुस्मृतिर्यस्मिन् समये निर्मिताभवत् तस्मिन् समये वा तस्य समयस्याभ्यर्णे स स राजधर्मोऽप्रथत । निर्णयप्रदानात् प्राग् न्यायाधिकारिभिः स्थानीयधर्मा अपि सम्यक् स्वध्यानावस्थिताः[२] कार्या-इत्येषोऽपि लेखो धर्मशा-स्त्रेषु प्राप्यते । अस्मद्धर्मशास्त्रेषु एतादृशस्य लेखस्य सद्भावो धर्मशास्त्राणां रचनाकाले स्थानीयन्यायालयानां स्थितिं प्रकटीकरोति । स्थानीयन्यायालया-नुल्लिखन्ती नारदस्मृतिः स्वसमयवर्तिनीनां कुलश्रेणीगणनामिकानां स्थानीय-

---

१—शुक्रनीतिः, चतुर्थोऽध्यायः ।
२—"जातिजानूपदान् धर्मान् श्रेणीधर्मांश्च धर्मवित्" मनुः, अध्यायाष्टमे ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न्यायसंस्थानां विद्यमानतां प्रतिपादयति । वृहस्पतियाज्ञवल्क्यस्मृत्योरपि कुल-श्रेणीपूगाख्यानां संस्थानां निर्देश आप्यते । कौटिल्यकालेऽपि स्थानीया न्यायसंस्थाः देशमिमं भूषयामासुरिति तदर्थशास्त्रतो विदितं भवति । स्थानीयसंस्थाचालितानि न्यायाधिकरणानि त्रिविधानि बभ्राजिरे—(१) कुलन्यायालयः, (२) श्रेणी न्यायालयः (३) गणन्यायालयः । परं 'कुलश्रेणीगणादय'[२] इत्यत्र स्थित-मादिपदमन्यविधन्यायसंस्थायाश्च सद्भावं बोधयति । निर्णयेऽपरितुष्टो ना तद्गतिं नृपं यावदपि कर्तुमार्हत् । मृच्छकटिकस्य "निर्णये वयं प्रमाणम् शेषे तु राजा" (नवमेऽङ्के) इत्येषा पङ्क्तिः सूचयति । सर्वविधेष्वपि न्यायाधिकरणेषु राज्यस्य नियन्त्रणं संरक्षणं चाभूदित्येतदप्युह्यते । स्थानीयाः संस्थाः साधारणानेवाभि-योगान् ददृशुः । कुलन्यायाधिकरणात् श्रेणी न्यायालयो ज्यायान् मतोऽभूत् । ततो गरीयोगणाधिकरणममानि । श्रेणी[३] सा मताभवद् यैकविधवृत्तिजीविनां प्रतिनिधित्वं चकार । यत्र विभिन्नवयवसायोपजीविनो नैकजातिमन्तो जनाः समवेता भूत्वा समाविष्यन्त स 'गण' इत्यभ्यधीयत । स्मृतिष्वप्येविधः सङ्घो गण इति नाम्ना व्यपदिष्टः । गणन्यायालये गणस्य सदस्यानामेव विवादा आकर्ण्यन्तेस्म ।

प्रजाः शासितुं राजा ग्रामे-ग्रामे पुरे-पुरे च साहसाधिपतिः, ग्रामनेता, भाग-हारः, लेखकः, प्रतिहारश्च-इत्येतान् षट्कर्मचारिणोऽधिकारिणो नियुयोज । साहससम्बन्धीन् सामान्यानभियोगान् साहसाधिपतिः शुश्राव । पुरा 'साहस'[४] शब्दस्य प्रयोगः स्तेयमारणादिक्रूरतमकुकार्येषु प्रयुक्तो बभूव ।

उक्तं च—मनुष्यमारणं स्तेयं परदाराभिमर्षणम् ।
पारुष्यमनृतं चैव साहसं पञ्चधा स्मृतम् ॥

१—अर्थशास्त्रम्, वार्ता १८, अ० १, अधि० ३ ।
,, ,, १६, अ० ६, ,, ३ ।

२—शुक्रनीतिः, अ० ४, श्लो० ५५२ ।

३— ,, ,, ,, ५५५ । श्रेणयो नानाजातीनाम्···मिताक्षरा ।

४— ,, अ० २ ,, १२०—१२१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मृच्छकटिके स्तेयार्थे शर्विलकः प्रयुनक्ति—'मया खलु मदनिकायाः कृते साहसमनुष्ठितम्। (चतुर्थेऽङ्के)

न्यायकार्यसम्पादनाय राज्यं कतिपयान् विशिष्टानपि न्यायनदीष्णान् नियुयोज। ते सभ्याः इत्यकथ्यन्त।

सभ्यानां न्यायालयः साहसाधिपतिकन्यायलयाद् वृहत्तरो बभूव। तस्याधिकारा गुरुतरा आसन्। तत्र यथापेक्षं त्रयः पञ्च सप्त वा अधिकारिणो न्ययुज्यन्त। तत्र न्यायासने[1] लोक-वेदनीति-निपुणा व्यवहारधुरन्धरा धार्मिकाः सुधियोनिर्णेतृत्वेन व्यवस्थाप्रदायकत्वेन च न्ययोजिषत। तस्याश्च सभ्यसभाया अप्युपरि अध्यक्षन्याय[2]-सभासीत्। राजसभा न्यायसभाप्राप्ताधिकारेभ्योऽपि गुरुतरान् अधिकारान् प्राप्तवती। राजसभायाः पदाधिकारी 'प्राड्विवाक' इति व्यपादिश्यत। राजसभायां राज्यस्यात्यन्तमहत्त्वपूर्णविवादसमाकुला व्यतिकरा निर्णयाय प्रास्तूयन्त। तस्यापुरतो पुनर्विमर्शग्रहेतोरभियोगाः समुपास्थाप्यन्त। तदीयो निर्णयोऽन्तिमनिर्णयत्वेनादृतोऽभूत्। राजापि तदा एकाकी सन् व्यवहारवीक्षणाय व्यवस्थाया वा निर्णयस्य विश्राणनाय नाधिकारं निधातुं शशाक-इत्येष च उल्लेखो दृश्यते[3]।

अधिकरणविषयिणी एषा व्यवस्था अस्मदनुसन्धेयकालाभ्यन्तराले बलवती निर्बला चावश्यमेव दृष्टाभूत्। अत्रेदमप्युल्लेखनीयमेव यत् तदानीन्तनोदेशो ''जन आत्मानं स्वयं शास्तु' इत्येतस्यामपि भावनायां रुचिं निदधौ।' तस्मात् तात्कालिकभारतस्य ज्ञानविज्ञानयोः प्रसारणे प्रमुखतया या शक्तिर्भागं जग्राह सासीद् ग्रामशासनपद्धत्यभिधाना शक्तिः। अत्रत्यां वर्णव्यवस्थां सामाजिकगठनविधां शिक्षां च सैव पर्यपूपुषत्। अत्रत्य एकैकोऽग्रजगेहः शिक्षणागारः, किञ्च ग्रामस्यैकैकः पुरुषो हि उद्यमशालाया जीवितयन्त्रमासीत्। किं बहुना स्वायत्तशासनं वस्तुतः प्राक्तनस्य भारतस्य जीवनरक्षकमसिद्ध्यत। न तस्याग्रे कापि शक्तिः स्थातुमक्षमत। देशीया विदेशीयाश्च तस्यसमक्षे नतभागा

१—शुक्रनीतिः, अ० ४ श्लो० ५४८।

२—शुक्रनीतिः अ० ८, श्लो ५५४।

३— ,, ,, ,, ५२८-५२९।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्तदालक्ष्यन्त । ग्रामशासनसभाः स्वयमेव स्वस्वग्रामस्य सर्वविधवादविवादकलहादिकं शमयामासुः । स्वयमेव तास्तमध्वानमवललम्बिरे येन ग्रामवास्तव्यानां सर्वाङ्गीणो विकासः स्यादतो न महामहाधिकरणानां न महामहोद्योगागाराणां न महामहाशिक्षणागाराणा मपेक्षा जजागार । जनतया जीवनस्य सरलत्वाडम्बरौपचारिकतादिशून्यत्वात् तन्न राजनीतिरसेऽनुरागमदर्शयत् । न तत्समयस्य जनता राज्यं निदध्यौ न च राजकीयानि सुखानि । अत एव तु वैदेशिकास्तदा सुखेन देशं प्रवेष्टुमशकन् ।

तस्मिन् काले जनता राज्ञि देवभावं निबबन्ध । तस्यां धीरियं विललास—

"बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

मालविकाग्निमित्रमुद्राराक्षसादिनाटकेषु "देव, एव ममात्थ परिषदे निवेदयामि" (पञ्चमेऽङ्के), 'सुगहीदनामहेए देवे चन्द्र उत्ते.........देवस्स......" (प्रथमाङ्के) सर्वत्रेदृशानि 'देव' पदप्रयोगवन्ति वाक्यानि लभ्यन्ते ।

तदानीं देशस्य शासनव्यवस्था परम्परागते व्यवहारे चरित्रे च दृष्टा बभूव । साम्राज्यस्य मुख्यमुख्यकार्यकलापेषु पदेषु चोच्चेषु नियता अधिकारिणः 'कुमारामात्याः' इति न्यगद्यन्त । साम्राज्यस्य भुक्तिविषयाद्यङ्गेषु नियोजिता अधिकारिणस्तदा सैन्य-न्यायपदादिष्वपि कार्यमकार्षुः । कुमारामात्याः साम्राज्यस्य तां सेवां कुर्वाणा अलभ्यन्त या सेवा कस्यचन शासनस्य दाढ्र्यायापेक्ष्यते । राष्ट्रस्याधिशासनकर्मसु त एव नियुक्तिमलभन्त ये राजवंशजा अभूवन् । विषयपतेः कार्ये साहाय्यं दातुमेका सभासीत् । तत्सभायाः सभ्याः 'विषयमहत्तराः' इत्यकथ्यन्त । नगरश्रेष्ठी, सार्थवाहः, प्रथमकुलिकः, प्रथमकायस्थ इत्येते तत्रावश्यमगृह्यन्त । मृच्छकटिके नवमेऽङ्के मुद्राराक्षसे च यत्र तत्र श्रेष्ठिकायस्थयोरुल्लेखो विलोक्यते ।

गुप्तकाले विषयपतयो महीयन्ते स्म । स्वप्रदेशस्य रक्षायै व्यवस्थायै च ते उत्तरदायिन आसन् । राजस्वगृहीतारो युक्ता वा आयुक्ता वा नियुक्ता तेषां निघ्नतायां कार्यं कृतवन्तः । दण्डपाशिकचौरोद्धरणिकारक्षाधिकृददण्डनायकाश्च तदायत्ततायामेव कर्माण्यनुतस्थुः । मृच्छकटिके दशमेऽङ्के दण्डनायकस्योल्लेख

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आप्यते । तथाहि—"चन्दनकः पृथिवीदण्डपालको भवतु" इति । दण्डपालको दण्डनायक एवासीदिति प्रतीयते । दण्डपाशिक' इत्येष शब्दोऽपि मुद्राराक्षसे दृश्यते । उक्तं तत्र—"उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकश्च" (प्रथमेऽङ्के) ।

समाजे घटितेषु कलहापहरणादिदुर्व्यवहारेष्वत्रत्यानि न्यायाधिकरणानि[1] विविधान् दण्डान् ददुः । मनुस्मृति-शुक्रनीत्यादिदर्शनेन दण्डादिविषये पर्याप्तं ज्ञानमधिगम्यते । तस्मिन् काले न्यायालयो यज्ञशालेव पुनीतोऽवागम्यत । न्यायाधिकरणसेवायै गणका, लेखकाः, स्वरलिपिविदः, परमगुणिनः शुचिशीलाश्च अगृह्यन्त[2] । जनता न्यायपूर्वकं शासिता स्यादित्येतदर्थं सर्वथा उपायाश्च अवालम्ब्यन्त । वादिनः प्रतिवादिनश्च कांश्चनाधिकारानवापुः । स्वकीयान् स्थानापन्नांश्चते कर्तुमादिश्यन्त । प्रतिभूप्रस्तुतीकरणाधिकारोऽपि तैः स्वाप्त आसीत् । अधिकरणेषु सर्वान् सर्वविधांश्चाभियोगान् लेखबद्धान् विधातुं लिपिका यथापेक्षिता नियता आसन् । प्राप्यते चात्रोल्लेखः—"लिहीअंदु, एदे अक्खला:" (मृच्छकटिकम्, नवमोऽङ्कः); "कुतोवाचिकं ? कस्य वा लेखः" ? (मुद्राराक्षसम्, पञ्चमोऽङ्कः); 'राज्यगामी तस्यार्थसञ्चयः इत्येतदमात्येन लिखितम्' (अभिज्ञान शा०, षष्ठोऽङ्कः) । राजकीयमुद्रा च व्यवाह्रियत । इयं तर्हि कस्य मुद्रा ? कुमार । कपटमुद्रामप्युपपादयितुं शक्नुवन्ति धूर्ताः" (मुद्राराक्षसम्, पञ्चमोऽङ्कः); "जदु मुद्दा लंछिदं मंजूसं" (मालविकाग्निमित्रम्, पञ्चमोऽङ्कः) । हस्ताक्षरग्रहणस्याङ्गुष्ठचिह्नस्य च प्रथा व्यवहारे आहृतासीत् । अभियोगेषु साक्षिणश्चापेक्ष्यन्त ।

मन्त्रिपरिषदः सदस्यानां संख्या, मन्त्रिपरिषत्प्रतिष्ठापनसिद्धान्ताः, सदस्यानां चारित्रिकपात्रता, पण्डितपुरोहितामात्यनृपराजकर्मचारिप्रभृत्यधिकारारूढानां शास्त्रीयं ज्ञानं, कुलीनता, आचारविचाराः–इत्येतान् विविधान् विषयान् लक्ष्यीकृत्य समुल्लिखितान्याकरविवरणानीहत्यायाः शासनव्यवस्थाया स्तात्कालिक्या राजस्थितेश्च सम्यगवगमनं कारयन्ति । "अर्थशास्त्रकारास्त्रिविधां सिद्धि-

१—मृच्छकटिकम्, षष्ठोऽङ्कः । (रण्णा सासिज्जइ···पृ० ३४९)

२—शुक्रनीतिः अ० ४, श्लो० ५५९-५६४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुपवर्णयन्ति-राजायत्तां सचिवायत्ता मुभयायत्तां च" (मुद्राराक्षसम्, तृतीयोऽङ्कः) इत्येतद्विधानि वाक्यान्यत एव रूपकेऽवाप्यन्ते ।

राजा राजकर्मचारिचक्रस्य नाभिरिव बभूव । तं केन्द्रीकृत्यैव राज्यस्य सकलाः कर्मचारिणः सङ्गठिता अक्रियन्त । अधिकारिदृष्ट्या सर्वप्रथमं राजा ततो युवराजः, ततो मन्त्रिपरिषत्सदस्याः अवागम्यन्त । सदस्यानामनन्तरं विभिन्नविभागोपविभागाध्यक्षाणां पदान्यमानिपत ।

राज्यस्य शासनचक्रानुरूपा विविधा बहवश्च विभागाः उपविभागाश्च तदाविद्यन्त तेष्वनेके सुयोग्याः कर्मचारिणः पृथक् कार्यकलापं सम्पादयन्तो राज्यस्य सञ्चालने स्वीयं श्लाघनीयं योगं प्रददुः । गजाश्वोष्ट्रादि पशूनां शुकसारिकामयूरादीनां पतत्रिणां च रक्षणाय शिक्षणाय च विभागा अवाप्यन्त । "तेल्लभङ्गिदविसाणा वद्धा पवहण बइल्ला…कुलींणो दीहं णीससदिसेरिहो… मद्दअदि गीवामेसस्स……सुत्तं पढदि पञ्जरसुओ……योधीअन्ति लावआ… आलवीअन्ति पज्जार कविज्जला……" इत्येतदादिका मृच्छकटिकस्य चतुर्थाङ्कस्थिताः पङ्क्तयः प्रत्यक्षाप्रत्यक्षभावेनोपरिस्थस्थितिपोषणे सहायिकाः सन्ति । रत्नमणि-सुवर्णरजतधातुवसनादिविभागानां च नियन्त्रणाय अध्यक्षोपाध्यक्षादयो नियतीक्रियन्तेस्म । वनोपवनान्नभाण्डागारप्रभृति विभागानां किञ्च शिक्षादेवायतनमल्लशालादिसंस्थानामपि व्यवस्था अथ च तत्तद्विभागाध्यक्षकोशाधिकारिदानधर्माधीशानाञ्च नियुक्तीकरणस्य कृते तत्तत्संस्थासञ्चालनस्य च हेतो र्ध्यानं दत्तमभूदित्येतत्तथ्यं प्रति "………मित्तावसुणा रट्ठिएण भट्टिणीपाअमूलं पेसिदाणं ? इत्थं अणो पमदवणस्स पालणकम्मसमप्पिदं ।"……अत्थजादस्स गणणाबहुलदाए एकं एव्व पोरकज्जं अवेक्खिदं……" इत्यादिकानि शाकुन्तलस्य षष्ठाङ्कस्थानि वाक्यानि उपरिनिर्दिष्टदिशाया मवश्यमेव प्रच्छन्नया रीत्या क्षिपन्ति प्रकाशम् । शुक्रनीति[१]-कौटिल्यार्थशास्त्रादिविलोकनेन रूपकेषु प्राप्यमाणमिङ्गितं परिपुष्टतामश्नुते । आकरग्रन्थेभ्यो[२]ज्ञातं भवति स्पष्टतया यदस्मदीयं पुराणतरं भारतं प्रजा-शासनकर्मणि सावधानमासीत् । कौटल्येन स्वीयेऽर्थशास्त्रे दत्तं

१—शुक्रनीतिः, द्वितीयोऽध्यायः ।

२—अर्थशास्त्रम्, वार्ता ८, अ० १२, अधि० ३ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विवरणं राजकर्मचारिविषयकमष्टादशतीर्थनियुक्तिपरकां व्यवस्थामपि प्रति अस्मदीयं मानसमावर्जयति । "आशास्यामीतिविगमप्रभृति प्रजानांसम्पत्स्यते न खलु गोप्तरि नाग्निमित्रे" इत्यादिकमालविकाग्नि-मित्रपञ्चमाङ्कस्थश्लोक उपरिस्थितथ्यसमर्थनार्थमादातुं शक्यः । पुरा विचारोऽयं दृढ़ीयानभवद् यद् भृत्यस्य कृते तावती भृतिरवश्यमेव दातव्या यया स आत्मनः कुटुम्बस्य च सुखेन पोषणं कर्तुं शक्नुवन् स्वधर्मकर्मानुष्ठातुं प्रभवेत्[1] । "सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः" (शाकु० ७अं ०); "प्रकृतिचित्तपरिज्ञाने नियुक्तो निपुणकः" (मुद्रा रा०, १ अं०) इत्यादिना वैतनिकभृत्यान् प्रति इङ्गितमुपलभ्यते । कर्मचारिणः समये-समये पुरस्कृता अपि अक्रियन्त—"किं पर्याप्तमिदमस्य प्रियस्य । तथापि गृह्यताम् ।" (मुद्रा रा० ३ अं०) । राजकर्मसु प्राप्तनिधनानां राजभृत्यानामाश्रितेभ्यः पर्याप्तधन साहाय्यं प्रादीयत[2] । राजकोषः प्रजारक्षणाय—तत्सर्वाङ्गीणविकासनाय प्राधान्येनोपायुज्यत । सैन्योपरि पर्याप्तद्रव्यव्ययः कृतोऽभूत्[3] । "यत्रैषा मेघनीला चरति गजघटा राक्षसस्तत्र यायादेतत्पारिप्लवाम्भःप्लुति तुरग-बलं वार्यतां राक्षसेन" (मुद्राराा० २, अं०) इत्यादिभिरेतद्विषयस्यौहा कर्तुं शक्यास्ति । यन्नगरं राज्यस्य प्रधानं नगरं तद्राजधानीत्यकथ्यत । पुरातनस्य कालस्य राजधानीनां परमाभिरामत्वं धनधान्यादिसमृद्धिसम्पन्नत्वं यद् दृष्टमभूद् तद् भारतीयस्य शासनस्य कुशलत्वं सुयोग्यत्वं च प्रकटीकरोति । "आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धसृजः । सम्पूर्णेन्दुमयूखसंहतिरुचां सच्चामराणांश्रियः······" इत्यादिकाः (मुद्राराा०, तृ० अं०, श्लो० २) पङ्क्तयोऽपि नाम न कच्चिदत्र सत्प्रमाणम् ? राष्ट्ररक्षाविधिराकरेषु साधु निरूपितः । महाभारते वर्णितं राजधान्यादिकवस्तुजातमवलोक्य स्पष्टमेव सिद्ध्यति यन्महाभारते यस्तादृशं वर्णनं तत्तच्छ्लोकैरकार्षीत् सः स्वयं तत् तद् वस्तुसौन्दर्यमैक्षिष्ट । आधुनिकानां विदुषां मतं यदिदानीन्तने काले महाभारतं यस्मिन् रूपे विलोक्यते तस्य रूपनस्य प्रणयनं त्वीशवीयं पञ्चमं शतकं यावद् बभूव । वस्तुतः कानिचन तत्रत्यानि वर्णनानि तस्य प्रणयनं तत्स-

१—अर्थशास्त्रम्, वा०८, अ०१२, अधि० ३ ।
२— ,, ,, ५, अ० ३, ,, ५ ।
३—शुक्रनीतिः, अ० ४, श्लो० ११८ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मयपर्यन्तमेवाभूदित्येव स्पष्टयन्ति । तस्मात् सत्यमेवेदं यदस्मदभिप्रेतयुगगामिनि भारतेऽद्भुतसौन्दर्यश्रियं दधाना राजधान्योऽशोभिषत[१] ।

अस्मदनुसन्धीयमानकालगामिनो राजानो यद्यप्यसहिष्णवो मात्सर्येर्ष्या-वन्तश्च बहव आसन् परं तेषां तद्दोषजातमपि नृपान्तरयायि प्रायेणादृश्यत प्रजासु तु ते पितेव वात्सल्यमयं हृदयं निदधुः । प्रजाः अपि स्वकीये नृपे दृढं भक्तिभावमबिभरुः । "अथवा स्वाम्पर्थमुपरतः......" (मुद्राराक्षसम्, तृ० अं०) किञ्च—"नियमयसि कुमार्गंप्रस्थितानात्तदण्डः प्रशमयसि विवादं कल्पसे रक्षणाय । अतनुषु विभवेषु ज्ञातयः सन्तु नाम; त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्" (शाकु०, ५ अं०) इत्यादिकानि वचांस्यत्र प्रमाणम् ।

बौद्धसाहित्याशोकाभिलेखादिषु परिषदामुल्लेखो दृश्यते । महासचिव जातकेऽमात्यानां परिषत् 'सुविनीतेति नाम्ना[२] निर्दिष्टास्ति । कौटिल्य उक्तं पदं 'विनयाधिकारः', पाणिनिः 'वैनयिकम्' इत्येतेन नाम्ना व्यवहरन्तावाप्येते । अतिशयावश्यकमहत्त्वमहनीयकार्येषु विमर्शं विधातुं परिषदोऽधिवेशनमविलम्व-माहूतमभूत् । एवंविधमधिवेशनमात्यधिकं व्यपादिश्यत । अर्थशास्त्रे परिषदः संगमनाय विस्तृतं विवरणं प्रदत्तमस्ति । तेन निश्चीयते यद् राजतन्त्रे तदानीन्तनी परिषन्नैजं लेख्यं स्वत्वं न्यदधात्[३] । राजानस्तदा मन्त्र्यधीना वा स्वतंत्रा उभयविधा आसन् । एतत् तथ्य मधोलिखितेन सन्दर्भेण तर्क्यते—

राजा—(सकोपम्) आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बन्धनमिव राज्यं न राज्यमिव ।

चाणक्यः—वृषल, स्वयमनभियुक्तानां राज्ञामेते दोषाः सम्भवन्ति । तद् यदि न सहसे ततः स्वयमभियुज्यस्व । (मुद्रा रा० ३ अं०)

'परिषद्बलो राजा' इत्येतस्मिन् वाक्यांशे विशेषणपदं राज्ञः परिषदधीनत्वं ज्ञापयति ।

१—ए० ए० मेकडानलः, ए हिस्ट्री ऑफ सं० लि०, पं० सं०, परि० १०, पृ० २८७ ।

२—एवं सुविनीता किरस्स परिसा, जा० १।२६४ ।

३—अर्थशास्त्रम् १।११ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिषदो बलवत्तरत्वं भारते चिरादद्दश्यत। अस्मदीयोऽभिमतोऽनेहाः प्रागभवादेवकालाद् गुणमिममग्रहीत्—इति निश्चप्रचतयाभिधातुं सुशकम्। श्रूयते यत् पुरा अशोको राजकोषाद् बौद्धसंघार्थं स्वेच्छया धनं दित्सुः परिषदा नान्वज्ञायि। एवमेव क्षत्रपोरुद्रदामा सुदर्शनसरसः पुनर्निर्माणायात्यधिकमर्थं व्ययीकर्तुमैच्छत् परं परिषत् तं तथाकर्तुं न्यरीत्सीत्। एतादृशान्युदाहरणानि बोधयन्ति परिषदो मूर्धन्यत्वम्। राजानमपि अपदस्थं कर्तुं प्रबभूव। अस्माकं भारते ब्राह्मणयुगेऽभिषेकानेहसि नृपः काश्चन प्रतिज्ञाः कर्तुमबाध्यत। कृत-प्रतिज्ञ एवाभिषिक्तोऽभूत्। ऐतरेयब्राह्मणाध्ययनेन च तथ्यमिदं ज्ञातं जायते। महाभारते शान्तिपर्वणि विषयस्यास्योपपादनं वर्तते। परिषदां प्रथा श्रौत-समय-मारभ्य अनारतं कौटिल्यादिकालं यावदपि प्रचलन्त्यवाप्यत। महाभाष्ये चन्द्र-गुप्तसभा-पुष्पमित्रसभापदानि निदर्शनत्वेन दत्तानि सन्ति। "अन्येषां भूपतीनां कदाचिदमात्यव्यसनम्" (मुद्रा रा०, ४ अं०) इत्येवंविधाभिः पङ्क्तिभिस्तस्य कालस्य नृपामात्यगतविरोधान्वितत्वमभिव्यज्यते। "दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेन" (मु०रा०, ३ अं०) इत्येतद् वाक्यं तस्य कालस्य दत्तसप्ताङ्ग-दृष्टित्वमाचष्टे।

सामान्यतः पौराणिकभारतस्य राजशास्त्रं नारीणां राजपदासीनतां नाति-हर्षपूर्वकं सहते। सत्यप्येवं ताः शासिका बभूवुः! युवराजस्याल्पवयस्कत्वे राज-मातुराध्यक्ष्ये परिषत् सञ्चालिताभूत्। शातकर्णिकुलस्य नयनिका (१५० ख्री० पू०) वाकाटकान्वयस्य च राज्ञी प्रभावती (३९० तमे ख्रैस्ताब्दे) निदर्शनभूते स्तः। लक्ष्म्यहल्यादिकानां देवीनां शासकसिंहासनासीनत्वञ्चासन्न एवातीते वीक्षितमेव। दक्षिणभारते चालुक्यराष्ट्रकूटयोः स्त्रियः साधु शासनसञ्चालनकार्य-मकुर्वत—इत्येतच्च लोकविदितम्।

राज्यस्य कृते आय-साधनान्यप्यनेकविधानि गृहीतान्यभूवन्। दुर्गाज्ज्ञात आयएकविंशतिविध आसीत्। अत्र दुर्गपदं नगरपरकम्। ग्रामेभ्यो जनपदेभ्यश्च जातस्यायस्य त्रयोदशविधत्वमासीत्। एवंविध आयो राष्ट्रकर इत्यकथ्यत। खनि-सेतु-वन-व्रज-मार्गेभ्यश्च आयः समवाप्तो बभूव। अन्यान्यप्यायसाधनानि तदानीमासन्। गुप्तकालं तत्कालोत्तरकालं च यावद् राजस्वस्रोतांसि परा-मुन्नतिं गतानि। आयस्रोतांसि आयस्थानमिति प्रोच्यन्ते स्म। शुल्कशालाया आगत आयः "शौल्कशालिक" आपणेभ्य आगत आय "आपणिको" गुल्मादागत

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आयो-गौल्मिक" इत्यगद्यत । 'को अवरो अवदेसो तुम राआणं ?[१]" इत्यादिकं तद्दिशि स्पष्टं सङ्केतं कुरुते । पुरा गुल्मेषु[२] राज्यं कृत्स्नतया दत्तदृष्टिकमासीत् "मागुल्माधिकारिकै:···प्रवेश्यसे" (मु० रा० ५ अं०) इत्येतदादीदमेवज्ञापयति ।

राज्ञां स्वीयाः परिचर्याकारिणः (पारिपार्श्विकाः) छत्रधार-तूणीरधार-भृङ्गारधारादिका अनेके आसन् । नृप-शरीररक्षायां नियुक्ताः अङ्गरक्षकाः अभ्यधीयन्त । कौटिल्योऽर्थशास्त्रे 'आतमरक्षितक' इति पदं तत्र प्रयुनक्ति । राजकुले द्वारस्योच्चाधिकारी 'दौवारिक' इत्यकथ्यत । राजकुलमुख्यद्वारसम्बन्धसर्वविधमप्युत्तरदायित्वपूर्णं कार्यं दौवारिकोऽधिकारी सम्पादयामास— "दौवारिकः— अमच्च, करभओ दुआरे चिट्ठदि" (मु० रा० ४ अं०)

पुरा राज्ञां दिनचर्यापि निश्चितासीत् । दिनचर्यां परिपालयितुं राजा प्रभवेदित्येतदर्थं विशिष्टाः अधिकारिणः सेवकाश्च न्ययुज्यन्त । परिषेचकस्नापकोद्वर्तकाद्यभिधानाः परिचारका राज्ञः शुश्रूषायै नियता आसन् । मुद्राराक्षसस्य तृतीयाङ्कगामी—"भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः । परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते" इत्येष श्लोक एतमपि प्रसङ्गं व्यञ्जनयाभिव्यञ्जन् प्रतीयते ।

राजशासने दूतपदं महनीयं पदं मतमभूत् । "कथं जीवसिद्धिरपि चाणक्यप्रणिधिः" (मु० रा०, ५ अं०); "दूतश्च तेन महासाराणि रत्नानि वाहनानि···· सकाशं·· " (मालविकाग्निमित्रम्, ५ अं०) इत्यादिकं वाक्यजातं दूतमुल्लिखद् दृश्यते । यस्मिन् देशे जनपदेषु वा दूतो न्ययुज्यत तद्देशजनपदाख्ययापि स आहूतोऽभवत् । यथा कोसलजनपदद्दूतश्चेन्मथुरायां (सूरसेनेषु) नियुक्तोऽभूत तदासौः 'माथुर' इत्यभ्यधीयत । दूतः प्रतिष्कष इति च संज्ञां भेजे । कौटिल्यः पर्याप्तरीत्या अर्थशास्त्रेऽस्मिन् विषये प्रकाशं क्षिपति । सन्देशादिकमादाय गन्तारो दूतास्तत्र 'जङ्घारिकाः' इत्युक्ताः । लिखितशासनवाही दूतः 'शासनहर' इति किञ्च वाचिकसन्देशग्राही 'परिमितार्थ' इत्यभाष्यत । अर्थशास्त्रे उत्कृष्टकोटिको दूतो 'निसृष्टार्थ' इति किं वा "अवसृष्टार्थ" इति कथितः । एतादृक् प्रणिधिर्महाधिकारासीनो बभूव । सः कर्तु मन्यथाकर्तुं च प्रबभूव । दूतस्तमपि व्यपदेशं प्राप

१—अभिज्ञान शकु० द्वितीयोऽङ्कः ।

२—मृच्छकटिकम्, ६ अङ्कः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यंव्यपदेशं स राजाभजद् यस्य सविधे सः (दूतः) प्रहितोऽभूत् । अतः आक्रन्दिकादिनामान्यपि तस्य दृष्टानि भवन्ति ।

वैनयिक-सामयिकौपयिक-सामयाचारिकभेदेन पुरा शासनस्यानेकविधत्वमदर्शि । तेषु वैनयिकं धर्ममूलकं[1] मतम् । भारतीयजनपदयुगे धर्मः, धार्मिको राजा, धार्मिकी प्रजा—इत्येतत् त्रिकमभिलष्यते स्म । मृच्छकटिके दशमे अङ्के

"लब्धा चारित्रशुद्धिश्चरणनिपतितः शत्रुरप्येष मुक्तः
प्रोत्खातारातिमूलः प्रियसुहृदचला मार्यकः शास्ति राजा ।
प्राप्ता भूयः प्रियेयं प्रियसुहृदि भवान् सङ्गतो मे वयस्यो,
लभ्यं किञ्चातिरिक्तं यदपरमधुना प्रार्थयेऽहं भवन्तम् ।।

इत्येष श्लोको हि उक्तविधां भावनां विभावयन् प्रतिभासते । तदानी मेषः सुदृढो विश्वासोऽजागो यदेतत् त्रिकं परस्परापेक्षि ।

राष्ट्राभ्युदयाय प्राचीनसमये द्वौ नियमावपाल्येताम् । तयोरेकतरो राजद्वारेण प्राचाल्यत अपरश्च लोकसंस्थया । श्रेणीनिगमपाषण्डगण[2]भेदेन लोकसंस्था चतुर्विधासीत् । इमाश्चतस्रोऽप्रि संस्थाः सार्वजनिकत्वेन मता बभूवुः । श्रेणी शिल्पिनां, निगमो वणिजां, पाषण्डो धर्मसम्प्रदायानां, गणश्च राजनीतिकसंघानामासीत् । एतासां संस्थानां नियमाः 'सामयिक' इत्येतेनशब्देन व्यवाह्रियन्त । अयं 'सामयिक' शब्दः स्मृतिषु 'सवित् इत्युक्तः । आपस्तम्बे सामयाचारिकधर्माणा मप्युल्लेखः कृतो वीक्ष्यते । सामयाचारिक पदं सामाजिकरीतिवाचकं कदापि मतमभूत् । एष सामयाचारिको धर्मः--सामाजिकः--धर्मशास्त्रीयक्षेत्रेषु मान्यतां गत आसीत् । धर्मशास्त्रे (५।५) सामयाचारिकं नाम प्रकरणमपि विद्यते । तस्मिन् प्रकरणे समाहतसन्निधात्रादिराजाधिकारिद्वारेण हि य आयो विविधकररूपेणोपापाद्यत स विशेषत उल्लिखित आस्ते । लोके ये केऽपि देयभागा आमंस्ते सर्वे सामयाचारिकनियमेनैव समापाद्यन्त न च राजानुज्ञया । राज्यस्य विशिष्टाधिकारिणो महिषीपुगेधः प्रभृतयोऽथवा प्रलेपिकाविलेपिकादिकाः सामयाचारिकायद्वारेणैव ततृतद्धनराशिं समये समयेऽलप्सत ।

१—जायसवालः हिन्दूराजतन्त्र, २।१०६।

२—याज्ञवल्क्यस्मृतिः, २।११२।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सामदानदण्डादिविषयिणी राजनीतिस्तत्प्राप्तिसाधनानि च 'औपयिकम्' इत्येतेन शब्देन व्यवह्रियन्ते स्म। अर्थशास्त्रे शासनाधिकारप्रकरणे सविस्तर-मौपयिकं प्रतिपादितम्।

कौटिल्येन व्यावहारिकधर्मोऽप्येको निरूपितः। विवाहदायभागवास्तुविक्रय-समयर्णदानोपनिधिकदासकर्मकरकल्पसम्भूयसमुत्थानसाहसवाक्पारुष्यदण्डपारु—ष्यादिव्यवहारान् आत्मन्यभिव्याप्य एष शब्दो विजृम्भते। एते व्यवहारा गच्छता नेहसा धर्मशास्त्रे व्यवहाराध्यायेऽन्तर्भूता अभूवन्।

राज्यस्य समुत्कर्षो हि कथं कर्तव्य इति विमृश्यात्र तदविषयकमायोजन सोत्साहमुपक्रान्तमभूत्। जनपदसम्पदमात्यसम्पत्कोशसम्पन्मित्रसम्पदित्यासां सम्पदामवाप्तियोजनं किञ्च मन्त्रप्रभूत्साहाख्यानां शक्तीनामर्जननिमित्तमधि-कृत्यात्रत्येषु राजशास्त्रेषु सविशदं प्रतिपादनं वर्तते। तद् भारतस्य तत्काल-वर्तिनो राजतन्त्रस्योत्कर्षमभिव्यनक्ति। मुद्राराक्षसे तृतीयाङ्के समागता "सहायसम्पदाभियुक्तः कोशवान्" इत्येषा पंक्ति निर्दिष्टाः सम्पद एव लक्षयन्ती प्रतिभाति। शक्तिसमन्वितो महीप एव श्रेष्ठतामृच्छतीति कौटिल्यो ब्रवीत्यर्थ-शास्त्रे (६।२)। राजतन्त्र-शासनपद्धति-राजाचारादिविषयानधिकृत्य प्राञ्चो राजनीतिज्ञाः गम्भीरया विद्वत्तया विचारान् व्यक्तीकुर्वन्तः सिद्धान्तांश्च समुप-स्थापयन्तः सम्प्राप्यन्ते। इहत्यं यत् किमपि राजशास्त्रमिदानीमुपलभ्यते तत् पुरातनराजनीतिकभारतरूपप्रदर्शनाय अलम्।

राज्यं पुरातनं दानशीलमप्यासीत्। राजशास्त्रे प्राप्तं साम्प्रदानिक मित्येतत्पदमत्र प्रदीप्तप्रमाणम्—"आर्य वैहीनरे, आभ्यां वैतालिकाभ्यां सुवर्ण-शतसहस्रं दापय (मु० रा०, ३ अं०)।

राजकीयेषु कार्यालयेषु कोशक्षयाज्जाता अर्थसम्बन्धिन्यस्तव्यस्तताकृते 'अवस्तार' इत्येष शब्दोऽर्थशास्त्रे (२।८) प्रयुक्तोऽस्ति। कौटिल्येन "औपनि-षदिक" इत्येष शब्दस्तेषु निन्द्यकार्येषु कृतो येषां प्रयोगो गुप्तचरविभागे पापानां कृते संवृत्तः। जघन्यमार्गेण जीविकार्जनकारी 'औपनिषदिक' इति कथितोऽभूत्। परमेतन्निमित्तेन भाषायाम् 'उपनिषत्कृत्यम्' इत्येतत् पदं विशेषतोऽभिहितम-भवत्। "अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ·· ···कुतोऽनुग्रहस्यावकाशः" (मु० रा०, ३ अं०) इत्येतानि वाक्यान्यस्यां दिशायां कदाचित् प्रकाशं पातयन्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रक्षार्थं निर्जनेषु कान्तारेषु रक्षाचतुष्किका वा स्थानकानि समस्थाप्यन्त। एषां सद्भावात् सार्थवाहाः शकटवणिजो यात्रिणश्च निष्प्रत्यूहं यात्रासु प्रावर्तन्त। पुरातने साहित्ये सार्थवाहानां वृत्तं सम्यगधिगम्यते। तद् देशस्य वाणिज्यप्रियतां किञ्च देशान्तरैः सार्धं तस्य व्यापारप्रचलनमपि साध्ववगयमति। "सार्थवाहस्त्वां विज्ञापयति"; (मृ० ४ अं०) "सत्यवाह विण अदत्तस्सरणातिवहो" (मृच्छ० ९ अं०); "समद्रव्यहारी सार्थवाहो धनमित्रो नाम" (शाकुन्तलम्, ६ अं०) इत्येतदादिवाक्यानि रूपकेष्वपि सार्थवाहवन्तं देशमस्मत्पुरतो निदधति। वाणिज्यस्य प्रसारोऽतीतस्य भारतस्य शासनपद्धतेः सौष्ठवं प्रकटीभवति।

गुल्ममधिकृत्याकरेषु[१] मनोज्ञं विवरणं लभ्यते। तस्मादपि देशशासनकृतां कौशलं विदितं जायते। लघुगुरुग्रामानुसारं द्वयोस्त्रयाणां पञ्चानां वोपरि एको गुल्मो वा स्थानकमस्थाप्यत। महास्थानकं शतं ग्रामान् नैजेऽधिकारे निदधौ। प्रति गुल्मस्य सैनिकाः स्वस्मिन् कार्ये प्रशिक्षिता आसन्। तदीया वेषभूषा नियतासीत्। तेन ते सुगमतयाभिज्ञेया अभूवन्। एते रक्षापुरुषा वस्तुतो रक्षिष्वेवागण्यन्त। द्वयोरपि संगठने काचिदुल्लेखनीया भेदरेखा नावर्तत। स्थावरजङ्गमयोर्भेदेन गुल्मस्य द्वैविध्यं दृष्टमभूत्। यानि स्वस्थानके नियततयावस्थितान्यासंस्तानि स्थावराणि; यानि च नगरग्रामरथ्यासु मलिम्लुचादिदुष्पथगान् रोद्धुं परिभ्रमणकारिण आसंस्तानि जंगमानीत्यगद्यन्त। मन्वनुसारमवस्थितिर्गुल्मानां चतुष्पथे, क्रीडास्थले, कौतुकक्षेत्रे, समाजप्रेक्षणालये, न्यायाधिकरणहट्टापणवेशापानगृहमन्दिरारामौद्योगिकभूमिषु चाघटत्[२]। गुल्मदेयस्योल्लेखो दिव्यावदाने दृश्यते। अतस्तस्य गुप्तकालवर्तित्वं ज्ञायते। गुल्मकरो वणिजां देय आसीत्) "गुल्मस्थानाधिकृतो दीर्घरक्षो विज्ञापयति..." (मु० रा० ५ अं०) इत्येतदादि वाक्यानि विषयेऽत्र रूपकेषु विलोक्यन्ते।

शासनकार्याणि निर्वोढुं बहवः कार्यालयाः प्रतिष्ठिता बभूवुः। आगणनविगणनगाणनिककार्मिकादिप्रचुरपदानि अर्थशास्त्रादौ लभ्यन्ते। तैः कार्यालयानां सद्भावस्यावगमने सहायता प्राप्ता भवति। 'अत्ययजादस्य गणणा बहुल

१—मनु० ७ ११४, १९०।

२—दिव्यवदानम्, पृ० ३४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दाए·····पत्तारूढं पच्चक्खीकरेदु "(अभिज्ञान शा०, ६ अं०) इत्येतदादीनि वाक्यानि निर्दिष्टविषये प्रकाशं क्षिपन्ति । धर्मसूत्रेषु च भूयांसि ईदृशानि पदानि विद्यमानानि सन्ति यानि भारतीयशासनप्रणाल्याः स्थितिं विनिगमयन्ति । भ्रेष-अभ्रेषपदयोः प्रयोगो गोपथब्राह्मणे प्राप्यते । अभ्रेप शब्दो न्यायार्थे प्रायुज्यत । याज्ञवल्क्ये, अर्थशास्त्रे च तदुल्लेखो विद्यते । याज्ञवल्क्येऽधिकरणार्थे पदद्वयं प्रयुक्तम् । तच्चाधिकरणस्य द्वैविध्यं ज्ञापयतः—(१) व्यवहाराधिकरणम्, (२) कण्टकशोधनाधिकरणम् । धर्मशास्त्रेषु प्रयुक्तानि परिवादकधर्माध्यक्षसाक्षि-प्रतिभूप्रभृतिपदानि तत्कालस्य शासननीत्यभिज्ञतां प्रदर्शयन्ति ।

सैन्यं परेभ्यो देश मवति तस्मादस्मदिष्टः कालः सैन्यवान् दृष्टो भवति । सैन्याङ्गानि चत्वार्यासन् हस्त्यश्वरथिपदाति भेदेन । रथिकाश्वारोहम् रथिक-पादातम्—इत्येतदादिपदानि तयोस्तयोरङ्गयोः पारस्परिकत्वं ज्ञापयन्ति । सैन्ये क्रमेलकानामप्यन्तर्भावः कृतोऽभवत् । उष्ट्रसैनिकाः उष्ट्रसादिनोऽकथ्यन्त । पत्ति-गणकरथगणकाद्यधिकारिणो वहिरङ्गव्यवस्थायै सैन्येन सह न्ययुज्यन्त । पदाति-रथिकसेनयोरन्तराले ये कार्मणाः अधिकारिणश्च कार्याणि कार्यालयेषु चक्रुस्ते पृतनादण्ड इति न्यगद्यन्त । प्रतिसैन्यनिचये पृथक् पृथगध्यक्षा नियुक्तिमापुः । ते बलभेदानुसारं सेनापतयोऽश्वपतयो रथपतयो गजपत्यादिका अभ्याहूयन्त । आयोधने यो योद्धा यस्मिन् प्रहरणे कुशलो बभूव स तत्प्रहरणाभिधाऽऽहूतो जातः । यथा-आसिकः प्रासकः, धानुष्कः, याष्टीकः । सैन्ये नार्योऽपि नियुक्तिम-वापुः । ताः अपि तत् तत् प्रहरणे प्रशिक्षणं लेभिरे । अतएव तु पतञ्जलिः शाक्तीकी, याष्टीकीप्रभृति पदानि प्रयुञ्जानो दृश्यते ।

"द्रुततुरगरथेभभ्रान्तयोधोग्रनादं विलसदमलखड्ग प्रासशक्त्यृष्टिकुम्भम्" (बाल चरितम्, ५ अं०) इत्यत्र भासो खड्गप्रासशक्त्यादिप्रहरणान्युल्लिखति । अर्थशास्त्र (१,२०) माह यद् राजहर्म्येषु रक्षायै स्त्रीसैनिका नियता आसन् । एषा स्त्रीयोधप्रथा मौर्ययुगादेव प्राचर्यत इत्युत्प्रेक्ष्यते ।

"एसो बाणासणहत्थाहिं वणपुप्फमालाधारिणीहिं"

(अभिज्ञान शा०, २ अं०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एषोपरिस्था पङ्क्तिः स्पष्टमेवयोषितामवाप्तायुधशिक्षत्वं सैनिकत्वं च वेदयते। कवचधारिणः सैनिकाः कावचिकः किञ्च सैनिकसेवार्हे सत्यायुषि यः सैन्यं प्रविवेश सः कवचहर इत्यकथ्यत।

स्यन्दनमभितो गमनकारिणौ पदाती परिस्कन्दाविति प्रोच्येतेस्म। ईशवीयादूर्ध्वे चतुर्थे शतके भारतीयानीके परिस्कन्दाख्याः सैनिकाश्च अदृश्यन्त। एवंविधस्य तथ्यस्य चर्चा यूनानीयैरितिहासलेखकैः कृतास्ति। तल्लेखानुसारं जन्ये सम्प्रयुक्ताभिधानः स्यन्दनचतुस्तुरङ्गः कृतोऽभूत। षट्सेनाचरास्तमनुययुः। तेषु द्वौ सारथिनौ, द्वौ लक्ष्मधरिणौ द्वौ च कार्मुकभृतावास्ताम्। शरासनधरौ रथस्योभयोःपार्श्वयो नाराचान् सन्दधतौ प्रचेलतुः।

आयुधजीविनो जनाः आयुधीयाः इत्येतां संज्ञा भेजुः। आयुधीयानामिह पुरानेके सङ्घा आसन्। वाहीकप्रदेशे नानालघुगुरुसङ्घाः समनिष्ठन्त। तत्र केवलमायुधशिक्षणव्यवस्थासीत्। मालवक्षुद्रकयोरायुधजीविनः सङ्घा नैजसैन्यमपि निदधुः।

युद्धक्षेत्रे नानाविधानि वादित्राणि प्रायुज्यन्त। पटहदुन्दुभिशङ्खढक्कादितूर्याणां घोषः सैनिकान् युयुत्सून् भूयोभूयः प्रोत्साहयाम्बभूव—

असौ नन्दीनादः पटुपटलशङ्खध्वनियुतो
दिशां द्रष्टुं दैर्घ्यं प्रसरति सकौतूहल इव। (मु० रा० ६ अं०)

सेनानिनादपटहस्वनशङ्खनादैः,
चण्डनिलाहतमहोदधिनादकल्पैः॥ (दूतवाक्यम् १ अं०)

वादित्रवादनप्रथा भारते चिराद् दृश्यते[1]।

भारतीयानां भूपतीनां धर्मप्राणत्वात् तेषां राजनीतिरपि धर्मानपेतासीत्। "महाभागं कामं नरपतिरभिन्नस्थितिरसौ" (शा० ५ अं०) इत्येतदादिनोक्तवैशिष्ट्यवत्त्वमुभयोस्तयोरप्रत्यक्षतया सिध्यति।

१—'ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः'। भगवद्गीता अ० १।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अश्वघोषस्य रचनाभ्यो विदितं भवति यत् तदा प्रजा धनेन धान्येन च सर्वथा समन्विता भूत्वा जीवनं निनाय ससुखम् । प्राचीनं भारतं जनविकासाय प्रचुरं सामर्थ्यं निदधौ । तत्र किमप्येतादृशं नियन्त्रणं नावर्तत येन सर्वाङ्गीणो विकासो बाध्यते । परमिदन्तु सत्यं यन्मानवो निसर्गतो दुर्बलः । स्वच्छन्दतां प्राप्य प्रकृतिसुलभा दुर्बलता वृद्धिं याति । ऐश्वर्यं लक्ष्मीस्तारुण्यञ्च मानव-मनायासेन स्वच्छन्दतोन्मुखं विदधति । अस्मद्देशस्य नृपाः लक्ष्मीं प्राप्य उन्मत्ताः प्रभुतां प्राप्य प्रमत्तास्तारुण्यञ्च प्राप्य चञ्चला बभूवुः । ते देशस्य गौरवं स्मृति-पथात् स्रंसयामासुः आत्मानं च ते देशस्य पातयामासुः । तस्माद् कुफलमिदं संवृत्तं यद् द्रुतमेव ते छिन्नभिन्ना बभूवुः । कृशे कस्यास्ति सौहृदम् । ये तेषां सुहृद आसंस्तेऽपि दुर्हृदोऽजायन्त । राजनीत्यां शनैः शनैः आविलता समाविष्टा-भवत् । सर्वत्र यदृच्छाचारिता देशे पर्यटन्ती व्यालोक्यत। राजपथेऽपि विटचेट-धूर्ताः सूर्यास्तसमयादेव भ्रमन्तोऽदृश्यन्त । द्यूतकाराणां कोलाहल एव यत्र तत्र प्रसृतोऽभवत् । सुजनानां कृते नैजजीवनयापनमपि दुष्करमभूत् । राज्ञां भोग-विलासेषु लिप्तत्वात् धूर्तजनानामेव सर्वत्र प्रभुत्वं व्याप्तमजायत । चाटुकाराणां राजानः सेव्या अभूवन् । ते तेषां प्रशंसाकारिणो यदूचुस्तदेव समनोयोगं चक्रुः । मृच्छकटिकस्य—

(क) "हित्वाहं नरपतिवन्धनापदेशं,
व्यापत्ति-व्यसन-महार्णवं महान्तम् ।
पदाग्रस्थितनिगडैकपाशकर्षी,
प्रभ्रष्टो गज इव बन्धनाद् भ्रमामि ।।६।।

भोः ! अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञापालकेन घोषादानीय विशसने गूढागारे बन्धनेन निबद्धः । (षष्ठेऽङ्के)

(ख) आगच्छत विश्वस्तास्त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ।।६।६।।

(ग) उद्यते पालके महती रक्षा न वर्तते, तत् शीघ्रमपक्रामतु भवान् ।
(सप्तमेऽङ्के)

इत्येताः पङ्क्तय उपरिस्थितं कथनं समीचीनतया पुष्णन्ति ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तदा नृपतीनां दुर्व्यसनितया दुष्टानां साहसिकता निरङ्कुशा भूत्वा समुपस्त्रियमाणासीत् । लम्पटाः निर्भयतापूर्वकं गुणानुरागिणो जनान् निपीडयितुमारभन्त । राजवल्लभाः कुलीनान् सज्जानांश्चावजानन्तो भाययन्तश्च नितरामदृश्यन्त । ते स्वतृष्णां तोषयितुं कुपथं गृह्णन्तोऽवाप्यन्त ।

"एदश्श दुट्ठवडअश्श विणअज्जलि कदुम पाएशु णिपड़िदे ?" (मृच्छ०, १ अं०) ।

ईदृशीः पङ्क्तीरधीत्य प्रसह्योपरिनिहितो विचारो मृच्छकटिक-कालमधिकृत्य हृदि समुदेति ।

देशस्य स्थितिरियमीशवीयद्वितीयतृतीयशतकयोः किञ्च पञ्चस्य शतकस्योत्तरार्द्धे घटिताभवत्[1] । वस्तुतोऽस्य कालस्य भारतमन्धकारावृतं विलोक्यते । ले० क० मार्क विलकसः 'हिस्टारिकल स्केचेज ऑफ दी साउथ ऑफ इण्डिया' इत्येतस्मिन् ग्रन्थे लिखति यत् तदानीं लघु-लघुराज्यानि स्वतन्त्राणि स्वच्छन्दानि च भूत्वा भारतं पातयितुमेवावतेरुः । उक्तं कथनं सत्यं परं तदापि कतिपयानां महीवल्लभाना मेष प्रयासोऽपि जातो यद् भारतं पाताद्रक्षितुमुदयतत । तेन क्वचित् क्वचिद्राज्यस्य व्यवस्था श्लाघनीया स्पृहणीया च प्राप्यत[2] ।

प्लेटो मेगास्थनीजश्चास्माकं पुर ईशुमसीहजनुषः प्राग्वर्तिनोऽनेहसः शासनं प्रस्तुतीकुर्वन्तौ लभ्येते । तेन तदानीन्तनानां व्यवस्थापिकासभानां निरवद्यं स्वरूपं समुपतिष्ठते[3] । दक्षिणभारते मुद्रान्तक स्थानस्य सविधे स्थितोत्तरामूलाख्यपत्तनादधिगतेभ्यो लेखेभ्यो ज्ञायते यत् तत्रत्या जनाः प्रातिनिधिकं शासनं चिरं प्रयुयुजुः ।

इदञ्चात्र कथनीयमपेक्ष्यते यदस्मद्राजनीतिकभारते प्रजातन्त्र-प्रणाल्यपि क्वापि भागे व्यवाह्रियत । एषा प्रणाली दक्षिणभारते ईशवीयं दशमं शतकं यावत् प्रेक्षिताभवत् ।

१—दी क्रैम्ब्रिज हिस्ट्री आफ इण्डिया, खं० १, परि० २१, पृ० ४६५ ।

२—हिस्ट्री आफ एण्टीक्विटी, खं० ४, पृ० २१५ ।

३—इण्डिया इन्सक्रिप्शन, खं० ३, पृ० ९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इदं पुनः स्मार्यते यदस्मदनुसन्धेयकाले राजनीतिर्यदि शोचनीयतां गता व्यालोक्यत तदा सा अशोच्याऽपि प्राप्ताभवत् । अशोचनीयत्वमेव न तस्याः, तस्याः श्लाघनीयत्वमपि दृष्टमभूत् । इहत्या राजशक्तिरियती बलीयसी च भूत्वा दिदीपे यत् तदीय तेजो न नैज देश एव काकेशिया-पर्शियावक्टीरियादि-देशेष्वपि प्रससार[1] । समुद्रगुप्तस्य महीयसा तेजसा प्रकम्पिता भूत्वा कतिपये वैदेशिका भूपास्तत्सेवायामुपदामर्पयाञ्चक्रुः । कर्नल टाडो जैसलमेरस्य पुरातनानि पुस्तकानि प्रेक्ष्य प्रब्रवीति यद्यवनशासनात् पूर्वं यदुराज्यं समरकन्दाद् गजनीं यावत् विजृम्भमाणासीत् । एतावद्दूरपर्यन्तं भारतीयानां राज्यस्य विस्तारस्तु प्रकटीकरोति यदवश्यमेव अत्रत्या राजनीतिर्लोकमप्रीणात् । अत एव तु भारतीयानां प्रभुत्वं ते ते देशाः अपि स्वीचक्रुः । अत्रत्यं मनुशास्त्रमाधृत्य मिश्ररोमफारसयूनानदेशेषु विधेः—शासनस्य-स्वरूपं विनिर्धारितमभूत् । तत्रत्यं जीवनमपि तेनालिङ्गितमभवदित्येतत् तथ्यं 'बाइबिल इन इण्डिया' ग्रन्थस्य लेखकेन सादर मुररीकृतम् । प्राचीनभारतस्य राजनीतेश्चेत् कश्चिद् दर्शनं कर्तुमुत्सुकस्तदासौ महाभारतम्, अर्थशास्त्रम्, शुक्रनीतिम्, कामन्दकीनीतिम्, नीतिवाक्यामृतम्, वार्हस्पत्यसूत्रादिकमधीयीत ।

भारतीयराजनीतेः अतः परं का प्रशंसा स्याद् यदत्रत्यः प्रतिग्रामः सुसंगठित आसीत् । ग्रामशासनविधानश्रीः सकलमिमं देशमभिव्याप्य वितता तदैव विलोकिता बभूव यदा खैस्ताब्दस्योदयोऽपि नाजायत । प्रतीच्येतिहासलेखकानां[2] कथनमिदं यदत्रत्य नैतिक चरित्रं चारुतरमासीत्, धार्मिकं च ज्ञानं गुरुतरमासीत् । व्यवस्थार्थं ग्रामा बहुषु खण्डेषु व्यभज्यन्त । ग्रामशासनसमिते-

---

१—(क) इण्डिया ओल्ड एण्ड न्यू पृ० ३३३ ।

(ख) माडर्न इण्डिया ऑफ इण्डियंस, पृ० ३९-४० ।

(ग) इण्डिया ए वर्ड्स् आफ विथु, पृ० १३५-१३६, १७४ ।

(घ) अर्ली हिस्ट्री ऑफ इण्डिया, पृ० ११४-११९ ।

(ङ) रिपोर्ट ऑफ दी स्लेक्ट कमेटी ऑफ दी हाउस ऑफ कॉमन्स, खं० ३, पृ० ३३ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निघ्नतायां बहूपसमितयो विरेजिरे। ग्राम्यशासनसमितेः प्रबन्धपटीयस्कत्वं प्रतिपादयन् श्रीज० भालभाई लिखति 'ग्रामसमितयो न केवलं व्यावहारिकेषु कार्यं कृतवत्यस्ताः पाठशालासञ्चालन-रोगि-परिचर्याधर्मानुष्ठानादिपरककार्याण्यपि नैजकर्तव्यत्वेन मेनिरे। वस्तुतो ग्रामसस्थाः भारतीयराजनीतेर्मेरुदण्ड इव असिद्ध्यन्। आसामेव सद्भावाद् भारतीयाः स्वीयां भारतीयतां पातुमशकन्। पुरातनेतिहासशिलालेखसाहित्यादिकं प्रेक्ष्य सर चार्ल्स मिटकाफादिका विद्वांसो वदन्ति यदिमा ग्रामसंस्थाः प्राचीनराजनीतिम्प्रति वरदानमिवासिद्ध्यन्। भारतीयां संस्कृतिं सभ्यतां च ता एव गोपायितुं प्रबभूवुः। महान्ति शासनानि तु व्यनश्यन् परं तासां सत्तामक्षुण्णतयैव समतिष्ठत'[1]। डॉ० एनीवेसेण्टो ग्रामशासनस्याधारो भारतीयग्रामसमितिव्यवस्थासीदिति मन्यते[2]। फाह्यानो नाम चीनीयो यात्री ४१३ तमेशवीयाब्दे भारतमाययौ। तल्लेखोऽपि भारतीयं राजशासनं श्लाघमानोऽवाप्यते[3]। हुएनसांगो हर्षवर्द्धनस्य शासनसमये आजगाम। स हर्षस्य शासनव्यवस्थायाः श्रेष्ठत्वाद् देशः समृद्धः प्रजाश्च सर्वथा सुखभाज आसान्नन्त इति लिलेख[4]। इत्सिंगो नाम यात्री भारतमुपश्लोकयन् आह[5]—"जनाः समुज्ज्वलचरित्राः सन्ति।" जनेषु चरित्रचारुत्वं तदैव सम्भवं यदा शासनं भवति सच्चरित्रम्।

एतेनोपरिस्थितेन विमर्शणेन स्फुटीभवति यद् यस्मिन् कालेऽस्मदभिमतानां रूपकाणां विरचनं समजनि तदा बहूनि बहुविधानि च शासनानि भारतमशिषन् किञ्च तद् भूभुजां बहूनि लघुगुरूणि राज्यानीक्षाञ्चक्रे किञ्चानेकाक्रमणानि प्रैक्षिष्ट परं सत्स्वपि तेषु महत्सु प्रत्यवायेषु भूयिष्ठानां भारतीयानां ग्रामवासित्वाद् वा भारतस्य ग्रामसभ्यतावत्त्वात् वा तस्यारण्यकशास्त्रप्रियत्वात् भारतीयेषु

१—हिस्टॉरिकल स्केचेज ऑफ दी साउथ ऑफ इण्डिया, खं० १, पृ० ११६।

२—थियॉसॉफिस्ट टीचिंग, पृ० २२४-२३४।

३—सत्यकेतु विद्यालङ्कारः भारतीय सं० और उसका इतिहास, अ० १,६ पृ० ३१०।

४—सीन्स एण्ड करेक्टर ऑफ इण्डियन हिस्ट्री, पृ० ४०-४२ :

५—इत्सिंग की भारत यात्रा, पृ० १४७, २८८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजनीत्याः उपरि जातानि तानि तानि परिवर्तनानि न कमप्युल्लेखनीयं प्रभावं पातयितुमपारयन् ।

पुरातनं भारतं नैजजीवनस्य प्रचुरतरं भागं कथाशास्त्रोपनिषद्गीतावेदान्तादिसाहित्यस्यानुशीलने स्वाध्याये चिन्तने च न्ययूयुजददतः प्रत्यूहस्यैकापि कणिका न तद् ज्ञानधनं सत्यप्रियं यशःसर्वस्वमाध्यात्मिकतानुरक्तं भृशमबाधत। कोऽपि राजा भवतु, कोऽपि शास्तु-इत्येतस्मिन् सम्बन्धे न कापि चिन्ता तन्मानसमन्दिरे समुदतिष्ठत। "अस्मान् साधु विचिन्त्य संयमधनान्..." (शाकु., ४।१६); "पापं करिष्यति धनार्थमवैरिजुष्टम्" (मृच्छ०,६।२२), "तत् किं हर्षस्थानेऽपि रुद्यते" (मुद्रारा ७ अं.) इत्येतदादिवाक्यानि भारतीयजनतायाः स्वान्तप्रवृत्तिः कस्यां दिशायामासीदिति स्फुटतया ज्ञापयन्ति। तदीयं मनःश्रद्धा सत्य एव रेमे इति प्रतीयते ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तमः परिच्छेदः

सामाजिक-स्थितिः

ईशवीयाब्दप्रवर्तनात् प्राग्वर्तिनः प्रथमाच्छतकादीशवीयषष्ठशतकं यावद् भारते शुङ्गकण्वकुषाणशालिवाहनादिगुप्तमहीपानां शासनं समवर्तत। एतस्मिन् युगे भारतीयस्य समाजस्य स्थितिर्न तथाविधं तानवमशिश्रियत यथाविधं साम्प्रतं सा चिन्तनीयामवनतिमवलम्बते। तत्कालगामिनः समाजस्य नैतिकं बलं न क्षीणतरतां गतमासीत्। न तदीयमाचरणं बलीयोभिश्छलकपटाडम्बरादिदोषैर्दूषित मासीत्। भौतिकतायामभिरुचिं निदधानोऽपि तात्कालिको जननिवहो नैजाध्यात्मिकीं चेतनां सम्यक् समस्मरदेव। जना भूयस्यां संख्याया मतितरां धर्मभीरवः प्राप्यन्त। तेषु प्राधान्येन धर्मात्मनां पुरुषप्रवराणां प्रभावोऽवालोक्यत। तदानीं वैष्णवो धर्मः पुनः पूर्णमेव बलं प्रगृह्य विकासस्यानुकूलं साधनमवाप्तुं शशाक। भगवान् वासुदेवस्तदा जनतायाः प्रमुखोपास्यदेवत्वेन प्रतिष्ठापितोऽभूत्। वैक्ट्रियना[1] यवना देशस्य विष्णुभक्तत्वात् स्वयमपि वैष्णवं धर्मं स्वीचक्रुः। यवना अवनिपतयो वासुदेवस्य प्रतिष्ठापूर्वकं गरुडध्वजान् उद्धावयन्ति स्म। वैष्णवधर्मं इव शैवधर्मोऽपि उत्तस्थौ। हूणराजमिहिरगुलस्य शैवत्वं तत्समयस्य पौराणिकदेवेषु श्रद्धां प्रथयति। 'मखशतपरिपूतं गोत्रमुद्भासितं मे' इत्येतदादिकानि मृच्छकटिकस्य वचांसि किञ्च 'यमपटं प्रसार्य धर्ममुपदिशामीत्येतदादीनि वचनानि मुद्राराक्षसस्य तत्समयस्य धर्मनिष्ठामभिव्यञ्जन्ति। न तस्मिन् समये वैदिकधर्मभक्ता एव अदृश्यन्त बौद्धजैनधर्मभक्ता अपि पर्याप्ता अवाप्यन्त। एकतस्तु धर्मभावनायाः प्रबलत्वमवर्तत अपरतो दुराचारम्प्रति शासनमपि कठोरमासीत्। तद् दुराचारवतो जनान् कठोरतया दण्डयत्[2]। एतद्धेतोर्विरल एव मनुजः कुमार्गमवलम्बितुं साहसमन्वतिष्ठत्।

१—सत्यकेतु विद्यालङ्कारः भारतीय सं० और उसका इतिहास, अ० २०, पृ० ३८१, ४०२, अ० १८, पृ० ३४५।

२—दी हि० एण्ड क० ऑफ दी इं० पी०, खं० २, परि० १८, पृ० ३५१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गिद्धवली भविश्शसि शुणो मुहं वा देक्खिशशि" अभिज्ञानशाकुन्तलस्येदृशानि वाक्यानि किञ्च 'सुसूक्ष्मं दण्ड्यन्ते मतिबलविदग्धाः कुपुरुषाः" इत्यादि वचनानि-च भासकृतस्याविमारकस्य ज्ञापयन्ति शासनस्य निर्दयदण्डप्रदत्वम् । तस्य कालस्य क्रूरतमदण्डप्रदताया बोधकमतः परं किं वाक्यं भवितुमर्हेत्—

"आकर्षन्तु सुबद्ध्वैनम्......पाट्यन्तां क्रकचेन वा" (मृच्छ०, १० अं०) वाक्येष्वेव मन्ये, एतद्विधायाः क्रूरतायाः वार्ता गृहीताभूत् न च व्यवहारे सा पर्यगृह्यत । परमिदं तु सत्यं यत् तदानीन्तनो दण्डस्तथाविथास्त्वास्त एव यः समाजे दुराचारं प्रसरणात् सर्वथैव निरुणद्धि ।

तदानीन्तनस्य धनधान्यपदप्रतिष्ठावैभवप्रभुतादिसम्पन्नस्यापि जनस्य जीवनं सरलं निर्दम्भं धृतबाह्यप्रदर्शननिर्वेदमासीदतस्तुच्छतराणां भौतिकानां द्रव्याणां सम्भोगाय परेषां निपीडनस्यापेक्षैव नोदतिष्ठत् । "उपलशकलमेतद्भेदकं गोमयानाम्" इत्यादिकां मुद्राराक्षसस्य पंक्तिं पठित्वा मनस्यनायासमन्तरेणैषभावः समुत्पद्यते यद् यस्य युगस्यामात्या अपि एतादृशमृजुसात्विकजीवनं निन्युस्तस्य युगस्य जनता कथं न न्यूनतमशरीरापेक्षिसम्भारा स्यात्—"यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" । एतद् व्यतिरिच्य तदानीन्तन्याः शिक्षायाः[1] आध्यात्मिकतानुप्राणितत्वाच्च, सा तात्कालिकजनसमुदायं स्वचारित्र्यनिर्माणे भृशमुपचकार । तस्मिन् युगे प्रणीतेषु रूपकेषु प्रतिस्थानं तपोवनानां ब्रह्मचारिणाञ्च यद् दर्शनं सञ्जायते तदपि मानसे भावमेतं जनयति यदसौ कालो नैतिकचारित्रिकशिक्षायां दत्तध्यान आसीत् ।

वर्णव्यवस्थायाः स्वरूपं तस्मिन् काले विकृतमवाप्यत । सा विकृतता वस्तुतस्तु मौर्यशासनसमयादेवास्मदृष्टि-पथमधिरोहति । तस्मिन्नेव समये समाजे श्रेण्यः सप्त सञ्जाताः । ताः सन्ति चेमाः - दार्शनिकश्रेणी, कृषीबलश्रेणी, पशुपालकाखेटकश्रेणी, व्यापारिकशिल्पनाविकश्रेणी, योधेयश्रेणी, राजकीय-चरश्रेणी, राजपरिषत्सदस्यश्रेणी । अभिलेखेषु भृतिकदासवर्गाणामप्युल्लेखो वीक्ष्यते । तत्कालवर्ती जनवर्गो वृत्तिहेतुवशादेव विभिन्नासु श्रेणीषु विभक्तोऽभवदितीतिहासविदां व्याहृतिः । एष श्रेणीभेद उत्तरोत्तरमेधाञ्चके । गच्छता

---

[1] —'दी' हिस्ट्री एण्ड क० ऑफ इं०पी०, खं० ३, परि० १२, पृ० ५७९-५८४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कालेन स जातिषु[1] पर्यवर्तत । श्रेणीभेदस्य विवरणमेतन्मेगास्थनीज इण्डिकायां प्रस्तवीति । श्रेणीभेदजनितानां जातीनां समुपचितं रूपं भासकालिदासशूद्रकादीनामनेहसि सम्यगवलोक्यते । तथाहि—

(क) ब्राह्मणेषूपदेशं करिष्यामि न क्षत्रियाणामिति (कर्णभा० १ अं०);

(ख) पाडच्चला ! किं जम्हेहिं जादी पुच्छिदा ? (शाकु०, ६ अं०)

(ग) अरे का महं चन्दण अस्स चन्द विसुद्धस्स जादी ? (मृच्छ० ६ अं०)

वैदेशिका भूमिपा यदा भारतीयायां सभ्यतायां धृतानुरागा अभूवंस्तैः सह[2] भारतीयानां सान्निध्यं सुदृढं सञ्जातं तदात्रत्यानां धर्मसूत्रकाराणां मनसि शङ्केयं समुत्पन्ना यत् सम्प्रति वर्णसङ्करतायाः समुद्भवः किञ्च तदीयः प्रसरः सम्भवस्तस्माद् देशं रक्षितुं ते जातिप्रथाबीजान्यवपन्[3] । अविमारकादौ "प्रवृत्तिमन्वयं च ज्ञातुमन्यापदेशेन गतवानस्मि" इत्यादिपंक्तियो जातिभेदम्प्रति दृष्टिमावर्जयन्ति । तदानीन्तना जाति र्जातिदुर्गाभ्यन्तरे स्वं-स्वं पातुमुपचक्रमिरे । फलं चेदं संवृत्तं यदीशवीयाब्दप्रवेशात् प्रागेव देशे सर्वत्र जातिबीजान्यङ्कुरितानि भूत्वा अचकासन्त ।

ब्राह्मणाः स्वधर्मकर्मभ्योऽस्मिन् काले निपतितुमारेभिरे । वेदज्ञता तु दूरे आस्ताम्ः तेषु बहवः साक्षरा अपि नालभ्यन्त—'तेन हि भण किं नाम एतदक्षरम्' (अविमारकम्, २ अं०) । निमन्त्रणमवाप्य ते भोजनार्थं धावन्तोऽदृश्यन्त—"कमन्यद् भोजनार्थं निमन्त्रयितुम्", (अविमारकम्, २ अं०); "अन्यथा कथं त्वां दक्षिणीयं नार्चयिष्यामः", (मालविकाग्निमित्रम् २ अं०); "अरणं वम्हणं उवणिमन्तेदु भवम् । वावुदो दाणिं अहम्", (मृच्छ० १ अं०)[4] ।

प्रायेण सर्व एव वर्णाः स्वस्वकर्मकर्तव्याणि विहाय कर्मान्तरं प्रत्यपद्यन्त । 'सहजं किल यद् विनिन्दितं न खलु तत् कर्म विवर्जनीयम्" इत्येतद् 'अभिज्ञान-

---

१—सत्यकेतु विद्यालंकारः—भारतीय सं० और उसका इतिहास, अ० १४, पृ० २६४ ।

२—दी केम्ब्रिज हिस्ट्री ऑफ इण्डिया, खं० १, परि० १५, पृ० ३४५ ।

३—दिनकरः—संस्कृति के चार अध्याय; अ० १, पृ० ४३ ।

४—व्याकरण महाभाष्यम्, अ० १, पा० १, आ० २, पृ० १०६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शाकुन्तले षष्ठाङ्कस्थं वाक्यं जनानां स्वकर्मपरिभ्रष्टतां बोधयति। वस्तुतो ब्राह्मणा एव न सर्वे एव वर्णा वृत्त्यन्तरे प्रवृत्ता भवन्तो मौर्यसमयादेव वीक्षिता भवितुमारभन्त। ब्राह्मणा युद्धविद्यया, क्षत्रियाः श्वपालनेन, श्येनसंवर्द्धनेन, भृतकवहनेन च वृत्तिमुपार्जयितुं सन्नद्धाः सञ्जाताः। अष्टाध्याय्यां गोत्रादिपदानां दर्शनं स्फुटतया प्रकटीकरोति यत् पाणिनिकालेऽपि जातिभावना दार्ढ्यं वोढुं परमोत्कण्ठिता बभूव। शुङ्गशासनसमये समुद्भूतः पतञ्जलि महाभाष्ये यान्युदाहरणानि प्रदत्ते तेषु अनेकानि तु जाति-प्रथां ज्ञापयन्ति। कात्यायनप्रयुक्तं महाशूद्रपदं जाते विस्तारं प्रथयति। जाति-विकासः शुङ्गशासनसमयं यावत् पर्याप्ततया समुत्थानं गतवान्।

रामायणमहाभारतयोर्विद्यमानं रूपमीशवीयप्रथमशतकाभ्यर्णे सृष्टमभूदिति साम्प्रतिकानां विचारः। तत्रत्येभ्यः श्लोकेभ्यः कतिपयेभ्यः सिद्ध्यति यदस्मन् नाटकानां निर्माणकालं यावत् समाजे जात्यन्तरविवाहप्रथाप्यदृश्यत[1]। समाजे जातिभावना कियत्प्रचण्डरूपेण तदाननं व्यादाय सन्तिष्ठमानासीदिति तु निम्नलिखितान्यक्षराण्यपि विज्ञापयन्ति—'अज्ज, अवरो वि अमच्च रक्खसस्स पिउ वअस्सो का अत्थो......' (मु० रा० १ अं०)

वशिष्ठनारदात्र्यादिस्मृतिषु विद्यमानेन विवरणेन ज्ञायते यद् ब्राह्मणा[2]स्तदा शोचनीयामवनतिं गता अभूवन्। अन्वेषणपराः पण्डिता निर्दिष्टानां स्मृतीनां रचनाकालं नेशुमसीहसस्य जन्मनः प्राग्वर्तिनं मन्यन्ते। चेत् तासां समयस्तदानीन्तनो मतोभवेत् तदैतदपि ज्ञायते यदस्मद्रूपककालवर्तिनी जनता ह्रासोन्मुखी बभूव। तस्यामनेकजातीनां सृष्टिर्विलोकिताभूत्।

प्रवृत्तिनिरोधाय वा तस्या नियन्त्रणाय भारतीयानि शास्त्राणि वर्णधर्मस्य व्यवस्थामकार्षुः। परं तस्मिन् काले शास्त्राणामनध्ययनं, शास्त्रोक्तवचनानामपरिपालनं, राजनीतिकस्थितेश्च परिवर्तनं, वीक्षितमजायत। तस्माद् वैदिककालसृष्टा वर्णव्यवस्था तदानीं श्लथतां ययौ। तस्याः शैथिल्याज्जातिवादः स्वप्र-

---

१—(क) रामायणेऽयोध्याकण्डे श्लो० ६६।४४।
(ख) महाभारतम् (गी. प्रे,) पृ० ४६२५।

२—अत्रिस्मृतिः, श्लो० ४७१-३८०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सारायानुकूलं समयमलब्ध । स जनाज्जनं दूरीचकार । स्वपरभावः पफाल । मानवो मानवेऽजुगुप्सत । सः समाजं पतनपल्वले निपात्य उच्चैर्हसन् जगता व्यलोकि ।

यथा तस्मिन् काले जातीनां प्राधान्यं व्यालोक्यत तथैवाश्रमाणामप्यस्तत्वं पर्यवेक्ष्यत । सत्यमेवेदं यद् वयमाश्रमांस्त्वस्मदनुसन्धेयसमयाच्चिर[1]पूर्वमेवोपेक्षाञ्चक्रमहे । परं तत्रास्मदीयोऽनुरागोऽविद्यदेवेत्यत्राश्चर्यम् । आश्रमेषु तदापि अस्मासु भूयिष्ठाः श्रद्दधतेस्म । अन्यथा—"अये आश्रमविरुद्धः खल्वेष जनः । अथवा तपस्विजनोऽप्यत्र । निर्दोषमुपसर्पणम्" । किञ्च—

उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः ।
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ।। (स्वप्नवासवदत्तम्, १ अं०)

इत्यादिकानां पङ्क्तीनां दर्शनं तत्कालगामिनीषु कुतः कृतिषु सम्भवमासीत् । आश्रमव्यवस्थायां सत्यामपि शिथिलायां जनसामान्यस्यापि श्रद्धा अन्तेवासिषु वैखानसेषु संन्यासिषु च विद्यत एव तस्माद् देशस्तदापि तपोवनानां रक्षणे ब्रह्मचारिणां साधुसन्यासिनां चाभ्यर्चने सततं प्रायतिष्ट । वन्यफलेषु वल्कलेषु च जीवनं नयन्तस्तीर्थोदके, दर्भाहरणे, समित्सञ्चयने च तदानीमपि रुचिं प्रीतिं च बिभ्राणा नैके जनाः प्राप्यन्त । सन्तोषेण स्वकीयान्यहानि नयतां नराणां तवापि पुष्कलत्वं विबभौ ।

(क) "धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलैः ।
मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।। (स्व.वा., १ अं.)

(ख) तीर्थोदकानि समिधः कुसुमानि दर्भान्,
स्वैरं वनादुपनयन्तु तपोधनानि ।। (स्वप्न वासवदत्तम्, १ अं०)

(ग) "वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता" । (शा० ४ अं०,

---

१ —(क) श्रीमद्भागवतम्, स्क० ११, अ० १७ ।

(ख) दी हिस्ट्री एण्ड क० ऑफ दी इं० पी०, खं० ३, परि० २०, पृ० ५५६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(घ) दुक्खशीले तपस्विजणे को अब्भत्थी अदु । (शाकुन्तलं, ४ अं०)

(ङ) "परिहरतु भवान् नृपापवादं न परुषमाश्रमवासिषु प्रयोज्यम् । नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति । (स्वप्न वा., १अं०)

आश्रमाणाम् आश्रम-धर्माणां च स्वरूपे सत्यपि तदानीमाविले तद्दर्शनमवश्यमेवोल्वणतया समवाप्यत ।

अधो विनिहितेभ्योऽवतरणेभ्यस्तत्कालवर्तिच्छात्राणां धर्मनिष्ठां कर्त्तव्यपालनप्रियताञ्च प्रति प्रकाशः प्राप्यते—

(क) "भगवन्, इमेस्मः । भगिन्यास्ते मार्गमादेशय" ।

(ख) "वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादपावृत्तेन काश्यपेन" ।

(ग) "भगवन्, अयमस्मि ।......यद आज्ञापयति भवान्" । (शाकुन्तले चतुर्थे सप्तमे चाङ्के)

(घ) विप्रा यान्ति वयः प्रकर्षशिथिला यष्टित्रिपादक्रमाः ।
शिष्यस्कन्धनिवेशिताञ्चितकरा जीर्णागजेन्द्रा इव ।।(पञ्चरात्रम्, १ अं.)

(ङ) शिष्यः—उपाध्याय, आज्ञापय ।

चाणक्यः—वत्स, नियतमस्फुटानि भवन्ति । तद् उच्यताम् अस्मद्वचनात् सिद्धार्थकः । (मुद्रा रा०, १ अं०)

भारतीया संस्कृति र्ब्रह्मचर्यवादिनी वर्तते । सास्ति ज्ञानोपासिका अतः ये ज्ञानार्जनाय समुत्पन्नाः[१], ज्ञानार्थं ये जीवन्ति, ज्ञानमेव येषां सर्वस्वम्, ज्ञानात् परमन्यन्न ये किमपि मन्यन्ते, ज्ञाननिमित्तेनैव ये सहर्षमसूनप्युज्झन्ति, तेषां श्रीचरणेषु सा सप्रश्रयं नैजमौलिं नमयति । संस्कृतरूपककाराः "द्विजोत्तमाः पूज्यतमाः पृथिव्याम्" (मध्यमव्यायोगे, १ अं०) इत्येतदादिकं लिखित्वा सविनयं ब्राह्मणेषु पूज्यतमताया हेतून् संस्मारयन्तः, पूज्यतमतार्चनाय विनिवेदयन्तीव प्रतिभान्ति ।

तत्कालवर्ती ब्राह्मणः स्वकीयां शक्तिं बौद्ध-जैनादिसम्प्रदायैः सह कलहं कुर्वाणो राजशक्तिमधिगन्तुं प्रयासं च विदधानोऽवालोक्यत । "ब्राह्मणाः सन्तु

१—मनुः ४।१६६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्तः" (मृ० १० अं०) इत्येतदभिलषमाणं संस्कृतरूपकमिच्छति तेषु साधुशीलत्वम्। कस्मिंश्चिद्युगे ब्राह्मणाः विश्वस्य समक्षे उच्चतममादर्शं पावनतमं सदाचारं महनीयतमं च ज्ञानज्योतिर्वितेनुस्तस्माद् भारतीया जनता चिरात् तत्कृतश्रेयस्कराणामुपकाराणां भारेण नतासीत्। तेषामेवानुकम्पाया मधुरं फलं भुञ्जाना सा सुखेन जीवनमतिवाहयतीति तदीयोऽविचलो विश्वास आसीदतः सा पतनोन्मुखेऽपि तस्मिन् विप्रसमाजे गम्भीरामेव भक्तिं निदधानादृश्यत। सा तस्मिन्नवनतानेहस्यपि तेषां वसुबन्धु (चतुर्थशतकवर्ती), असङ्ग (चतुर्थशतकवर्ती), असङ्ग (चतुर्थशतकवर्ती), दिङ्नाग (चतुर्थपञ्चमशतकाभ्यर्णवर्ती), वात्स्यायन (शुङ्गसातवाहनशकयुगवर्ती)-अश्वघोष (कनिष्ककालवर्ती)—चरक (कनिष्कसमकालीनः)—भामह (षष्ठशतकगामी)—हरिषेण (समुद्रगुप्तसमयवर्ती) प्रभृतिबहुज्ञानोदधीन् प्रैक्षिष्ट तस्मात् सा सर्वथा तेषामनुज्ञावर्तिन्येव प्राप्यत। परं महीदेवानां पतनं प्रेक्ष्य; तान् निन्द्यानि च कर्माणि कुर्वाणान् दर्शं दर्शं जनेषु बहवो हि तदानीमपि सम्प्रदायान्तरं श्रयन्तोऽलभ्यन्त। "भट्टिणि मितं उवट्ठिव भोअणं ब्रह्मणजणं पेक्खिअ……" (प्रतिज्ञायौ०, १ अं०), किञ्च "किस्स अहं अवेदिओ। सुणाहि दाव। अत्थिरामाअणंणाम णट्ठसत्त्थम्" (अविमारकम्, २ अं०) इत्येतदादि वाक्यानि निधाय रूपकाणि तेषां विनिपातं[1] प्रदर्शयन्तीव प्रतिलक्ष्यन्ते। हन्त, पथः श्रुते दर्शयितारोऽपि तदा मलीमसां पद्धतिमाददतेस्म-इत्यत्रेतिहासः साक्षी[2]।

पौराणिकता, मन्ये, तस्मिन् युगे बलीयसी भूत्वा समुदतिष्टत्। परं बौद्धधर्मस्य चिरं प्रवर्तमानत्वात् विद्वत्स्वनेके गृहीतबुद्धधर्मदीक्षा अपि अवाप्यन्त। ते बहून् महत्त्वपूर्णान् ग्रन्थान् विरचय्य संस्कृतवाङ्मयमपि सम्यगसेविषत। भावोऽयमत्र यत् तदानीं द्वयोरपि पौराणिकबौद्धधर्मयोश्छटा वीक्षिताभूत्। केचन बौद्धधर्ममर्चन्तः केचश्च पौराणिकं धर्मं पूजयन्तः प्राप्यन्त। रथ्यासु क्षपणका यदि अदृश्यन्त तदा वैदिकधर्मपराः संन्यासिनश्च।

---

१ -मनुस्मृतिः अ० ३, श्लो० ६५, अ० १०, श्लो० ९२।

२—संस्कृति के चार अध्याय दिनकरकृत, अ० ४, पृ० १६०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बौद्धसाधून् अभिभवितुं पौराणिका मनसा वाचा कर्मणा च सर्वथा सन्नद्धा अदृश्यन्त। तात्कालिकेषु पुराणेषु बौद्धनिन्दापराणि बहूनि वचनानि श्लोका[1] वा उपलभ्यन्ते।

"एशे दुट्टशमणके गहिदकाशा ओदकं चविलं गेण्हिअ आअच्छदि। एशे मए णशि छिदिअ वाहिदे किदवेले...... ।" (मृच्छ० ८ अं०)

इत्येतदादिपङ्क्तय उपरिर्वणितां स्थितिं परिपोषन्त्योऽवाप्यन्ते[2]। षष्ठशतकोत्तरकाले विनिर्मिते प्रबोधचन्द्रोदयरूपके जैनबौद्धयोः रूपं नितान्तं जुगुप्सास्पदं चित्रितं वीक्ष्यते। नात्र संशयो मनागपि साम्प्रदायिक एष कलहो, द्वेषो, रागो वा समाजस्योपर्यस्वस्थं प्रभावमपातयत्।

ईशवीयात् प्रथमाच्छतकात् षष्ठं शतकं यावत् बौद्धाबौद्धयोर्विचित्रमेवोन्नमनमवनमनञ्च नयनचरमभवत्। यदा बौद्धा बलवदाश्रयमाप्नुवन् तदा ते, यदा च पौराणिकाः कस्यापि पुराणपक्षपातिनः शक्तिशालिनोऽवलम्बमलभन्त तदा तेऽपि समुत्थिता अजायन्त। परमेतदुत्थानं नैतिकमुत्थानं नासीत् केवलं भौतिकबलजनितमुत्थानमासीत्।

पुष्पमित्रे सिंहासनासीने सति ब्राह्मणधर्मस्य प्रसारो जातः। बौद्धा अपि अन्तरमन्विष्य शकयवनादीन् शरणं ययुः। तेषां ग्रन्थेषु यवनशकादीनां या विकत्थना दृश्यते सा कथनमेतत् परिपुष्णाति। महायानग्रन्थे कनिष्कस्य प्रशंसापि स्वधर्मपरित्राणलाभायैव कृता वर्तते। धर्मानन्दकौसाम्ब्याः विचारोऽयं यद् बौद्धधर्मस्य पतनेऽन्यतमं कारणं नृपाश्रयणमप्यजायत। "स मया क्षपणकलिङ्गधारी......कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितः......" (मुद्रा० रा०, अं०) इत्यादिवाक्यानि दिशायामस्यामाभासमिव क्षिपन्ति। बौद्धान् व्यथयितुमत्र तदानेके प्रयत्नाः अक्रियन्त। श्रूयते यद् हर्षात् प्राक् शशाङ्को[3] नाम

१—विष्णुपुराणे पाखण्डिनो विकर्मस्थान्......इत्यादिश्लोकाः।

२—बी. एन. लूनियाः, भारतीय सभ्यता तथा संस्कृति का विकास अ० ५, पृ० १४१-१४३।

३—सत्यकेतु विद्यालंकारः, भारतीय सं० और उसका इतिहास अ० २०, पृ० ३६१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजा बौद्धमठान् विध्वंसयाम्बभूव । तदानीमेव कश्चित् पाण्ड्यो राजा दक्षिणस्यां दिशि जैनानामष्टसहस्रकं जघान । एवविधान्युत्पीडनानि साम्प्रदायिकद्वेषभावाज्जन्म जगृहुः ।

भारतीयविद्वज्जगतः शिवश्चिरादुपास्योदेवः । प्रायेणात्र अनेनैव नाम्ना ईश्वर आराधितोऽभूत् । साम्प्रतमपि स एव देवेषु महान्देवो मतः । ईश्वरोपासका भक्ता अतिप्रतनकालादेव 'शिव-शिव इति जपन्तः श्रूयन्ते । शिवस्तुतौ सन्ति सहस्रशः स्तोत्राणि । परमेषा पुनीतशिवोपासना सङ्कीर्णचरितैरनुदारहृदयैः साम्प्रदायिकतादोषदूषितविचारैर्जनैरदूष्यत । य ईश्वरः शिव इति मत्वा अर्चितोऽभूत् सः[1] साम्प्रदायिकतोन्मादोन्मत्तैरीश्वरपदात् प्रच्याव्य देवेषु अन्तर्भावितः । स्थावरजङ्गमानां स एव मान्यः; स एव स्थिति-सर्ग-प्रत्यवहारहेतुरित्येषा तद्विषयिणी भावना न साम्प्रदायितानुरागिभिरादृता । "या सृष्टिः सृष्टुराद्या......" (शाकुन्तलम्) इत्येतदादिशब्दैः कालिदासः, "पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः" (मृच्छकटिकम्) इत्येतदादिपदपङ्क्तिभिः शूद्रकः किञ्च "धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्याः" (मुद्राराक्षसम्) इत्येतदादिशब्दस्रजा विशाखदत्तः कविश्च नून शिवं वन्दमानः संसारं परमेश्वरोन्मुखं कर्तुमभिलषते न च स तथा कृत्वा तं साम्प्रदायिकतासङ्कीर्णतायां निपातयितुमिच्छति । इमे कवयः शिववन्दनाव्याजेन शैवं सम्प्रदायम्प्रति नैजं सम्मानं प्रकटीकुर्वन्तस्तं सम्प्रदायं सर्वत्र सर्वतश्च प्रसारयितुमुत्सुका आसन्-इत्येवंविधो विचारो भ्रान्तः । परमिदं सत्यं यद्स्मदीयाभिमतरूपकाणां कालः स कालोऽवश्यमासीद् यो बहुदेवेषु आस्थां निहितवान् । तस्मिन् काले सङ्कुचितस्वान्ताः 'अयं निजः परो वा' इत्येतस्या अनुदारायाः असद् भावनायाः पल्लवने संलग्न आसन्नपरतः संस्कृतरूपककाराः शिवस्य तां-तां विशिष्टतां प्रकाश्य देशमीश्वरनिष्ठं विधातुमुत्कण्ठिता बभूवुः । किञ्च ते "महादेवं विअ दुआर सोहा" (मृ० ४ अं०); "भगवत्यो देवताः" (मृ० १० अं०), 'तदनु जयति भेत्ता षण्मुखः "(मृ० १० अं०); "......त्रिभुवनो विष्णुः स्वर्णप्रभः"

१—सत्यकेतु विद्यालंकारः भारतीय संस्कृति और उसका इतिहास, अ० १६, पृ० ३०२।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(बालचरितम्, ५ अं०) इत्यादिवाक्यैस्तदानीन्तनस्य भारतस्य बहुदेवतापरत्वं ज्ञापयन्ति ।

पौराणिकधर्मस्यानुयायिनो मुख्यतयाद्विविधा आसन् । एके तु त आसन् ये शैवशाक्तवैष्णवादिसम्प्रदायानामनुगामिनः सन्तः स्वसम्प्रदायस्य देवानुपासतेस्म, अन्ये ते बभूवुर्ये स्वसम्प्रदायस्यैव देवमाराधयन्तिस्म । जनतायाः प्रवृत्तेरनेकदेवीदेवपरत्वात् सः कालो बहुदेववादी[1] काल इति नाम्ना अप्रथत ।

गुप्तयुगे वैष्णवशैवधर्मौ नितरामैधिषाताम् । तदा शिवस्य विष्णोश्चानेकमन्दिराणि निर्मितान्यभूवन् । तदेवमस्मद्रूपकाणां समये बौद्धधर्मस्यास्ततोन्मुखता-पौराणिकतायाः किं वा श्रौतस्मार्तधर्मस्योदयो, जातिवादस्य प्रबलता वर्णाश्रमधर्मयोश्चावनतता स्पष्टमेववीक्षिताभवत् ।

शिक्षा —

अस्मदभिमतकालेऽधिसमाजं यादृशी शिक्षासीत् यादृशश्च शिक्षाप्रदानाय प्रबन्ध आसीत् यादृशाश्च विविधविषयपारदृश्वानः पण्डितधौरेया आचार्याः आसन् यादृशाश्च छात्राः आसन् सर्वमपि तद् बाणस्य महाकवेस्तद् विवरणमवेक्ष्य स्पष्टतो विदितं जायते यत् तेन स्वीकीये हर्षचरिते, नैजदेशान्तरपरिभ्रमण-विद्याध्ययन-गुरुकुलनिषेवणादिसन्दर्भे लिखितमथ च कादम्बर्यां चन्द्रापीडशिक्षाप्रकरणे वर्णितम् । पुरातनतरस्य कालस्य शिक्षाव्यवस्थायाः स्वरूपं हि इत्सिंग[2] यात्रिणश्च शिक्षायाः विवेचने सम्यग् विलोक्यते ।

बाण इत्सिंगश्च सप्तमशतकाभ्यर्णेऽभूतां परं या शिक्षा तयोरनेहस्यवर्तत तां ज्ञात्वा तदूर्ध्वकालवर्तिन्याः शिक्षायाः अवस्थामपि ज्ञातुं प्रभवेम वयम् । शुङ्ग सातवाहनगुप्तकालेऽपि प्रायेण तादृश्याः एव शिक्षायाः विद्यमानत्वात् ।

"यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतोऽरुणपुरःसर एकतोऽर्कः"

(शाकु० ४ अं०)

१—"तत् साम्प्रतं गच्छ, मातृभ्यां बलिमुपहर" मृच्छ० १ अं० ।

,,—"जअदि जलदणीलो केसवो केसिघादी" मुद्रारा० ६ अं० ।

२—दी हिस्ट्री एण्ड क० ऑफ दी इं० पी०, खं० ३, परि० २१, पृ० ५७९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतदादिश्लोकेभ्योऽप्रत्यक्षभावेनाभास एव आपतति यत् तदानीमाध्यात्मिक्याः शिक्षायाः प्रदानं प्रधानत्वेन कृतमभूत् । यादृशी शिक्षा मुख्यत्वेनोपनम्यते तादृगेव संस्कारोहृदय मधिदसति, विचाराश्च तथाविधा एव उत्तिष्ठन्ति । कण्वस्य शिष्योऽत एव प्रभातं विलोक्य तद्विधान् भावान् व्यक्तीकुर्वंन् श्रुतो भवति । कवेर्गीतं तमुपरिस्थितं श्लोकं श्रुत्वानुमानमिदं हृदयमधिरोहति यत् कविकालेऽपि शिष्या गुरोः सविधे उषित्वाधीयते स्म तत्र च ते उपनिषद्-दर्शनादिसम्बन्धिनीं शिक्षां प्रमुखत्वेन अधिजगिरे । तस्मिन् काले ललितकलाः अधिकृत्यापि शिक्षा प्रदत्ताभवदित्येतत्—'मया सुतीर्थादभिनय विद्या सुशिक्षिता' इत्येतन् मालविकाग्निमित्र-प्रथमाङ्कस्थितवाक्यादवगम्यते । अध्यायकाले आचार्याणां क्वाप्यन्यत्र गमनं नाभिमतमभूदित्येतदपि तत्रत्यादेव "किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानम्" इत्येतद् वाक्यं बोधयति । तदा शास्त्रस्याध्ययनं छात्रैर्गम्भीरतया कृतं; ते स्वाधीतविषये परं पाण्डित्यं प्राप्तुं सततमचेष्टन्त—इत्येतच्च 'तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु" इत्येतस्मात् प्रसङ्गात् ज्ञातं भवति । शास्त्रार्थद्वारेण तस्मिन् काले पाण्डित्यस्य, योग्यतायाः व्युत्पत्ते र्वा परीक्षणं कृतमभूदिति च तत्रत्यादेव 'पक्षपातमत्र देवी मन्यते' इत्येतेन ज्ञायते । कविकृतेन पण्डितकौशिक्याः परिव्राजिकायाश्च उल्लेखेन ज्ञातं भवति यत् तदानीं नार्योऽप्युच्चशिक्षां ग्रहीतुमधिकारिण्य आसन् किञ्च तदा स्त्रीशिक्षाया व्यवस्थापि पूर्णासीत् ।

'मङ्गलालंकृता भाति कौशिक्या यतिवेषया ।

त्रयीविग्रहवत्येव सममध्यात्मविद्यया ।। (मालविकाग्नि, १ अं०)

इत्येतस्मिन् श्लोके कविर्यथा अध्यात्मविद्यया त्रय्याः शोभा तथैव परिव्राजिकया कौशिक्याः इति यद् आमनति तस्मात् स्त्रीणामवाप्तोच्चतम शिक्षत्वे प्रकाशः पतति । तदा नूनं स्त्रिय उच्चतमशिक्षालब्ध्यर्थमानुकूल्यं लेभिरे इति प्रतिभाति । तस्मिन् कालेऽस्मद् भारते कीदृशाः श्रेष्ठा शिक्षका व्यराजन्त किंवा कीदृशान् शिक्षकान् तदानीन्तनो देश आचकाङ्क्ष इत्यत्र अधः स्थितः श्लोक इङ्गितं स्पष्टं करोति—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"शिलष्टा क्रिया कस्यचिदात्मसंस्थासंक्रान्ति रन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ॥
(मालविकाग्नि. १।१६।

यो जनः केवलजीविकायै विद्यां विक्रीय धनं समासादयतिस्म स जनस्तस्मिन् काले वणिक्त्वेन मतोऽभूदित्यत्र चायं वक्ष्यमाणः श्लोकः प्रकाशं क्षिपति—"लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥
(मालविका: १।१७)

शिक्षासस्थानां सञ्चालनाय नृपा श्रद्धया भक्त्या च पुरा पुष्कलमर्थं व्ययीचक्रुः । यदा मौर्यसमयोपरि दृष्टिः क्षिप्यते तदा तत्रापि शिक्षायाः कार्यमाचार्य-पुरोहितश्रोत्रियादिनिघ्नमदृश्यत । राज्यं शिक्षार्थं शिक्षाप्रदातृभ्यश्च साहाय्यं प्रददौ । गुरुभ्यो भूः प्रदत्ताभूद् येन ते निश्चिन्ता भूत्वा तदायद्वारेण शिक्षाकार्यं साधुतया चारुतया च चालयितुं क्षमा अभूवन् । शिक्षार्थं दत्ता वसुमती 'ब्रह्मदेया' इति न्यगद्यत । न ततः किमपि राजस्वं ग्रहीतमभूत् । एकतस्तु स्वतन्त्रतयाध्यापयितृभ्यो देशस्य नवयुवानः शिक्षामनिशमगृह्णन् अपरतो देशे एवंविधान्यनेकानि शिक्षानिकेतनानि शुशुभिरे यत्र आचार्याः शिक्षादानकार्यं कृतवन्तः । मौर्यकालीनस्तक्षशिलाविश्वविद्यालयो विश्वविदित आसीत् । तस्मिन् काले शिक्षाग्राहाय मार्गद्वयं प्रचलितमासीत् । शिक्षाशुल्कं दत्वा शिक्षाग्रहणस्य किञ्च गुरुसेवां कृत्वा शिक्षोपादानस्य । गुप्तशासनसमये च शिक्षाया व्यवस्थोपर्युक्तविधैवालक्ष्यत[1] । इत्सिंगो नालन्दाविश्वविद्यालयस्य यद् विवरणं प्रदत्तवान् तेन तत्कालस्यादर्शशिक्षायाः पावनमवदातं च रूपमस्मत्पुरः सन्निहितं भवति । भासः स्वप्नवासवदत्तनाटके लावाणकग्रामस्य ब्रह्मचारिण मुपस्थाप्य तत् समयस्य शिक्षायाः शिक्षार्थिनां च चारुचित्रमतिशयचतुरतया लिखति ।

डॉ० ए० एस० अल्टेकरश्छात्राणां दिनचर्याया यद् विवरणं प्रस्तौति तदत्रत्यानां तत्कालगामिनामन्तेवासिनां जीवनस्योपरि मनोज्ञं प्रकाशं प्रस्तवीति । तेषां कार्येष्वन्यतमं कार्यं गोचारणमप्यासीत् ।

१—सत्यकेतु विद्यालंकारः भारतीय सं०······इतिहास, अ० १३, पृ० २५१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"भगवन् अखिलान्यपि अस्त्राणि उपशिक्षितुम्"...... इत्येताः कर्णभारस्य पङ्क्तयस्तत्कालस्य शिष्याणां विनयं किञ्च शिक्षाजगत्यागतं भेदभावं चाभिव्यञ्जन्ति।

[1]कादम्बकुलं शिक्षाया व्यवस्थार्थं यत् स्वयुगे चकार तदप्युल्लेखनीयं वर्तते। यथा तस्मिन् युगे उच्चतमशिक्षार्थं नालन्दा वि० विद्यालयः ख्यातिं गत आसीत् तथैव वलभी अपि शिक्षाजगति लब्धप्रतिष्ठासीत्। तदानीं पाठ्यक्रमेऽष्टादशानामपि विद्यानां समावेशः कृतो बभूव। महाभाष्यस्याध्ययनेनेदमपि ज्ञातं जायते यत् तस्मिन् युगे व्याकरणस्याध्ययनं मुख्यत्वेन नितान्तमपेक्षितं मतमभवत्।

नार्यः—

तत्कालवर्तिनः समाजस्य पतने किमपि कारणं चेत् प्रमुखं कथनीयं भवितुमर्हति तर्हि तत्कारणमस्ति समाजकृता नार्यवमानना। या नार्यो वैदिककाले[2] परमसम्माननीया बभूवुस्ता एव पौराणिककाले उपेक्षिता अक्रियन्त। स्त्रीणां स्त्रीत्वमेव तदा दोषत्वेन दृष्टमभूत्। शिवपुराणे धर्मसंहितायां ४३ तमेऽध्याये, वराहपुराणे १७७ तमेऽध्याये, स्कन्दपुराणे तृतीयाध्याये चैवंविधानि बहूनि वाक्यान्याप्यन्ते येषु स्त्रीणां चरित्रं तासां स्वभावश्च भृशं निन्दितः। क्वाचित्-क्वचित्तु तासां गर्हाऽतिजुगुप्सोत्पादकैः शब्दैः कृता दृश्यते।

(क) "अपण्डितास्ते पुरुषा मता मे, ये स्त्रीषु च श्रीषु च विश्वसन्ति।
श्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि॥
(मृच्छ०, ४ अं०)

(ख) स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः।
पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते॥ ,, ,,

इत्येतदादिशविलकोक्तिभिर्ज्ञायते यत् तदा प्रायेण स्त्रीषु जनसामान्यस्य दृष्टिः पुरोभागितां बभाज। तासामधिकारास्तदा अह्रियन्त। पञ्चतन्त्रादिग्रन्थ-

१—दी हिस्ट्री......पीपुल, खं० ३, अ० २१, पृ० ५७६-५८४।
२—ऋक् १०।१८।६। अथर्व० ११४।२-३।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पठनात् तु विदितं भवति यत् तदानीन्तनः[1] समयस्तासां सर्वाङ्गीणविकासम्प्रति नितरामेव प्रमादमदीदृशत् ।

जनकृतां नारीणामवमाननां[2] तासु व्यवहृतान् कठोरान् व्यवहारान् विलोवयैव कदाचित् स्मृतिकारो नारीः प्रति सम्मानपूर्णगौरवधियं प्रतिष्ठापयितुं जनतां सम्बोध्य वक्ति—

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" ॥
"न शोचन्ति तु यत्रैता वर्धते तद्धिसर्वदा" ॥

तस्मिन् काले प्रणीतानां पद्मपुराण[3]मत्स्यपुराणस्कन्दपुराणब्रह्मवैवर्तपुराणस्थ बहूनामंशानामत्र्यादि[4]स्मृतीनां च विलोकनेन विदितं जायते यत् तत्कालवर्तिनि समाजेऽनेके दोषा आगता आसन् । तस्मात् स्त्रीणां स्थितिरपि अस्वस्थैव प्रत्यलक्ष्यत । तस्मिन् युगे स्त्रीषु पुंसां प्रभुत्वं कठोरमनुदारं च अलभ्यत । अतएव तु तात्कालिकेषु रूपकेष्वेवंविधाः श्लोकाः प्राप्यन्ते—

"तदेषा भवतः कान्ता त्यज चैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥

"यदि यथा वदति क्षितिपस्तथा, त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचिव्रतमात्मनः, पतिकुले तव दास्यमपि क्षमम्" ॥
(शाकु०, ५ अं०)

सामान्यतः संस्कारावसरेषु वेदमन्त्रोच्चारणाय न स्त्रियोऽधिकारिण्यः आसन् । शिक्षा-प्रसारः सामान्यनारीसमाजे तु प्रायेण न प्राप्यत परं धनवतां कुमारिकाः, राजकुमारिकाश्च शिक्षामधिगच्छन्त्यः प्राप्यन्त ।। वात्स्यायनस्य कामसूत्रमधीत्य विदितं भवति यत् सामन्तानां नृपतीनां च तनयाः शास्त्रेष्वपि

१—दी हिस्ट्री······पीपुल, खं० ३, परि०, पृ० ५६२ ।

२—डॉ० राम जी उपाध्यायः भारतीय संस्कृति का उत्थान, अ. ३, पृ०१२८ ।

३—पद्म पु. उत्तर २१३।८।१३; मत्स्यपु. २२१।१२८ । ब्रह्मवै.पु० २।४५। १०६; ४।५१।५३ ।

४—अत्रि. १९७-१९८।२०१-२०२ । मनुः ५।१५४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परां प्रवीणतां दर्शयन्त्यः समलक्ष्यन्त। वात्स्यायन एकां विस्तृतामनुक्रमणीमस्माकं पुरतो निदधति। सः चतुःषष्ठिसंख्याकानामङ्गविद्यानामुल्लेखं कुरुते। नार्यस्तासु विशिष्टां पटुतां प्रादर्शयन्। गुप्तयुगवर्तिसाहित्यानुशीलनेन उच्चवंशोद्भवयुवतीनां साहित्यसङ्गीतकलासु कुशलत्वं व्यक्तं जायते। ताः गृहस्य—गार्हस्थ्यस्य—भारमतिप्रशंसास्पदनिपुणतया वहन्तिस्म अतस्ताः 'गृहिणी' इत्येतेन सम्माननीयेन पदेन आकारिता अभूवन्। अमरकोशो, यस्य रचना गुप्तकाले बभूव, वेदयते यत् तदा नार्यो हि उपाध्यायाश्च अजायन्त। वात्स्यायनः पत्नीचित्रमालिखन् प्रतिपादयति यत् तत्कालीनाः पत्न्यः पत्युराज्ञया सामाजिकेषु उत्सवेषु यज्ञेषु धार्मिकेषु अनुष्ठानेषु च सम्मिलिता भवितुमार्हन्।

तस्मिन् काले पुरुषसमाजे बहुविवाह[1]प्रथापि प्राबल्येन प्रचलितासीत्। स्मृतीनां विलोकनेन विधवाजीवनस्य कष्टाकीर्णत्वञ्च ज्ञातं भवति।

(क) "किं अन्ते उर विरहपज्जस्सु अस्स राएसिणो उवरोहेण"
(शा० ३ अं०)

(ख) "बहुधनत्वाद् बहुपत्नीकेन तत्रभवता भवितव्यम्"
(शा० ६ अं०)

(ग) भर्तु······बहुवल्लभस्य" (मुद्रारा० ३ अं०)

एतैस्तत्कालवर्तिनां नृणां विशेषतो नरेन्द्राणां धनिनां च बहुपत्नीकत्वं सिद्ध्यति विधवानां च विवाहो न पूर्णतया प्रतिषिद्ध आसीत्। हुएनसांगस्य विवरणात्तु स्पष्टं जायते परम् "पुनर्भू दिधिषूरूढ़ा द्विस्तस्या दिधिषुः पतिः" (अमर को. द्वि. का. मनुष्य वर्गः, श्लो. २३) इत्येतं श्लोकं विलोक्य तु तासां (विधवानाम्) पुनर्विवाहत्वं सूचितं भवति। समाजे गणिकाः अपि तदा नृत्यसंगीतादिललितकलासु परामेव कुशलतां निदधत्योऽवालोकिषत। नृत्येन संगीतेन च सहृदयानां रसिकानां समाजस्य रञ्जनं तस्य चेतसः समुपासनं तासां प्रमुखं महत्त्वाधायकं कार्यमसीत्। तासु अनेकाः प्रचुरवैभवशालिन्यश्च प्राप्यन्त। मृच्छकटिके वसन्तसेनां चित्रयित्वा शूद्रकः, दशकुमारचरिते रागमञ्जरीं चन्द्रसेनां

१—दी हिस्ट्री······पीपुल, खं. ३, परि० २०, पृ० ५६५।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चालिख्य दण्डी स्वसमयस्य नृत्य-संगीतादिकलाप्रियत्वं बोधयन्तौ लभ्येते । पुरा देवमन्दिरेषु नर्तक्यः-गणिकाः-देवपूजानेहसि[1] दैवतस्य पुरः नृत्यञ्च कृतवत्यः । उज्जयिन्यां महाकालेश्वरमन्दिरे च ता नर्तक्यस्तदानृत्यन्त्योऽवाप्यन्ते । हुएन-सांगस्य समये पूर्वीय सिन्धुप्रदेशस्य पुरे सप्तसप्तिमन्दिरेऽपि तासां नर्तकीनां नृत्यं दृष्टमभूत् ।

अवगुण्ठनप्रथा तदा नासीदिति न सत्यं प्रतीयते । "अम्भो परपुरुषदंसणं परिहरदि अय्या" (स्वप्नवासव. १ अं०); "अवणहस्सं दाव दे उण्ठणम्" (शाकु० ५ अं०) इत्येतददादिना तु ज्ञायते यत् तदाप्यवगुण्ठनप्रथावर्तत ।

अधोलिखिताः पङ्क्तयस्तस्मिन् काले सतीप्रथायाः प्रचलनमप्यासीदिति च ज्ञापयन्ति —

"मत्तुणो चलणे अणु गच्छन्तीए अप्पाणगलो होदिति" ।

(मुद्रारा०, ७ अं०)

"एसा अज्ज चारुदत्तस्स बहुआ अज्जा धूदा पावए पविसदि" ।

(मृच्छ०, १० अं०)

अस्मदीयानां रूपकाणां काले देशे कौटुम्बिकप्रथा सर्वत्र प्रसृतासीत् । भारतीया जनता श्रुतेः—

समानी प्रपा सह वोऽन्नभागः, समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतता, उरा नाभिमिवाभितः ।।
ज्यायस्वन्तश्चित्तिनो मा वियौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसः कृणोमि ।।

(अथर्ववेदे, ३.३०)

इत्यादिकां प्रदत्तां भावनां साम्प्रतमपि व्यवहारे साभिनिवेशं परिणमयन्त्येव लोचनगोचराभवत् । तदा पिता, पितृव्यस्यापत्यानि, बन्धवः, बन्धूनां पुत्रकलत्रादिकाः, सर्वेऽपि एकस्मिन्नेव सद्मनि सप्रेमभावं वसतिं कृतवन्तः । गेहे यः कोऽपि पिता पितामहो वा आप्तो ज्येष्ठो बभूव तस्यैवाधीनतायां सर्वेषां वात्सल्यमयं संरक्षणमासीत् । स एव कुटुम्बस्य कृते अशन-वसनशिक्षणादिविषयकं

१—मेघदूतम्, पू० ३६; एच. टी. डब्ल्यू० २,२५४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रबन्धं चकार । तस्यैव आज्ञा सर्वमान्याभवत् । तदीयादेशमन्तरेण गृहस्य किमपि कार्यं न भवितुं शक्यमभूत् । समग्रोऽप्यायराशिस्तस्यैव प्रदत्तोऽभवत् । स च सर्वेष्वपि परिवारसदस्येषु समदृष्टिं निदधानः सर्वेषामपि सर्वाङ्गीणाभ्युदयनिमित्तेन तस्य व्ययमकरोत् । ज्येष्ठो भ्राता पितेव मतोऽभूत् । सोऽपि स्वकीयान् अनुजान् स्वसुतानिव मन्यमानस्तेषु स्नेहपूर्वकं व्यवाहरत् । देशस्तदानीं नितरां स्वावलम्बी आसीत् । सर्वेऽपि अन्नोत्पादनस्य वस्त्रनिर्माणस्य च कार्यं स्वयमेव विदध्युः । ग्रामे ग्रामे ग्रामस्य स्वकीया लौहकाराः, स्वकीया रथकाराः शिल्पिनः कारवश्च स्वकीया एव अभूवन् । जीवनस्य कृते यदप्यपेक्षितमभूत् तदेकस्मिन् स्थान एव प्रायेण समवाप्तमभूत् । अतस्तत्कालवर्तिनी परिस्थितिस्तत्कालगामिवातावरणं च कौटुम्बिकप्रथानुरूपमेव असिद्ध्यत् । तस्मिन् काले जनानामपेक्षणीयमपि यदासीत् तदपि न्यूनमासीत् । भौतिकेषु पदार्थेषु आस्था न गुरुतरासीत् । जीवनयापनप्रकारोऽतिसरलोऽतिसात्त्विकोऽतिपवित्रश्चासीत् । तृष्णा परिमिता, सन्तोषो मर्यादावान् तेषु अदृश्यत । तेषां निवसने ऋजुता, तेषां वार्तायां छलविहीनता, तेषां प्रकृत्यामध्यवसायप्रियता, कर्त्तव्यनिष्ठा धर्मभीरुता च अशोभन्त । एतेषां हेतूनां सद्भावात् कौटुम्बिकी प्रथा बलवत्तरं जीवनं प्राप[1] ।

"ज्येष्ठोभ्राता पितृसमः कथितो ब्रह्मवादिभिः"
(मध्यमव्यायोगः, १ अं०)

"कुटुम्बकम् अनुगृहीतम्" (मुद्राारा०, ६ अं०)

"तदो सो विभवमन्द दाए अरुराहीण परिजणो विसज्जिअ कुडुम्बभरणो......"
(चारुदत्तम्, २ अं०)

"भोदु कुडुम्बिनीं सहाविअ परमत्थं" (मृच्छ०, १ अं०)

इत्यादिकानि वाक्यानि तत्समयवर्तिदेशस्य कौटुम्बिकजीवनवत्त्वं प्रकटीकुर्वन्ति ।

शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा ।
कस्य स्वजन शब्दो मे लज्जामुत्पादयिष्यति ।।

१—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पी०; खं० २, परि० २१, पृ० ५५६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामः—आः अतः परं न मातुः परिवादं श्रोतुमिच्छामि ।
भरतो वा भवेद् राजा वयं वा ननु तत् समम् ।
यदि तेऽस्ति धनुः श्लाघा स राजा परिपाल्यताम् ।। (प्रतिमा)

भासः कविरित्येतद् यत् किमपि लिलेख तस्यान्तरे कौटुम्बिक-जीवनस्यैव (तत्समयवर्तिनः) मनोज्ञं चित्रं दृक्पथमधिरोहति ।

भारतस्य प्रतिकुटुम्बमेकं लघुराज्यमिव आसीत् तत्र सर्वज्येष्ठो वृद्धो राजेवासीत् । अन्ये च सर्वे कौटुम्बिकाः प्रजा इव तत्र आसन् । यथा राजा सस्नेहं प्रजां पालयति तस्याः उन्नत्यर्थं विविधानुपायानवलम्बते । सवपु जनेषु च न्यायबुद्धि निदधाति तथैव प्राचीनकालस्य आप्तो वृद्धो वा सर्वेष्वपि कुटुम्ब-जनेषु व्यवाहरत् । न कुत्रापि तस्य पक्ष-पात आसीत् । अत एव प्राचीनाः कुटुम्बिनः सुखेन एकत्र न्यवसन् ।

गृहिणः—

धर्मशास्त्रोदीरितानां गृहधर्माणां रक्षणं कुर्वन्तो गृहिणस्तदानीं भूयस्कतया अवालोकिषत । गार्हस्थ्ये तानि कर्माणि प्रायेण सर्वत्र अदृश्यन्त यैस्तस्योत्कर्षश्रीः देदीप्यते । परं मनुप्रभृतिविदुषां ग्रन्थेषु[1] गार्हस्थ्यं लक्ष्यीकृत्य यदभिहितं तद्-विलोक्येदमपि विदितं जायते यत् तस्मिन् समये गृहिणः स्वधर्मपरिपालने नूनं प्रमादमदीदृशन् । त इदं विसस्मरुर्यद् गार्हस्थ्यधर्मम्प्रति कृतयानवहिततया तदूर्ध्ववर्ती वानप्रस्थाश्रमः संन्यासाश्रमश्च जरतस्तस्यैवोपरि तौ द्वावपि जीवतः । कदाचिद्—इत्येतत्प्रबोधनाय वा गार्हस्थ्यस्य को धर्म इति ज्ञापनाय धर्मशास्त्रं तत्सर्वमाह ।

(क) "संतुट्ठतपस्विजणं इदम् अस्समपदम्" ।।

(ख) "यद्यनवसिता विद्या किमागमनप्रयोजनम्" ।। (स्वप्नवा०, १ अं०)

(ग) "यथा चातिथिसत्कारं जानीयात् तथा प्रयतितव्यम्" ।।

(प्रतिज्ञायौगन्धरायणम् २ अं०)

१—मनुस्मृतिः ३।७७-७९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतदादादिनास्मद्द्रष्टव्यस्य समयस्य तत्तदाश्रमवासिनां ध्यानं स्वस्वकर्तव्य-धर्मपालनदिशायामाकृष्टमासीत् । शास्त्रोक्तान् पञ्चापि यज्ञांस्ते प्रत्यहमन्वतिष्ठन्—

(क) यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव सम्प्रति विरूढतृणाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः ॥

(ख) समाप्तजप्योऽस्मि । तद् साम्प्रतं गच्छ, मातृभ्यो बलिमुपहर ।
(मृच्छ०, १ अं०)

गोपालनं तात्कालिकस्य गृहस्थस्य प्रतिगृहे दृष्टमभूत्—
"षन्ती होदु षन्ती होदु अम्हाणं गोधणाष्ष अ" (पञ्चरात्रम्, २ अं०)

गोमयेन गृहलेपनम्, तुलसीवृक्षकस्यपूजनम्, सन्ध्यावन्दनम्, गुरुचरणेषु शिरोऽवनमनमत्रप्रतिगृही कुर्वाणोऽदृश्यत—

(क) "सलिलसित्तमज्जिदकिदहरिदोवलेवणस्स, विविह-सुअन्धिकुसुमोवहार-भूमिभाअस्स........" (मृच्छ०, अं० ४)

(ख) "साम्प्रतं त्वमेव वन्दनीया संवृत्ता" । "स्वस्ति भवत्यै" । (तत्रैव)

(ग) "जाद पुत्तअ, पत पच्चिमेसु पिदुणो पादेसु" । (मु० रा०, ७ अं०)

गृहाः—

प्राचीनेतिहासपुराणाख्यायिकादिषु[१] गृहाणां यद् वर्णनं लभ्यते तदत्रत्यानां सामाजिकानां नागराणां वा जीवनभूमेरुत्कृष्टतरतामुन्नततरतां च प्रस्तौति गृहनिर्माण-कलायां वैदिक[२]समयादेव वयं कुशला बभूविम । वेदेषु गृहाणामुल्लेखस्तान् विचारान् उपहसति यत्र वेदकालीनजनताया असभ्यत्वं वन्यत्वं वाभिहितमस्ति । रामायण-

---

१—(क) रघुवंशे ७।७१ ।
(ख बी० एन० लूनियाः भारती सभ्यताय तथा संस्कृति का इतिहास परि० ६, पृ० २३० ।

२—ऋग्वेदः १।४।१०; १।११४।१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाभारत-भागवता[1]दावुत्तमोत्तमनिकेतनानां निरूपणं यद्विद्यते तदपि तत्कालस्य भवननिर्माणकलाविशारदतां प्रथयति। अमरकोशे[2] निर्दिष्टेभ्यो गृहवाचकेभ्यः पदेभ्यः प्रतीयते यदत्रत्या सभ्यता निश्चप्रचतयातिपुरातनी अन्यथा तत्र वा अन्यत्र तावन्ति बहुलानि गृहवाचकानि पदानि न कदापि संलब्धानि भवितुं शक्यानि। यस्य प्रयोजनस्य कृते यादृशस्य गृहस्यापेक्षावर्तत तत्प्रयोजननिर्वर्तनाय तादृशा एव गृहाः अकार्यन्त। अत एव तु छात्रिशाला-निषद्या-कोष्ठागार-चतुश्शाल-प्रासाद-सौध-हर्म्य-सदन-निकेतनमन्दिरादिका बहवो गृहवाचकाः शब्दाः प्राप्यन्ते। भारतं पुरा प्रासादपंक्तिभिः परमाभिराममासीत्—

"क्रियतामनर्गलविशाला प्रासादमाला"। (अविमारकम्, २ अं०)

शास्त्रेष्वेवंविधानां चाधिकारिणामपि निर्देशोऽवाप्यते ये विशिष्टागाराणां प्रबन्धे तद्व्यवस्थायां तन्निरीक्षणे च न्ययुज्यन्त। भाण्डागारिक-कौष्ठागारिकादिशब्दानां हि कुतोऽन्यथा दर्शनं सम्भवं भवेत्। अगारः कदाचिद 'वृहद्भवनम्' इत्येतस्मिन् अर्थे प्रयुक्तोऽभूत्। अगारैकदेशः प्रघणो वा प्राघाणोऽकथ्यत। द्वारप्रकोष्ठालिन्दप्रभृतिपदानि अस्मत् समक्षे तान् वृहदाकारान् गृहान्समुपस्थापयन्ति ये महाकपाटाजिरादिभिः सुशोभिता बभूवुः।

प्रत्नभारतीयशिल्पसंभारवर्णनपरैः पालीभाषाग्रन्थैः, अर्ली इण्डियन आर्किटैक्चरादिपुस्तकैश्च ज्ञायते यद् भारतीयानां भौतिकमपि जीवनं तथाविधमेव समुन्नततरमासीद् यथाविधं तेषामाध्यात्मिकं जीवनमलक्ष्यत। यजुषि (१५।५), शतपथब्राह्मणे (८।५।२।५), अर्थशास्त्रे (२।४), मनौ (१।३६) च निकायम् इत्येतत्पदमुपलभ्यते। यत्पदं मनीषिभिर्भिन्नभिन्नार्थे गृह्यते। तत्पदं सङ्घ-देवनिवासस्थान-भिक्षुकावासभूप्रभृत्यर्थेषु प्रथते। प्राच्येषु पुस्तकेषु ऐकशालिकं नाम वेश्म अपि समुल्लिखितमालोक्यते। इदमैकशालिकं नाम वेश्म उपवनमध्यतिष्ठत्। धनिनः प्रत्यूषे सायं च यदोद्यानेषु विहर्तुमगमंस्तदैकशालिकमुपायुज्यत। बौद्धकालवर्तिनि साहित्ये एवंविधस्य गृहस्योल्लेखः प्रायेणावालोक्यते।

१—श्रीमद्भागवतम् १।११।१५।

२—अमरकोशः पुरवर्गः श्लो० ४-५।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यज्ञ-पूजा-विश्राम-शयन-क्रीडा-भोजनातिथ्यादिप्रयोजनेनेह गेहेषु भिन्नभिन्न-कोष्ठकाणां दर्शनमवाप्यत। अत एव तु—

(क) "तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि"। (शाकु० ५ अं०)

(ख) "वेत्रवति, अग्निशरणमार्गमादेशय। (तत्रैव)

(ग) "शुद्धान्तमेनां प्रवेशयिष्यामि" (तत्रैव)

(घ) "समुदगेहके किल सेज्जात्थिण्णा" (स्वप्न वा. ५ अं०)

इत्यादिकानि वाक्यानि तात्कालिकेषु रूपकेषु सम्प्राप्यन्ते। वराकाः निःस्वाः पुरुषा मृन्मयेषु गेहेषु वासं चक्रिरे। छदिस्तेषां तृणमयी अक्रियत। धनिनां गेहनिर्माणे ग्रावणा मिष्टिकानां वा प्रयोगो व्यधीयत। गृह्यसूत्रेषु काष्ठगृहाणामपि वर्णनं दृग्गोचरं भवति। गृहाणां भित्तयः सुधासिताश्चित्रविचित्राः, कुट्टिमानि चानर्घ्यद्रव्यैः प्राणीयन्त। वात्स्यायनप्रतिपादितं सामाजिकं जीवनवृत्तं स्पष्टमेव इहत्यानां सद्मनां सुषमां सन्निदधाति। मौर्यकाले काष्ठगेहाश्च बहवोऽदृश्यन्त। पुरातत्वविद्भिरशोकस्य काष्ठदुर्गोत्खननं कारयित्वा तथ्यमिदं जनसामान्यस्य पुरस्तात् प्रस्तुतीकृतम्। उत्खातादेतस्मात् दुर्गात् प्राप्त उपस्करः सर्वोऽपि स्निग्धः सुदृढापघनो वर्तते। पाटलिपुत्रनगरं वर्णयता फाह्यानेन अशोकस्य प्रासादोऽपि वर्णितः। तदीयं सभाभवनं च तेन वर्णितम्। तस्यायामविस्तारं च वीक्ष्येदमवभासते, मन्ये, तानि भवनानि दैत्यैर्विनिर्मितानि। प्रायेण गृहा द्विवासा निरमीयन्त। आभ्यन्तरो वामभागो वामानां निमित्तेन बाह्यश्च प्रकोष्ठभागः पुंसां निमित्ताद् व्यरच्यत। वसन्तसेनायाः अष्टप्रकोष्ठं भवनं पर्यवलोक्य मैत्रेयो ब्रवीति—

"अष्टप्रकोष्ठं भवनं वीक्ष्य, यत् सत्यं जानामि, एकस्थमिव त्रिविष्टपं दृष्टम्"। (मृच्छ०, ४ अं०)

तदानीन्तनगेहानां स्तम्भावली मणि-महर्घधातुरम्या भित्तयश्च मनोभिरामचारुचित्रचित्रिताः अक्रियन्त पद्म[1]वननिर्गच्छत्करीन्द्रादीनां मूर्तयो मूर्तिकारास्तथा व्यधीयन्त यथा ताः सजीवाः इव प्रतिभासिता भवेयुः।

१—चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति॥
रघु० १६।१६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गृहस्य प्रघाणप्रदेशे निष्कुट-दीर्घिका-कूपादिकानामपि यथास्थानं निर्माणं कृतमभूत् । बाणादिकवीनां कृतं निकेतनवर्णनं वीक्ष्य तत्कालवर्तिनो भारतस्य शिल्पकला-भवननिर्माणकलाया आश्चर्यकरं विपुलवैभवं पाठकानां पुरतः समीचीनतया समुपस्थितं जायते । अस्मदभिमतरूपककृतगृहवर्णनादवलोकनेन तत्समयस्य भारतस्य गृहाणां भव्यं स्वरूपं स्थितं भवति—

(क) उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो,
धूमैर्जालविनिःसृतैर्वलभयः सुस्निग्धपारावताः ।
आचारः प्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः,
सन्ध्या-मङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः ।।

(विक्रमोर्वशीयम्, ३ अं०)

(ख) पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां,
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दूत्क्षेपात् पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रम्,
सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ।।

(मालविकाग्नि., २ अं.)

(ग) स्तम्भेषु प्रचलितवेदिसञ्चयान्तं शीर्णत्वात् कथमपि धार्यते वितानम् ।
एषा च स्फुटितसुधाद्रवानुलेपात् संक्लिन्ना सलिलभरेण चित्रभित्तिः ।।

[मृच्छकटिकम्. ५ अं.]

[घ] आर्य प्रथममेव देवस्य चन्द्रगुप्तस्य······कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमराजभवनद्वारम् । [मु. रा. अं.]

जनास्तदानीन्तनाः सदनानि लोकोत्तरसौन्दर्येण[1] प्रसाधयितुं नितान्तमेव प्रशस्तावदातामभिरुचिं दधानाः प्राप्यन्त ।

१—(क) तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं ।
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।। (मेघदूतम्)

(ख) वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा ।
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।। (तत्रैव)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नगरम्—

उज्जयिनी-माहिष्मती-कौशाम्बी राजगृह-तक्षशिला-हस्तिनापुरादीनां प्रख्यातानां नगर-नगरीणामनुपमया शोभयास्मदीयं भारतं प्राचीनतरमतितरां रमणीयं भवद् भूमण्डले विभातिस्म। पुरातनेषु ग्रन्थेषूपश्लिष्टं तद् विवरणं साद्यस्कस्य नो देशस्य वास्तुविद्याविशारदतां प्रकटीकरोति। पुरनिर्माणकलायां तु भारतीयानां निष्णातता श्रुति[1]समयादेव समग्रेणापि संसारेण सम्यगदर्शि। युधिष्ठिरस्य[2] इन्द्रप्रस्थं नाम नगरं कियद् बन्धुरं विशालमद्भुतं विचित्रं चासीदिति कस्य नु अविदितम्।

वास्तुविद्याविद्वांसः प्रथमं नगर-निर्माणार्थं[3] नियतां धरित्रीं संस्चक्रुस्ततो नगरसीमामानं[4] कृतमभूत्। नगरनिर्माणात् प्राक् परिखायाः प्राकारस्य तोरणद्वाराणाञ्च निर्माणमपेक्षितमजायत। अर्थशास्त्रे कथितं यद् दुर्गविधानप्रयोजनेन पुरप्रतिष्ठापनहेतुना च परिखाया निर्माणमादावपेक्ष्यते। महाभाष्ये[5] प्रासादप्रकारमधिकृत्य सङ्केतः कृतोऽवाप्यते। तत्रोक्तं पाटलिपुत्रप्राकारस्य विभिन्नावयवत्वं चेत् प्रतिपत्तव्यत्वेन मतं तदायोध्याया दर्शनं कार्य्यम्। तद्दर्शनेन तदीया महनीयतावगम्या भवितुमर्हति। प्रतिज्ञायौगन्धरायणाविमारकादौ "न खलु कौशाम्ब्यां किल नगरपरिचितोऽहम्", "तिमिरमिव वहन्ति मार्गनद्यः ···प्रतिभान्ति हर्म्यमालाः" इत्येतदादिवर्णनेनात्रत्यानां पुराणां प्रकाण्डता समृद्धता च बोध्यते। शुङ्गकाले अयोध्यापि राजधानीत्वं गमिताभूत्। तन्निर्माणं पाटलिपुत्रमादर्शीकृत्य समजायत। तस्मादेव हेतोर्महाभाष्ये तस्य साधुत्वं निर्दिष्टम्। महाभारतस्यापि आधुनिकं रूपं शुङ्गकालं यावद् विनिबद्धमजायत इत्येतदर्वाचां मत; तेन विदितं भवति यत् तत्र नगरादिकस्य यन्निरूपणमवाप्यते तल्लेखकेन तदानीन्तनानां नगराणां दर्शनेनैव विहितं कदाचित्।

१—ऋग्० २।४१।४। ; ७।८८।५।

२—महाभारतम् आदिपर्व, १९९, २९-३१।

३—पालिवत्थुविज्जा चरियजातकम्, १।२९७।

४—महा उम्मग छातकम् ६।४।४८।

५—·····पाटलिपुत्रं चाप्यवयवश आचष्ट ईदृशाः अस्य प्रकाराः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतज्ज्ञापयति यत् तस्मिन् कालेऽस्मद्भारतीयसमाजस्य सभ्यतात्युत्कर्षं गतासीदन्यथा कथं तथाविधानां नगराणां तत्र तत्र तत् तद् वर्णनं क्रियते ।

प्राचीनानां पुराणां प्राकाराश्चतुर्द्वारा अक्रियन्त । नगरद्वाराणि स्वस्वनामापि पृथक्-पृथग् भेजुः । यथा—'स्रौघ्नद्वारम्, विदर्भद्वारम्, कान्यकुब्जद्वारम् । नगरेषु आपणचतुष्पथोद्यानवापीसहस्रधार-नाट्यशाला-शिल्पसंस्था-मार्गदीपापानकप्रपातिथिगृहयज्ञशालाविद्यालयाधिकरणक्रीडागृहमल्लशालाचित्रशालागुल्मादिकानां विचित्रविचित्राणां नवनवानां संस्थानानां पदार्थानां नानाविधवस्तुजातानां चारुतरः सद्भावोऽवाप्यत । वाल्मीकिरामायणे[1] कृतस्य तत्तद्वर्णनस्य पुरपरकस्य मूले मन्ये, वर्णयिता स्वसमयवर्तिनो नगरस्याप्रत्यक्षभावेन वर्णनं विदधाति । कादम्बरी[2]कृतमुज्जयिनीवर्णनं निशम्य वस्तुतो बाणस्य समये वा तत्पूर्वापरकाले विद्यमानानां नगराणां श्रीः सम्यग् दृग्पथमधिरोहति । अत्रत्यानां पुराणां कमनीयता वैदेशिकान् यात्रिणो[3]भृशममोह्यत् तस्मात् तेऽपि नगराणि वर्णयन्तः प्राप्यन्ते । मृच्छकटिके प्रथमेऽङ्के

"राजमार्गोहि शून्योऽयं रक्षिणः सञ्चरन्ति च"

स्थितेत्येषा पदावलिर्नगरस्यावलोकनायैव तर्जनीमुत्थापयन्तीव प्रतीयते । एवमेव "अहिरामतणं प्रमदवणस्स" इत्यादिका विक्रमोर्वशीयपदपंक्तिश्च तामेव दिशाम्प्रति दृष्टिमावर्जयति । अथ च 'प्रकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यताम् ।

द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम्" ।।

(मु० रा०, २ अं०)

इत्येषा च पंक्तिर्नगरस्य प्राकारवत्वं द्वारालङ्कृतत्वं च ज्ञापयति । यदा हि गृह्य[1]सूत्रादिकालेऽपि सुन्दरतरनगराणां सद्भावोऽलभ्यत तदा शकसातवाहनगुप्तसम्राजां तस्य समयस्य तु कथैव का यस्य समयस्य सभ्यतायाः समृद्धतरत्वं समुन्नततरत्वञ्च वैदेशिकैरपि मुक्तकण्ठं स्वीक्रियते ।

१—नानावणिग् जनोपेता······उद्यानप्रवरैर्युता । बा० का०, ५।५ ।
सभोद्यानप्रभाभिश्च रुचिराभिरलङ्कृताम् ।।

२—अस्ति······ललामभूता··उज्जयिनी नाम नगरी । पृ० ९८-१०४ ।

३—सत्यकेतु वि० : भारतीय सं० और उसका इतिहास, अ० १६, पृ० ३०८ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राक्तन राजधानीनां सुन्दरतां ललिततां कलाकलिततां च पठित्वा पाठकस्य हृदयं 'प्रथमं पुरातनराजधान्याः लक्ष्मीचरणयोर्मौलिं नमयानि वा प्रथमं साम्प्रतिक्याः राजधानीलक्ष्मीचरणयोरित्येतत्संशयदोलाधिरूढं जायते ।

शुक्रनीतिर्वदति यत् पुरेषु सर्वविधाः पदार्थाः सुलभा बभूवुः । सा कौतुक-गृह-गोशाला-पशुपक्षिशाला-पान्थशालादिकानां ललितं वर्णन मुपस्थापयति । सा प्रतिपादयति यत् सस्यांशुकक्रीडनकादिवस्तुजातानां पृथक् पृथगापणा[२] अभ्राजन्त । अद्यत्वेऽधिगतायाः शुक्रनीत्याः समयः सुधीभिः स एव निर्धार्यते यो गुप्तशासनस्य समय आसीत् । तेन सिद्ध्यति तत्कृतनगरराजधान्यादिवर्णनं गुप्तकालवर्तिनां नगरराजधान्यादिकानां वर्णनं विद्यते । कौटिल्यस्य अर्थशास्त्रं यदानुशील्यते तदा ज्ञायते यत् तत्कालगामीनि नगराण्यवश्यमेव मनोज्ञानि समृद्धानि च भूत्वा अभासन्त । तानि सर्वाङ्गसमुल्लसितान्यासन् । भासस्य अविमारकं 'नगरापणालिन्दे' (३ अं०) इत्यादिवाक्यानि नगरस्थापणश्रियं विलोकयितुं पाठकान् प्रेरयन्ति । शुक्रनीतिसमये यथाऽऽपणाधिकारिणोऽदृश्यन्त तथैव कौटिल्यस्यापि समये ते व्यराजन्त । नगराणि तदा रक्षिभिः संरक्षितान्यासन् । अत एव तु—"रक्षिणौ—अले कुम्भीलआ कहेहि कहिं तुए… … शमाशादिए" (अभिज्ञान शा०, ६ अं०) इत्येवंविधानि वचांसि समवाप्तानि भवन्ति प्राचीनरूपकेषु ।

पुरातने काले राजमार्गान् पातुं करोऽपि गृहीतोऽभूत् । राजपथानां परिणाहस्य चोपरि ध्यानं दत्तमभूत् ।

ग्रामः—

भारतस्य ग्रामप्रधानत्वं सूचयति यद् भारतं प्रकृत्या प्रकृतिप्रियम् । यावतां जीवनस्य योगक्षेमो भवितुमर्हेत् तावदेव तत् प्रतिगृहीतुमभिलषते । सात्विकेषु, भोज्येषु, सरलेषु वसनेषु, पर्णप्रधानेषु आवासेषु सामान्येषु परिच्छदेषु च तस्य निसर्गतो वृत्ती रमते । भारते एतादृशीं दैवीं विशिष्टतां विलसन्तीं विलोक्यैव

१—सोशल एण्ड रिलीजस लाइफ इन दी गृह्यसूत्राज, पृ० ४५ ।
२—(क) शुक्रनीतिः, अ० १ ।
(ख) अर्थशास्त्रम्, वार्ता १, ३, ४ । अ० १६, अधि० २ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तल्लक्ष्यीकृत्येदमभिहितमभूत्—"दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम्"। यस्मिन् देशे एवंविधा सात्विकी भावनोद्वेल्लति स देशः कथं न ग्रामप्रधानो देशः स्यात्। 'ग्रामप्रियता' इत्येतत्पदं सरलहृदयतायां दम्भशून्यतायामपरिग्रहात्मिकायां विचारणायां च पर्यवस्यति। आध्यात्मिकता तत्रैव समुन्मीलति यत्र सत्यान्वेषणपरता जागर्ति। भारतीयसंस्कृतेराध्यात्मिकतायाः प्रभावोऽयं जातो यद् भारतस्य जनेभ्यो ग्रामवासोऽरोचत्। चिरन्तनात् कालात् भारतस्य ग्रामबहुलतायामिदमेव कारणं सञ्जातम्।

अस्मदभिमतेषु रूपकेषु ग्रामाणां रमणीया आभा यत्र तत्र सर्वत्र संशोभते।

"वहध वइल्ला ! वहध। कधं गामशअलेहिं लुद्धे मग्गे"।
(मृच्छ०, ६ अं०)

इत्यादिना मृच्छकटिकं ग्रामश्रियं दर्शकाणां वा पाठकानां पुरो निदधाति। एवमेव "उदआन्दमूले विमहिदेण कुम्भीलएण संधिच्छेदे........" इत्येतेन मालविकाग्निमित्रं (३ अं०) किञ्च "ततस्तस्मिन् ग्रामदाहेन;, इत्यादिना च स्वप्नवासवदत्तं ग्रामं वा ग्रामप्रदेशमुपस्थापयतः।

पुरा ग्रामास्तिसृषु[1] श्रेणीषु विभक्ता अवालोक्यन्त। कुम्भः,[2] पल्लिः, ग्राम इत्येता आसंस्तिस्रः श्रेण्यः। लघिष्ठो ग्रामः 'कुम्भ' इति, कुम्भाज् ज्यायान् 'पल्लि' रिति[3], पल्लेर्गरीयान् 'ग्राम' इत्यकथ्यत। ग्रामस्याभ्यन्तरिकं संगठनं पुरातने समये नितरां श्लाघनीयमासीत्। शुक्रनीत्याम्, अर्थशास्त्रे, पुराणादिषु च यद् ग्रामवर्णनमवाप्यते तेन तेषां स्वरूपं, संगठनं, सम्प्रतिष्ठापनं च साधु बोध्यते। ग्रामवासिनामैहिकामुष्मिकहिताय सर्वेऽप्युपाया अवालम्ब्यन्त। ग्रामाः कृषौ कुटीरोद्योगे च समुन्नताः स्युरित्येतदर्थं प्रयासः कृतोऽभूत्।

ग्रामेषु गेहास्त्रिकोष्ठाः, पञ्चकोष्ठाः सप्तकोष्ठाश्च अक्रियन्त। अनेकभूमिकानामपि गृहाणां निर्माणस्य प्रथासीत् परं तादृशानां गृहाणां दर्शनं बाहुल्येन

१—शुक्रनीतिः, अ० १, श्लोक० १३२।

२-३— ,, ,, ,, १६२।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरेष्वदृश्यत । प्रतिकोष्ठं समीरण-प्रकाशयोश्च कृते वातायनानि[१] व्यधीयन्त । गृहद्वारस्य गृहान्तरद्वारविद्धता नेष्टाभवत्[२] । वृक्षस्तम्भमार्गपीठकूपवेधिन्यपि द्वारस्थितिर्नाभ्यलष्यत । ग्रामे गृहाः पंक्तिवद्धा निरमाप्यन्त । तथा प्रयत्नः कृतो बभूव येन पंक्तिर्वक्रतां असुन्दरतां च न गाहेत । वीथी[३] दशहस्ता अक्रियत । तोयनिर्गत्यर्थं तामभितः कुल्या[४] व्यरच्यत । गृहद्वाराणि प्रमुख-पथोन्मुखान्येव प्रायेण प्राणीयन्त ।

गृहाणां निर्माणावसरे स्वच्छतायाः स्वस्थतायाश्च सिद्धान्ता आश्रीयन्त । स्वच्छतानाशिनो जना अदण्ड्यन्त[५] । निशायां रक्षायै यामिकानामपि[६] व्यवस्थासीत् । चौर-भ्रष्टाचारिषु कर्कशदृष्टिर्निहिताभवत् । ग्राम्यजनजीवनोपयोगिनोऽनोकहाश्च ग्रामेष्वारोप्यन्त । अत्र रुचिविशेषोऽगृह्यत । उदुम्बराश्वत्थवटपिचुमर्दचिञ्चाकदम्बजम्बीरजम्बूवकुलाशोककिल्वसहकारकपित्थकपुन्नागचम्पकादि-नामधेया वहवः शाखिनो ग्रामेषु प्राचुर्येण[७] समारोप्यन्त । अत एव तु मुद्राराक्षसादौ "पुरदौउदुम्बर एव कहिदो" इत्येवं विधः सङ्केतो लभ्यते ।

राज्यं यात्रिणां कृते स्थाने-स्थाने पान्थाश्रमान् संस्थापयामास । पान्थाश्रमान् पातुं निरीक्षितुं च योग्याधिकारी नियतोऽभवत् । असौ ग्राम्य इत्यकथ्यत । ग्रामपः पान्थगृहस्य रक्षास्वच्छतासम्बन्धिनीं व्यवस्थां कृतवान् । सः पान्थस्य पूर्णं विवरणं च पञ्ज्या[८]मलिखत् । ग्रामरक्षी पान्थानां रक्षणाय साहाय्याय च आदिष्ट आसीत् । आसीच्च स आज्ञप्तो हि पान्थं ग्रामोपशल्य-

---

१—अर्थशास्त्रम्, वार्ता १७, अ० ८, अधि० ३ ।

२—शुक्रनीतिः, १।२३२ ।

३—शुक्रनीतिः, १।२६४ ।

४—तत्रैव, १।२६४ ।

५—अर्थशास्त्रम्, वार्ता ३०, अ० ३६, अधि० २ -

६—शुक्रनीतिः, १।२६१ ।

७—तत्रैव, अ० ४ ३८० ।

८—तत्रैव, १।२७१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कपर्यन्त वोढुम्[१]। मार्गरक्षासमुचिततया यात्रिणोऽकुतोभया भूत्वा यात्रां कर्तुमशकन् ।

प्रतिग्राममधोलिखिताः कर्मचारिणो राज्येन न्ययुज्यन्त—

साहसाधिपतिः, ग्रामनेता, भागहारः, लेखकः, शुल्कग्राही, प्रतिहारः ।

सर चार्ल्स मेटकाफ महोदयस्य कथनानुसारं प्रत्ने भारते भारतीया ग्रामा लघुलघुगणराज्यमिवाभूवन् । तेषां शासनं ग्रामवृद्धा अन्ये च कर्मचारिणोऽकुर्वन् । मनुधर्मशास्त्रे सप्तमेऽध्याये ग्रामाधिकार्युल्लेखस्तत्कालवर्तिन्या ग्रामदशाया उपरि प्रकाशं क्षिपति । मृच्छकटिके बीरक-चन्दनकौ तत्समयस्य रक्षा प्रबन्धम्प्रति नूनमिङ्गितमिव विदधानौ प्रतीयेते । तदा कृषीवलानां गृहाः कुटीरमिति व्यपादिश्यन्त । ग्रामेषु अन्धवो, निपानानि, उद्गाहाः गोचरभुवश्च अवाप्यन्त । ग्रामाणां वहिर्भागे सान्द्रसुशिरश्रेणी, वनस्पतय ओषधयस्तालवनं शरवणं, कुशं, फलिनः शाखिनश्च अलभ्यन्त । अत एव तु—

(क) "अस्माद्धनात् कनकतालवनैकदेशात्,
निर्धावितः शरवणादिव कार्तिकेयः" ।। (प्रतिज्ञायौ०, २ अं०)

(ख) "तदो तं पि जाणि अ भहि दामो बलेण तव्ष वामपादं गहिअ उक्खिविअ पादि दाणि तालफलाणि" । (बाल चरितम्, ३ अं०)

इत्यादिकानि वाक्यानि प्राप्यन्ते ।

ग्रामेषु घोषाः, वहिर्भागे च ग्रामस्य पक्वणः पर्यवालोक्यत । क्षेत्रैः शाद्वलैश्च ग्रामस्य श्रीः सततमुल्ललास । घोषोचिता इन्द्रयज्ञनामान उत्सवाः स्वीयया शोभया सह प्रतिग्राममनिशमस्फुरन् । अत एव भासस्य बालचरिते 'षुवे अह्माणं घोषष्ष उइदोइन्द्रयज्वोणाम उष्ववो भविष्षदि' इत्येतत् पठामः ।

क्षेत्रमानादिकार्यप्रयोजनेन नियतीकृताः राजकर्मचारिणः क्षेत्रकराः इत्यभ्यधीयन्त । ते काण्डेन क्षेत्रभक्तिं निश्चिक्युः । केदाराख्यं क्षेत्रं तदुच्यतेस्म यत्र सलिलेन सेचनं सुलभ मासीत् । गोष्ठेषु पशवोऽरक्ष्यन्त । ग्रामेषु प्रायेण वहिर्भागे अवकरस्थलम्, ततोगोचरभूः, ततश्च क्षेत्राणि अदृश्यन्त ।

१—शुक्रनीतिः, १।२७४ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अरण्यस्य पशवः 'आरण्याः' इति, अरण्यवासिजनाः 'आरण्यकाः' इत्यभ्यभाष्यन्त । ग्राम्यपशवो यत्र अचरन् सः प्रदेशः 'आशितं गवीनम्' इति-न्यगद्यत । यत्र गवां प्रवेशो न सम्भव आसीत् स भागः अगोष्पदमरण्यमिति प्राकथ्यत । जीर्णोद्यानभागोऽपि ग्रामस्योल्लेखनीयो भागो मतोऽभूत् । मृच्छकटिके मुद्राराक्षसे च तद् वर्णनमाप्यते—

(क) 'पुम्फ करण्डवं जिण्णुज्जाणां गदो अज्ज चारुदत्तो"

(मृच्छ० ६ अं०)

(ख) "ताव अत्ताणं उब्बन्धिअ वावा दइद इमं जिणज्जाणं आऊदो"

(मु० रा०, ६ अं०)

क्वचिद् ग्रामेषु चैत्यं किञ्च मठाः अपि प्राप्यन्त । प्राचीनसाहित्ये तदुल्लेखो दृश्यते ।

नागराणां वर्त्तनम्

वात्स्यायनकृतकामसूत्राध्ययनेन[1] विदितं जायते यत् तदा नागराणां निकेतनेषु सर्वविधा सुखसमृद्धिर्वीक्षिताभूत् । समस्तान्यपि मनोऽभिरामाणि च वस्तूनि सन्ततं जनानाराधयितुमुपस्थितानि अदृश्यन्त । सुश्लक्ष्णाः शय्याः, मृदूनि आस्तरणानि, सुकोमलानि मांसलान्युपधानानि, शुक्लाः प्रच्छदपटाः, विविधाः सुवासिताः पदार्थाः पौरैः सदैव प्रायुज्यन्त । तेषां शयनागारे देवतानु-स्मरणाय कूर्चासनमशोभत । सन्निहितायां च वेदिकायामनुलेपनं, माल्यं, सिक्थकरण्डकं, सौगन्धिपुटिका, मातुलुङ्गत्वचस्ताम्बूलानि च सुसन्नद्धानि प्राप्यन्त ।

नागरकाः स्वसमयं कदापि वीणादिवादित्रेण, कदाप्यालेख्यस्यालेखनेन, कदापि संगीत-सुधापानेन, कदापि द्यूतादिक्रीडया, कदापि प्रहेलिकादिरचनाभिः, कदापि पुस्तकानामध्ययनेन, कदापि सलिलविहारेण, कदापि शुकसारिका-प्रलापनव्यापारेण, कदापि कुक्कवाकुलावकमेषान् योधयित्वा, कदापि गोष्ठी-

१—कामसूत्रे नागरवृत्तप्रकरणम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संयोजनेन, कदापि च काव्यशास्त्रविनोदेन स्वसमयं सानन्दमतिवाहयन्ति स्म। अस्माकं पुरतः स्थितानि रूपकाणि उपरिनिरूपितं नागरवृत्तं सपुष्णन्ति। तथाहि—

(क) "अर्धवाचितं पाशकपीठे तिष्ठति पुस्तकम्" (मृच्छ०, ४ अं०)

(ख) "ततो गत्वोद्यानं यथासुखमाक्रीड्य निवर्तमानायाम्" (अविमारकम्, १ अं०)

(ग) "भो वयस्क ! संगीतशालाभ्यन्तरेऽवधानं देहि। कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते" (शकु०, ५ अं०)

(घ) "शङ्के मे प्रतिकृतिं निर्दिशति" (मालविकाग्नि०, ४ अं०)

नागराणां वेश्मसु वादित्राणि, वर्तिकाः, समुद्गकः, द्यूतफलकं, दोला, शुक-सारी-मयूरादिशकुनयः, अन्यानि च नानाविनोदोपकरणान्यजस्रमंशोभन्त। सदनेषु तत्तत्कर्मनिष्पादनाय अनेके कोष्ठा अराजन्त। शयनासनविहरणाशनादि-कार्यकलापसम्पादनाय यानि स्थानानि नियतान्यासंस्तेषु मणिमाणिक्यखचितानि कुट्टिमानि विविधवन्धुरप्रतिमाचित्राञ्चितकुड्याः शुभ्रांशुकसमुल्लसितमहर्घकाच-वर्तिकाः शतदलसुसेव्यमानाश्छदयोऽगुरुधूमोद्गारिणो गवाक्षाः, अनेकरङ्गरा-जिरञ्जितानि च पक्षद्वारादिकानि प्रतिसीरोपस्कृता गृहान्तर्भागा मनोहारिण्यः गरिम्णाभ्यर्चिता भवन्तोऽनिशमशोभिषत।

नागरकाः प्रभाते उद्बुध्य शुचयो भूत्वा रदान् प्रक्षाल्य, सुरभिणा वारिणा-वगाह्य, गन्धसौरभधूपसृजश्च परिगृह्य सिक्थकालक्तकादिविविधाङ्गरागान् निषेव्य, मुकुरे वक्त्रं विलोक्य, आननवास[१]ताम्बूललवङ्गादिकञ्चासेव्य स्वकार्ये संलग्नाः समवाप्यन्त।

समाजे घटाबन्धनानां प्राचुर्यं तदा व्यालोक्यत। समापानकस्य प्रथा तदा-धिक्येन प्रचलितासीत्। यदहो यस्या देवताया नियतं तद्दिने तद्देवताया मन्दिरे नागरका नटाश्च समवेता भूत्वा युगपन्नृत्यगीतवादित्रादिभि दैवतं सिसेविरे। नटकुशीलवादिकाः पुरस्क्रियन्ते स्म च। वेश्याः नृत्येन गीतेन च सभाजयन्तिस्म च साद्यस्कं लोकम्। द्रश्यतां तावन् मृच्छकटिकम्—"इमा

१—हर्षचरितम्, द्वि० उ०, पृ० ९० ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अपराश्च कुसुमरसमत्ता इव मधुकर्यः अति मधुरं प्रगीता गणिकादारिका नर्त्यन्ते" । (४ अं०)

जनाः मधुमैरेया[1]सवानां पानेऽनुरागं निदधुः—

"वयस्य, एतत् खलु सीधुपानोद्वेजितस्य मत्स्यण्डिकोपनता" (मालविकाग्नि० ३ अं०)

निदाघे सरःसु अवगाहने शिरीषपाटलमालत्यादिसुमनसामुपभोगे तेषां प्रीतिर्भृशमरमत—

(क) "सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ।।
(शाकु०, १ अं०)

(ख) "अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि"
(,, ,,)

गोष्ठीसुखं च ते प्रायेणोपावुभुजुः—

"सङ्कीर्णदोषरहिता विषयेषु गोष्ठी" (चारुदत्तम्, ३ अं०)

शिक्षासमुच्चयावलोकनेन तदानीन्तनानां महीपालानां विलासिजीवनस्य परिचयः प्राप्यते । शिक्षासमुच्चयो महायानबौद्धसम्प्रदायस्य कृतित्वेन प्रथते। मणिरत्नादीनामुपयोगो बहुधा राज्ञी-नृपसामन्ताधिकारिभिरक्रियत । स्त्रियो विविधासु कलासु मनो रमयन्त्यो दृष्टा बभूवुः । नागरकाः निष्कुटे च सुहृद्भिः सह यदा तदानेहसं गमयामा[2]सुः ।

सम्प्रत्युपरिनिर्दिष्टजनाभिरुचयः पृथक्-पृथक् वैशद्येन प्रदर्श्यन्ते उद्यानेषुसरोवरेषु चानुरागः—

अस्माकं वर्णनीयः कालोऽतुलेन धनेन समृद्ध आसीत् । जनसमुदायः सत्यपरो धर्मभीरुश्चासीत् । जनाः सुखार्ताः आसन् । पुरेषु सर्वेषूपवनानि चित्रशालाः,

१—सत्यकेतु वि० भारतीय संस्कृति और उसका इतिहास, १३।२३५ ।

२—दी हिस्ट्री ए० क० आफ दी इं० पी०, खं० ३, परि०, पृ० ५७०-५७८ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नाट्यगृहाणि, सरांसि च विलेसुः। कपिलवस्तुनगरस्य वहिर्भागे उपवनानां पञ्चशती शुशुभे । वाल्मीकेः अयोध्या, व्यासस्य हस्तिनापुरं, कालिदासस्य च उज्जियनी तदा रमणीयैरारामैर्निषेव्यमाणासीत् । तात्कालिकानामुद्यानानां लोभनीयं लावण्यं तत्समयस्य पौराणिके साहित्ये सम्यग्[1]दृष्टं भवति । तत्समयवर्तिषु रूपकेष्वतएवोद्यानादिलक्ष्मीः प्रेक्षिता भवति । तथाहि—"कथं सेन्द्रगोपं नवशाद्वलमिदम् । तत्कुतोऽस्मिन् विपिने प्रियाप्रवृत्तिमागमेयम्" । "अयमासारोच्छलितशैलतटस्थलीपाषाणमधिरूढः" । "आलोकयति पयोदान् प्रबलपुरोवातनर्तितशिखण्डः" । (विक्रमोर्वशीयम्, ४ अं०)

उद्यानयात्रासूद्यानानां श्रीरद्भुतैवादृश्यत । नियतेऽहनि पूर्वाह्णे नागराः सुसज्जिता भूत्वा तुरङ्गमस्यन्दनादिद्वारेण यदोद्यानं जग्मिवांसस्तदा तैः सह शिविकासु शकटिकासु वा आसीना भूत्वा गणिकाः अपि अगमन् । तत्र दोला, कन्दुकक्रीडा, जलकेलिरन्याश्चानेकविधा खेलाः आयोजिताः अक्रियन्त । "दोलाधिरोहणमनुभवितुमू" इत्यादि पङ्क्तयो रूपकमालविकाग्निमित्रस्थाः (३ अं०) उद्यानविहरणप्रियतामेव तत्कालस्य पिशुनयन्ति ।

भवनदीर्घिकां समया क्रीडापर्वतको[2]ऽद्योतत । स्वप्नवासवदत्ते (४ अं०) एताः पङ्क्तयो विलोक्यन्ते चात्र—

"उदाहो अरुणकुसुमसञ्चिदं..........पव्वद तिलअं णाम सिलापट्टअं गदा भवे, ... दारुपव्वदअ गदा भवे" ।

क्रीडापर्वतकं परित उद्दीपनकारीणि चित्राण्यालिख्यन्त । निशान्तसुन्दर्य इव तानि चेतो व्यनोदयन् । गेहेषु निगूढमार्गेण निर्वाधाम्भोगमनागमनव्यवस्था च विहिताभूत् । तेनोष्मकेऽपि शैत्यं तत्र न्यषीदत् । कालीदासो रघुवंशे जलकेलिसन्दर्भे गूढमोहनगृहान् वर्णयन् प्राप्यते[3] ।

दीर्घिकाणां साहाय्येन जलयन्त्राणि सहस्रधाराख्यानि व्यापारवन्त्यभूवन् । मृच्छकटिके धारागेहानां सङ्केतो वर्षावर्णनप्रसङ्गे कृतः । तथाहि "निश्चेष्टं स्व-

---

१—ब्रह्मपुराणम्; स्कन्दपुराणेऽवन्तिखण्डे च ।

२—मेघदूतम्, उ० श्लो० १७ ।

३—रघुवंशम्, ६ । १६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पितीव सम्प्रति पयोधारागृहान्तर्गतम्" (५ अं०) धारायन्त्रैरारामाणामाभातितरां व्यवर्धत। धारायन्त्रनिर्गततोयेन प्रमदवनान्यजस्रमासिच्यन्त। दृश्यताम्

(क) "बन्धणं दाणि पमदवणं सम्भाविअ......"

(प्रतिज्ञायौग०, ३ अं०)

(ख) "इत्थं अणो पमदवणस्स पालणकम्म समप्पिदं"

(शाकु० ६ अं०)

उपवनेषु राजमानेभ्योऽम्भोधारायन्त्रेभ्योऽवरोधसुन्दर्यः कुसुमाकरमहं सभाजयितुं तन्नीरमाकृष्य अबीर सिंदूरपलाशादिना वसुमतीं नानावर्णैर्वर्णितां विधाय[१] स्वः इव विदधुः।

खैस्ताब्दपूर्ववर्तिद्वितीयशतकगामिनि साञ्चीतोरणे उत्कीर्णासु प्रतिकृतिषु कनककदलीपरिवेष्टिता आगारवाप्यः सच्छायवन्यानोकहनिषेव्यमाणक्रीडागिरयश्च लक्षिता भवन्ति। ता दीर्घिकाः क्रीडाशिखरिण्यश्च प्रेयसीनां लोलाः प्रेमलीलाः विभावयन्त्योऽधुनापि दर्शकाणां चेतांसि चोरयन्त्य इव प्रतिभान्ति। एतावदेव न, वलभीषु स्तम्भेषु च हस्तप्राप्यस्तवकनमितमन्दारमहीरुहोऽपि तत्र दीव्यन् दृश्यते। पञ्जरस्थां सारिकां गृह्णन्ती यक्षाङ्गनापि समुत्कीर्णावाप्यते। तत्तोरणं वीक्ष्य तत्सर्वमपि सत्यमेव सिद्ध्यति यस्योल्लेखस्तत्तत्काव्यनाटकादिषु विद्यते। तद् दृष्ट्वा तत्कालगामिनीनां वास्तुशिल्प-चित्र-मूर्तिकलानां प्रकर्षगतता दृग्गोचरीभवति।

अजन्ताभिधायां कन्दरायां कुमारगौतमस्य स्नानकालिकमेकं मनोहरं दृश्यं चित्रितमस्ति। तच्चित्रं पुरातनानेहसो नागराणां स्नानविधिं प्रदर्शयति। तत्रत्यचित्रावलोकनेन विदितं भवति यत्स्नानान्तरमनेकानि प्रसाधनान्युपायुञ्जत तत्कालीना नरनार्यः। तदा शरीरोद्वर्तनमन्तरेण समपद्यत न च प्रत्यहम्। स्नानीयचूर्णानां फेनिलानां सुरभिपदार्थानामङ्गरागानां चोपयोगः सस्नेहं कृतोऽजायत। स्नानागारेषु सुन्दरस्नानपीठिकाः अशोभन्त। तत्र महर्घधातुमत्सु कलशेषु सुरभिसलिलमनारतं सन्नद्धमवाप्यत। भृत्यानां कार्यमासीत् यत्ते सुगन्धामलकचूर्णकल्केन शनैः शनैः स्वामिनः केशान् प्रमार्जयेयुः। सुवासिततैलेन

१—रत्नावली १ अं०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

च तत्संहननं संवाहयेयुः। जलद्रोण्यः सततं स्नानालये सिष्णांसून् प्रतीक्षमाणाः समतिष्ठन्त । जलयन्त्रधाराः सततं स्नातुकामान् सेवितुमुत्कण्ठिता अवालोक्यन्त । स्नानावसाने पुमांसः सर्प-निर्मोकनिभसितसूक्ष्मांशुकं वसते स्म[१]। "सोहइ अज्ज आए पावारओ" (मृ०, २ अं.), "अनतिलम्बिदुकूलनिवासिनी बहुभिराभरणैः प्रतिभाति मे" (मालविकाग्नि०, अं० ५) इत्यादिना तत्काल-वर्तिनां जनानां वसनप्रियतां प्रति सुमधुरं सङ्केतो लभ्यते । तदानीं श्वेतांशुक-परिधाने नृणामभिरुचिर्विशेषतोऽजागः। उत्तरीयान्तरीययोस्तदाप्रयोगोऽकारि नरैः। प्रावारकस्योपयोगो बाहुल्येनाक्रियत । वासः सीवनं च स्तोकमलक्ष्यत । योषितो हि आवृतशिरस्का आप्रपदीनवसनवेष्टिता अदृश्यन्त ।

उपवासनम्, अधिवासः, प्रतिधिः, द्रापिका, अल्कम्, उष्णीषम्, कञ्चुकम्, चोलकम्, चण्डातकम्, इत्येतदादीनि बहूनि वसनानि जना उपयुयुजुः। कौशेय-कार्पासकविधानि नानाविधानि दुकूलानि तदोपयोगे आहृतान्यभवन् ।

"कौशेयपत्रोर्णयुगलमुपनय" (मालविकाग्नि. ५ अं.) इत्यत्र कौशेयचर्चा कृतास्ति । कात्यायनानुसारमुपसंव्यानम्, अन्तरीयं शाठकमित्यभ्यधीयत । व्याख्याकृद्भिरुपसंव्यानस्यार्थः परिधानीयं प्रावरणीयं च इत्येष विहितः। मृच्छकटिके प्रोक्तम्—"प्रियवयस्केन चूर्णवृद्धेन जाती-कुसुमवासितः प्रावार-कोऽनुप्रेषित;" (१ अं.)। कटिप्रदेशे च वसननिबन्धनप्रथासीत् । गोमूत्रिका शाठिकाया एव भेदोऽवर्तत । वृहतिका[१] नाम वासः सामान्यतः प्रायुज्यत । कात्यायनेन नैजग्रन्थे वर्णकानामपि निर्देशः कृतोऽस्ति । अर्थशास्त्रे वर्णकं कम्ब-लत्वेन निर्दिष्टः। जनाः प्रायेण कुसुमसौरभवासितवासांस्यवसत् । तत्र च शैल्पी कलात्मकसुन्दरतापि चकास्ति स्म ।

आभरणानि

आभरणेष्व[२]भिरुचिस्तु प्राचामियती प्रगाढासीद् यत्ते स्वयमेव न तान्युप-युयुजुः परं ते स्वकीयान् गो-गज-तुरगादिपशूनपि विविधैर्विभूषणैर्विभूषयामासुः।

१—कामसूत्रम्, पृ० ४७ ।

१—मज्झिम सुत्त ८८, वाहितिकसुत्तम् ।

२—(क) प्रासादसोपानतलप्रणादैः काञ्चीरवैर्नूपुरनिस्वनैश्च । बुद्धचरितम्, ३।१५

(ख) वातायनेभ्यस्तु विनिःसृतानि परस्पराभासितकुण्डलानि । ,, ३।१६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्खननादवाप्तवस्तून्यप्यत्र साक्षीणि। पुरा विविधधातुमयानि भूषणानि प्राचव्यन्त। मृन्मयानि गजदन्तनिर्मितानि च त्रिकोणकानि भूषणान्यपि बहुधोपयोगे नीतान्यभूवन्। तात्कालिका जना मौलौ शिरोबन्धं, श्रोत्रयोः कुण्डलं, वक्षसि हारं, करयोः कङ्कणं बलयं वा, अङ्गुलीषु अङ्गुलीयकं, कटौ काञ्चीं, चरणयोः नूपुराणि च धारयाञ्चक्रुः। रूपकेषु भूषणानां निर्देशो बहुधा प्राप्यते। तथाहि–

(क) "आर्य, अलङ्कारत्रयं श्रीमता यदनुप्रेषितं......कुतोऽयमलङ्कारः। (मु. रा., ५ अं.);

(ख) "कूजितं राजहंसेन नेदं नूपुरशिञ्जितम्" (विक्रमोर्वशीयम्, ४ अं०);

(ग) "वाष्पासारा हेमकाञ्चीगुणेन श्रोणी बिम्वादप्युपेक्षाच्युतेन" (मालकाग्नि. ३ अं.)।

भारतीयजनतायां भूषणानां व्यवहारस्तस्मिन्नपि पुरातनतये काले विलोकितो बभूव यदा वैदिकः कालो विबभौ। ऋग्वेदादिषु[1] तत्तद्भूषणोल्लेखाप्तेस्तथ्यमिदं साधुतयैव प्रमाणितं जायते। कौटिल्यस्य कालः शीर्षकोपशीर्षकप्रकाण्डक अवघाटक-तरल-प्रतिबन्धाख्यानामाभरणानां वर्णनं कुर्वाणो दृश्यते। तदानीमिन्द्रच्छन्दोविजयच्छन्दोऽर्धहाररश्मिकलापगुच्छकनक्षत्रमालार्धमाणवकसंज्ञिका मुक्तामालाश्च बहुलाः प्रायुज्यन्त। गुप्तशासनानेहसि बहुविधानि श्रवणाभरणानिचोपायुज्यन्त। निष्कमुक्तावलीताराहार-हार-हारशेखर-हारयष्टिनामधेयानि विभूषणानीशवीयेषुचतुर्थपञ्चमषष्ठशतकेषु नितरां प्रचलितान्यदृश्यन्त। स्त्रियः पुरुषाश्च प्रायेण व्यपगतभेदान् एव हारान् अविभरुः। महाभारते यथाविधानां रशनानां निर्देशोऽवाप्यते तथाविधा एव रशना बौद्धकालगाभिर्महिलाभिरुपायोजिषत। गुप्तशासनसमये चानेकविधाः काञ्च्यः समसेव्यन्त। ताः हेममेखलाकाञ्ची-कनककिङ्किणीरशनादिव्यपदेशै र्व्यपादिश्यन्त। केयूरादीनां बाहुभूषणानामपि तदोपयोगोऽत्यन्तमवर्त्तत।

मौर्यशुङ्गादिकालव्यापिन्यां भारतीयायां कलायां ग्रैवेयकाङ्गुलीयककर्णिकाललाटिकाद्यलङ्काराणां भूयस्कता दरीदृश्यते। तत्कालवर्तिन्यो यक्षादिदेव-

---

१—ऋक्, १।१३२।२; अथर्व० ५।२०।१०, तैत्ति० सं० ५।४।४।४; शतपथ ५।४।३।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रतिमा: उपर्यभिहितभूषणभूषिता विलोक्यन्ते। परखम (मथुरा) स्थानाल्लब्धा यक्षमूर्तिर्ग्रैवेयकं, दीदारगञ्जत: सम्प्राप्ता मूर्तिर्ललाटिकां दधाना च दृश्यते।

पुरा पुष्पकिसलयान्यपि परमप्रीतिपूर्वकं भूषणत्वेन नरनारीभिर्भृशं प्रायुज्यन्त[1]। काव्येषु तेषां वर्णनं पुष्कलतया प्राप्तं भवति। कालिदास: शाकुन्तले ब्रवीति—

"अवतंसयन्ति दयमाना: प्रमदा: शिरीषकुसुमानि" १ अं., ४)

स एव मालविकाग्निमित्रे (३ अं.) वदति "आदाय कर्णकिसलयमस्मात् ..."।

अत्र चिरन्तनात्कालादुपानहामपि प्रयोग: कृतोऽभूत्। "बुल्लपावारअपाउदा उवाणह जुअलणिक्खित्त-तेल्ल चिक्करोहिं पादेहिं" (मृच्छ. ४ अं.) इत्यत्रशूद्रक: उपानह मुल्लिखन् प्राप्यते। पुरा काष्ठपादुकानामपि प्रचार आसीत्। गुप्तकालेतिहासलेखकानां कथनमस्ति यज्जना नोपानह् रहितांघ्रयो वहिरगमन्। मथुरास्थित-पुरातनतरकालिकमूर्तिसंग्रहशालावलोकनेन स्पष्टमेव सिद्ध्यतीदं यत् तदोपनहादिमारभ्य सर्वविधभूषणवसनानि जना उपयुञ्जते स्म। अत एव तु तदानीन्तना मूर्तिकारा मूर्तीस्तत्तत्प्रसाधनै: प्रसाधिताश्चक्रु:।

दर्पणो हि प्रसाधनकर्मणि एकान्ततोऽतिप्रधानं मङ्गलं वस्तु मत:। सिन्धुसभ्यतात्र साक्षिणी यत् तदापि आरकूट-ताम्र-कंसखचिता मुकुरा: प्राणीयन्त। अस्मद्देशेविविधाकारभाज आदर्शा अदृश्यन्त। उन्नतोदराण्डाकार-समतल-मुष्टिकाकृतिका दर्पणा: कलाकारैर्निरमीयन्त। अजन्ताचित्राणि सन्ति दर्पणशालीनि। पूजावसरे च दर्पणोपयोग इहाभवत्। काव्येषु[2] दर्पणवर्णनमाप्यत एव सर्वत्र।

१—हस्ते लीलकमलमलके बालकुन्दानुविद्धम्,
नीता लोध्रप्रसवरजसा पाण्डुता मानने श्री:।
चूडापाशे नवकुरवकं चारुकर्णे शिरीषं,
सीमन्ते च त्वदुपगमजं यत्र नीपं बधूनाम्॥ (मेघदूतम्, उ०)

२—"दर्पणेषु परिभोगदर्शिनी ......", (रघौ, १९।२८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

षोडशविधेषु श्रृङ्गारेषु अञ्ज[1]नस्याप्यन्तर्भावो विधीयते। केशरचनाया मिह जनानामतिशयानुरागोऽवालोक्यत। विविधरीत्या चिकुराणां श्रृङ्गारोऽत्र-त्यासु प्राप्तासु प्रतिमासु, उपनतेषु चित्रेषु, काव्येषु च लोचनगोचरीभवति। 'बहुविधकुसुमैर्विरचितशेखर' इत्येतदादिपदावलिर्विक्रमोर्वश्यादिषु (४ अं०) दृश्यते। स्नानानन्तरं केशा धूप-धूमेन सुवासिता[2] अक्रियन्त। एतत्कृते कालागुरु-लोध्र-चूर्णयोः प्रयोगः कृतोऽभवत्। भूत्खननात् प्राप्तेभ्यो वस्तुभ्यो विदितं भवति यत् पुरातनसमये धम्मिलबन्धने कला दर्शिताभूत्। प्रत्नाः केशान् नानाविधतया प्रसाधयाञ्चक्रुः सामान्यतो वेणीबन्धप्रथाप्रचलितासीत्। पुरुषास्तदानीन्तना दीर्घालका अवालोकिषत। ते चूडाभृतश्च अदृश्यन्त। शिखासंयमनाय ते सूत्राणि प्रायुञ्जत। युवतयश्चपेटिकाः केशेषु प्रयुयुजुः।

तदेवमस्मदभिप्रेतनाटककालः केशप्रियः कालोऽवर्तत। विक्रमोर्वशीयादौ "मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्षणीयः" (४।६३) इत्या-दीनि वाक्यानि तात्कालिकजनवृन्दस्य कुसुमानुरागितां केशप्रसाधनप्रणयितां च स्पष्टमेवोद्भावयन्ति। इत्थमस्माकं पुरतस्तस्य कालस्य जनानां साभिरुचिरुप तिष्ठते यास्त्यलङ्कारनिष्ठा।

अनुलेपनं तिलकश्च

स्नानात् प्राक् पश्चाच्च वपुः स्नेहितुं मार्जितुञ्च किञ्च सुवासयितुं मनोज्ञ-गन्ध-लेप-तैल-चूर्णाङ्गरागादीनां प्रयोगः कृतोऽभूत्। भुव उत्खननेन साम्प्रतं तानि द्रव्याणि संलब्धानि सन्ति यानि पुरातनसमये शरीर-वासनाय तन्मार्दवाय चोपायुज्यन्त। उद्वाहावसरे तु विशेषतो वरस्य गात्रं विविधैः सौरभमयैरङ्गरागैः सुवासितं कृतमभवत्। अङ्गरागोपयोगप्रथेह चिरात् प्रसृता दृश्यते। वाल्मीकिरामायणे वर्णितं यद् भरद्वाजो मुनिर्नानाविधानि चूर्णानि अङ्गरागांश्च संयोज्य भरतस्य तदनुगतसकलसमाजस्य च कृते स्नानव्यवस्थां चकार। गुप्तकालेऽङ्गरागेषु जनानां रुचिर्भृशमाप्यते। तदाङ्गरागस्यनिर्माणाय चन्दनकस्तूरिकाकेसरागुरुप्रभृतिविविधपदार्थाः प्रायुज्यन्त। स्त्रियः पुरुषाश्च

२—"अञ्जनस्नेहशून्यम्", (मेघ० उ०);

३—"जालोद्गीर्णैः.........केशसंस्कारधूपैः, (मेघ० पू०); धूपायतीवाम्बरम्" (मृच्छकटिकम्, ५।२७)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वं एव तदा तिलकशोभितमस्तकाः अदृश्यन्त। पत्ररचनाचाङ्गेषु स्त्रीभिर्व्यधीयत। रेखा-विशेषकादिभेदेन पत्ररचनाबहुविधा अवालोक्यत। तिलकनिमित्तेन चन्दनस्य कुङ्कुमस्य च व्यवहारो बभूव। ओष्ठयोरुपरि बिम्बाफलस्याभां सञ्चारयितुं तदनुगुणान्युपकरणानि व्यवाह्रियन्त। अलक्तके तु दाराणां मनः प्रीतिर्विशेषेण समलभ्यत। लोध्रचूर्णकर्पूरोशीरकेसरादिकानि बहूनिवस्तूनि प्रतिगृहं दृष्टान्यभूवन्। मालविकाग्निमित्रादिरूकेषु विलोक्यमानाः पङ्क्तय इमाः इह प्रमाणम्—"आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयितुम्" (३।१३) इति "निष्ठयूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्" (शाकु. ४।४) इति। शरीर-संस्काराय उत्तमोत्तमानि सुगन्धशालीनिद्रव्याणि प्रायेण सर्वे विशेषतोधनिकाः समुपयुयुजुः[1]।

भोजनम्

सामान्यतो[2] भोजनं द्विर्गृहीतमभूत्। पूर्वाह्णेऽपराह्णे च। भोजने भोज्यलेह्य-चोष्य-पेयादिभोज्यपदार्था अगृहयन्त। भोजने मधुरपदार्थस्य समावेशोऽनिवार्यत्वेन कृतोऽभवत्। ओदनं प्रियभोज्यं मतमभूत्। तथाहि—

(क) "तं जधा,…गुड़ोदणं, घिअं, दहीं, तडुलाइं, अज्जेण अत्तब्वं रसाअणं सव्वं अत्थि"।

(ख) "चारुदत्तस्स रिद्धीए अहोरत्तं पअतणसिद्धेहिं उग्गासुरहिगन्धेहिं मोदकेहिज्जेव असिदो अब्भन्तरचदुस्सालदुआएउवविट्ठोमल्लक सदपरिवुदो चित्तअरो विअ……चिट्ठामि" (मृच्छकटिकम्, १ अ०)

अस्मिन् युगे शूद्रनिर्मितभोजनं हि अवैधम्-अग्राह्यं-घोपितमभूत्। यद्यपि जैन बौद्धधर्मयोरपि प्रचारस्तदासीत् परं पौराणिको धर्मः पुनः बलीयान् भूत्वोदतिष्ठत्

१—विमानपृष्ठेशयनासनोचितं महार्हवस्त्रागुरुचन्दनार्चितम्।
कथं नु शीतोष्णजलागमेषु तत् शरीरमोजस्वि वने भविष्यति ॥ (बुद्धच०, ८।५६।

२—वात्स्यायनः कामसूत्रम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अतः वैदिकी हिंसा हिंसा न इत्येषा भावना भूयो भारते हिंसामुददीपयत्। यज्ञेषु पशु-बलि[1]प्रथायाः प्रसृतत्वाद् भोजने मांसमपि खाद्यत्वेन परिगृहीत[2]मभवत्। धर्मशास्त्रिभिः श्राद्धादौ मांसभक्षण मपि प्रतिपादितमजायत[3]। तात्कालिकेषु रूपकेषु पिशितस्योल्लेखो दृश्यते—

"मंशेण तिक्खा मिलकेण भत्तं शाकेण शूपेण शमच्छकेण"॥

(मृच्छ०, १०।२९)

"शब्बकाल मए पुट्ठे मंशेण अ घिएण अ" (मृच्छ०, ८।२८)

"शूल्यमांसभूयिष्ठ आहारो भुज्यते"॥ (शाकु०, २ अं०)

"…मृगाः प्रतिवसन्ति, तैर्महर्षयः श्राद्धान्यभिवर्धयन्ति"॥

(प्रतिमा, ५ अं०)

पुराणेषु मांसमधिकृत्य बहवः श्लोकाः प्राप्यन्ते। ब्रह्मपुराणे मांसेन पितरस्तुष्यन्तीति प्रोक्तम्। गोदुग्धयवयोर्विशेषतो देशे उपयोग आसीत्। शालिमधुमिश्रणेनार्धं प्रकल्पितमभूत्। उत्सवावसरेषु मोदकापूपादिका अनेके पदार्थाः अपच्यन्त। हुएनसांगस्य लेखो वेदयति यद् भोज्यपदार्थेषु पयो हैयङ्गवीनदध्यादिकं गृहीतमभवत्। एवमेवइत्सिंगश्च लिखति यद् भोजने घृत-शर्करा-मिष्ठान्न-फलादिद्रव्याणामुपादानं भवति। भोजनान्ते शुष्कमोदनं, लुम्बिका-यवागूः, तक्रलेहो मुखस्वादाय प्रादीयन्त। लसुन-पलाण्ड्वोर्ग्रहणं प्रायेण प्रतिषिद्धमासीत्। शुचितातितरामपेक्षिताऽजायत। सामान्यजनानां रुचिः सक्तुषु च दृष्टाभवत्। मुखशोधनाय ताम्बूल-क्रमुकैलालवङ्गादिपाचकद्रव्य-परिग्रहश्चाभूत्। लङ्कावतार[4]सूत्राध्ययनात् तदानीन्तनानामनेकेषां भोज्यानां सञ्चलनं ज्ञातं जायते। मादक[5]द्रव्येषु च जना रुचिं बबन्धुः। द्राक्षासवं ब्राह्मणा बौद्धसाधवश्च अग्रहिषुः तदेवं तदा भोजनं बहुविधभोज्यपदार्थयुतमदृश्यत।

१—(क) मनुः, ५।३९।; ५।१९९; ५।३५।

२—ब्रह्मपुराणम्, २२० अ०, श्लो० २४-२७।

३—"पसुबन्धोवणीदस्स विअ छाअलस्स" (मृच्छ०, १ अं०)

४—लङ्कावतार सू०, पृ० २५०।

५—ललितविक्रम बन्धविचक्षणं सुरभिगन्ध पराजित केसरम्।
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितम्॥ (रघौ, ९।३६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्थापत्यकला

पुरा राजानो धनपतयश्च कलानामुन्नयने च स्वकीयं श्लाघनीयं योगं प्रददुः। कलानां तदा परमविकासितत्वात् भारतं महीतलस्पर्शनमात्रभिन्ननाकलोकइव प्रत्यलक्ष्यत। सर्वासा मपि कलानां वसतिस्थली नाट्यं वर्तते। तात्कालिकाः क्षोणीशा अर्थवन्तश्चातः स्वीयेऽवरोधे नाट्यशालामपि प्रातिष्ठिपन्। अत्र प्राचीनतरसाहित्यिकसामग्री ज्वलत्प्रमाणम्। मालविकाग्निमित्रादौ तद्विषयक उल्लेख उपलभ्यते- "अचिरप्रवृत्तोद्देशं छलिकं नाम नाट्यमन्तरेण......तावत् सङ्गीतशालां गच्छामि"। (अं० १)। एतस्मिन् निर्दिष्टे रूपकेऽथ च प्रियदर्शिकायां यस्या अभिनयप्रतिद्वन्द्वितायाश्चर्चा प्रवर्तमानास्ति सान्तःपुरस्थितरङ्गमञ्चोपर्येवाघटत। एतदत उन्मुक्तहृदयेन वक्तुं शक्यते यद् गीत-नृत्य-वादित्र-चित्र-कवितादि-सम्बन्धिन्यो ललिताः कलाः अन्तःपुरेषु परां पुष्टिमगुः। वात्स्यायनस्य कामसूत्रं तत्समयस्यैव ग्रन्थरत्नं वर्तते; तदध्ययनेन तत्समयवर्तिनामवरोधानां चारुता समीचीनतया चेतोऽजिरेऽवतीर्णा भवति। सुखसमृद्धिभाजां सदनानि प्रायेण सरितः कूले[1] तदाऽऽलोक्यन्त। सामान्यतो महार्हा दर्शनीयाश्च प्रासादाः पुरेषु प्रधानपथस्योपरि उभयोरपि पार्श्वयोर्वभ्राजिरे। भवनानां श्रेणीबद्धता, चन्द्रशालानामभिरामभावः, पक्षद्वारेषु वातायनेषु च शोभमानाः प्रतिसीराश्चेतांसि चोरयन्त्यश्चकासतिस्म। गेहानामलिन्दभुवो गोमयेन पुनीता भूत्वा विभान्तिस्म। तत्र च कुङ्कुमेन, सुरभिणा सुमनोभरेण, अक्षतैश्च चतुष्ककाः प्रतिप्रभातं स्मित-कौमुदीं विकरन्त्योऽलक्ष्यन्त। तोरणेषु नागदन्तोपरि मालतीमाला मनोरमया भङ्ग्यलम्बिरे। उपरिष्टाच्च तोरणस्थण्डिलस्य कलाकलितानि निशान्तानि अशोभिषत। तत्र च मौक्तिकस्रजो विचित्रा मेव चारुतामुपचिक्युः। तोरणस्योभयोरपि भागयोः करेणुकाकान्तप्रतिकृतयः स्वीयया श्रिया सर्वेषामपि मानसान्यप्रीणयन्। मृच्छकटिके चतुर्थेऽङ्के वसन्तसेनायाः प्रासाद[2] वर्णनमधीत्य तत्समयस्याद्भुतायाः स्थापत्य कलायाः लक्ष्मीः समुपस्थिता भवन्ती ज्ञापयति यत् तदा तादृशानि बहूनि

१—"कादम्बरी सक्खिअं····इक्छीअदि···सोंडिआपणं एव गच्छामो"।
(शाकु०, ६ अं०)

२—कामसूत्रम्, पृ० ४१।

,,—"यत्सत्यं जानामि, एकस्थमिव त्रिविष्टपं दृष्टम्। प्रशंसितुं मे नास्ति वाचाविभवः"॥ (मृच्छ०, ४ अं०, चौ० सं० सी०, पृ० ३४७)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भवनानि इमामिलां विभूषयामासुः। तदानीं प्रासादद्वारस्योर्जस्वितायां परिणद्धतायाञ्च मानवीयं मनो नितरामरंस्त। तस्मात् ते जना; प्रमुखं द्वारं विशालीकर्तुं भूपयितुं च सर्वथाऽयतन्त। खैस्ताब्दतः पूर्ववर्तिनः शतकस्य द्वितीयस्याभ्यर्णे निर्मितं तोरणं[1] साञ्च्यां साम्प्रतमुपलब्धम्। तत्रेभस्य पुरस्तात् सुमृदुलभङ्गिभाविताया वनितायाः पेशला प्रतिमा महीरुहशाखां संश्रित्य शोभमाना प्रेक्ष्यते। ईदृश्यः प्रतिमास्तोरणशालभञ्जिकाः इत्यभ्यधीयन्त। अश्वघोषः स्वकीये बुद्धचरिते वदति—

"अवलम्ब्य गवाक्षपार्श्वमन्या शयिता चापविमुग्धगात्रयष्टिः।
विरराज विलम्बि चारुहारा रचिता तोरणशालभञ्जिकेव"।

(बुद्ध चरितम् २५।५२)

तोरणस्तम्भसविधे वेदिका स्वामाभा मुञ्जगाल। सौभाग्य वैजयन्त्यश्च तत्र समुल्लेसुः। तत्र च स्फाटिकमङ्गलकलशा बभ्राशिरे। ससलिलानां तेषां कलशानामाननानि सहकारकिसलयकलितान्यकल्प्यन्त। स्कन्दपुराणेऽवन्तिकाखण्डेऽवन्तिकां वर्णयन् कविराह—तत्र मणिखचितशातकुम्भकुम्भा भवने-भवने बिबभुः। 'अभिषेक' नाटके भासः—

कनकरचितचित्रतोरणाढ्या मणिवरविद्रुमशोभितप्रदेशा।

विमलविकृतसञ्चितैर्विमानैर्नियति महेन्द्रपुरीव भाति लङ्का"॥ (२ अं०)

इत्यादिविधया लङ्कां वर्णयन् यदाऽऽलोक्यते तदेदमुहृयते यत् तदा नूनं तथाविधा पुरश्रीः पृथिव्यां व्यद्योतत।

रामायणमधिकृत्य केचन वदन्ति यत् तत्प्रणयनमीशवीयं द्वितीयं शतकं यावज्जात मपरे निगदन्ति यदीशवीयाब्दात् प्रागवर्तिनि पञ्चमे शतके तत्प्रणयनं पूर्तिमियाय। तदस्माकं पुरतः प्रासादानां यां श्रियमुपन्यस्यति सैव तदुत्तर कालवर्तिषु काव्येषु[1] चविनिबद्धावाप्यते। पुराणेष्वपि[2] केषुचित् क्वचित्-क्वचित् तादृशमेव वणनमासाद्यते अतः ज्ञायते यत् तत्-तद् ग्रन्थ-निर्माणानेहसि भारतस्य पुराणि तथाविधप्रासादशालीनि भूत्वा व्यराजन्त। प्रासाद-

१—ब्रह्मपुराणम्, अवन्ति, श्लो० २५, २६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तोरणादिपरकेण तेन वर्णनेन तत्समयस्य स्थापत्यकलायाः समुत्कृष्टतरत्वमस्मत्समक्षे साधुतया समुपस्थितं जायते ।

शय्यासनादिगृहपरिच्छदः

प्राचीने साहित्ये पर्यङ्कशय्यातल्पविष्टरासनासन्दीदीपप्रसाधनीपतद्ग्रहमञ्जूषवरत्रापिष्टपचनपानभाजनदर्विस्थालीभृङ्गारकपर्यप्रोष्ठपीठप्रभृतीनामनेकेषां वस्तूनां नामानि दृश्यन्ते । एवमेव तत्र कुसूलशूर्पमन्थशूलकटाहकंसकुण्डीशरावामत्रकम्वितर्दू प्रभृति बहूनि विविधानि चान्यानि वस्तूनि तत्र निरूपितानि प्राप्यन्ते । भस्त्रादृतिवेधनिकावृषदंशिकादीनां च निर्देशमवलोक्य प्रतीयते यद् देशे तदा चर्मपात्राण्यप्युपायुज्यन्त । तैलनिवेशाय च कुतु-कुतुपादीनां प्रयोगः प्रचलित आसीत् । वारिनिमित्तेन कुट-निप-कलशादिपात्राणि गृहे-गृहेऽवाप्यन्त । दृतेरुल्लेखस्तु वैदिकवाङ्मयेऽपि दृश्यते । पञ्चविंश ब्राह्मणे क्षीरदृतेः सुरादृतेश्च सङ्केतो लभ्यते । शतपथब्राह्मणाद् ज्ञायते यद् भस्त्राः सक्तुहेतोः प्रायुज्यन्त । क्षेत्रेभ्यः सस्याहरणाय च तत्प्रयोगो बभूव । यवशालिगोधूमादिद्रव्यपूरितभस्त्रावाहिनो भस्त्रिकाः इति न्यगद्यन्त । मृच्छकटिककारस्य—

"लोहकड़ाहपरिवत्तणकसणसारा किदिविसेसआ" । (अं० १)

इत्येतदादिपदेष्वागतकड़ाहपदं तत्समयस्य विविधगुरुलघुभाजनवत्ताम्प्रति सङ्केतं विदधाति । एवमेव चारुदत्तादिरूपकेषु "करण्डकात्" (३ अं०), किञ्च "विक्किणिद भण्डओ (तत्रैव, ३ अं०) इत्यादिपदानि तत्समयस्य भाण्डशालितामभिव्यञ्जन्ति ।

अर्थशास्त्रे, आयुर्वेदे च बहुविधानि पात्राण्युल्लिखितानि सन्ति । गोणय इह अन्नप्रयोजनेन प्रायुज्यन्त । गोणकम् और्णेयवास आसीत् । गोणीतिपदं भाष्यकारस्तोलनसाधनमित्येतस्मिन्नर्थे प्रयुनक्ति । चरकानुसारं गोणी खारीत्यकथ्यत । विवधद्वारेण कहाराः कूपेभ्यो जलमानिन्युः । कौटिल्येन वीवध इत्येष शब्दो भारवाहनविभाग इत्येतस्मिन्नर्थे प्रायोजि । कोष्ठी सस्यनिधानाय प्रायुज्यत । सा 'कुम्भी' इत्यप्यकथ्यत । हर्षचरिते गराडकुसूल इत्येतत्पदमपि

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लभ्यते । मथुरा-कौशाम्बी-पाटलिपुत्र-राजघाटाहिच्छत्रादिपुरोत्खननेन गण्डकुसूला लब्धाः सन्ति । इमे कूप इव गभीराः सन्ति । पाणिनिकाले एते कूपाः इति व्यपादिश्यन्त । एतेन सिद्धयति ईशवीयाब्दात् प्राक् षष्ठे शतकेऽपि तेषां उपयोगित्वम् । शालाविलं नाम भाजनमपि धान्यार्थं प्रायुज्यत । तत्र तावद् धान्यं सुखेन न्यधीयत यत् त्रैवार्षिकजीवनम्प्रति पर्याप्तं भवेत् । एतस्माद् विवरणाद् ज्ञातं जायते यच्चुल्लीचमसादिमारभ्य वृहत्तरबृहत्तमपात्राणामुपयोग इह कृतोऽभूत् । "मुसलमिदमियं च पातकाले (मु० रा०, १ अं०) इत्यादिपङ्क्तयस्ततसमयस्य तत्तद्गेहद्रव्याणि अधिकृत्य मधुरं सङ्केतं विदधानाः प्राप्यन्ते ।

क्रीडा

समाजे मनोविनोदयितुमनेकविधाः क्रीडाः अपि प्रसृता आसन् । तासु क्रीडासु उद्यानक्रीडानां बाहुल्यमाकरेषु प्राप्यते । उद्दालकपुष्पभञ्जिका, वीरणपुष्पप्रचायिका, शालभञ्जिका, तालभञ्जिका, अम्भोषखादिका इत्यादिका विविधा उद्यानक्रीडाः पुरा प्रावर्त्यन्त । कामसूत्रे एता देश्याः क्रीडाः प्रोक्ताः । तत्र सहकारभञ्जिका, विसखादिका, अशोकोत्तंसिका, पुष्पावचायिका इषुभक्षिका, दमनभञ्जिका, उदकक्ष्वेडिका इत्येतदादिक्रीडानामपि निर्देशः सविस्तरं विहितः । एतासां क्रीडानां परम्परा जातककालं यावदेव न, काव्यपुराणाख्यायिकादिकालपर्यन्तमपि अनारतं व्यालोक्यत ।

प्राच्यक्रीडासु सरसीक्रीडा च जनेभ्योऽतितरामरोचत । मातङ्गजातके समुल्लेखोऽय यत् कन्याः अपि क्रीडितुमुद्यानं गच्छन्त्यस्तदा अदृश्यन्त । उद्दालकजातकानुसारं वाराणस्याः राजपुरोधाः उद्दालकोपवने स्वीयां गणिकामादाय विहर्तुं सततमुत्साहमदीदृशत् । कामसूत्राद् विदितं भवति यत् कदापि विहरणार्थं गतानां कुमारिकाणां हरणमपि तदा दृष्टमभूत् । भासोऽविमारके कुन्तिभोज-दुहितुः कुरङ्ग्याः उद्यान-गमनं वर्णयन् प्राप्यते । उद्यानयात्रासु मेषादिकानां पशूनां युद्धमपि जनास्तदाऽऽयोजयामासुः । एतादृशेष्वसरेषु जनसम्मर्दस्य महान् कोलाहलोऽश्रूयत । उद्यानयात्रासु जना बिन्दुमती, प्रहेलिकादिरचनाः अपि विदधानास्तदा अवाप्यन्त । क्रीडैकशाल्मली वा शाल्मलीमूल-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

खेलनं नाम विनोदोऽपि कामसूत्र-भावप्रकाशसरस्वतीकण्ठाभरणादिग्रन्थेषु कीर्तितः। कामसूत्रस्य जयमङ्गलायां टीकायां निगदितमिदं यदेषा क्रीडा विदर्भेषु विशेषतः प्रचलिताऽऽसीत्। अशोक-शालादिशाखिनामधोभागे किञ्च कुसुमशोभिनीः शाखाः बिभ्रतां तरूणामधः क्रीडाना मायोजनं प्रायेण कृत-मभूत। कुमारिका शाखाः स्पर्शं-स्पर्शं कुसुमानि सामोदं ग्राहं-ग्राहं कुमारयन्ति स्म। अवदानशतके शालभञ्जिकोत्सवस्य कमनीयता दर्शनीया वर्तते। एषा क्रीडा पालिनिदानकथायामतिप्रकर्षपूर्वकं गीतास्ति। भरहुत-सांची-शुङ्ग माथुर-कुषाण कलासु शालभञ्जिका-पुष्पप्रचायिकाख्यक्रीडानिरतानां प्रमदानां विविधानि विचित्राणि च दृश्याणि अङ्कितानि सन्ति।

वीरणपुष्पप्रचायिकोत्सवो विभावर्यां पौर्णमास्यामायोज्यत। तत्र हि पुष्पावचयोऽभिनीयते स्म। कुसुमा-करे सति समागते पुराणकाले प्रमदाः काममर्चन्त्यो रूपकेषु वीक्ष्यन्ते। नूनं तदुपासनं क्रीडाभेद एव कश्चित प्रति-भासते। कविकृतवसन्तकामार्चाभिव्यनक्ति यत् पुरां तादृशे मनोऽभिरामा-वसरे इहानेक हृदयाह्लादिकानां क्रीडानामप्यायोजनं कृतं बभूव। आम्रकलिका-चयनं शाखिनामधो धावनं सुमन सौन्दर्यदर्शनजनितानन्दादानमपि क्रीडाया एव प्रकारा आसन्। "तत्तअं वेलं गाअन्तो णच्चन्तो होम", "ही ही षुठ्ठु णच्चिदम्। षुट्ठु गाइदं अहं पिणच्चेमि" इत्येतदादि पञ्चरात्र-द्वितीयाङ्कस्थाः पङ्क्तयः क्रीडायाः एव दृश्यमुपस्थापयन्ति।

प्रहरणक्रीडाः अपि इहत्ये साहित्ये वर्णिताः प्राप्यन्ते। येन प्रहरणेन या क्रीडा चरिताभवत् तत्प्रहरणनाम्नैव सा अप्रथत। ग्रन्थेषु दाण्डक्रीडा-मौष्ट-क्रीडादिकानामुल्लेख इदमेव पिशुनयति। ईशवीयं सप्तमं शतकं यावदेतासु क्रीडासु जनानां प्रवृत्तिरलक्ष्यत। मल्लयुद्धमपि तदानीं क्रीडात्वेन मततभूत्। तदा ग्रामे-ग्रामे मल्लशालाः अशोभन्त। युवानो नियतसमये प्रत्यूषे प्रत्यहं दैहिकीं शक्तिं वर्द्धयितुं मल्लशालां जग्मुः। तत्र क्रीडार्थं बहुविधानि साधनानि सन्निहितानि प्राप्यन्त। तद्द्वारेण आवृद्धबालाः क्रीडित्वा-क्रीडित्वा मनो-विनोदनपूर्वकं वापुष्कं बलमपुष्णन्।

क्रीडासु दोलाप्यगण्यत। न केवलं नार्यो नरा अपि क्रीडायामस्यां भृशं रुचिं दर्शयामासुः। एषापि क्रीडोपवनेष्वेवाधिक्येनायोज्यत। तत्रैव प्रयाय

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वेऽपि समवेता भूत्वा मनः प्रीणयितुमृतुं पर्व चाभिनन्दयितुमस्यां दोला क्रीडायां समुदं सप्रीतिं च भागमगृह्णन्[1] ।

"तर्कयामि दोलापरिभ्रष्टया····नियुक्तेति" (२ अं०) इत्येतन्मालविकाग्निमित्रस्य वाक्यं दोलाक्रीडानिर्दिशद् दृष्टं भवति। एवमेव मल्लक्रीडाया वा मल्लयुद्धस्य निर्देशो भासस्य बालचरिते पञ्चमेऽङ्के प्राप्यते। पश्यन्तु तावत् क्रीडतीः गोपाङ्गनाः ।

"एताः प्रफुल्लकमलोत्पलवक्त्रनेत्रा गोपाङ्गनाः कनकचम्पकपुष्पगौराः ।
नानाविरागवसना मधुरप्रलापाः क्रीडन्ति वन्यकुसुमाकुलकेशहस्ताः ।।"
(बालचरितम्, ३।२)

वात्स्यायनाद्[2] ज्ञायते यद् वाटिकासु सघनच्छायेषु महीरुहेषु दोलादिकानां क्रीडानां योजना कृताभवत् । क्रीडाङ्गणे छायावत्सु भूभागेषु दर्शकाणां कृते किञ्च क्रीडाश्रान्तानां जनानां निमित्तेन उपवेशनाय पीठिकासनादीनि च स्थापितान्यक्रियन्त ।

(क) "अमी हि वृक्षाः फलपुष्पशोभिताः,
कठोरनिष्पन्दलतोपवेष्टिताः"

(ख) "बहुकुसुमविचित्रिता च भूमिः,
कुसुमभरेण विनामिताश्च वृक्षाः" (मृच्छ०,८ अं०)

(ग) "खगशतविरुते विरौति तारं
द्रुमगहने दृढसङ्कटेऽस्मिन्"
(मध्यमव्यायोगे, १ अं०)

तत्-तन्नाटकेष्वित्येतदाद्युपरिस्थिताः श्लोकाः उद्यानानां छविं निदधानाः एतन्मनस्यनुमानं जनयन्ति यत् प्राक्तनानां नृणां हि उपवनारोपणे, उपवन-

---

१—अनुभवन् नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे भुजलतां जलता मबलाजनः ॥
(रघु०, ९।४६)

२—कामसूत्रम्, पृ० ४५ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भरणे च महानभिलाष आसीत् । तेषामस्मिन्नभिलाषे क्रीडानुरागितैव निगूढा भूत्वा सन्तिष्ठते । तदोपवन-निषेवणं क्रीडामिवामंसत जनाः ।

वर्गविशेषेषु मृगया—शारिफलकाक्षद्यूतप्रभृतिक्रीडानामपि प्रचारोऽवर्तिष्ट कामम् ।

यत्र जनाः क्रीडितुं समवेता भूत्वा भागं जगृहुः सः उत्सवः 'समज्या' इत्येतन्नाम्ना व्यश्रूयत । जातकेभ्यो विदितं भवति यत् समज्यास्ता गोष्ठ्य आसन् यत्र नरनार्योऽनेकविधेषु क्रीडाकौतुकेषु-नृत्यसंगीत-हस्तिमेषादियुद्धरूप-क्रीडासु अभिरुचिं दर्शयामासुः । महाभारते सविस्तरं समाजाभिधोत्सव-मधिकृत्योल्लेख आप्यते । अशोकस्याभिलेखेभ्यः समाजस्य द्विविधतापि ज्ञाता जायते । विधुरपण्डितजातकं समज्यायाश्चारुचित्रं विदधाति । एवंविधानां क्रीडानामवसरेषूपस्थितजननिवहः पुरातनेषु ग्रन्थेषु 'समावयः' आहोस्वित् 'समाज' इत्यभ्यधीयत । कामसूत्रे प्रयुक्तमिदं पदं पर्यवलोक्य शालिवाहनयुगे तादृशस्य समाजस्य प्रचलनमासीदिति तर्क्यते । क्रीडाया विविधान्यङ्गानि अनुक्रीडा, संक्रीडा, परिक्रीडा, आक्रीडा-इत्यादिनामभिः प्रथितानि बभूवुः । क्रीडाकारिणः आक्रीडिन इत्युच्यन्तेस्म । दण्डी दशकुमारचरिते कन्दुकावत्या कन्दुकक्रीडां वर्णयन् दृश्यते । "मालविए, गोदमचापलादो दोला परिभट्टाए सरुजो मह चलणो" (मालविकाग्नि० ३ अं०) इत्येतदादिपङ्क्तिभिरस्मदी-यानि रूपकाणि जनानां विविधक्रीडानुरक्तिपरकमनुमानमुद्भावयन्ति ।

ललितानि मनोरञ्जनानि—

जगत्यां सर्व एव प्राणभृतो निसर्गतो विनोदप्रियाः प्राप्यन्ते । कालिदासः सत्यमाह—'उत्सवप्रियाः खलु मनुष्याः' इति । जीवितार्थमपेक्षितान् व्यवसायान् अनुष्ठाय प्रत्यहं प्राणी तत्-तत्कार्यजनितां श्रान्तिं क्लान्तिं चापनेतुं प्रायेणात्मानं विनोदयितुमीहते । प्राचीनेऽस्मदीयेऽभिमतेऽनेहसि विनोदनस्य कानि कानि साधनान्यासन्नित्येतत्सम्प्रत्यन्वेषणीय विद्यते ।

पुरा मनोरञ्जनाय नाटक-सङ्गीत-वादित्र-नृत्य-चित्रालेखन-कविताप्रणयन-दारुपुत्तलिकानृत्यैन्द्रजालिकता-पर्यटन—विविधक्रीडाद्यनेकोपकरणान्यविद्यन्त । नाटकं नाम मनोरञ्जनं तु तदा मूर्धन्य मतमभूत् । मधुरसङ्गीतमयानि धार्मिका-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ण्यभिनयनानि पूर्वाह्ने, वीरतोदारतादिसम्बन्धीनि अपराह्ने, श्रृङ्गाररसविषयकाणि नृत्तवाद्यसंगीतमयानि नाटकानि नक्तं, भक्तिभाव-करुणरसमहत्तादिपराणि रूपकाणि प्रभातेऽभिनीतान्यभूवन्। नाट्ये परमाद्भुतकौशलशालिनोऽभिनेतार आचार्याश्च सक्रियं भागमग्रहिषुरित्येतन् मालविकाग्निमित्रस्य (प्रथमाङ्के) एतेनावतरणेन स्पष्टीभवति—"एतौ पुनः हरदत्तगणदासौ। उभावभिनयाचार्यौ परस्परजयैषिणौ। त्वां द्रष्टुमुद्यतौ साक्षाद् भावाविव शरीरिणौ"।

सङ्गीतं च चिराद् भारतस्यातिहृद्यं मनोरञ्जनम्। पुरातने समये न केवलमेतन्मनोविनोदनस्य साधनमभूदपितु भगवदाराधनायाः अपि सर्वोत्कृष्टसाधनत्वेन मतं वभूव। एतस्य सङ्गीताख्यस्यात्मविनोदिनः साधनस्यातिपुराणत्वमेतेनैवावगन्तुमर्हति यत् सामवेदः केवलं सङ्गीतायाकल्पयत्। गान्धर्ववेदो नामोपवेदस्तस्यैवाङ्गत्वेन समग्रेऽपि संसारे प्रथते। सामवेदस्तुतिषु सङ्गीतकलाया आदितमं शास्त्रीयं रूपं दृग्गोचरीभवति। अस्तु, अस्मदीयानां रूपकाणां समये जनेषु सङ्गीत[1]कलाप्रियत्वं नितरामवालोक्यत। अत एव तु

(क) "अये तन्त्रीनादो युवतिकलगीतध्वनियुतः" (अविमारकम्, ३ अं०)

(ख) "गीतं तु पुनः स्त्रियाः। इह हि,
तानस्तु मन्दो विशदप्रवृत्तो जातस्तु नादो मुखनासिकेन।
स्थूलोऽपि हेतुः करतालनादः सञ्जायते सद्बलयस्वनेन"॥
(तत्रैव) ३ अं०)

(ग) "तं तस्य स्वरसंक्रमं मृदुगिरः श्लिष्टं च तन्त्रीस्वनम्,
वर्णानामपि मूर्च्छनान्तरगतं तारं विरामे मृदुम्।
हेलासंयमितं पुनश्च ललितं रागद्विरुच्चारितं।
यत्सत्य विरतेऽपि गीतसमये गच्छामि श्रृण्वन्निव"॥ (मृच्छ, ३ अं०)

(घ) "भो वयस्य सङ्गीतशालाभ्यन्तरेऽवधानं देहि। कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते। जाने, तत्रभवती हंसपदिका वर्णपरिचयं करोति"।
(शाकुन्तलम्, ५ अं०)

१—ब्रह्मपुराणम्, अ० ४३, पृ० ३१७।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतदादिकाः बहवः श्लोकाः गद्यावतरणानि च तस्य समयस्य सङ्गीत-प्रियत्वं पिशुनयन्ति ।

वादित्रं हि सङ्गीतस्य पूरकमिव । इदमुभयमप्यन्योन्याश्रितम् । प्राचीने साहित्ये नानाविधानां वादित्राणां नामानि निर्दिष्टानि प्राप्यन्ते । उत्खनना-ल्लब्धानि द्रव्याणि चिह्नानि च ज्ञापयन्ति यत् पुरा मृदङ्गवीणा-मुरज-कांस्य-ताल-मञ्जीरादिवादित्राणां वादने तात्कालिकाः जना लब्धवैदग्ध्या बभूवुः । रूपकेषु-

(क) "वंशं वाए शतछिद्दं, वीणं वाए शततन्तिं शदन्तिं" (मृच्छ० ५ अं०)

(ख) "अहो, अहो ! साधु, साधु रेभिलेन गीतम् । वीणा हि नाम असमुद्रोत्थितं रत्नम् । (मृच्छ० ३ अं०)

एताः पंक्तयस्तस्य समयस्य वादित्रवत्वं बोधयन्ति । तदानीं वेणुकर्करी-क्षोणी-गर्गर-गोध-पिङ्गाघातिप्रभृतिबहुवादित्राणि प्रायुज्यन्त । बौद्धकाले विविधानां वादनयन्त्राणां प्रादुर्भावोऽभवत् । तात्कालिके साहित्ये पाणिस्सर-सम्भताल-कुम्भत्थण-भेरी-मूर्तिगा-शंख-पणवानकालम्बर-देण्डिम-स्वरमुख-परिवादे-ऽन्तिका-कुटुम्बतिरिडमादिवादित्राणामुल्लेखोऽवलोक्यते ।

गुप्तकाले वादित्रसंगीतयोरुत्थानं विशेषतो दृष्टम् । सम्राट् समुद्रगुप्तः स्वयं वादने संगीते च प्रवीणप्रवर आसीत् ।

पल्लवनृपतीनां शासनसमये कद्रुमुखं समुद्रघोषश्च-इत्येतदुभयमपि प्रथित-मासीत् ।

भासकालिदासशूद्रकादिरूपककाराणां रूपकेषु काव्येषु[1] च झल्लकी-वल्लकी-मृदङ्ग-वीणातोद्य-वंशकृत्य-वेणु-दुन्दुभि-दर्दुर-झर्झरादिवादित्राणां वर्णनं दृश्यते । तस्मात् तदा नानाविधानां बहूनां वाद्यानामुपयोगः कृतोऽभवदिति सिद्ध्यति । स्वप्नवासवदत्ते षष्ठेऽङ्के भासः—

१—(क) बुद्धचरितम्, ५।४५ ।
(ख) तत्रैव, ५।५५ ।
(ग) महाभाष्यम्, ७।४।१ ।
(घ) नाट्यशास्त्रम्, ३४।१५ ।
(ङ) रघौ, ४।१९ ।
(च) कादम्बरी, चन्द्रपीडवैशम्पायनयोः जन्मोत्सवप्रकरणम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"श्रेणीसमुद्वहनपार्श्वनिपीडितानि,
खेदस्तनान्तरसुखान्युपगूहितानि ।
उद्दिश्य मां च विरहे परिदेवितानि,
वाद्यान्तरेषु कथितानि च सस्मितानि" ॥

किञ्च स एव दूतवाक्ये, प्रथमेऽङ्के—

"सेनानिनादपटहस्वनशङ्खनादैः,
चण्डानिलाहतमहोदधिनादकल्पैः ।
गाङ्गेय मूर्ध्नि पतितैरभिषेकतोयैः
सार्धं पतन्तु हृदयानि नराधिपानाम्" ॥

इत्यादिभिः स्वसमयस्यैव वादित्रवत्वं प्रकटीकरोति ।

नृत्यम्—

नृत्यकलायामभिरुचिश्चिरादेव भारतीयनरनारीणामवालोक्यत । प्रायेण प्रत्यहमेव देवायतनेषु जना इहत्या विधाय नृत्यं स्वां सपर्यां देवेषु समर्पयामासुः । उत्सव-शुभसंस्कारादिषु मङ्गलमयीषु वेलासु तु गृहे-गृहे नृत्यमभवदेव जनाः सुन्दराण्यंशुकानि वसाना भूषणानि च बिभ्राणा नृत्यानन्दं स्वदमानाः पुरा प्राप्यन्त । तदा युद्धनृत्यमपि दृष्टमभूत् । तदपि दर्शकचक्षूंष्यप्रीणात् । कुमारिकास्तदानीं नृत्येषु काममपि परां पटुतां गता अवाप्यन्त । वस्तुतो नृत्यस्येतिहासस्तु तदा प्रभृत्येव प्राप्यते यदेह वैदिकोऽनेहाः शुशुभे । खननलब्धसामग्र्यश्चात्रत्यस्य नृत्यस्य साक्षिण्यः । अखिलोऽप्यतीतो नृत्यसौन्दर्यसुन्दर आसाद्यते । शुङ्गशालिवाहनशककुषाणगुप्तादिसाम्राज्ये विरचितात् साहित्यात् तस्य समयस्य नृत्यकलाप्रियत्वं सिद्ध्यति । तत्कालवर्तिषु रूपकेषु :—

"करताडिता जलधराइव······सार्यते वीणा······अतिमधुरं प्रगीता गणिका दारिका नर्त्यन्ते । नाट्यं पाठ्यन्ते सश्रृङ्गारम्" ।

(मृच्छ०, ४ अं०)

इत्यादिकाः पङ्क्तयो नृत्यनिरूपणपराः प्राप्यन्ते ।

तत्समयप्रणीतात् कामसूत्रादनेकविधनृत्य-नीति-रसालापसम्बन्धिनीनां सभानां बोधो जायते । एतादृशी सभा सरस्वतीमन्दिरे नियततिथावघटत । सभा-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भागग्राहिणोऽत्यन्तपरिष्कृतावदातवृत्तयः साधुभावा नागरिका बभूवुः । तद्विधासु सभासु गायकनर्तकादिकास्ते समाज्ञप्ता अजायन्त ये नागरिकैरधिकारारूढै-र्न्ययुज्यन्त । स्थायित्वेन नियुक्तानां तेषां नर्तकगायकादिजनानां कार्यं नागरिक-मनः प्रसादनमासीत् । समये-समयेऽन्येभ्यः स्थानेभ्यश्च समागताः कुशीलवाः नृत्यगीतिविचक्षणाः स्वकलायाः प्रदर्शनं चक्रुः । यदाकदापि किमपि महन्मह[1] आकारितमभवत् तदैतासु परिषत्सु स्वतन्त्रा आगन्तारो नर्तका गायकाश्च समवेता भूत्वा स्वां कलां विभावयाम्बभूवुः । नगरान्तरादागतानामेषां प्रत्युद्गमनं नाग-रिकाणां कर्त्तव्यमिव मतमभूत् ।

रामामणे[2]ऽयोध्याकाण्डे ६७ तमेऽध्याये समाजसभोद्यान-यात्रोपवनविनोदाः सम्यग्वर्णिता दृश्यन्ते । सम्भवमिदं भवितुमर्हति यद् रामायणे तत्तद्वर्णनं तस्मिन्नेवकालेऽन्तर्हितं कृतं स्यात् । कामसूत्रे समाजशब्दस्यव्याख्यां पठित्वा विचारोऽयमुन्मीलितो जायते यद्वश्यमेव समाजस्य तद्दृश्यं कामसूत्रकारः स्वाक्षिभ्यां प्रथमं दृष्टवान् अन्यथा तादृशं जीवितं साकारं वर्णनं कुतः सम्भवम् । अशोकेन स्वलेखेषु कामशास्त्रीयसमाजरोधादेशः प्रसारितः परं येषां समाजाना-मायोजनंसुपरिष्कृतोदग्रभावानां प्रदर्शनाय अजनि न तत् प्रतिषिद्धमजायत । मृच्छकटिके तृतीयेऽङ्के—"काविवेला अज्जचारुदत्तश्श गन्धव्वं शुणिदु गवश्श" इत्येताः पङ्क्तय उपरिनिर्दिष्टसमाजम्प्रत्येव वस्तुत इङ्गितं विदधत्यः शोभन्ते ।

कामसूत्रे कथितं यत् तदा समाजे शास्त्रीयवादोऽपि प्रावर्तत । गोष्ठीना[3]-मायोजनानि प्रायेण अक्रियन्त । ता गोष्ठयो नागरिकाणां सद्मसु वा गणिकाना-मावासेषु आयोज्यन्त । तासु गोष्ठीषु आमन्त्रिताः प्रवेष्टुमशकन् । तेष्वहःसु समाजे गणिकाः अत्यन्तमादरमविन्दन् । तास्तदानीं नृत्यसंगीत-काव्यादिक-लासु परां निष्णाततां निदधुः । वस्तुतस्तु तासां तस्यसम्मानस्य प्रमुखं कारणं तासां विविध-बहुलगुणवत्वं बभूव । ताः परमप्रतिष्ठाजुषां नागरिकाणामपि वेश्म नामन्त्रण मन्तरेण प्रययुः[4] । ताः स्वकीयेन मनोहरिणा नृत्येन, मधुरेण गीतेन,

---

१—कामसूत्रम्, पृ० ५०-५१ ।

२—भृदङ्गवेणुवीणानां··· ··समाजस्था······ । (रामयणे, ५।१५)

३—ललित विस्तरम्, पृ० १५ ।

४ —कामसूत्रम्, पृ० ५८-५९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सरसया कवितया, विस्मयोत्पादिकया समस्यापूर्त्या, शुद्धेन विदग्धतावदातेन निबन्धपाठेन, ललितेन देशदेशान्तरभाषाविज्ञानेन, सुदृढेन दुर्वाचकयोगेन, सुन्दरेण छन्दोबन्धेन, चारुतरेण नाटकेन, अनवद्येनालापेन, रम्याभिराख्यायिकाभिरुज्ज्वलाभिरालोचनाभिः, प्रियाभिः प्रहेलिकाभिः मञ्जुलाभिर्मात्राच्युतकादिविषयकरचनाभिश्च नागरिकाणां चेतांसि नितरामचूचुरन्[1]। मृच्छकटिके शूद्रकेण या वसन्तसेना नाम्नी गणिका समुपन्यस्तास्ति तया तस्य समयस्य गणिकानां वैशिष्ट्यं सम्यग् ज्ञातुमर्हति।

तस्मिन् काले आपानकमपि गोष्ठीनामन्यतमो भेदो मतोऽभवत्। मृच्छकटिकेऽष्टमाङ्के एवंविधाया गोष्ठ्याः सङ्केतः कदाचिदनया पङ्क्त्या दीयते—"आवाण अ मज्झ पवइश्श··· मोइश्शं"।

आपानके मद्यपानस्य च व्यवस्थाऽदृश्यत। एतादृशी गोष्ठी सभ्यसमाजेन अगर्ह्यत। अशोकलेखेभ्य ईदृशं सत्यं ज्ञायते। वात्स्यायनेनापि एतादृशीषु गोष्ठीषु सत्पुंसां गमनं प्रत्याख्यातम्। राजा तदायोजकान् दण्डितवान्। कामसूत्रे सर्वमेतत् साधूपपादितम्।

उत्सवः

भारतं हि उत्सवानामपि देशः। तस्योत्सवबहुलत्वं तस्य प्राचीनतमत्वमभिव्यनक्ति। अस्मदभिमतेभ्यो रूपकेभ्यः प्राचीने काले अत्र प्रतिदिनमेव गुरुर्गुरुतरश्चोत्सव आयोजितः सञ्जात इति साधुतया विदितं जायते।

(क) किण्णुक्खु उदुच्छवे वि······दीसइ (शाकु० ६ अं०)

(ख) वसन्तोस्सवु वा अण लोलुपेण अज्ज गोदमेण (मालविकाग्नि० ३अं०)

(ग) श्वोऽस्माकं घोषस्य····· इन्द्रयज्ञो नामोत्सवो भविष्यति। (बालचरितम्, १ अं०)

(घ) तत् किं पुनः इदं नवं संविधानकं वर्तते। (मृच्छ०, १ अं०)

(ङ) अये तत् किमिदमस्मद् गृहेषु महोत्सव इव दृश्यते। (मु०रा०, १ अं.)

इत्येतदादिवाक्यैस्तत्समयवर्तिनो देशस्योत्सवाकीर्णत्वं[2] प्रति सङ्केतः संलभ्यते।

१—नाट्यशास्त्रम्, पृ० २६७।

२—कामसूत्रम्, पृ० ४४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राचीने समयेऽस्मद्देशे सर्वत्रोत्सवतरङ्गिण्यो वस्तुतः प्रवहन्त्योऽलक्ष्यन्त। बहुना किं पञ्चापि पृथिव्यादितत्त्वान्युत्सवमयानीव भूत्वा तदाऽऽवाप्यन्त। देशस्य सर्वविधसमृद्धिशालित्वाच्चिन्ता क्वापि वीक्षितैव नाभवत्। देशोऽतो विविधमङ्गलोत्सवान् तन्वानः समुदं जीवनं नयन् समलक्ष्यत।

काव्यशास्त्र-विनोदः

पर्वणि पर्वणि प्रेक्षावन्तः काव्य-शास्त्रैर्विनोदं कर्तुमायोजनं सोत्साहं कृतवन्तः। प्रत्यहं तु प्रतिशास्त्रानुरागी शास्त्रानुशीलनेनात्मानमरीरमदेव परं समाजद्वारेणाप्येवंविधमायोजनं श्रीपञ्चमी-ऋषिपञ्चम्यादिशुभतिथिषु च विशेषसमारोहपुरस्सरमारचितं बभूव। राजानो राजसभासु प्रायेण शास्त्ररञ्जनरङ्गमसज्जयन्। ईदृशेष्वसरेषु शास्त्रार्थद्वारेण पण्डितानां पाण्डित्यमपि परीक्षितं बभूव।

वासुदेव-शालिवाहन-शूद्रक-साहसाङ्कादिका भूरमणा इमां शास्त्रविनोदिनीं पुनीतां परम्परां चालयामासुस्तदीयां गतिं च वर्धयामासुः। एषा परम्पराऽऽधुनिकं कालं यावत् यशःप्रियैः पार्थिवैरनारतमरक्ष्यत। काव्यमीमांसादिविविधप्रचुर-ग्रन्थरचयिता राजशेखरो लिखति यत् स्वयमपि शास्त्रेषु काव्येषु च मर्म्मज्ञतां निहितवन्तस्ते तदीयस्य प्रकर्षस्य मर्यादायाश्चोपरि सततमतितरां दत्तावधाना आसन्। भाषाया रक्षार्थमनिशं भूभुजो यतमाना अलभ्यन्त। केचन तु स्वकुटुम्बे भाषाया मधुरिमाणं पातुं कठोरतरं नियमश्चाबध्नन्। श्रूयते यन्मगधेषु राज्ञा शिशुनागेनैष नियमः कृत आसीद् यत् तदन्तःपुरेषु 'ट-ठ-ड-ढ-ष-स-श-ह' इत्येषामष्टानां वर्णानां प्रयोगो न कृतः स्यात्। शूरसेनाधीशः कुविन्दोऽपि कटुसंयुक्ताक्षरोच्चारणे प्रतिषेधमस्थापयत्। कुन्तलेषु नृपस्य सातवाहनस्यादेश आसीद् यत् तदीयेऽवरोधे केवलं प्राकृतभाषा प्रयुज्येत। भावोऽयं तदैतद्विधः प्रयत्नोऽभ्युपागम्यत येन काव्य-शास्त्रविनोदपूर्वकं भाषायाः, भाषामधुरतायाश्च सम्यक संरक्षा स्यात्।

"भगवति, अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्यासितव्यम्" (मालविकाग्नि० १ अं०) इत्येतदादिपंक्तीः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पठित्वा स्पष्टमेव तस्य समयस्य काव्यशास्त्रव्यसनित्वमभिव्यक्तं भवति[१]।

मल्लविद्या—

मल्लविद्या भारतस्यातिप्राचीनविद्या विद्यते मल्लानामिह पुरातनेऽपि युगे परमसम्मानमासीत्। जनेषु प्रायेण सर्वेषु मल्लविद्यापरकं प्रेम पुरा बलीयोऽवाप्यत। ते प्रतिदिवसं प्रातः सायं च मल्लशालामुपेत्य विविधव्यायामान् विधाय शारीरिकीं शक्तिमर्जयामासुः। तांस्तान् सर्वानुपायांस्तेऽशिश्रियन् यद्द्वारेण मल्लताधिगम्यते। श्रीमद् भागवतादौ चाणूरमुष्टिकादिवीरमल्लानां चारित्र्यं वयं शृणुम एव। अस्मदभिमतकालोऽपि मल्लताप्रियः कालोऽवालोक्यत। मल्लतामधिकृत्य—

"इतश्चापनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा"। (मृच्छ०, ४ अं०)

इत्येतदादिपंक्तयो रूपकेषु दृश्यन्ते। बालचरिते भासस्तादृशमवतरणमवतारयन् प्राप्यते यत्र मल्ला गर्जन्तः श्रूयन्ते प्रतिस्पर्धिनां मल्लानां द्वन्द्वयुद्धं नागराणां मनोविनोदिषु साधनेष्वन्यतमं साधनं बभूव। महाभारते विराटपर्वणि द्वादशाध्याये भीमजीमूतयोर्मल्ययोर्द्वन्द्वयुद्धमतिशयहृदयहारिण्या रीत्या वर्णितमस्ति। तद्वर्णनेन प्राचीनतरस्य भारतस्य मल्लतायाः सम्यक् संस्तवोलभ्यते। प्राकृतने साहित्ये प्रतिकृत-सन्निपात-प्रमाथावधूतोन्मथनप्रच्यावननिस्वनादिपदानि प्राप्यन्ते। श्रीमद्भागवते परिभ्रामणविक्षेपपरिरम्भावयातनोत्सर्पणापसर्पणान्योन्यप्रतिरोधोत्थापनोन्मथनस्थापनचालनादिपदानि तद्दिशि प्रयुक्तानि सन्ति। एतत् पुरातनभारतस्य मल्लविधानुरागितायां प्रकाशं निपातयति

पशु-पक्षि-पालनम्—

यथा प्राक्तनस्य भारतस्य तत्तद्विषयेष्वनुरागोऽस्माभिर्विलोकितस्तथैव तदीयोऽनुरागोऽस्माभिः पशुपक्षिष्वपि वीक्ष्यते। तिर्यक्ष्वपि भारतीया आत्मवद् व्यवाहरन्। ते तानपि स्वजनानिव मेनिरे। गो-गज--मेष-तुरङ्ग-महिषी-हरिणप्रभृतिपशूनां शुक-सारिका-सारसमयूरलावक-कपिञ्जलकोकिलादिपतत्रिणां च गेहेगेहे पालनमिहावलोक्यत। तदुपरि पुरातनभारतीयानामेतावत् प्रेमासीद् यत्

१—केम्ब्रिज हिस्ट्री, खण्ड, १, परि० ६ पृ० २०१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तेषां चिकित्सायै चिकित्सालयाः अपि प्रतिष्ठापिताः अक्रियन्त। अर्थशास्त्रे कौटिल्येन तत्कालवर्ति-राज-परिपोषित-गोगजघोटकादिसंवर्द्धनसम्बन्धिविवरणं सविस्तरं दत्तमस्ति। तेनेदमपि सिद्ध्यति यत् तदा पशूनां जीवनं सुखितं समृद्धञ्चासीत्। अश्वानधिकृत्य यदसौ लिखति ततो ज्ञायते यत् तेषां कृते भोजने शालि-यव-चणक-मुद्ग-माष-तिल-लवण मांस-दधिगुडादिबहूनि भोज्यवस्तूनि दत्तान्यजायन्त। तर्णकाः स्वजन्मकालाद् दशाहानि नवनीतं गोधूमचूर्णं चादन्। षण्मासांस्तेभ्यः क्षीरमेवादायि। चत्वारि वर्षाणि च तान् जना यवान्-भोजयामासुः। चेद् भेषजानां दोषाद् वा भिषजां प्रमादेन वाजिनोऽस्वस्थतां भेजुर्वा व्यथां भेजिरे तदा वैद्याः अदण्डयन्त। अश्वादिपशुवृन्दं जना बहुविधैश्चित्रैर्विचित्रैर्भूषणैर्वसनैश्च विभूषयन्तिस्म। स्नानचन्दनादिना च ते तान् सततं लालयामासुः।

"...... पर्यन्तोपनीतयवसबुस......सैरिभ...... अश्वानां केशकल्पना क्रियते......मन्दुरायां शाखामृगाः......"; "सुश्लिष्टविहङ्गवाटी......नानापक्षिसमूहैः" (मृच्छ०, ४ अं०)

इत्यादिकाः पङ्क्तयः स्फुटतयैव तस्यानेहसः पशु-पक्षिपालनप्रियतां प्रकटीकुर्वन्ति। कविः कालिदासो रघुवंशे दिलीपकृतगोसेवां वर्णयित्वा भारतीयानां गोभक्तत्वं समीचीनतया साधयति। पुराणानां पर्यवेक्षणेन विदितं भवति यद् भारतीयानां तदा पशु-पक्षिषु व्यवहारः सौहृन्मय आसीत्। तस्मिन् काले न केवलं मानवाः समये समयेऽवकाशानन्दमुपबुभुजुः परं पशवोऽपि पूर्णिमायाममायां सङ्क्रान्त्याद्यवसरेषु च श्रमादुन्मुक्ता व्यधीयन्त। तेऽपि अवकाशसुखं यथेच्छमभौक्षुः। भारतीयस्य गृहस्थस्य गृहे पुरा प्रत्यहमतिथि-पितृदेवर्षिबलिवैश्वदेवयज्ञा अन्वष्ठीयन्त। एषा यज्ञप्राणा संस्कृतिः स्पष्टमेव भारतस्य पशुपालनभावमाविर्भावयति। गामन्तरेण न यज्ञानुष्ठानं सम्भवमिति सर्वविदितमेव। पद्मपुराणे, भूमिखण्डे, सप्तत्रिंशेऽध्याये कृतं जैनधर्मनिरूपणं ज्ञापयति यत् तदा नूनं पशुषु जनता धृतस्नेहासीत्। भारतीयास्तदा पशूंश्च स्वशरीरस्यैवाङ्गमन्यतममिव मेनिरे। अतस्तेषां समयस्य स्तोकांशोऽवश्यमेव पशु-सेवायामतीयाय। तेऽमंसत यद् यथा मातृपितृगुरुजना अस्मज्जीवनं रक्षन्ति तथैव पशवोऽपि; तस्मात् कारणात् तेषु तेषां स्नेहोऽतितरां बभूव। पञ्चतन्त्रे पशुपक्षिणां याः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कथाः लेखकेनालेखिपत ताः अपि सर्वा ज्ञापयन्तीदं यदत्रत्यानां मानवानां येभ्यः साधनेभ्यो मनोविनोदः समपद्यत तेषामन्यतमं साधनं पशु-पक्षिपरिचर्याप्यासीदतस्ते तद्द्वारेण च मनःप्रीतिमचिन्वन् ।

(क) "यस्य त्वया व्रणविरोपणमिङ्गुदीनां, तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति, सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।।"
(शाकु०, ४ अं०)

(ख) "एते परे वृद्धमहल्लका इव इतस्ततः सञ्चरन्ति गृहसारसाः"
(मृच्छ०, ४ अं०)

(ग) "शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य" (पञ्चरात्रम्' २ अं.)

इत्यादिकानि तत्तन्नाटकीयानि वचांसि अस्माकं पुरतस्तात्कालिके समाजे पशुपक्षिणः कियन्मात्रायामादृता आसन्निति स्फुटं वेदयन्ति[१] । पशुपक्षिणां याः प्रतिमाः पाषाणमय्याः सम्प्रत्युपलभ्यन्त उत्खननात्, किञ्च तत्तद्भाजनेषु तदीयानि प्राप्तानि चित्राणि च भारतौकसां पशु-पक्षिषु स्नेहं साधु दर्शयन्ति । अहो, यस्य देशस्य हरिहरादिदेवा अपि गरुड़वृषादीन् स्वीयवाहनत्वेनाङ्गीकृत्यानुजग्रहुस्तस्य देशस्य जनेषु चेत् पशुषु पक्षिषु च स्नेहः स्यात् तदा किं नाम आश्चर्यम् ?

इन्द्रजालविद्या

एषा विद्याऽपि यथाद्य तथा पुरापि जनचेतोरञ्जनकारिण्यासीत् । एतद्द्वारेण[२] जना अनेके विस्मयाधायिकां शक्तिमुपार्ज्य विचित्रविचित्रतराणि कार्याणि प्रदर्श्य जनमानसानि जह्रुः । जीविकोपार्जनेऽपि तेभ्यः साहाय्यमियं विद्या ददौ । कविकालिदासेन शाकुन्तले, षष्ठेऽङ्के "भोस्तिरस्करिणीगर्वित ! मदीय शस्त्रं त्वां द्रक्ष्यति"—इत्यादिपंक्तिभिरिमामिन्द्रजालविद्याम्प्रत्येवेङ्गितं

१— 'पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां ।"
(क) कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति"
(ख) "तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तयामे ।
या मध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः" ।।
(मेघ०, उ०, श्लो० १९, २५)

२—दण्डी, दशकुमारचरितम्, उ० ५, पृ० ५३ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विदधातीति तर्क्यते । रत्नावल्यां हर्षवर्द्धन ऐन्द्रजालिकखेलां स्पष्टमेव वर्णयन् प्राप्यते ।

कथा

कथाकथनपरम्परातिपुरातनी परम्परास्ति । कथाद्वारेण भगवल्लीलानां, महापुरुषचरित्राणां, धार्मिकाणां सन्दर्भाणामैतिहासिकवृत्तानां, ज्ञान-विज्ञान-विषयिकीणां प्रवृत्तीनां च श्रवणस्य पुण्यावसरं प्राप्नुवन्तिस्म जनाः । कथावसरेषु सहस्रेभ्योऽप्यधिका जनाः समुपातिष्ठन् । पुरातने समये कथासु जनानां महती प्रगाढाभिरुचिः प्रेक्षिताऽभूत् । ते कथास्थलीं कदली-सहकाराशोकपल्लवैः सुमन-स्रग्भिर्मधुरमनोज्ञाकारफलैर्विविधैर्बहुलैश्च वृन्तवृन्दैर्महार्हाभरणक्षौमदुकूलमुक्ता-मणिरत्नसुवर्णाभिरामपात्रादिभिरुत्तमोत्तमैः परमोत्साहपूर्वकं विभूषयाम्बभूवुः । कथा-यज्ञस्य कृते महती सज्जा, गुरुतमा उपक्रमाः, विशालतराण्यायोजनानि प्रशस्ताश्च सम्भाराः सादरं गृहीता अजायन्त । कथावाचकाः प्रायेण नाना-पुराणनिगमागमपारदृश्वानोऽत्र प्राप्यन्त । तेष्वनेकेऽगाधज्ञाननिधयो मनोज्ञव्य-क्तित्वसमुल्लसितास्तेजस्विनस्त्यागनिष्ठा महात्मानोऽदृश्यन्त । ते सांख्य-वेदान्त-मीमांसान्यायोपनिषदादिशास्त्राणि कथाप्रवचनावसरे हृदयावर्जनकारिण्या पद्धत्याशिश्रयन् । श्रोतारः शास्त्रीयाणि निगूढान्यपि रहस्यानि अनायासेन बोद्धुं प्रवभूवुः । सर्वेऽपि संशयास्तेषां तदाच्छिद्यन्त । परामेव शान्तिं गाहमाना गृहान् निववृतिरे । प्रत्यहं प्रायेण ग्रामे-ग्रामे क्वापि रामायणकथा, क्वापि महाभारत-कथा, क्वापि श्रीमद्भागवतकथा, क्वाप्युपनिषदादिव्रततीर्थदानविषयिण्यः कथाः इह निरन्तरमश्रूयन्त । सादरं कथावसरे ज्ञानपिपासवस्तदा स्वकीयान् प्रश्नान् स्वकीयाः शङ्काः जिज्ञासाश्च निदधानाः प्राप्यन्त किञ्च कथाकोविदा-स्तेषां शङ्काजिज्ञासाः समादधतः, सन्देहान् निरस्यन्तः प्रश्नान्, उत्तरयन्तो-ऽध्यगम्यन्त ।[१]

महाकविः कालिदासः स्वकीयेविश्वविश्रुते शाकुन्तले नाटके सप्तमे अङ्के "दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयती"

१—"मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम्", श्रीमद्भागवतम्, स्क० १, अ० २, श्लो० ५ ।

,,—"......ब्रह्मोद्याः कथाः कुर्वन्......" हर्षचरितम्, उ० १ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्यादिपङ्क्तिभिर्भारतस्य कथाप्रियताम्प्रति मधुरमिङ्गितं विदधद्दृश्यते । एवमेव भासः "कथामधुरं ब्रुवन्तः" (पञ्चरा० १ अं०) इत्यादिना देशस्य कथासुरततां समुद्भावयन् प्राप्यते ।

वाहनम्

इतिहास-पुराणाख्यायिकादिसाहित्यमिह विषये साक्षित्वेन सन्तिष्ठमानमस्ति यद् भारतवर्षे चिरन्तनात् कालात् नानाविधानां वाहनानामुपयोगः कृतोऽभूत् । सार्थवाहाः जल-यान-भूयानद्वारेण वाणिज्यप्रयोजनेन दूरदूरतरदेशान् प्रति गमनं कृतवन्तः । जना रथप्रवहण-शकट्यादिभिरुपवन-विहार-नदी-तीर्थनगरान्तराणि च यातायातं कुर्वन्तोऽवालोकिषत । चक्रि-शताङ्गादिवाहनानि समरार्थं किञ्च पुष्परथ-कम्बलि-वाह्यक-याप्यादियानानि यात्रोत्सवादिनिमित्तमिह प्रायुज्यन्त[1] ।

अस्मद्देशस्य प्राचीनेभ्यो लघुलघुतरेभ्यश्च ग्रन्थेभ्यो विदितं भवति यदत्रत्याः जना यान-निर्माणकलायामपि निपुणा आसन् । सांयात्रिक-नैगमप्रभृतिपदानि किञ्च नौस्तरणिस्तरिरुडुपप्लवपोतवहित्र-पत्रादिकाश्च शब्दाः एवंविधाः सम्प्राप्यन्ते ये ज्ञापयन्ति यन्नानाविधानि यानानीह तत्तत्कार्यकलापनिर्वहणाय व्यराजन्त । अभिज्ञानशाकुन्तले कालिदासः "समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः" इत्येतदादिकं लिखित्वा स्वसमयस्य देशान्तरगामीनि यानानि प्रस्तवीति । आकरेषु भिक्षुवाहण-शरवाहण-दर्भवाहणादिवाहनानामथ च रथ-शकट्यादिवाहनानामुल्लेखो विद्यते । पतञ्जलिरश्वरथोष्ट्ररथगर्दभरथादिशकटानामुल्लेखं विदधानो दृश्यते । जैनसाहित्ये शकटिकाविशेषस्यापि वर्णनमाप्यते । तत्प्रचलनं कृष्णागोदावरीनदीमध्यभागेष्वदृश्यत । जातकेषु अश्वतरीरथस्यापि निर्देशः कृतोऽस्ति । संस्कृतसाहित्यस्य रथकार इत्येतस्माच्छब्दाच्च वाहनानां वैविध्यस्य बोधो भवति । आपस्तम्बशुल्वसूत्रे सद्रथमापविधिरपि प्रतिपादितोऽस्ति । लाट्यायन-श्रौतसूत्रेऽन्यविधानां च रथानां निरूपणमुपलभ्यते । पुरातने समये रथाश्चर्मवसनादिना आवृता अपि व्यधीयन्त । वास्त्र-काम्बल-चार्मरथानां वर्णनमिदमेव पुष्टीकरोति । ईशवीयाब्दात् प्राग्वर्तिषु शतकेषु वैयाघ्ररथस्य ख्यातिर्विशेषतोऽश्रूयत । वेस्सन्तरजातके लिखितया कथया ज्ञायते यत् कश्चिद्राजसूनुर्वेस्सन्तरः शतानां सप्ततिः स्यन्दनानि दाने ददौ । इमानि सर्वाण्यपि

१—राधाकुमुद मुकर्जीः हिन्दूसभ्यता, पृ० २९२,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वैयाघ्राणि स्यन्दनान्यासन् । महाजनजातकेऽपि (षष्ठे भागे, पृ० ४८-५०) दीपवैयग्घरथान् लक्ष्यीकृत्य गीतिरप्येका गीतास्ति । मृच्छकटिके प्रवहणनामकस्य यानस्य निर्देशः संलभ्यते । तत्रोक्तम्—

"स्थावरक, प्रवहणं गृहीत्वा पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छ" । (६ अं०) २

कौटिल्यस्यार्थशास्त्रे[1] रथानां वर्णनं वीक्ष्यते। तत्र सर्वपथीनस्य रथस्य निर्देशः कृतः। तस्मिन् ग्रन्थे कुशलः सारथी सर्वपत्रीण इति व्यपदिष्टः । रथचक्ररक्षकाः परिस्कन्दाः इत्यभिहिताः । एषः शब्दोऽथर्ववेदे (१५।२।६) तैत्तिरीये ब्राह्मणे (३।४।१।७), महाभारते च भीष्मपर्वणि (१८।१७) दृग्गोचरीभवति । वृषारोहिणो गोसादिनः, उष्ट्रारोहिण, उष्ट्रसादिनः:, अश्वारोहिणो युक्तारोहा इत्युच्यन्ते स्म । हलवाहिनो वृषाहालिकाः सैरिकाश्च न्यगद्यन्त । स गौः प्रशस्ततरोमतो यः शकटं सीरं चोभयमुदवहत् । ईदृग् गौः गोतर इत्यकथ्यत महाभाष्ये । प्राचीनसमये गुरुजनाचार्यमहात्मपण्डितदेवीनाञ्च प्रियं वाहनं शिविकाऽऽसीत् । राजानो महाराजाश्च यानत्वेन कुञ्जरांस्तुरङ्गांश्चोपयुयुजुः[2] । अविमारके प्रथमेऽङ्के— "इमां गजशालां प्रवेश्याहं‥‥‥गतवानस्मि"; प्रतिज्ञायौगन्धरायणे "शिविकायां प्रकामं दृष्टेति" इत्यादीनि वाक्यानि वाहनपरकाणि दृष्टानि भवन्ति ।

चित्रकला

चित्रालेखनं मनोरञ्जनकारिषु साधनेषु ललितासु च कलासु स्वीयां स्पृहणीयां विशिष्टतामभिव्याप्य विभातितराम्। इयं हि चित्रकला मानवसमाजस्य भृशमुपकारिणी । सा मानवस्य मनो विनोदयति; अर्थञ्चप्रचुरं प्रददाति, मनश्च तदीयं सुस्थिरं विदधाति । एषापि कला भारतेऽतिचिरन्तनकालात् प्रवर्तमाना दृश्यते । एतस्याः प्राचीनतरता बहुभिर्विविधैश्च प्रमाणैः प्रमाणीभवति । पुरातत्वविभागोद्योगेनोत्खातानां पदार्थानामवलोकनेन ज्ञातं भवति यत् तेषां-तेषां पदार्थानां विनिर्मितानां त्रिसहस्रवर्षाणि व्यतीतानि । मोहनजोदड़ोप्रभृतिस्थानेभ्यः

१—अर्थशास्त्रम्, २।४ ।

२—बुद्धचरितम्, ५।८१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आसादितासु मुद्रासु, भाजनेषु चानेकविधानि चित्राणि चित्रितानि व्यालोक्यन्ते। तानि चित्राणि महिषबलीवर्दधेनुप्रभृतिपशुसम्बन्धीनि सन्ति। आलिखितपश्वाकृतिषु स्पष्टमेव नैसर्गिकत्वं यथार्थत्वं च संलक्ष्यते।

विष्णुधर्मोत्तरपुराणे तृतीयखण्डे (४५।४८) चित्रमहिमा भृशं वर्णितः प्राप्यते। चित्रकला धर्मार्थकामविधायिनी, यत्रेयमुल्लसति तत्र मङ्गल्यं वर्षतीति तत्राम्नातम्। चित्रनृत्ययोरन्तराले सन्निकृष्टः सम्बन्ध इत्यभिधाय नृत्यं चित्रपरं स्मृतमिति च तत्र समुदीरितम्।

सोमेश्वरस्याभिलषितार्थचिन्तामणौ चित्राणां चतुर्विधत्वमुपपादितम्। तदेवम्—(१) विद्धम्, (२) अविद्धम्, (३) रसचित्रम्, (४) धूलिचित्रम्। शास्त्राणामवलोकनेनावबुध्यते यत् पुरा चित्राणि बहून् भावान् प्रचुरान् विविधांश्च पदार्थानभिव्याप्य विबभुः। तेषां प्रसारः शृङ्गारचेष्टा धर्माख्यानं यावदेव नासीदपि तु तेषां विस्तारस्ततोऽपि परे पर्यवालोक्यत। तद्द्वारेणेतिहासमाख्यायिकां, रीतिनीतिप्रपञ्चं, महापुरुषाणां चरित्राणि, भगवल्लीलाश्च भारतीयाः प्रकाशयितुमनिशमीहाञ्चक्रिरे। कामसूत्रे (पृ० २६) इतिहासपरकाणामाख्यानपटानामुल्लेखोऽप्यधिगम्यते। मुद्राराक्षसे प्रथमेऽङ्के लिखिता "ता देहि मे पवेसं जाव दे उवज्झा अस्स जमपडं पसारिअ धम्म उपदिसामि" इत्येषा पङ्क्तिरपि प्रमाणीकरोति यत् तदानीं चित्रकलया बहूनि कार्याणि सम्पादितान्यभूवन्। तस्मिन् पुराणतरे युगे देवदानवनागयक्षकिन्नरवृक्षलतागुल्मपशुपक्षिप्रभृतयोऽथ च वननदीगिरिसमुद्रगगनसूर्यशशिपयोदादिकानि प्राकृतिकानि दृश्याणि चित्रद्वारेण प्रादर्शिषत। नाट्यशालार्थं नेपथ्यानि नानाभावाभिव्यञ्जकास्तेते सम्भाराश्च चित्रकलानुकम्पयैव विनिर्मिता भवितुमशकन्। नाट्यवेश्मणामेव भित्तयो न साधारणगेहानामपि भित्तयश्चित्र-चित्रिताः अदृश्यन्त। चित्रं नाट्यं च उभयमपि तदानीं मङ्गलमिवामानिषाताम्। चित्रचारुतेहकियत्यत्राभिमताभूदिति भरतकृतात् नाट्यशास्त्रात् (२।८५-८६) सम्यग् विदितं भवति। परिणयादिशुभावसरेषु देवताश्चित्रार्पिताः विधाय[1] सभाजिता अभूवन्। वधूनां दुकूलानि तत्प्रान्तभागाश्च हंसमिथुनेनालङ्क्रियन्तेस्म। तादृशं दुकूलं वसानां स्नुषां विलोक्य

१—रघुवंशम्, १६।१६-१७।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जनस्तस्याः सद्योजातोद्वाहत्वमज्ञायि । अजन्तासु यथायथं तथैव चित्रं चित्रितं यत्कालिदासेन राजवर्णनप्रसङ्गे वर्णितम् ।

अधिमध्यभारतं मयसूरशैलगह्वरेषु इतिहासगोचरकालवर्तीन्याखेटविषयकाणि बहूनि चित्राणि सम्प्राप्यन्ते । रामगढ़-कन्दराद्वारे, मिर्जापुरस्य शिखरिणि चानेकानि चित्राणि भवन्ति प्रेक्षितानि । तानि चित्राणि स्फुटतया बोधयन्ति यत् पुरा भारतं सामान्यमेव चित्रचातुर्यं न न्यदधादपि तु चित्रकलायां तद् विस्मयकारिणीं चातुरीं जगाहे ।

अस्मदध्येतव्येषु रूपककारेषु भासः स्वप्नवासवदत्ते (६ अं०) चित्रचारुतां निदधानः प्राप्यते । दृश्यताम्—

"तत्र च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः" ।

सरगुजासन्निकृष्टस्य रामगढगिरेर्जोगीमाराभिधायां दर्यां दर्शितं चित्रणं हि ईशवीयाब्दात् पूर्ववर्तिनि प्रथमे शतके जनुर्लेभे । दक्षिणहैदराबादान्तर्गतायामजन्तायां रम्याणि चित्राणि गवालियरबाघस्थानि च चित्राणि सम्प्रेक्ष्यात्रत्यायाः कलायाः पुरातनत्वं प्रकृष्टतरत्वं च सिद्ध्यति । रामायणमहाभारतविनयपिटकादिग्रन्थेषु निर्दिष्टालेखनं ज्ञापयति यत् तत्तद्ग्रन्थप्रणयनकाले किञ्च तद्ग्रन्थेभ्यः प्राग्गामिन्यनेहसि चित्रकलायां जननिकरस्यातितरामनुरागो विरेजे । तारानाथो नामेतिहासपण्डितो बुद्धसमयात् प्राक्तनीं चित्रकलामुल्लिखन् यक्षनागक्लृप्तचित्रकर्म प्रस्तौति । ईशवीये तृतीयशतके वात्स्यायनो नाम बुधवर आलेखनकलायाः षडङ्गानि निरूपयामास । तदीयेन तेन निरूपणेन च प्रमाणीभवति यज्जनता चित्रैश्चित्रालेखनैश्चानिशं चेतो विनोदयन्ती समवायि । कालिदासो भारतस्येमामेव चित्रकलानुरागिणीं प्रवृत्तिं स्वकृतिषु सम्यग् दर्शयन् दृग्गोचरीभवति ।

तथाहि—यद्यत्साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।

तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम् ॥ (शाकु०, ६।१४)

गुप्तसाम्राज्ये किंच महाराजहर्षवर्द्धनस्य समये ग्रावणि, भित्तौ, फलके, वाससि, द्विपरदने, गात्रेषु च चित्राण्यक्रियन्त । एवंविधं किमपि वस्तु नादृश्यत

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यन्न स्यात् सचित्रम् । नृणां कृत्स्नमप्युपभोग्यं चित्रालङ्कृतमवाप्यत । सर्वेष्वपि धातुषु, काष्ठेषु, पत्रेषु च जनाः स्वां रसज्ञतां चित्रद्वारेणाकलयाम्बभूवुः । कादम्बरीकारेण विलासवत्याः महिष्याः प्रसूतिकागृहं वर्णयता तस्य विविधालेख्यललितत्वं निरूपितम् । हर्षचरित ज्ञापयति यत् तदानीं श्राद्धानन्तरं प्रथमं यत् कार्यं समपाद्यत् तदासीत् दिवंगतस्यालेखनम् । तदैतस्याः कलायाः प्रसारो वस्तुतो राजप्रासादादारभ्य पर्णशालामभिव्याप्य विलोकितोऽभवत् । विष्णुधर्मोत्तरपुराणे चित्रकलाचार्यस्य लक्षणमिदमुक्तम्—

"तरङ्गाग्निशिखाधूमवैजयन्त्यम्बरादिकम् ।
वायुगत्या लिखेद्यस्तु विज्ञेयः स तु चित्रवित् ॥
गुप्तं च चेतनायुक्तं मृतं चैतन्यवर्जितम् ।
निम्नोन्नतविभागं च यः करोति स चित्रवित् ॥

अस्मदभिप्रेतसंस्कृतरूपकेषु चित्रचारुताविषयिणी प्रतिपत्तिरधिगता भवति । तेन तत्समयस्य चित्रकलानुरागित्वं[1] ज्ञातं जायते । इह काश्चन पङ्क्तय उद्ध्रियन्ते येन तदानीन्तनस्य भारतस्य चित्रकलायां कौशलं तस्यां च तदीयं प्रेम प्रतिलक्ष्येत—

(क) "चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम्" । (मालविकाग्नि०)

(ख) "विदूषकः—भोः, अवरं किं एत्थ लिहिदव्यम् ।
राजा—श्रूयताम्—
कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी,
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य तरोर्निर्मातुमिच्छाम्यधः,
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ (शाकु०, ६।१७ ।

(ग) "वसन्तसेना—चेटि मदनिके, अपि सुसदृशीयं चित्राकृतिरार्य चारुदत्तस्य ?" (मृच्छ०, ४ अं०)

(घ) "इदं तावत् चित्रफलकं.........लघु आगच्छ" । (मृच्छ, ४ अं०)

१—बुद्धचरितम्, ८।२५ । रत्नावली, २ अं०, नाट्यशास्त्रम्, चित्राङ्गनिर्माणप्रकरणम्, २३।७३-७७ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वस्तुतोऽस्मदनुसन्धेयकालस्य भारतीयानां जीवनं परमरसिकमासीत् तत् कलासु नितरामभिरुचिं जग्राह ।

शिल्पम्

कला-शिल्पादिकमधिकृत्य जातकेषु अष्टादशविधानां महनीयानां शिल्पानां निरूपणं[1] निर्वर्णितम् । तत्र वड्ढकि-कर्मार-चर्मकारप्रभृतिशिल्पज्ञानां नामान्यपि प्राप्यन्ते । वास्तुशास्त्रमपि तदा समुन्नतमासीत् । तस्मिन् काले थपति-तच्छक-भ्रमकारा[2]दयोबहुविधाः काष्ठकर्मकृतः शिल्पिनोऽविद्यन्त । शिल्पविद्यायामिहैतावती महती समुन्नतिरासीद् यत् समुद्रपोतानाम[3]प्यत्र कुशला निर्माणकर्तार आसन् । पाषाण[4]कार्यकर्तारः 'पाषाणकोट्टका.' इत्युच्यन्तेस्म । मृच्छकटिके (४ अं०) निर्दिष्टम्—"अण्णोण्णं विचारेन्ति सिथिणो ।"

एतेन विवरणेन स्पष्टमेव तात्कालिकस्य समाजस्य स्थितिरस्मत् पुरत उपतिष्ठते । विदितञ्च जायते यद् भारतं तदानीन्तनं सुखितं समृद्धं कलासु विद्यासु च प्राप्तवैदग्ध्यमासीत् ।

१—जातकम् १, २६७, ३१४; ३, २८१; ४,४११; ६,२२ ।
२—तत्रैव १, २०१; ४, ३०३ ।
३— ,, ४, १५९ ।
४— ,, १, ४७९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अष्टमः परिच्छेदः

आर्थिक-स्थितिः

अर्थाद्धर्मश्च कामश्च स्वर्गश्चापि नराधिप।
प्राणयात्रापि लोकस्य विना ह्यर्थं न सिद्ध्यति॥
धनात् कुलं प्रभवति, धनाद् धर्मः प्रवर्तते।
अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप[1]॥

अर्थस्यैतदुपादेयत्वं महत्त्वञ्च यदुक्तं महर्षिणा व्यासेन तत्र तस्यानेहसोऽपि भारतं दत्तावधानमवापि यस्मिन्ननेहसि अस्मदीयाभिप्रेतरूपकाणामभूद् विरचनम्। अस्मद्रूपकाणां प्रणयनकालः शालिवाहन-शक-शुङ्ग-गुप्तादिशासनानां कालो वर्तते। एतस्मिन् कालेऽपि देशस्य वाणिज्यं परितोषास्पदमासीत् तदुच्चतरधरामधिष्ठितं व्यालोक्यत। वणिजो जलयानान्यारूह्य देशान्तराणि प्रयाय स्वदेशस्य वस्तूनि विक्रीणन्तो वैदेशिकानि च वस्तूनि क्रीणन्तः किञ्च तैर्नैजदेशस्य आपणान् परिपूरयन्तः समलक्ष्यन्त। जातक[2]साहित्यावलोकनेन वाणिज्यविषयका ऊर्जस्विनस्तेजस्विनश्च गतिविधयः सम्यग् ज्ञाता जायन्ते। सर्वदैवात्र शकटसार्थसमुदायाः प्राच्याः प्रतीचीं किञ्चावाच्याः उदीचीं दिशां यातुं सन्नद्धा एव अदृश्यन्त। ते देशस्य तत्तद्भागेषु स्थितानि नगराणि प्रति विविधान् पदार्थसम्भारान् प्रापयन्त प्राप्यन्त। अनाथपिण्डिकस्य शकटसार्था. श्रावस्तीतो राजगृहं यावद् यात्रामनुष्ठाय न्यवर्तन्त। ऊह्यते चैतद् यत्ते गान्धारानपि गमनविषयीकृतवन्तः। आकरेषु[3] तत्समयगामिवाणिज्यवर्णनं सविस्तरं कृतमवाप्यते। रामायणस्याधुनिके काले यद्रूपं दृश्यते तस्याधानमीशवीयतृतीय-चतुर्थशतकप्रत्यासन्नयुगेऽजनीत्येतत्साम्प्रतिकानामन्वेषणप्रियाणां प्रधीवराणां विचारश्चेत् तत् तथैव तदा तु रामायणस्य तत्तत्स्थलं वीक्ष्य ज्ञातमिदं जायते यत् तदानीन्तने भारते गुरुगुरुतरा उद्योगाध्य-

---

१—महाभारतम्, गी० प्रे०, पृ० ४४४०।

१—जातकम्, १।३२०; २।१९७; ४।१५६; १।१२२।

३—रा० कु० मुकर्जीः हिन्दूसभ्यता, पृ० २९२-२९६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वसाया देशस्यार्थिकीं शक्तिमुन्नमयितुं समिद्धं च कर्तुं प्रयतमाना अभूवन्[१]। महाभारतस्य यद्रूपं सम्प्रतीक्ष्यते तद्रूपं महाभारतीयम् ईशवीयाब्दपूर्ववर्ति ३२० तमाच्छतकादीशवीयपञ्चाशत्तमाब्दपर्यन्तं प्राप्तमभूदित्येतच्चानेकानुसन्धातॄणामिदानीन्तनानां निगदनम्। चेदेव खल्वभ्युपगम्येत तदा तद्रूपनिर्माणकालेऽपि भारतस्यास्मदीयस्यार्थिकीदशात्युन्नतासीदत्रत्या वणिजः स्वं देशं च धनधान्यवन्तं विधातुं प्रयासशीला आसन्निति साधु विदितं सञ्जायते[२]।

अस्मद्युगस्य श्रेणीनामुल्लेखोऽनेकशिलालेखेषु प्राप्यते। शिलालेखेषु नासिकस्थगुहामन्दिरोत्कीर्णशकोषावदातस्यलेखोऽतिमहत्त्वभाक् कथ्यते। तस्माल्लेखाद्[३]ज्ञायते यत्कौलिकादिव्यवसायिनां सङ्गठनं श्रेणीत्येतन्नामाभजत्। श्रेण्य एकतः स्वकीयं व्यवसायं सङ्गठनपुरस्सरं सञ्चालितवत्योऽपरतः परकीयं धनं निक्षेपत्वेन निधाय तत्कुसीदं धनप्रभुभ्यः प्रददुः। श्रेणीनां सविधे न केवलं सुवर्णरजतरूपं धनं न्यधीयत अपितु भूम्युपवनादिकाचलमपि धनं निक्षेपत्वेन न्यधायि। श्रेण्यो लाभस्यांशं नियतेषु धार्मिकेषु कार्येषूपयुयुजुः। शिल्पश्रेणीनां वर्णनं कौटिल्यस्यार्थशास्त्रे सविशदमवलोक्यते। वैदेशिकस्य व्यापारस्य तदानीं नितरामुत्थानं बभूव। मौर्यशासने श्लथतामुपेते सति यवनानां राज्यान्युत्तरपश्चिमीयभारते-प्रतिष्ठामधिगन्तुमवसरमापुः। परं तान्यपि देशस्यार्थसंवर्द्धने मित्रमिव कार्यं चक्रुस्तस्माद् देशस्यार्थिकी शक्तिरुपचितैवाभवत्। देशस्य वाणिज्यं देशान्तरेषु तीव्रतरां प्रकृष्टतराञ्च गतिमवाप। अस्मदभिमतरूपकाभिज्ञानशाकुन्तल-मालविकाग्निमित्रादिकानि सार्थवाह-श्रेष्ठि-वणिजां निरूपणं यद् विदधति तत् तत्कालवर्तिनीमार्थिकीं स्थितिम्प्रति स्फुटं प्रकाशं क्षिपति। तत्रवर्णितनगरादिसमृद्धिरपि प्रकटीकरोति यदवश्यमेव तदानीमिहत्यार्थिकदशा[४]सुपुष्टासीत्। गुप्तशासनवर्तिन्या शुक्रनीत्या[५] च तदानीन्तनस्य भारतस्य समुन्नतार्थवत्त्वं ज्ञातं जायते।

१—वा. रामायणे, अयोध्याकाण्डे, ९४ तमाध्यायः लङ्काकाण्डे च ९१ स०।

२—महाभारते, वनपर्वणि, ६४ तमेऽध्याये श्लो० ११०, १२४, १६०।

३—सत्यकेतु विद्यालङ्कारः भारतीय संस्कृति और उसका इतिहास, पृ० २७४-२७६।

४—दी कैंब्रिज हिस्ट्री ऑफ इण्डिया, खं०१, परि० २१, पृ० ४६५।

५—शुक्रनीतिः, अ० ४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः ?" (मुद्रा रा० १ अं०)

(ख) "शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा......" (तत्रैव, २ अं०)

(ग) "घृष्यन्ते धीरं वैदूर्याणि, छिद्यन्ते शङ्खाः, शाणयन्ते प्रवालकाः, शोष्यन्ते आर्द्रकुङ्कुमप्रस्तराः, सार्य्यते कस्तूरिका.." (मृच्छ. ४अं.)

इत्येतैः रूपकेषु स्थितैर्वाक्यैस्तदात्वस्य जनतायास्तत्तदर्थकरेषु कर्मसु संलग्नत्वं दृग्गोचरीभवति।

गुप्तशासनसमये देशेऽनेकानेककलानां प्रचारः प्रसारश्च व्यालोकि। तत्कालवर्तिन्यः सहस्रशो मूर्तय इदानीमाप्यन्ते। एतद् बोधयति यत् तदा सहस्रेभ्योऽपि परा नरा अर्थोपार्जनप्रयोजनेन तासु तासु कलासु प्रसक्ता आसन्। देशस्य वाङ्मयमत्र प्रमाणं यत् तत्समयवर्ती देश आध्यात्मिकतायां महतीं व्यावहारिकीं श्रद्धां निदधानोऽपि अर्थस्योपादेयतां मनागपि नोपेक्षाञ्चक्रे।

"सत्यं न मे विभवनाशकृतास्ति चिन्ता भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य यत् सौहृदादपि जनाः शिथिलीभवन्ति॥"

मृच्छकटिकस्य (१, १३) उपरितने श्लोके अर्थस्य लोकेऽपेक्षा कियन् मनोज्ञभङ्ग्योद्भावितास्ति।

मनुस्मृतेर्याज्ञवल्क्यस्मृतेश्च विरचनं गुप्तशासनात्[३] प्राग्बभूवेत्याधुनिकेतिहासविदां मतम्। चेदेवं तर्हि तयोरध्ययनेनार्थसम्बन्धिन्याः स्थितेः पर्याप्तं ज्ञानं भवितुमर्हति। मनुस्मृतौ भारतीयकृषीवलानां भूम्यधिकारिता प्रतिपादितास्ति। याज्ञवल्क्यस्मृतौ ऋणादान-लेख्य-स्वामिपालविवादादिप्रकरणानि पर्यवेक्ष्य ज्ञायते यदर्थोन्नयनार्थमत्र बहूनि साधनान्यङ्गीकृतान्यभूवन्। ईशवीयाब्दोदयात् प्रागिह लेखपाला बहवोऽदृश्यन्त। तस्य समयस्य सा लेखपालता प्रकटीकरोति तत्कालवर्तिनो देशस्य अर्थवादविवादसक्तत्वम्। अतएव, मन्ये, स्मृतिकारास्तां तां व्यवस्थां प्रदातुं तत् तच्च विधातुं परिस्थितिभिः प्रेर्यन्ते स्म।

भारतस्यार्थागमसाधनेषु कृषेः प्रामुख्यं तत्कालवर्तिभ्यो रूपकेभ्योऽप्यप्रत्यक्षतया विदितं भवति।

३—स० के० वि०: भारतीय सं० और उसका इति०, अ० १६, पृ० २९६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "दुवेवितुम्हे सुखं पणमिअ कलमकेदारा अण्णोण्णम्" (मृच्छ., १अं.)

(ख) "शशशपलक्कवलद्दे" (मृच्छ०, ३ अं०)

याज्ञवल्क्यस्मृतिरिमञ्च विश्वासं जनयति यत् तदा प्रसंविदायाश्च प्रथाऽप्रथत। शिल्पवाणिज्यात्मकसंगठनकारिण्यामाशायां तस्मिन् काले जनवृन्दस्य ध्यानं मौर्ययुगादपि दृढीयोऽवालोक्यत। 'उषवदात' ग्रन्थस्यात्राभिलेखः प्रमाणम्। श्रेणीनामपि कार्यक्षेत्रं तदानीं (शुङ्गकुषाणशकशालिवाहनादियुगे) भूतपूर्वयुगाद् विकसिततरमदृश्यत। तदीया मान्यताप्येधमानाभूदित्येतत्सकलं जुन्नरीयाभिलेखेभ्यः सिद्ध्यति। शालिवाहनकाले श्रेणीनामक्षयिण्यो नीव्यः प्रेक्षिता अभूवन्। महाभारतादिषु[1] तदुल्लेखनं यदवाप्यते तत् तदानीन्तनीनां श्रेणीनां विषय एव कृतं प्रतीयते। 'क्रयविक्रयानुशयो विवादः स्वामिपालयोः' इत्येषापि मानवी पङ्क्तिस्तस्य युगस्य वाणिज्यम्प्रति कदाचित् सङ्केतं विदधाति। तत्रैव—"तेषामाद्यमृणादानं निक्षेपोढस्वामिविक्रयः" इत्येतस्मिन् पदे विद्यमान 'निक्षेप' पदमस्मदुपरिकथितकथनं दृढयति। मनुस्मृतौ[2] तथाविधाः केचन श्लोकाः प्रेक्ष्यन्ते यैस्तत्कालवर्तिवणिजां पण्यवैचक्षण्यमभिव्यक्तं भवति। आपणेषु तदा नानावस्तूनि विक्रय्याणि सज्जितान्यदृश्यन्त। तत्तद्वस्तुनिर्धारणे कुशला वाणिज्योपजीविनः स्वधिषणायास्तिग्मतां दर्शयाम्बभूवुः। वाणिज्यमेतावद् गतिशीलमुच्छ्रितञ्चासीद् यन्नानावस्तुसम्भारोपस्करभारवतीः शकटीर्वहन्तोऽनड्वाहः सततमवालोक्यन्त।

"विपणिगत इव बलीवर्दः" (मालविकाग्नि०) अं० ४)

इत्येतदादिपङ्क्तयो नाटकीयाश्चोपरिप्रोक्तं परिपुष्णन्ति। भाण्डानामागमनिर्गमा[3]वर्थसंवृद्धेर्हेतुर्भवतः। भारतीयानि महर्घाणि भाण्डानि विक्रयहेतोः रोमदेशम्प्रति नीतान्यभूवन्। दक्षिणभारत-योरपयोश्च मध्ये तदा व्यापारः प्रवर्तमान आसीदित्येतत् सर्वं प्राचीनकालवर्तिनीभ्यः प्राप्ताभ्यो मुद्राभ्यः भवति विदितम्।

१—घोषयात्रापर्वणि (गीता प्रे०) पृ० १६५४।

२—मनु०, ८।३९८।

३—मनुः, ८।४०१; मनुः, ८।३९९।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतीयवैदेशिकवाणिज्योपरि गुप्तयुगस्य विवरणं साधुप्रकाशं क्षिपति। चीनदेशीययात्रिणां लेखाः प्रमाणीकुर्वन्ति यच्चतुर्थसप्तम[1]शतकमध्ये लङ्कया किञ्च इण्डोनेशिया-इण्डोचायनाभ्यां साकं तात्कालिकेन ताम्रलिप्त्याख्येन समुद्र-मार्गेण वाणिज्यं भारतीयैः सांयात्रिकैः कृतमासीत्।

इह पुरातने समयेऽश्वव्यापारोऽपि व्यालोक्यत। कालिदासस्य काले काम्बो-जाख्यं जनपदं तदर्थं ख्यातमासीत्। अमरकोषे वनायु-पारसीक-काम्बोज-वाह्लीक देशजा अश्वा उल्लिखिता लभ्यन्ते। माषपर्णी-मरीचिका-पिप्पली-चन्दनादिवि-विधद्रव्याणां वाणिज्यमिहत्यं देशान्तरेषु समचलत्। एतदर्थं मालकूटस्य (पाण्ड्य) पार्श्ववर्ती समुद्रमार्गो व्यश्रूयत। चीनांशुकं नाम वासश्चात्र दूरस्थदेशादानी-यत। एतत्सम्बन्धी व्यापारः स्थलाध्वना सलिलाध्वना च समपद्यत। प्राच्या ग्रन्था[2] अत्र प्रत्यक्षतोऽप्रत्यक्षतश्च प्रकाशं वितरन्त आप्यन्ते[3]। श्रूयते यदीश-वीयाब्दात् प्राग् आगस्टसः पाण्डयवंशसम्भूतमदुराराजप्रणिधेः स्वागतं चकार। येन मिथः सौहृदं वर्धेत वाणिज्यञ्च देशेषु प्रसरेत्। मृच्छकटिकादिषु आर्थिक-स्थितेस्तात्कालिक्याश्चित्रं तावदेवाप्यते यावद्रूपकं स्वसीमानुसारं तदालिखितु-मीष्टे तस्मात् तत्रत्याः पङ्क्तयः प्रायेण तत् स्थितेर्लघीयांसं सङ्केतमेव कर्तु महन्ति।

'सार्थवाहस्त्वां विज्ञापयति-जर्जरत्वाद् गृहस्य दूरक्ष्यमिदं भाण्डम्"
(मृच्छ०, ४ अं०)

इत्यादिपङ्क्तिष्वागतं सार्थवाह इत्येतत् किञ्च भाण्डमित्येतत्पदं वीक्ष्य तत्समयस्य सार्थवाहवत्त्वमथ चानेकवस्तु विभावितत्वञ्चोत्प्रेक्ष्यते।

पञ्चतन्त्रे वर्धमानो नाम वणिग् देशान्तरेषु भाण्डव्यापारं कुर्वाणो वर्णितः। तत्र तच्चित्रणमपि तद्ग्रन्थस्य पुरातनत्वात् समयस्य तस्य पुरातनस्य वाणिज्य-

---

१—स. के. वि.; भारतीय संस्कृति और उसका इतिहास, अ. १६, पृ. ३१४।
२—रघु० ४।४६, ४।७०।
३—दी हिस्ट्री एण्ड कल्चर ऑफ दी इण्डियन पीपुल, खं० ३, परि० २२, पृ० ५८९-५९२।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रियत्वं वितनोति । विष्णुपुराणा[१]च्चानेकवस्तूनां पण्यत्वं विदितं जायते । तत्रत्याद् वर्णनात् तस्माद् ब्राह्मणानां वणिज्वृत्त्यवलम्बनपरत्वमपि ज्ञातं भवति । अधः केषाञ्चन वैदेशिकविदुषां ते विचाराः स्वशब्दद्वारेण प्रकटीक्रियन्ते ये देशस्यार्थिकस्थितेरुपर्यालोकं पातयन्ति—

"एन्सेण्ट एण्ड मिडिवल इण्डियाऽऽख्ये ग्रन्थे ग्रन्थकार आह—"भारतस्य भूयांसि विविधानि च वस्तूनि देशान्तरे दृष्टान्यभूवन"। "हिस्ट्री ऑफ एण्टीक्विटी" पुस्तके तल्लेखको भणति—"ख्रैस्ताब्दात् प्राक् एकसहस्राब्दोर्द्धे फिनिशियनजात्या सह भारतीयानां करिरदन-चन्दन-काष्ठ-सुवर्ण-रौप्य-रत्न-मयूरादिषु वाणिज्योद्यमः प्रावर्तिष्ट ।" 'ट्रेजरीऑफ इण्डिया' पुस्तके तल्लेखकतल्लजोऽभिदधाति "सेलसिडराज्यानेहसि सीरिया देशेन समं भारतीयेन वाणिज्येन व्यतन्यत । भारतीयानि भूषणानि दुकूलानि च वारिपोतद्वारेण व्याविलोनम्प्रति प्रापितान्यभवन् । कौशेयक्षौमप्रवालमुक्ताहीरकादिव्यापरश्चिराय मिश्रदेशेन सार्धं प्रचलितो बभूव । अत्रत्या वणिजो हि कुञ्जररद-नीलादिपदार्थजातविक्रयणाय यवनदेशं जग्मुः । भारतीयान्यंशुकान्यामोदप्रदानि च वस्तूनि रोमाङ्गनाभ्यो भृशमरोचन्त ।

नव्यानां विद्वद्धौरेयाणामुदीरणमिदं यद् भरतस्य नाट्यशास्त्रं यस्मिन् रूपेऽद्य प्रतिष्ठितमस्ति तद्रूपं तस्येशवीये प्रथमे वा द्वितीयशतकाभ्यर्णे[२] विरचितमभूत् । तन् नाट्यशास्त्राध्ययनेन भारतस्य तत्कालवर्तिन्याः अर्थस्थितेर्बोधो जायते । तस्य नाट्यशास्त्रस्य त्रयोविंशेऽध्याये नानाविधानामाभरणानां वसनानां, रत्नानां, मुकुटानां, वेष्टनानां, बन्धनपट्टानां, प्रालम्बकानां, माल्यानां, प्रहरणानामायुधानां, यन्त्राणां, नीलपीत-हरितादिरङ्गानामन्येषां च बहूनां सम्भाराणामुल्लेखं वीक्ष्य मतिरेतं निश्चयं याति यद् दिनेषु तेषु भारतीयाः कलाकारास्तत्तन्निर्माणे संलग्ना आसन् अन्यथा नाट्यशास्त्रे तत्तत्पदार्थानामुल्लेखः कथं सम्भवो भवितुमर्हेत् । तदा तैस्तैर्वस्तुभिर्भारतीयाः पण्यागाराः सततमदीप्यन्त ।

१—विष्णु पु०, द्वि० अं०, ६ अ० । सत्यकेतु विद्यालङ्कारः भारतीय संस्कृति और इतिहास, अ० १६, पृ० ३१२-३१३ ।

२—प्रो० भोलाशङ्करः भरतमुनिकृतनाट्यशास्त्र, पृ० २५ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिवानक्तमत्रत्यासु आपणविशिखासु, वाणिज्यवेश्मसु, कलाकौशलनिलयेषु च सहस्रशो मानवाः कार्याणि कुर्वाणा एव प्राप्यन्त। अहो, यत्र तावन्त्यनन्तानि महामूल्यानि अनुपमानि मनोऽभिरामाणि वस्तूनि प्रत्यहं जनुरग्रहिषुस्तत्रत्यायाः वाणिज्यायाः अर्थसिद्धेश्च महिमा केन प्रकारेण गातुं मातुं च शक्यः स्यात्।

(क) "आभरणास्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।"

(विक्रमोर्वशीयम्, २।३)

(ख) भवति ! क एष पट्टप्राकारकप्रावृतः अधिकतरमत्यद्भुतपुनरुक्तालङ्कारालङ्कृतः अङ्गभङ्गैः परिस्खलन्नितस्ततः परिभ्रमति ?

(मृच्छकटिकम्, चतुर्थोऽङ्कः)

इत्येवंविधानां नाटकेषु विभ्राजमानानां श्लोक-गद्यानामवेक्षणेनावगम्यते नाटककर्तृणां कालस्यार्थसमृद्धत्वम्।

अस्मदीयस्य भारतस्य गगनं तदानीमनारतं कच्छपीघोषक-मृदङ्ग-दुर्दुर-पणव-विपञ्ची-शङ्ख-ढक्का-भेरी--पटह-डिण्डिम--त्रिपुष्कर--वीणादीनामातोद्यनां विरावेण गुञ्जितमेवाश्रूयत इदं हि भरत-नाट्यशास्त्रस्यत्रयोविंशाध्यायेन ज्ञायते। तत्तद्वादित्रादीनां कीर्त्तनमपि तत्रत्यमत्रत्यस्य समृद्धस्य स्वस्थस्य च वाणिज्यस्य दिशि मधुरतरमिङ्गितं विधत्ते।

जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य।
निह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि॥

(मालविकाग्निमित्रम्, १।२१)

इत्येतदादिपंक्तिभिरस्मदीयरूपकसाहित्यं च तात्कालिकीमार्थिकतामवान्तराध्वना समुपस्थापयति।

भारतं लोकापेक्षितानि सकलान्यपि वस्तूनि स्वयमेव ससर्ज। न तत् कस्यापि वस्तुनः कृते देशान्तराननमीक्षाञ्चक्रे। तस्य सविधे वाणिज्याय स्वकीया एव नावो रेजिरे[1]।

१—"पार्थानां दर्शयामास मनोमारुतगामिनीम् × × × सर्ववातासहां नावं यन्त्रयुक्तां पताकिनीम्। × × नावां शतानां पञ्चानां कैवर्तानां शतं शतम्।

(महाभारतम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "त्वं वापीव लतेव नौरिव जनम् ।" (मृच्छ० १।३२)

(ख) "केनोडुपेन परलोकनदीं तरिष्ये ।।" (मृच्छ०, ८।२३)

इत्यत्र नावमुल्लिखन् रूपककारश्च तत्कालस्योडुपवत्वं परिपुष्णाति। आकरेषु तरीनिरूपणमधीत्य पुरातनस्य कालस्य नौकाद्वारेण कियद्वाणिज्यमभूदिति सम्यग् ज्ञायते। वृहत् संहितायां पठिता :—

धननिचुललीनजलचरसितखगशबली कृतोपान्ते·······
स्वातौ प्रभूतवृष्टिर्दूतवणिङ्नाविकान् स्पृशत्यनयः·······

इत्यादिपङ्क्तयः किञ्च याज्ञवल्क्यसंहितायां एताः पंक्तयः—"ये समुद्रगा वृद्ध्या धनं गृहीत्वाधिकलाभार्थं प्राणधनविनाशशङ्कास्थानं समुद्रं गच्छन्ति ते विंशशतकं मासि मासि दद्युः" ज्ञापयन्ति यत् पण्यजीविनो वणिजः प्रचुरार्थलब्धिकाङ्क्षया नानादेशानगमन् । कदा कस्मिन् मुहुर्ते वणिग् वाणिज्याय देशान्तरं गच्छेदित्येतदत्र विचारितमभूत। एतद् विवरणं वेदयति यत् पुरातनं भारतमर्थक्षेत्रेऽपि विश्वस्य विश्वानपि विषयानधरीचकार।

वायुपुराणे, मार्कण्डेयपुराणे भागवते चैतादृशानि वर्णनान्युपलभ्यन्ते यानि भारतौकसां वणिजामुदकाध्वना यातायातं सम्यगवगमयन्ति। वाराहपुराणे गोकर्मनामानं वणिजमधिकृत्याभिहितं यद् वाणिज्याय प्रस्थितोऽसौ सांयात्रिको वात्ययातितरां सङ्कटं सेहे। तत्रैव पुराणे उदीरितं यज्जलपथेन स्थलपथेन च भारतीया वाणिज्यार्थं भूभुवने सर्वत्र विचेरुः। दरद-यवन-पारसकादिदेशांस्ते स्थलपथेनैव ययुराययुश्च।

"एवं निश्चित्य मनसा महासार्थपुरस्सरः ।
समुद्रमायिभिर्लोकैः संविदं सूच्य निर्गतः ।।
शुकेन सह सम्प्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्वे पोतवाहैरुपोषिता" ।। (वाराहपुराणे)

इत्येतदादि समुद्रव्यापारपरकश्लोकाः अनेके पुराणेषु विद्यन्ते येऽत्रत्यवणिजां समुद्रमुत्तीर्य देशान्तरेषु वाणिज्यार्थमुत्कटोद्योगावलम्बनं विनिगमयन्ति। स्थलव्यापारो जलव्यापारश्च गुप्तकालं यावदत्रातिशयवैपुल्यं प्रापेतीतिहासविदां

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मतम्[1]। कुल्याणां च सद्व्यवस्थानुष्ठिताऽभवद् येन भूभागा जलेन सिक्ताः स्युः स्याच्च क्षितिः सस्यश्यामला। भारतभूभुजोऽस्यां दिशायां दत्तावधाना अवाप्यन्त। चन्द्रगुप्तमौर्यो (ईशवीयाब्दात् प्रागवर्तिनि ३१० तमे शतके) जूनागढातन्तर्गतगिरिनगरे महान्तमेकं कासारं निर्मापयामास। २६० ईशवीयाब्दं परुदशोकः सेचनाय तस्मात् तडागादनेककुल्याः निःसारयामास। तदैव बन्धः १५० तमेशवीयेऽब्दे भग्नोऽभूत् प्रतीच्यस्य भारतस्य भूभुग् रुद्रदामा पुनस्तं कारयामास। क्व कियज्जलमपेक्ष्यत इत्येतदर्थमसौ श्लाघ्यं प्रयासमकार्षीत्। तदीयेनाध्यवसायेन कृषिर्द्विगुणीवभूव। राजतरङ्गिण्यां कल्हणः सूर्यस्य चातुरीमभिनन्दन् 'शंसति—सनदीस्तथा नर्तयामास यथाहितुण्डिकोऽहीन्।

ज्ञायते यत् स्वसमदस्य भूभागान् कुल्याभिः सिच्यमानान् विलोक्य कालिदासः शाकुन्तले (१, १५) तज्जनितवर्धितशोभमाश्रममेवं वर्णयति—

"कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः,
भिन्नोरागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुविच्छिन्नदर्भाङ्कुरायाम्,
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति॥"

पातज्जलभाष्ये हल्यपरमहल्यसीव्यपरमसीव्यादिशब्दा अधिगम्यन्ते। तेन तात्कालिकानां क्षेत्राणामायामं परिणाहवैविध्यं च व्यक्तीभवति। किञ्च कर्ष-वाप-मूलावर्ह-लवन-खल-निष्पाव-केदार-सीता-व्रज-गोष्ठ-हलिप्रभृतिशब्दान् कोषेऽथ च "तुतोष पश्यन् कलमस्य सोऽधिकम्" (४।३); "उपारताः पश्चिमरात्रिगोचरात्" (४।१०); किञ्च—

"कृतावधानं जितवर्हिणध्वनौ सुरक्तगोपीजनगीतनिस्वने।
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम्"॥ (४।३३)

इत्यादिकान् किरातार्जुनीयादिकाव्येषु श्लोकानधीत्य प्राचीनतरस्य भारतस्य कृषेः कमनीयता युक्ततया समक्षे समुपतिष्ठति। जनाः कृषौ कुशलतां

१—लूनियाः—भारतीय सभ्यता तथा संस्कृति का विकास, पृ० २०८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गता आसंस्ते पुष्कलं धान्यं विदेशानपि प्रहिण्वन्तिस्म[1]। तेन च प्रचुरमर्थमार्जिजन्। वैदेशिकाः सर्वविधजीवनोपयोगिनीं सामग्रीं देशादस्मात् परिगृह्य निमानरूपेण राजतपात्राणि, चषकान्, गायकान्, सेवाकारिणः, शावकान्, दासान्, दासींश्च सम्प्रेष्य भारतं प्रसादयितुं प्रायस्यन्।

ब्रह्मपुराणदर्शनात् ज्ञायते यद् देशः कृषीवलानां संस्थाः संवर्धयितुं सर्वविधोपादेयाश्च सामग्रीः समुत्पादयितुं कृषिजीविनां कृते साहाय्यं प्रोत्साहनं च प्रददौ। शुङ्गकाले ते कृषीवला अदण्डयन्त ये कृषावनवहिततामदीदृशन् वा तामक्षिण्वन्। सुवर्णमुद्राणां प्रचलनेन तत्समयस्यार्थशालित्वं व्यक्तीभवति। मृच्छकटिकादिषु संस्कृतरूपकेषु तदधिकृत्य "अले भट्टा, दश सुवण्णश" पदिट्ठोसि (२ अं०) इत्यादिपंक्तयोऽधिगम्यन्ते। मुद्राराक्षसे पञ्चमेऽङ्के इममेव विषयमभिव्याप्य "वणिग्भ्य क्रयादधिगतः, "अर्थशास्त्रव्यवहारिणामर्थवशात्" "इत्येतदादीनि पदानि लभ्यन्ते।

'आर्ट एण्ड क्राफ्ट इन इण्डिया' इत्येष ग्रन्थः प्राचीनतरभारतस्य जलपोतान् वर्णयन् अत्रत्यस्य समृद्धस्यार्थस्याभां सर्वेषामपि पुरः प्रस्तौति। अत्र ऋत्वनुसारं कर्षकाः सस्योत्पादनाय भुवमकर्षन्। गावो वर्धन्तामिति सततमभिलषितमभूत्—"गावो मे अहीनवत्सा भवन्तु (पञ्चरात्रम्, २ अं०) आश्विने उप्तम् 'आश्वयुजम्', ग्रीष्मे उप्तं 'ग्रैष्मिकं', वसन्ते चोप्तं 'वासन्तकं' सस्यं प्रोच्यतेस्म। कौटिल्यकृतार्थशास्त्रावलोकनेन विदितं भवति यद् देशे हरितकृषिः सस्यमिति, पक्वकृषिः 'मुष्टिरिति' व्याह्रियत। मैगस्थनीजस्य विवरणात् कुरुधम्मादिजातकेभ्यश्च ज्ञायते यत् तदा कृषिनिरीक्षणार्थमधिकारिणां नियुक्तिरजायत।

अर्थोपार्जनाय कृषिस्त्वन्यतमसाधनमासीदेव परमुपवनान्यपि साधनान्यर्थस्याभूवन्। देशे दिशि दिशि उपवनानि शुशुभिरे। जनास्तदुद्भूतफल-पुष्पादीनि विक्रीयापि धनमर्जन्ते स्म।

अर्थशास्त्रे उपवनानामारोपणविधिः सम्यग् वर्णितः। पुराणान्युद्यानानां महिमानं भृशं गायन्ति। तेन सिद्धयति देशस्योपवनसमृद्धित्वम्। मत्स्यपुराणे

१—लूनिया: भारतीयसभ्यता तथा संस्कृति का विकास, पृ० २१६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वृक्षोत्सवायोजनस्य कृते प्रेरणा प्रदत्ता दृश्यते। पद्मपुराणे वृक्षारोपणमहत्त्व-मुल्लिखितम्। वाराहमिहिरेण वृहत् संहितायां वृक्षायुर्वेदाध्याये वृक्षविकास-स्योपाया निरूपिताः। वनमित्येतत्पदमर्थद्वयवाचकमासीत्—(१) प्राकृतिक-मरण्यम्, (२) उद्यानं च। पुरगावण-मित्रकावणादीनि प्राकृतिकेष्वरण्येषु पर्यगण्यन्त किञ्च आम्रवण-खदिरवणेक्षुवणादीनि उद्यानेष्वन्तर्भूतान्यभूवन्।

कालिदासादिकवीनां भारतमुपवनैः सर्वथा शोभमानं बभूव। प्रेक्ष्यतामुपवन-श्रीः शाकुन्तले—

चूतानां चिरनिर्गतापि कलिका वध्नाति न स्वं रजः।
संनद्धं यदपिस्थितं कुरवकं तत्कोरकावस्थया॥
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतम्।
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम्॥ (६।४)

औषधि-वनस्पतिभेदेन वनस्यान्यद् द्वैविध्यं भवति। औषधि-फल-पुष्प-तृण-पर्ण-काष्ठादिपदार्था मानवमात्रोपकारिणः। रोग-वारणाय औषधानि, स्वास्थ्य-समृद्ध्यै देवार्चायै च फलानि प्रत्यहमुपयुज्यन्ते। काष्ठेन च बहूनि विविधानि च वस्तूनि निर्मीयन्त-इत्येतत् सर्वं विलोक्य तत्र विमृश्य च प्राञ्चो भारतीया वनेषूपवनेषु च नितरां स्वीयां प्रीतिं रुचिं च बबन्धुः।

पशुपालनमभ्यर्थकरम्। प्राचीनस्य भारतस्य पशवो हि उल्लेखनीयधनत्वेन मता अजायन्त। तत् पशुसहायतया सरलतापूर्वकं नैजं जीवनमृजुतामयं सात्विकतामयं च कर्तुं प्राभवत्। पालनीयेषु पशुषु गो-वृषाश्वा भृशमादृता अभवन्। वृषमन्तरेण कृषिः, गामन्तरेण देवतापित्रतिथिक्रियाः, अश्वमन्तरेण सैन्य-यानादिकार्यं न भवितुमशकन् अतस्तेषां रक्षणं, भरणं, वर्धनं ध्यानपूर्वकं कृत-मभूत्। सहस्रश्च जना स्तेषां क्रय-विक्रय द्वारेण जीवन्ति स्म।

कौटिल्येन अर्थशास्त्रे तदानीन्तनानां नृपाणामाश्रये परिपालितानामनुडुहां वाजिनां, द्विपानां, क्रमेलकानां रासभानां च संवर्धनं साधु प्रतिपादितम्।

(क) "अतीत्य हरितो हरींश्च वाजिनः" (शाकु० १ अं०)

(ख) "ओशालिदा मए शअडा, ता जाव गच्छामि..........जाध गोणा! जाध। (मृच्छ०, ६ अं०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(ग) स्वयमाहृत्य भुञ्जाना बलिनोऽपि ·····गजेन्द्राश्च······
(मुद्रारा०, १ अं०)

(घ) द्रोणः— गोवृषा इति । हन्त, सिद्धं कार्यम् । (पञ्चरात्रम्, १ अं०)

इत्यादीनि वाक्यानि तत्र सर्वत्र प्रकाशं पातयन्ति यत् सर्वमिहोपरि निरूपितम् । अत्रत्यं शालिहोत्रशास्त्रमिदं ज्ञापयति यद् भारतीयाः पशुपालनविज्ञानेऽपि परां प्रवीणतामवाप्तवन्तः । जीवनम्प्रति बहूपयोगित्वात् पशूनां, प्राचीना भारतीयास्तेषु भृशमस्निह्यन् । ते तज्जीवनम्प्रति सन्निकृष्टसुहृद इवासिद्ध्यन् ।

अनुपदमेवाभिहितं यदस्मदीयानि रूपकाणि स्वसमयस्य आर्थिकताम्प्रति मधुरमिङ्गितं विदधति । अत्र तेभ्यः कानिचनोद्धरणानि तद्विषयवैशद्याय प्रदीयन्ते—

(क) "को नु खलु अयमस्मिन् नगरापणालिन्दे सशङ्कितमतिस्निग्धं च सम्भाषते" । (अविमारकम्, अ० ३)

(ख) "······युवतिजनसमक्षं काममेतन्नवाच्यम्,
विपणिषु हतशेषा रक्षिणः साक्षिणो मे ॥
(चारुदत्तम्, १ अं०)

(ग) "·······विअ वणिजो णिद्दं ण लभामि । ········अहं विक्किणिद भण्डओ विअ वणिज्ञो सुहं सहस्सं । (चारुदत्तम्, ३ अं०)

(घ) "उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे" (मृच्छ०, ६ अं०)

(ङ) अथवा कदापि शिल्पिना घटितो भवेत् ।·········
वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टम् ॥ (मृच्छ०, ९ अं०)

अहो तस्य देशस्यार्थिकावस्थायाः उत्कृष्टता केन विधिना वर्ण्येत यत्रत्या गेहाः माणिक्यैः सुवर्णालङ्कारैर्मौक्तिकाभरणैर्नित्यं विद्योत्यमाना अदृश्यन्त ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्यास्य शिल्पिनो दिवानिशं रत्नानां परीक्षणे सुवर्णाभूषणानां निर्माणे निरता एव प्राप्यन्त—

(क) "पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।।
(मालविकाग्नि, १ अं०)

(ख) "अनतिलम्बिदुकूलनिवासिनी बहुभिराभरणैः प्रतिभाति मे ।।
(मालविकाग्नि०, ५ अं०)

इत्यादिपंक्तिभिर्देशस्य धनाभरणवत्त्वं शिल्पकलावत्त्वं च स्पष्टीभवति ।

प्राचीनेषु दिनेषु यातायातमार्गा नाना कान्ताराकुला अविद्यन्त । अतएव समवेता भूत्वा वाणिज्यजीविनः शकट-नौकादियानेष्वधिरूढाः सन्तो गमनमागमनं च कृतवन्तः तस्मादेव हेतोर्जातकादि ग्रन्थेषु संहत्यां तदीयं गमनं निरूपितं दृश्यते । मालविकाग्निमित्रस्य अधोलिखिताः पंक्तयस्तस्यामेव दिशायां प्रकाशं क्षिपन्त्य इव प्रतिभान्ति—

"स च अटव्यन्तरे निविष्टो गताध्वा वणिग्गणः ।.........

स इमां.......मया सार्धमपवाह्य भवत्सम्बन्धापेक्षया पथिकसार्थं विदिशागामिनमनुप्रविष्टः । (पञ्चमेऽङ्के)

धनलब्धेर्द्वाराणि भवन्ति शतशः । तदधिगमाय वर्द्धनाय च भारतीया उपायाननेकान् अवललम्बिरे । ते विविधानामायुधानां च निर्माणमकार्षुरची-करंश्च । आयुधानामिह महान्त आगारा अशोभन्त । प्रतिज्ञायौगन्धरायणे भासो लिखति—

"अमच्चो आह—आउहागारे चिट्ठदु किल अय्यो । पुरुसगुत्तो अऊं देसोत्ति" । (४ अं०)

तत्रैवागतेन—"निशितविमलखड्गः संहृतोन्मत्तवेषः ।
कनकरचितचर्मव्यग्रवामाग्रहस्तः ।।
विरचितबहुचीरः पाण्डुराबद्धपट्टः ।
सतडिदिवपयोदः किञ्चिदुद्गीर्णचन्द्रः ।। (४ अं०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतेन श्लोकेन च तत्र भवति क्षिप्तः प्रकाशोऽथ च कनकरचितानां चर्मणामपि निर्माणं ज्ञातं जायते।

इहत्येषु आपणमार्गेषु सततं श्रमरतैः शिल्पिभिः कलाकुशलैः कार्यलग्नै-रेवास्थीयत। क्वचिदनेकविधानां वादित्राणां, क्वचिच्चेतोहराणामंशुकानां क्वचित्पर्यङ्कोपयोगिनामास्तरणानां, क्वचिच्चित्राणां, क्वचित् कुङ्कुमकेसर-चन्दनोशीरालक्तकागुरुलवङ्गघनसारसुरभिपदार्थानां, क्वचित् क्रीडोपादानानां, क्वचिद्विद्युन्मयीनां कशानां, क्वचित् कटानां, क्वचिद् भृङ्गाराणाम्, क्वचित्प्लवानां, क्वचिच्चान्यविधानां वस्तुजातानां निचयैर्भारतविपणयो निषद्याश्चारुतया चकासन्त्य एव जगतादर्शिषत।

निम्नलिखितेभ्य उद्धरणेभ्य उपर्युक्तं सिद्ध्यतितराम्—

(क) "मम विअत्थरं अत्थरेहि।" (अविमारकम्, ३ अं०)

(ख) "स्वहस्तरचिता भूमिः कटप्रच्छदा।" (प्रतिज्ञयौ०, ३ अं०)

(ग) "...गुणेषु न तु मे द्वेषो भृङ्गारः प्रतिगृह्यताम्।" (,, , ४ अं०)

(घ) "प्लवतरणीय इवायमन्धकारः।" (अविमारकम् ३ अं०)

(ङ) "हला, अदिचिरं कन्दुएण कीलिअ...।" (स्वप्न वा०, १ अं०)

एतादृशं विपुलं वाणिज्यं नैव कदाचन मुद्रामन्तरेण चलितुं सम्भवम्। अतः अवश्यमेव तदा मुद्राणामपि प्रसारस्तर्क्यते। परं तर्कस्येहापेक्षैव नोत्तिष्ठति। पुरातत्वानुसन्धानप्रयत्नेन प्राचीनतरा बहुला मुद्राः प्राप्ताः सन्तीदानीम्। ता भारतीयेषु प्रदर्शनालयेषु शोभमानाः सन्ति। देशस्यास्य वाणिज्यं रोमदेशेन सार्धमासीदतस्तस्य देशस्य मुद्राः अपि लब्धाः सन्ति। तत्तन्मुद्रावलोकनेनात्रत्यस्य वाणिज्यस्य विस्तार उत्कर्षो व्यापकत्वं, विश्वविदितत्वञ्च समीचीनतयावगम्यन्ते। मनुस्मृते[1]र्दर्शनेन ज्ञायते यत् तदात्र निष्क-पण-शतमानादि-नामधेयानां मुद्राणां प्रचलनमासीत्। अस्मदीयेषु रूपकेषु चानेकविधानां मुद्राणां निर्देशः कृतो ऽवाप्यते—

१—मनु०, ८।२२०; ८।२२४; ८।२७६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "अपि च दक्षिणा माषका भविष्यन्ति ।" (चारुदत्तम्, १ अं०)

(ख) "आउसणिमित्तं णिक्क सदसुवण्णपरिमाणं दक्खिणं देवी··· ।" (मालविकाग्नि०, ५ अं०)

(ग) "एशा णाणकमूशिकामकशिका···" (मृच्छ०, १ अं०)

(घ) "तदो सुवण्ण सदप्पदाणेण तं णिसिसं···" (प्रतिज्ञायौ० १ अं०)

वस्तुतः पुरातनस्य तस्योच्चतरस्य व्यापकस्योत्कृष्टधरातलस्थितस्य वाणिज्यस्य सद्भाव एव मुद्राणां स्थितिं सुदृढतया प्रमाणीकरोति । न मुद्रां विना तद्विधस्य वाणिज्यस्य गतिः सम्भवा । निमानं न कदापि तत्र मूर्च्छति । मुद्रैव तत् साधनं यत्सहकृत्य तत् स्फीततया संस्फुरति, एधते च । सत्यं त्विदं मुद्रायाः उपयोगो भारत चिराद् दृश्यते । इदं हि तथ्यम् वेदब्राह्मणग्रन्थ[1]-बौद्धसाहित्यावलोकनेनावगतं जायते । परं वैदिकसामग्रीतो निश्चप्रचतया निष्कस्य मुद्रात्वं न सिद्ध्यति । सम्भाव्यते यत् निक्षेपत्वेन तद्व्यवहारस्तदानीं प्रावर्तत । तद्द्वारेण जना-वस्तूनि प्रापुः किञ्च प्रददुश्चेत्यनुमातुं शक्यम् । तस्मात् तत्प्रचलनं मुद्रावदासीत् । वैदिककालानन्तरं निष्को मुद्रात्वमुपेतइत्युत्प्रेक्ष्यते । महाभारत-जातकाष्टाध्यायीत इदमेव साधीयो भवति । डॉ०भाण्डारकरस्य मतेन जातकोल्लेखो निष्कस्यसुवर्णमुद्रात्वं विनिगमयति । पाणिनेः समय इह बहुमुद्राणां प्रसार आसीदित्येतत्सत्यं तत्रत्येभ्यः[2] कतिपयेभ्यः सूत्रेभ्यः सिद्ध्यति । भाण्डारकरडॉक्टरस्यायं विश्वासो यदसंस्कृतं 'हुण्डम्' हिरण्यमित्यकथ्यत । तदेव गच्छताऽनेहसा संस्कृतं भूत्वा मुद्राकृतिमवाप तदा तत् सुवर्णमित्यतां संज्ञां प्राप[3] । कौटिल्यानुसारेण सुवर्णं कर्ष-(८०गुञ्जा.) मितमासीत् । प्राचीनतरसुवर्णाख्यमुद्रायाः प्राप्तिः सम्प्रत्यपि न जातास्ति । गुप्तसमयवर्तीनि सुवर्णानि प्राप्यन्त इति कथ्यते । तान्यपि परिमाणे तावन्मितानि । सामजातके 'हिरञ्ञ-सुवण्ण' इत्येतावुभावपि शब्दावाप्येते । कौटिल्यस्यार्थशास्त्रे 'हिरण्यसुवर्णम्' इत्येतत् पठितम् । श्रीरामशास्त्रिणा 'हिरण्य-

१—ऋग्०५।१९।३; २।३३।१०; १।१२६।५ अथर्व०—२०।१३१।५।५।१७।४ । ऐतरेय—८।२२; शत०—१३।४।१।८

२—शतमानविंशतिक······५।१।२७; विभाषा कार्षापण—५।१।२९ ।

३—प्राचीन भारतीय मुद्राशास्त्र पृ० ५१ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्यार्थः 'पाश' इति 'सुवर्णस्य' सुवर्णमुद्रेति च कृतः। इत्थं सौवर्णमुद्राणां सद्भावः पाणिनि-कत्यायनकौटिल्यादिकाले आसीदित्युह्यते। तात्कालिकाः कार्षापणाख्या रजतमुद्रास्तु सहस्रशोऽद्याधिगम्यन्ते। मृच्छकटिकेऽष्टमेऽङ्के कार्षापणस्य निर्देशः कृतोऽस्ति—

"कहावरणं देमि शवोडिअंदे"। पुरा सुवर्णमाषकं नाममुद्रासीत् काचित्। एतद्धि उदयजातकतः (४।५८) पालिजातकतश्च (४।१०६) सिद्ध्यति। शतपथब्राह्मणतोऽपि ज्ञायते यत् पुरा शतमाननाम्नी कापि सौवर्णी मुद्राप्यासीत्। यदा सुवर्णं दक्षिणात्वेन देयमभूत् सा शतमानमुद्रा प्रदत्ताभवत्। गच्छता समयेन तस्या मुद्राया राजतमपिरूपं प्राचल्यत[1]। सायणकर्काचार्यकृतव्याख्यायां शतमानस्योल्लेखो दृश्यते। वैदिकेण्डैक्सश्चोल्लेखं कुर्वाणः प्राप्यते। शुङ्ग-कुषाणसमये कार्षापणस्य मानं प्रगुणतां नीतमभूत्। वर्धितमानं च तत् 'शतमानम्' इत्येतेन-नाम्ना व्यवहृतमजायत-इति कथ्यते। तक्षशिलोत्खननात् शतरत्तिकामानाः मुद्राः ईशवीयाब्दोर्द्ध्ववर्तिचतुर्थशतकगामिन्योलक्ष्यन्ते। ईशवीयाब्दात् प्राक्तनकालवर्तिसप्तमशतकाच्छतत्रयवर्षपर्यन्त (महाजनपदयुगे नन्दयुगे च) शतमानमुद्राणां प्रचलनमासीदित्येतदनुमीयते[2]। शाणाख्यापि कापि मुद्रा पुरा प्राचुर्येण प्राचल्यत[3]। तदुल्लेखः कात्यायनेन कृतोऽस्ति। चरके च तन्निर्देशोऽस्ति। मृच्छकटिके प्रथमेऽङ्केसमागतं नाणकपदं, मन्ये शाणकमित्येतदस्ति। अशुद्धिवशात् तत्र नाणकमिति दृश्यते। मुद्रासु कार्षापणानां व्यवहारः प्राचुर्येणासीदिति प्रतीयते। साम्प्रतं तेषामवाप्तिरेव प्रभूतसंख्यायां जातास्ति। माषो नाम मुद्रा ताम्रमुद्रासीत्। भासश्चारुदत्ते प्रथमेऽङ्के तदुल्लिखति—

"अपि च दक्षिणा माषका भविष्यन्ति।" काकण्यर्धकाकण्योरपिप्रचलनं बभूव। चुल्लसेहि जातके (१।१२०) सालित्तकजातके (१।४१६) च तयोर्निर्देशो

१—(क) शतपथ ब्रा०, ५।५।५।१६; (ख) १३।२।३।२;
(ग) कात्यायन श्रौ० सू० २०।२।६;

२—वासुदेवशरण अग्रवालः पाणिनिकालीन भारत, आर्थिकदशा प्र०;

३—आरण्यकपर्वणि १३४।१४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विद्यते। तत्तन्मुद्राणां प्रचारोऽत्रत्यस्य वाणिज्यस्य वा आर्थिकदशायाः प्रकर्षं प्रथयति।

वृधुषि–वार्धुषिकार्धकभागिक-पञ्चक-साम्वत्सरिक-दशार्ण-वत्सरार्ण-शिखावृद्धिायचितकाधियोगवृद्धि प्रभृतीनि वहूनि पदानि प्राप्यन्ते। तानि वोधयन्ति यदत्र ऋणप्रदानादानविषयकव्यवहार उच्चभूमौ प्रवृत्त आसीत्। स च व्यवहारो विना मुद्राः न सम्भव इति सरलतयैव बोद्धुं शक्यः[1]।

एतदुपरि प्रतिपादितं यद् गुप्तसाम्राज्ये शिल्पिनामिह दृढीयांसः सङ्घा अशोभन्त। ते सङ्घा अपि राज्यमिव देशस्य विभिन्नाः संस्थाः सफलतापूर्वकं चालयामासुः। ते देशे स्वायत्तसंस्थात्वेन रेजिरे। शिक्षा-धर्म-विविधव्यवसायानां चालनं तदा तन्निघ्नतायामासीत्। तदीयं नैजं विधानमप्यवर्तत। तच्च विधानं शासनमाद्रियत्। सङ्घ-कार्य-सम्पादनाय तदीयाः कार्यकारिण्यः सभाश्चावर्तन्त। सङ्घीयसदस्येषूदितान् विवादान् कार्यकारिणी सभाऽपश्यत् निर्णिनाय च। सङ्घानां सविधेऽतुलं धनमभूत्। स्वसदस्यान् रक्षितुं ते कोषान् प्रतिष्ठापयामासुः। ते न केवलं स्वायत्तसंस्थानां चालनं विदधुः, मन्दिराणि, बिहारान्, कूप-तडाग-धर्मशाला-क्षेत्रादिपुण्यकार्यकलापांश्च प्रति समुदं साहाय्यमपि प्रददुः। ते सङ्घाः स्वकीयमुद्राः अपि प्रयोक्तुं राज्यद्वारेणादिश्यमाना व्यालोक्यन्त। व्यतिरिच्य च तान् अत्र तन्तुवाय-कारु-वास्तुविदां च सभाः नैजं सङ्घटनञ्चासन्। तदीयं कार्यमासीत् स्वकलायाः प्रशिक्षणम्। कात्यायनलेखात् गण-पाखण्डपूगाख्यसंस्थानां स्थितेरपि बोधः प्राप्तो भवति। पूगाख्यसंस्था वाणिज्यजीविनामासीत्। मनु-याज्ञवल्क्य-विष्णुवृहस्पतिस्मृतयोऽप्यत्र प्रकाशं विकिरन्ति। गुप्तकालस्य शिलालेखेभ्योऽर्थ-क्षेत्रम्प्रति श्रेणीनां योगदानं[2] नितान्तं स्पृहणीयं बभूव। एकस्माच्छिलालेखाद्विदितं भवति यद् दुकूलक्षौम-

---

१—मृच्छकटिकम्, द्वितीयोऽङ्कः-नन्वहं दशसुवर्णान् इति। दूतवाक्यम्, १ अं.
(क) द्वादश सुवर्ण भारेण।
(ख) दीघनिकायो, प० भा० सोणदण्ड सुत्तं, पृ० १३१।

२—दी हिस्ट्री एण्ड क० आफ दी इं० पी०, खं० ३, परि० २२, पृ० ५९२-५९५।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निर्माणकारिणी श्रेणी दशपुरे सूर्यमन्दिरं ४३७-३८ ईशवीयाब्दे निर्मापयामास। एवं विधान्युदाहरणानि बोधयन्ति यच्छ्रेणीपूगनिगमादिसंस्थाः एकतो वाणिज्यकर्मणा देशं धनवन्तं चक्रुरपरतो देशे धर्मप्रचारे महत्त्वपूर्णं योगं प्रायच्छन्।

गुप्तकालो वाणिज्योद्यानम्प्रति वसन्तर्तुर्बभूव। देशीयो देशान्तरीयश्च व्यापारस्तदातितरां विचकाशे। तदा सस्यसुवर्णरजतरत्नकाष्ठक्षौमादिपदार्थानां क्रयविक्रयावुच्चतरां सीमां सिसिधतुः। दक्षिणापथः पट्त्रिंशद्विधानि वासांसि निर्माय तदा जगति महतीं कीर्तिं लब्ध्वा देशमर्थेनैधयामास[1]। उत्तरापथः कलाक्षेत्रे विस्मयप्रदां कुशलतामदीदृशत्। स कलाद्वारेण देशं समुत्कृष्टां श्रियं प्रापयन् तमर्थवन्तश्चकार। तदा द्वावध्वानौ नितरां लोकहितसाधकौ सिद्धावभूताम्। तयोरेकतरः पूर्वतो दक्षिणदिग्गामी; अपरश्च विदिशातो नासिकं गच्छन् सुदूरावाचीस्थप्रदेशमियाय। मौर्यकाले सामुद्रिकव्यापारस्य कृते कलिङ्गप्रदेशस्य समुद्रमार्गो विशिष्टमार्ग आसीत् परं गुप्तकाले तदितरपथाश्च विवृतिंययुः। तेनार्थिकसंवृद्धेर्वैभवस्य चाभूतपूर्वाभ्युदयः संवृत्तः। मुद्राराक्षसस्याधःस्थिता पंक्तिरत्र साक्षिणी भूत्वा भाति यदिदं भारतमीशवीयादिमशताब्दीषु अर्थतो न कथमपि कृशमासीत्। इहोत्तमोत्तमा विज्ञानविद आसन्; आसंश्च कलाकाराः—

(क) "अहो महान् विज्ञानराशिरुपरतः" (२ अं०)

(ख) "कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कारं प्रथमराजभवनद्वारम्" (तत्रैव)

अहो, तस्यानेहसः श्रीः केनविधिना वर्णयितुं पार्येत यस्मिन् समये ताम्रलिप्तिर्नाम प्रमुखं समुद्रद्वारं दरद-यवद्वीपादिनिमित्तेन वाणिज्यार्थं किञ्चान्ध्रेषु कृष्णागोदावरीयाणि द्वाराणि,[2] अथ च चोलेषु कावेरीपट्ट-टोडार्हद्वारे, अपि च

१—वी० एन० लूनियाः भारतीय सभ्यता तथा संस्कृति का वि०, अ० ११, पृ० २७६, अ० ७, पृ० १९१।

२—(तत्रैव) अ० ९, पृ० २१६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पाण्ड्येषु कोरकयीसलीभूरद्वारेऽथ च मालावारेषु कोट्टायमादिद्वाराणि व्यापारकार्यार्थमुद्घाटितान्यासन् ।

तात्कालिकं व्यापारमुद्दिश्य गौतम-वशिष्ठादिस्मृतिषु वर्णितं यत्, तदस्मदीयरूपकनिरूपितस्थितिसंवादि प्रतीयते ।" जेण दाव पुरट्ठावण विहारारामदेवलतडागकूव जूवेहिं·····" (मृच्छ०, ६ अं०) किञ्च "पापं करिष्यति धनार्थमवैरिजुष्टम्" (मृच्छ, ६।२२) इत्यादिना तात्कालिकस्य व्यवहारस्य सत्यपरता जनप्रवृत्तेश्च धर्मभीरुत्वं ज्ञातं भवति ।

कौटिल्यार्थशास्त्रे स्मृतिषु[1] च 'सम्भूय समुत्थानम्' इत्येतद् विषयिण्या वार्तया वाणिज्यजीविनः पुष्कले लाभेऽरज्यन्निति चावगम्यते ।

मौर्यशासनावसाने यवनराज्यमुत्तरपश्चिमीये भारते प्रतिष्ठापितमभूत् तस्मात् प्रतीच्ये जगति भारतीयः सम्बन्धो दृढतां प्रपेदे । भारतस्य पश्चिमीयसागरकूलाद् भारतीया वणिजो वनायु-मिश्रपर्यन्तं यात्वा वाणिज्यमनुतस्थुः । तेष्वहःसुमित्रस्य राजधानीं 'अलकजण्ड्रिया' विद्या-वाणिज्यसंस्कृतीनां वृहत्तरकेन्द्रस्थानमासीत् । भारतीया वाणिज्योपजीविनस्तत्राप्युपसस्रुः । रक्तसागरनीलनद्योः पथि कस्यचन वणिजो यवनान्यां लिखित एकः शिलालेखोऽपि प्राप्तोजातः। तस्माद् यवनभारतयोर्मध्ये प्रवृत्तस्य वाणिज्यस्योपरि प्रकाश आप्यते। अथ भारतीयोत्कृष्टवाणिज्यं तदानीन्तनं प्रमाणीकर्तुं, सार्थवाह इत्येतत्पदमात्रं पर्याप्तम्। रूपकेषु 'सार्थवाहं योद्धारः, (मालविकाग्नि०, ५ अं०); 'प्रभाते··········सार्थवाहस्य··········' (मृच्छ, ४ अं०) इत्येषः 'सार्थवाह' शब्दः प्रायेण प्राप्यते ।

ईशवीयप्रथमशतकव्यापी कालो वैदेशिकव्यापारदृष्ट्यास्त्युल्लेखनार्हः । नावो दूर-दूरतटसमुद्रान् यावद् विजह्रुः । तात्कालिके संसारे रोम-चीन-भारत साम्राज्यानि त्रीणि शक्तिशालीनि भूत्वा व्यराजन्त । भारतस्य स्थितेः रोमचीनयोर्मध्ये विद्यमानत्वात् देशस्यास्य वाणिज्यसम्बन्धस्तेन तेन देशेन सह दृढीयान् बभूव । हजारा-रावलपिण्डी-प्रयाग-मिर्जापुरप्रभृतिपुराणामापणेषु सम्प्रत्यपि लभ्यमाना रोममुद्राः अत्र प्रमाणम् ।

१—मनौ, अध्यायोऽष्टमः; गौमम स्मृतौ, एकोनत्रिंशाध्यायः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्तु, भावोऽयं रूपकेष्वर्थमुद्दिश्य ये केऽपि सङ्केताः प्राप्यन्ते तेषां पुष्टिः साहित्यिकेभ्यो ग्रन्थेभ्यो जातकेभ्य इतिहासेभ्यः स्मृतिपुराणादिभ्यः शिलालेखेभ्य उत्खननप्राप्तपदार्थेभ्यः सम्यग् जायते। विदितं च भवति स्पष्टतया यदस्मदीय रूपकाणां कालस्य भारतमर्थदृष्ट्या नितान्तं समृद्धमासीत्। भारतमस्यामर्थदिशायां साफल्यमवाप इत्यत्र कारणमस्ति तदीया विश्वजनीनसंस्कृतिस्तदीयं पुण्यं चरित्रं तदीयः पावनश्चाचारः। एतेषामेव गुणानामवलम्बनेन तद् यथान्येषु क्षेत्रेषु पुराग्रणीर्बभूव तथैव तदर्थक्षेत्रेऽपि तदग्रेसरतां लेभे। न तस्य निवासिनः सिकन्दरमहमूद-चंगेजखाँ-सीजर-तैमूर-नैपोलियनादिका इवार्थमुपार्जयितुं लब्धुं वा नृशंसतां शिश्रियुर्न च ते पर-सम्पद्धरणं बलात् पर-सम्पद्ग्रहणमेव विधातुं प्रावर्तन्त। 'सर्वे भद्राणि पश्यन्तु' 'भद्रं कर्णेभिः…' इत्येतदादिभावनापूर्वकं ते व्यवाहरन् अत एव लक्ष्मीः स्वयमेव तान् सहर्षमवारीत्।

———

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नवमः परिच्छेदः

धार्मिक-स्थितिः

आदिकालाद् एव भारतौकसां धर्म-प्राणत्वं भुवि विदितचरम्। यादृशी श्रद्धा प्रीतिश् च धर्मे इहाऽदृश्यत न तादृशी कुत्राऽप्यन्यत्राऽवालोक्यत। अयम् एव प्रमुखो हेतुर् येन भारतं पुरातनेऽनेहसि भू-मण्डलवर्तिनः सर्वान् अपि देशान् धर्म-पथम् अदीदृशत्। प्रतिकर्म-कलापम् आचारे विचारे च व्यवह्रियमाणा तदीयाऽनन्य-धर्मनिष्ठा, तद्-अर्थं, तत् तेजः, तद् ओजः, तद् बलम् असृजद्, यद् अखिलेऽपि विश्वे तद् अगमद् अजेयताम्। अतः सुरा अप्यत्र जन्म लब्धुं सोत्सुकम् अचीकमन्त। अत एवोक्तं भवति—

गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारत-भूमि-भागे।
स्वर्गाऽपवर्गस्य च हेतुभूते,
भवन्ति भूयः पुरुषाः सुरत्वात्॥ इति।

'यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः', इत्येतल्लक्षणकं धर्मं परित्रायमाणो भारत भूमातृको जनो रागे द्वेषे च जुगुप्समानो विश्वस्य श्रेयः प्रेयश् च सम्पादयन् नैजं जीवनम् अनैषीत्। येनाऽनवद्येन चरित्रेण, येन च पूतेन विचारेण, यया च विमलया क्रियया पवित्रया च प्रवृत्त्या समेषाम् अपि दैहिक-मानसिक-बौद्धिक-विकासः कृत्स्नतया सम्पद्यते; त एवाऽऽआचारविचाराऽऽदिका उपाया अत्र धर्म इति नाम्ना व्यपादिश्यन्त। दीन-दरिद्रेषु दया, असहायानां साहाय्यं, सत्यस्याऽनुसरणं, न्यायस्य परिरक्षणम्, अशरणस्य संत्राणं, मर्यादाया गोपनं, गुरु-जनानां सेवनं, विद्यायाः परिग्रहणं, नीतिपथस्याऽङ्गीकरणं, वचनस्य रक्षणं, नारीणां सम्माननं, स्व-स्ववर्णाऽऽश्रम-नियमानां परिपालनं, सारल्येन जीवन-यापनम्; परसम्पदः प्रत्यगृध्नुताऽऽदि च भारते 'धर्म' इति निगद्यतेस्म।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतं धर्मं प्रति शुङ्ग-कालतो हर्ष-वर्द्धनस्य कालं यावद् भारते कीदृश्यावस्थाऽवर्ततेत्यत्राऽस्त्यनुसन्धातव्यम् ।

यज्ञ-दान व्रत-तीर्थाटन-देवाऽर्चन-तपश्चरण-विद्योपार्जन-गुरुजननिषेवण-स्नान-ध्यान-जप-स्तवनाऽऽदिकानि कृत्यानि तैरेव जनैर्गृहीतान्यवाप्यन्त येषां संख्या सात्त्विकेभ्य आसीद् भूयसी । धर्मस् तदानीम् अधर्मायैवाऽकल्पत । धर्माऽऽत्मानो जनताया विप्रलम्भाय धर्मं प्रायुञ्जत । जनतायां धर्मं प्रति निष्ठाऽवश्यम् अराजत, परं सा कार्श्यम् आलिङ्गितुम् उत्सुकताम् अदधात् । मानवास् तु प्रायेण धर्मार्थं स्वान् असून् अपि हातुम् उद्यताः समलभ्यन्त; परं धर्मोपदेष्टृषु भूयांसः परिगृहीतदम्भा बभूवुः । धर्म-ग्रन्थ-स्वाध्यायिनस् तु ववृतिरे परं ते धर्म-ग्रन्थाऽध्ययनं, धर्मस्य व्याख्यानं, धर्मस्योपदेशम् एव धर्माऽऽचरणं धर्म-रक्षणं च मेनिरे । एताम् अवस्थां वीक्ष्यैव महाकविः कालिदासः मालविकाग्निमित्रस्य प्रथमेऽङ्के—

यस्यागमः केवल-जीविकायै, ते ज्ञान-पण्यं वणिजं वदन्ति ।।

इत्येवं विलिखति । राज-वृत्तिं परिगृह्य योऽजीवद् ब्राह्मणोऽसाव् अनिन्द्यत—'भो महाब्राह्मण ! कामम् एतद् अभिनन्दनीयं, तथाऽपि वयम् अत्र मध्यस्थाः' इति । एषा शाकुन्तले कालिदासोक्तिः केषाञ्चन भूसुराणाम् आदत्त-राज-वृत्तित्वम् एव सूचयति ।

जाति-वादस्य प्राबल्याज् ज्ञानस्य प्रवाहः संकीर्ण-स्थल-स्थित एव समजायत । कामं ब्राह्मणो मूर्खो भवतु, परं स ब्राह्मण-जात्याम् उत्पन्नत्वाद् आत्मानं सर्वेषां पूज्यं श्रेष्ठं चाऽमंस्त । 'किं शोभनो ब्राह्मण इति कल्पयित्वा राज्ञा प्रतिग्रहो दत्तः'; 'पाटच्चर, किम् अस्माभिर् जातिः पृष्टा' इत्यादिकाः कालिदास-कृत-शाकुन्तल-गताः पङ्क्तयोऽत्र प्रमाणत्वेनोपस्थापयितुं शक्यन्ते । ब्राह्मणास् तदानीन्तनाः प्रायेण निमन्त्रणभोजिनोऽजायन्त । ...'चेद् ब्राह्मणो भोजितस् तदा महान् स धर्मं आचरित' इत्येषा हि धारणा तात्कालिके समाजे बद्ध-मूलेवाऽभवत् । मृच्छकटिकस्य 'अस्माकं गेहे अशितुम् अग्रणीर् भवत्व् आर्य'......'भवत्व् अन्यं ब्राह्मणम् उपनिमन्त्रयानि' इत्यादि-पङ्क्तयोऽत्र प्रमाणम् । हन्त यद् यज्ञोपवीतं धर्म-रक्षायै समाजे धृतम् अभूत्, तद् अपि तदा—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतेन मापयति भित्तिषु कर्ममार्गम्,
एतेन मोचयति भूषणसम्प्रयोगान् ।
उद्घाटको भवति यन्त्र-दृढे कपाटे,
दष्टस्य कीट-भुजगैः परिवेष्टनञ्च ॥[1]

इत्यादि-कर्मसु प्रायुज्यत ।

अनेक-देव-वादः, उच्चावच-भावना, अस्पृश्यता, मतमतान्तराणि, कूप-तडाग-प्रपा-सदाव्रताल्पायुष्ककुमारीपरिणयाऽऽदिकानि कार्याण्य् एव धर्मत्वेन निश्चित्य भूताऽर्थो हि धर्मो न्यक्-कृतो वभूव तथाहि—'नमो वरदाय कुमार-कार्तिकेयाय' इत्येषा मृच्छकटिकीया; 'जयतु भगवती कात्यायानी' इत्येषा अविमारक-स्थिता,

उदय-नवेन्दु-सवर्णावासवदत्तावलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥

इत्यादिका च स्वप्नवासवदत्तस्थाः पङ्क्तयो देव-वादम् उच्चैर् घोषयन्ति ।

'जादी तुज्झ विसुद्धा माता भेरी पिदा विदे पड हो'

इत्यादिषु मृच्छकटिक-स्थितेषु वचःसु स्फुटतयोच्चावचतायाः दर्शनं केन न विधीयते ? उच्च-जातित्वं हन्त धर्मत्वेन मतम् अभूत् ।

'वऊं दक्खिणत्ता अव्वत्तभासिणो । खस-खत्तिखडो'······इत्यादिनाऽस्पृश्यताम्, 'उट्ठेड, उट्ठेड बुद्धोवासिआ' इत्यादिना च मतमतान्तरतां, 'भो भो आर्या ! येन तावत् पुरस्थापन-विहाराराम-देवकुल-तडाग-कूप-यूपैर् अलङ्कृता नगरी उज्जयिनी' इत्यादिना च कूप-तडागाऽऽदि निर्माणं धर्म इत्य् अभिदधाति शूद्रकः ।

धर्मस्य या परिभाषा पुराऽगृह्यत सा तदानीं परिवर्तमानेवाऽलक्ष्यत । लोको धर्म-कञ्चुकेनाऽऽवृत्याऽऽत्मानम् अधर्मे प्रावीवृतत् । मानवेषु हव्य-कव्यो रुचिस् त्व् अजागः, परम् अमन्त्रत्वं तत्र दृष्टम् अभवत्—'मन्त्रहीनम् अवज्ञातं तेषां

१—मृच्छकटिकम् ३, १६ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दत्तं क्व गच्छती'ति ? अपुष्पवत्याः कन्यायाः प्रदानम् अपि धर्म एव तदानीम् अमन्यत 'यस्तु पुष्पवतीं कन्यां...तस्या भ्रौणध्न्यम् आप्नुते[1]' ।

वस्तुतस् तस्मिन् काले -धर्म-क्षेत्रे महान् विप्लव एवाऽदृश्यत । नानावादाः बहुलाः सिद्धान्ताः, प्रचुराणि मतानि, बहवो विश्वासा अश्रूयन्त । कश्चिच् शिवोपासकः, कश्चिच् च विष्णु-भक्तः, अन्यः शक्ति-पूजकश् चाऽऽसीत्; एकस्मिन्न् एव बौद्ध-धर्मेऽनेकाः शाखा अजायन्त न्यूनाधिकमात्रायाम् । पौराणिकादिवादाः कर्मभक्त्याऽऽत्मविषयकाश् च सिद्धान्ताः प्रचलिता आसन् । सम्राजः कनिष्कस्य काले देशेऽश्वघोषसंकाशा त्रिपश्चितो बुद्धधर्माऽनुयायिनोऽभूवन् । महायान-सम्प्रदायस्य विकासे ते विद्वांसः प्रायेण कारणम् अभूवन्, ये समन्वये निदधू रुचिम् । महायाने श्रद्धालवः सुधियो बोधिसत्वेऽनुराग-विशेषम् अदर्शयन् । महायानस्य स्मरणं यदा विधीयते, तदा नागार्जुन-वसुबन्धु-धर्मकीर्ति-प्रभृतयः समक्षे समुपतिष्ठन्ते । यस्मिन् युगे तादृशो मनीषिणो रेजिरे, तस्मिन् समये धर्मविषयिणी चर्चा कीदृशी बलीयसी वा तनीयसी भवितुम्, अर्हतीत्य् अनायासेनोत्प्रेक्षितुं शक्यते । 'मानव-जीवनम् अहो प्राकृतिकेषु नियमेषु सन्तिष्ठते, न च तत् कर्मापेक्षि'—इत्येवं विधाः सिद्धान्तास् तदाऽपि श्वसन्तोऽवाप्यन्ते । हुएनसाङ्गफाह्यानादिकानां लेखाः[2] स्पष्टम् एव तस्याऽनेहसः धर्माऽऽकुलतां प्रकटीकुर्वन्ति । शांकरभाष्य-श्लोकवार्तिक-सर्वदर्शनसंग्रहाऽऽख्य-ग्रन्थानाम् अध्ययनाद् विदितं भवति यत् तदा हीनयान-महायानाभिधो बुद्धवादो वैभाषिक-सौत्रान्तिक-माध्यमिक-योगाचाराऽऽख्येषु सम्प्रदायेषु विभक्तो भूत्वा बभ्राजे । काश्मीरप्रदेशे विभाषा प्राधान्येनाऽधीताऽभूत् । वसुबन्धुः (ई० ५ मे शतके) विभाषाम् अध्येतुम् इयाय कश्मीरान् ।

सौत्रान्तिक-सिद्धान्तस्य महाव्याख्याता श्रीलाभो नाम विद्वत्-तल्लजो बभूव । वसुबन्धुः स्वीये कोष-भाष्ये तस्योल्लेखं चकार । हुएनसाङ्गोऽयोध्यायां तम् आश्रमं प्रैक्षिष्ट, यत्र कानिचिद् दिनानि श्रीलाभ उवास । त्रिविष्टपीयेतिहास-

---

१—महाभारतम्, पृ० ५५४५, ५५४६ ।

२—दी हिस्ट्री एण्ड कल्चर आफ दी इण्डियन पीपुल (सं० ३, परि० १८, पृ० ३७८) ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विदः सिद्धान्तस्याऽस्योपरि न प्रकाशं क्षिपन्तोऽवाप्यन्ते। प्रो० तकाकुसुर् मन्यते यत् सौत्रान्तिक-सिद्धान्तो हरिवर्मणः सत्यसिद्धि-सम्प्रदायाद् उद्बभूव। हरिवर्मा भारतं तृतीय-चतुर्थ-शतकयोर् अन्तरालेऽध्यासाञ्चक्रे।

माध्यमिक-सम्प्रदायस्य प्रतिष्ठापको नागार्जुन ईशवीयं प्रथमं शतकम् अलंचकार; लिलेख च मूलमध्यम-कारिकाम्। शून्यताम् असौ सर्वथा पर्यपुष्णात्।

योगाचार-सम्प्रदायस्य प्रवर्तको मैत्रेय ईशवीये तृतीय-शतके प्रादुर्बभूव। स मध्यान्त-विभागाभिसमयालङ्कारप्रज्ञापारमितोपदेशसूत्रालङ्कारमहायानोत्तर-तन्त्रधर्म-धर्मताविभङ्गाभिधान् पञ्च ग्रन्थान् अग्रथ्नात्। स्थिरमति-दिङ्नाग-प्रभृतय आचार्याः सम्प्रदायम् इमम् अध्यतिष्ठन्। क्लेशाऽऽवरणज्ञेयाऽऽवरणे विनश्यतो यदा, मुक्तेर् भवति तदा लाभ इति मनुते योगाचारः (विज्ञान-वादः)।

श्लोकवार्तिक-तन्त्रवार्तिक-टीका-काराणां श्रीकुमाररिलभट्टानां साहित्यम् अधीत्येशवीयं षष्ठं शतकं यावत् कियत् क्रूरतायाः प्राबल्यम् आसीद् इति स्फुटतया ज्ञायते। तस्य विवरणोपस्थापनस्य केवलम् उद्देश्यम् एतद् एव यद् वयम् अनुसन्धेयस्यानेहसो धार्मिकीं चर्चां ज्ञातुम् अर्हेम।

'यावद् अहम् अपि ब्राह्मण-समुदाचारम् अनुष्ठास्यामि ···साङ्गोपाङ्ग-वेदम् अधीये······श्राद्धकल्पं चे'त्येता भासकृताः प्रतिमा-पङ्क्तयो ज्ञापयन्ति किं वा सम्भावनां जनयन्ति, यत् तेन कालेन सङ्घर्षशीलेन भवितव्यम्। विविध-धर्म-वादनां सद्-भावाद् विप्रास् तदा स्वाऽभिप्रेतं वादं प्रवर्तयितुं भृशं सावधाना अजायन्त।

तदानीं वेद-सम्मत-सिद्धान्ता अवैदिकाश् च सिद्धान्ताः प्रावर्तन्त। सर्वेऽपि ते सिद्धान्तिनः स्व-स्व-सिद्धान्तान् प्रसार्य्य तं तं विश्वासं वा धर्मं प्रत्य् आवर्जयितुं प्रायतिषत। रूपकाणि दिशायाम् एतस्याम् अवश्यम् एवेङ्गितं विदधति। कामं तत्र तद्-वादानां विवरणं साक्षात् प्रत्यक्षे वा न स्यात्।

'आवदे चन्दे समाजदाणि सव्वणक्खताणि। अयं बम्हण भावं। ईहा मत एण समण एण अभवं दी आदि' इत्येतानि प्रतिज्ञायौगन्धरायणस्य वाक्यानि तस्य कालस्य वैदिक-धर्माऽवैदिकधर्मवत्वं तु स्पष्टम् एवाऽऽविर्भावयन्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुराणानाम् आधुनिके समये यद् रूपम् अवलोक्यते, तद् रूपं तदीयं गुप्तकाले समागते सति पूर्णताम् अगमद् इत्येतद् इदानीन्तनं मतं वरीवर्ति । तच् च युक्तम् अपि प्रतिभाति; तत्र तत्-कालवर्तिनीनां घटनानां दर्शनात् । विष्णुपुराणे मौर्य-वंशस्य, मत्स्यपुराणे दक्षिण-दिग्-वर्तिनाम् आन्ध्र-नरेशाणां (२२५ तमेशवीया-ब्दगामिनाम्) वायुपुराणे च गुप्तसाम्राज्यस्य विवरणम् प्राप्यते । एतद् हि पौराणिकं विवरणं प्राधान्येन वर्णाश्रम-धर्मपरकम् अवाप्यते । तस्माद् सिद्ध्यतीदं यत् स कालोऽवैदिक-धर्म-निरासाय किं च वैदिक-धर्मोद्धाराय प्रायतत । निपातोन्मुखान् वर्णाऽऽश्रम-धर्मान् उत्थापयितुं तदानीं बृहदान्दोलनान्य् अप्य् अक्रियन्तेति ब्रह्मपुराणाद् विदितं भवति[1] ।

महाभारते भगवन्तं कृष्णं प्रति वयं गार्हस्थ्य-धर्मम् उपदिशन्तीं पृथिवीम् अश्नुमहे । तद्-उपदिष्ट-कर्तव्य-परान् वयं मृच्छकटिक-प्रतिमादिरूपकेषु चारुदत्ता-ऽऽदीन् प्रेक्षामहे । एतेनाऽवबुध्यते यत् महाभारतस्य तत् तत् स्थलं पौराणिकं कालम् अभिव्याप्नोतीति ।

केषुचित् श्लोकेषु वयं तस्याऽनेहसः पौराणिक-धर्म-प्रियत्वम् ईक्षामहे । तथाहि—

यासां वलिर्भवति मद्-गृह-देहलीनां,
हंसैश्च सारसगणैश्च विभक्त-पुष्पः ।
तास्वेव पूर्व-वलि-रूढ-यवाङ्कुरासु,
बीजाञ्जलिः पतति कीट-मुखावलीढः[2] ॥

द्विजोच्छिष्टै रत्नैः प्रकुसुमित-काशा इव दिशो,
हविर्धूमैः सर्वैः हृत-कुसुम-गन्धास्तरुगणाः ।
मृगैस्तुल्या व्याघ्रा वधनिभृत-सिंहाश्च गिरयो,
नृपे दीक्षां प्राप्ते जगदपि समं दीक्षितमिव[3] ॥

१—ब्रह्मपुराणम्, २ भा०, क्लाइवरो० पृ०, १३३२-१३३८ ।
२—मृच्छकटिकम्, १, ९ ।
३—पञ्चरात्रम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मखशत-परिपूतं गोत्रमुद्भासितं मे,
सदसि निविडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम मरण-दशायां वर्तमानस्य पापैस्,
तदसदृशमनुष्यैर्घुष्यते घोषणायाम्[१] ॥

एवं तेषु तेषु रूपकेषु विभावितेयं धर्माऽऽचरण-भावना प्रत्याययति तत्-काल-वर्तिनां भारतीयानां वैदिक-धर्माऽऽनुराग-निष्ठत्वम् ।

मृच्छकटिकाऽऽदिषु रूपकेषु यत्र तत्रेदृशान्य् अपि वाक्यान्य् आसाद्यन्ते यानीदम् अपि बोधयन्ति यत् तदा बौद्ध-जैन-धर्मेऽपि जनाः प्रीतिं निदधुः । परं रूपक-काराणाम् अस्मदीयानां प्रवृत्तिः सर्वथा पौराणिकताम् एवाऽनुधावति । सत्यपि धर्माऽऽन्तरे न सा स्वीयम् अभिनिवेशं तत्र निदधाति । एतेनेदम् अपि तर्क्यते यच् श्रौतः स्मार्तश् च धर्मस् तदा स्वेतरं धर्मं पराबभूव । तदा जन-निकुरम्बं यं धर्मम् अवलम्ब्याऽजीवत् तस्य धर्मस्य छविं सम्यक् निबध्नन्त्य् अस्मत्-प्रियाणि रूपकाणि ।

इतिहासोऽत्र साक्षी यच् शुङ्गाऽन्ध्र-शक-गुप्त-कुल-सम्भवा महीपाला बहून् यज्ञान् वितेनुः । यज्ञ-कर्मस्व् एतद्-युगस्य क्षितीन्द्रा महतीं रुचिं निहितवन्तः । पुष्यमित्रो नाम राजा पौराणिक-धर्माऽनुरागितायां ख्यात आसीत् । गुप्त-सम्राजो वैदिकान् विधीन् विमर्श-सहितम् उररीचक्रुः । ते नियतम् एव वाजपेयाऽग्निसोमातिरात्र-निभान् मखान् अनुतष्ठुः । समुद्र-गुप्तोऽश्वमेधम् आततान । इदं च पुण्यं कर्म चिरं स्मृति-पटले समारोपयितुम् असौ स्वर्णमुद्राश् चालयामास । शुङ्ग-समयाङ्गीकृतां वेदोक्त-धर्म-भावनां गुप्त-सम्राजः समीचीनं पोषयामासुः । तत्-कालवर्तिभ्यो लेखेभ्यः सिद्ध्यति यद् भूपतयोऽमात्या धनिकाश् च द्विजेभ्यो मन्दिर-भूमि-प्रभृति-बहु-वस्तु-जातं श्रद्धया प्रददुः । तस्मिन् काले विनिर्मितेषु मन्दिरेषु शिव-विष्णु-सूर्या-ऽऽदि-देव-प्रतिमाः प्रतिष्ठापिता अक्रियन्त । गुप्त-युगे वैष्णव-धर्मो वा भागवत-सम्प्रदायोवाऽतितरां लोक-प्रियतां जगाम । श्रीकृष्णो विष्णोर् अवतारत्वेनाऽगृह्यत । यदा वैष्णव-धर्मस् तथाविधं सम्मानम् अविन्दत, तदा शैव-धर्मोऽपि

१—मृच्छकटिकम्, १०, १२ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पूजनीयताम् इयाय । यदा गुप्त-पल्हव-शुङ्ग-नरेन्द्रा वैष्णवा आसन् तदा वाकाटक-नाग-मैत्रक-कदम्बादि-राजकुलानि शिवम् अयजन्त । शिवस्याऽपि मन्दिराणि तद्-भक्तैः पुष्कलान्य् अकार्यन्त । साधारण-जनतायां यक्षा नागाश् चाऽपूज्यन्त । गणेश-कार्तिकेयाऽऽदिकान् अप्य् आराधयन्तो जना तदानीन्तना दृश्यन्ते ।

बौद्ध-धर्मस्याऽभिलेखान् विलोक्य ज्ञायते यद् गुप्त-शासनात् प्राक् शुङ्गाऽऽदि-शासनानेहसि देशे धार्मिक्य् असहिष्णुता धर्मोन्मादाऽऽतङ्कश् च विजृम्भतेस्म । पुष्यमित्रो बौद्ध धर्माऽऽरातिर् आसीत् । एवं-विधां धर्मेऽसहिष्णुतां गुप्तसम्राजो न गोपायांचक्रुः । फाइयानोऽभिदधाति यद् गुप्त-शासने बौद्धा अपि राज्याऽवलम्बम् अवाप्तुम् अशकन् । भारतीये धर्मे एतावती द्रढीयसी शुचिता ग्रहण-शक्तिश् च तदानीं स्थिताऽभूत् । तस्या एव फलं यद् यवना अपि भारतीय-धर्मस्य वशं गताः । अनेके देशान्तरीया महीपा भारतीय-धर्मे दीक्षिता अभूवन् । मिनेण्डरोऽपि बौद्धधर्मं जग्राह । यवनास् तु तथा भारतीये धर्मेऽरज्यन् यत् ते तत्-प्रकर्षाय दानम् अमितं ददुः । मध्यभारत-स्थित-भेलसायां राजमानो गरुड-स्तम्भो यवन-राजदूत-हेलियोडोरस-निर्मित इति सर्व-विदितम् एव । एते व्यतिकरास् तत्कालीनस्य धर्मस्यौदार्य्यं प्रथयन्ति । तस्मिन् काले भारतस्य धर्म-प्रियत्वात् सर्वत्र तद्-विधानि स्थलानि साधनानि च भूयिष्ठानि धनवन्तो राजानश् च समुत्पादयामासुर् यद् आश्रित्य जना रहसि स्थित्वा साधनासु रता भवेयुः । धारणाम् एतां—

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलैः ।
मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।।

खगा वासोपेताः सलिलमवगाढो मुनि-जनः ।
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनि-वनम् ।।

इत्यादिकाः स्वप्नवासवदत्ताऽऽदि-रूपकस्थिताः श्लोकाः पुष्णन्ति । जनेषु नृपेषु च तदा दाने महती रुचिर् विललास । तथाहि—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतत्तु मां दहति यद् गृहमस्मदीयं,
क्षीणार्थमित्यतिथयः परिवर्जयन्ति।
कस्याऽर्थः कलशेन को मृगयते वासो यथा-निश्चितम्।
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्॥

इत्यादयः श्लोकाश् चेह प्रमाणम्।

तदानीन्तने भारते शिक्षणाऽऽदि-सम्बन्धिन्यः संस्थाः सर्वा दान-द्वारेणैव संचालिता अजायन्त। तासां जीवनं दानेनैव गतिं लेभे। राजानो महाराजाश् च धनवन्तः, श्रेष्ठिनश् च सतां महात्मनां सेवायाम् अमितं धनं धर्मम् उत्थापयितुं व्यतरन्। बुद्धमतावलम्बिनो हि बौद्धधर्मस्य पल्लवने यत् साफल्यम् अवापुस् तत्र कारणं श्रीमतां दानम् एव। जातक-ग्रन्थाः, पालि-साहित्यं, जैन-साहित्यं वैदिकं च साहित्यम् अत्र ज्वलत् प्रमाणम्।

अस्मदीयेषु कालिदासादि-प्रणीतेषु रूपकेषु तीर्थानां य उल्लेखः समवाप्यते तेन ज्ञायते यत् तदा भारते तीर्थेषु श्रद्धा प्रगाढाऽऽसीत्। एतस्याः श्रद्धायाः प्रसारणस्य कार्यं पुराणानि चक्रुः। रूपककाराः स्व-रूपकैस् तां श्रद्धां पर्यपोषयन्। अभिषेक-प्रतिमा-दूतघटोत्कचादिकेषु तीर्थपराण्य् अनेकानि पद्यानि स्फुरन्ति।

शुङ्ग-शातवाहन-वंशौ ब्राह्मणाव् आस्ताम्। अतस् तदा ब्राह्मण-धर्मो विशेषेण गरिमाणम् अध्यारुरोह। वर्णानां कर्तव्यानि निर्धारयितुं कृतः तदानीन्तनः प्रयत्नः प्रकटीकरोति यत् तदा ब्राह्मण-क्षत्रियादिकाः स्ववर्ण-धर्मे प्रमादधियम् एव निबबन्धुः। अत एव तु तादृशः प्रयत्नः पुनर् व्यवसितोऽभूत्[1]। सवर्ण-विवाह एव धर्म-सम्मतोऽभवत्। परं धर्म-ग्रन्थानाम् एव विवाह-दाय-भाग-प्रकरणाऽवलोकनेनाऽसवर्ण-विवाहानाम् अपि प्रथा सिद्ध्यति। परवर्णकृत-भोजनं तदोचितं न मतम्। पात्र-निरवसितता[2] इदम् एवाऽभिव्यनक्ति। तदा काश्चनैतादृशा विश्वासा जीविता आसन् येषु जनता धर्मबुद्धिं निदधौ। प्रमाणे चाऽत्र—

१—जयचन्द्र वि०: भारतीय कृष्टि का क ख, (पृ १८७)।
२—महाभाष्यम्, २, ४, १०।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इंदे प्पवाहि अन्ते, गोप्पशवे शंकमं च तालाएं ।
शुपुलिशपाणविपत्ती, चत्तालि इमे ण दट्टव्वा[1] ।।

श्लोकोऽयम् उपस्थापयितुं शक्यते ।

नारीणां पातिव्रत्यं गुरु-जन-निदेश-र्वातत्वं स्वामि-भक्तिः, अन्ये च एवं-विधा आचारा न 'धर्म' एवाऽपितु परमो धर्म इत्येतेन शब्देन व्यपादिश्यन्त । तत्-काल-र्वातरूपकेष्व् आचारवतां चर्चाऽनुमापयति यन् नूनं देशस्याऽस्य जनताया भूयान् भागस् तत्-तदाचारं जुषते स्म । रूपककारा जनताया यादृशीम् अभिरुचिम् ईक्षन्ते, तादृशीम् एव सामग्रीं च ते प्रस्तुवन्ति । दारत्यागोऽघं, परस्त्री-स्पर्शः पापम् इत्येतस्या एव भावनायाः प्रदर्शनम्—

'दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः[2]'

इत्येतस्यां दुष्यन्तोक्त्यां कुर्वाणः कविः कालिदासः प्रतीयते । 'आर्य चारुदत्त, स्वामि-नियोगोऽपराध्यति' इत्येतस्मिन् मृच्छकटिकीय-वाक्य-मुकुरे तत्-काल-गामिन्या जनतायाः स्वामि-भक्तेर् दर्शनं सञ्जायते । मध्यम-व्यायोगस्य 'न हि न हि पुत्र, विनिमाय गुरुप्राणान्' 'माता किल मनुष्याणाम्' इत्यादीनि वाक्यानि तस्य कालस्य गुरु-निदेश-र्वातत्वादिकम् अभिव्यञ्जन्ति ।

धर्मक्षेत्रे समागताया विश्रृङ्खलतायाः कारणं, तदानीन्तन्या राजनीत्या दुर्बलत्वं मन्ये । देशे राजशक्तेर् विघटितत्वाद् अनेक-वैदेशिक-बल-संस्थान-सन्निविष्टत्वाच् च धार्मिकाणां समुच्चयः स्वच्छन्दताम् अगमत् । बौद्ध-भिक्षवः सुखेषु न्यपतन्, पौराणिक-धर्मानुगा आडम्बर-भाजो बभूवुः[3] । 'तिष्ठ तावद् गुणाऽन्तरमजानन्' इत्यादि-वाक्य-स्थले समुपलब्धः सन्दर्भस् तद्-अभावम् एव भासयति मालविकाऽग्निमित्रे । 'वेदार्थान् प्राकृतस् त्वं वदसि न च ते जिह्वा निपतिता'[4] इत्यादिना प्राकृता वेदाऽध्ययनाय मन्त्रोच्चारणाय वा नादिष्टा

१—मृच्छकटिकम्, अङ्कः १०, श्लो० ७ ।

२—अभिज्ञान-शा० ५, २६ ।

३—सत्यकेतु वि०: भारतीय संस्कृति और उसका इतिहास (अ० २०, पृ० ३६१) ।

४—मृच्छकटिकम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभूवन्न् इति सिद्ध्यति । धर्मकञ्चुकप्रवेशशिनस्तृणच्छन्नकूपोपमस्य तवाऽनुकृतिं प्रतिपत्स्यते' इत्यादिना च तस्य समयस्य धर्म-कञ्चुक-धृत्त्वं कविः शाकुन्तले दर्शयति । मित्रं प्रति साहाय्य-प्रदानं तद्-रक्षाऽर्थं स्व-जीवनोत्सर्गोऽपि तस्मिन् युगे दृश्यते । तत्-कृतेऽपि प्रमाणत्वेन—'ता एदिणा विणि भण्णमुंचि तदु पि अव अस्सो चन्दनदासोति—इत्येतद् मुद्राराक्षसस्य वचो निदर्शनत्वेनेह निधीयते ।

समाजे तदानीं कीदृशी धार्मिक-स्थितिर् आसीद् इत्येतस्मिन् विषये न केवलम् इतिहास-पुराण-काव्य-रूपकादिभिः प्रकाशः क्षिप्यतेऽपितु तात्-कालिकानि चैत्य-स्तूप-तोरण-मूर्ति-प्रभृति-वस्तून्य् अपि सम्यक् ज्ञापयन्ति तत्-कालवर्तिनीं धर्माऽवस्थाम् । मथुरा-पाटलिपुत्र-हैदरावादादि-स्थानेषु विद्यमानानि प्रदर्शन-भवनानि तस्य युगस्य ताम् अपि दृष्टिम् उपस्थापयन्ति या धर्म-पराऽऽसीत् । तत्र स्थितानां तेषां तेषां प्रतिमा-तोरणाऽऽदि-वस्तु-जातानाम् अवलोकनेन स्पष्टं भवतीदं यद् वस्तुतस् तदा जनानां धर्मे सैव प्रवृत्तिः शुशुभे या तात्कालिके रूपकादि-साहित्ये वर्णिता वर्तते ।

ईशवीयाऽब्दोदयात् प्राग्-वर्तिनः प्रथमाच् शतकाद् ईशवीयं षष्ठं शतकं यावद् वैदिकाऽवैदिकयोर् उभयोर् अपि धर्मयोः सद्भावः समवाप्यते; परं तयोर् अवैदिकः स्वजीवनस्य संध्यायां पदं निदधानोऽवलोक्यते । तद्-इतरश् च स्व-जीवनस्योच्छृङ्खले तारुण्ये कृतप्रवेश इव संलक्ष्यते खलु । भावोऽयम्—

पुराण-धर्मो नितरां चकाशे,
बौद्धो हि वादः पतनं जगाम ।
पुनर्दिदीपे व्रत-तीर्थ-पूजा,
कथाऽदिवह्निर् जनमानसाऽध्वरे ॥

———

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दशमः परिच्छेदः

नैतिक-स्थितिः

शुङ्ग-कण्व-शकशालिवाहनादिशासनसमयवर्तिभारतस्य राजनीतिकस्थितिर्ग्लाना कृशा च विलोकिताऽभवत् किञ्च धार्मिकस्थितिरप्यनुदारतां सङ्कीर्णताञ्च प्रपन्ना वीक्षिताऽभूत् परं तत्कालाभिव्यापिनोऽस्मद्भारतस्य नैतिकं बलं सुदृढमुज्ज्वलं गरीयश्च भुवि व्यालोक्यत । तदानीन्तनस्य भारतस्य नैतिक बलवत्तायाः दीप्यमानं प्रमाणं किं युक्ततरमन्यत्स्याद् यद् ये केऽपि वैदेशिका यात्रिण[1]स्तस्मिन्काले समाययुस्ते सर्वेऽपि मुक्तकण्ठतया भारतीनां चारित्र्यस्य नैतिकतायाश्च महतीं प्रशंसां कृतवन्तः । एतद् व्यतिरिच्य तत्समयगामिसाहित्यावलोकनेनापि तत्कालवर्तिनां भारतीयानां निहितोज्ज्वलतरनैतिकबलत्वं प्रकटीभवति । अत्र तदीया नैतिकी शक्तिः कीदृश्यासीदित्येतदेव ज्ञातुं यत्नः क्रियेत ।

अन्यायनिष्ठं स्वामिनं विरोद्धुं स एव मानवः प्रभवति यस्य सविधे नैतिकं बलं विलसति । सत्यमेवेदम्—'आचारो मित्रमुत्तमम्' । स्वाभिमते काले साधारणतरेऽपि भृत्ये तादृशीं नैतिकीं शक्तिं वीक्ष्य हृदि सम्भावनैषोत्तिष्ठति यदवश्यमेव तत्समयस्थेन समाजेनोच्चतरसीमाव्यापिनीं नैतिकतां गतेन भवितव्यम् ।

"कथं विदूरतया न कोऽपि शृणोति ? तत् किं करोमि ? आत्मानं पातयामि । यद्येवं करोमि, तदा आर्यचारुदत्तो न व्यापाद्यते । भवतु, अस्याः प्रासादवालाग्रप्रतोलिकातः एतेन जीर्णगवाक्षेण आत्मानं निक्षिपामि.........
हं हो चाण्डालौ ! अन्तरमन्तरम्" । (मृच्छ०, १० अं०)

प्रथमतस्तु कस्यचन भृत्यस्य कृते दुष्करं कार्यमिदमेव यदसौ कठोरहृदयेन स्वामिना सह विरोधं कर्तुं प्रभवेत् ततश्च कठिनतरं कार्यमेतद् यत् कस्यचन जनस्य जीवनं रक्षितुं स्वकीयं जीवनमप्युत्सृष्टुमीशीत । तद् विधं त्याग-

---

१—फाइयानः ईशवीयचतुर्थशतकान्ते आगतः ।
हुएनसांगः ६३० तमेशवीयशतकाभ्यर्णे आगतः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कार्यं वस्तुतो नैतिकबलभागेव विधातुमर्हति । स्थावरक नामकचेट इव जनोऽपि यस्मिन् काले तादृशं पूतं नैतिकं बलं निदधानो यदा दृग्-गोचरो भवति तदा तत् समयवर्तिसमाजेन नैतिकताश्रीशोभितेन भाव्यमित्येतदनुमानं समुत्थितं जायते ।

जनकौलीनात् तदानीन्तनाः पुरुषा भूयांसोऽनिशमभैषुः । ते तस्मादाचरणादात्मानमनारतमत्रायन्त यस्मादपवाद उद्भवति । असह्यानि दुःखानि, विषमाः क्रूराश्च विपदस्तेषु भूयांसो जनाः न्यायार्थं धर्मार्थं च सहर्षं सेहिरे । शूद्रकश्चारुदत्तस्य चरित्र-चित्रणव्याजेन तस्यानेहस आभिजात्यगतं वैशिष्ट्यमुपन्यस्यति—

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसोऽस्ति मे विषादः ।
एको मां दहति जनापवादवह्निः
वक्तव्यं यदिह मया हता प्रियेति ॥ (मृच्छ० १०।३३)

प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात्कथञ्चित् ।
सुरपतिभवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव ॥ (तत्रैव, १०।३४)

प्रेमवशाद् वा कस्माच्चिद् वैवश्याद् वा दारिद्रयाद् यदि कश्चिज्जनस्तदा चौर्यमपि कर्तुं प्रावर्तत तदापि स विमृश्यकार्यवलोकितोऽभूत । मनोविक्लवकारिण्यामपि स्थित्यां तदानीन्तनस्य समाजस्य प्रवृत्तिः कार्येऽकार्ये च विवेकं प्रायुनक् । शर्विलकस्याधोलिखिते वचसि विमृश्यकारिताया मनोव्याकुलकारिण्याश्च स्थितेर्दर्शनं भवति सम्यक्—

''नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां,
विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धात्र्युत्सङ्गगतं हरामि न तथा बालं धनार्थी क्वचित्,
कार्याकार्यविचारिणी मम मतिश्चौर्येऽपि नित्यं स्थिता ॥

(मृच्छ०, ४।६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्मिन् काले चौरा अपि अबलाया भूषणहरणं, भूसुरस्य धन-ग्रहणं, यज्ञस्य सुवर्णादानं दुरितं मेनिरे सः कालो धन्यः ।

प्रभूतैरभावैर्दूयमाना अपि तत्कालस्य जनाः स्वकीयं गुणिनं स्वामिनं न मुमुचुः । ते सत्यपि स्वामिनि दरिद्रतां गते, तस्य विपदि साहाय्यकृतो बभूवुः । गुणेषु तेषामादरोऽत्रालोकि तस्मात्ते गुणिनः सन्ततमसेवन्त । मृच्छ-कटिकस्य मैत्रेयो विदूषकः, शर्विलकः, संवाहकश्च गुणानुरागी प्राप्यते । शर्विलक आह—

गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।। (मृच्छ; ४।२२)

तदानीन्तना रक्षिणः सदाचारसमुज्ज्वला आसन् । ते नैजं कर्त्तव्यं साधु विदाञ्चक्रुर्गोपायाञ्चक्रुश्च तत् । न तेऽनुचितेन मार्गेण धनमानर्जुः । न ते धनार्थं कमपि निपीडयामासुः । न ते परनारीमवजग्मुः । न च ते कमपि जनमपकृत्य नैजमभीष्टं साधयितुमपिकामयाञ्चक्रिरे । सज्जनो यदि दरिद्रो तदा तमपि ते सभाजयाम्बभूवुः । तेषामीदृशीं चारित्र्यचारुतां मृच्छकटिककारश्चन्दनकवीर-कयोश्चरित्रे दर्शयति । भाग्यस्य चाञ्चल्यात् संवाहकः संवाहनवृत्तिमवललम्बे परमङ्गीकृतायामपि तस्यां वृत्त्यां न स निन्द्ये कर्मणि रुचिं निदधौ । सः स्वभावेन ऋजुः, हृदयेन च महानासीत् । निःस्वतां यातेऽपि चारुदत्ते, तं तदापि निषेवमाण एव सोऽदृश्यत । 'एतस्मान्निर्धनात् प्रभोस्तु भृतिरपि न लब्धा स्यात् सम्प्रति, नायमतः सेव्यं' इत्येवंविधं विचारं विधाय नासौ तं जहौ । स तदी-यांस्तांस्तान् गुणान् आद्रियमाणस्तं बभाज । न तस्य सेवामुज्झाञ्चकार । अहो, एवंविधानेव भृत्यांल्लक्ष्यीकृत्योक्तमिदम्—'भृत्या अपि त एव ये सम्पत्तौ-विपत्तौ सविशेषं सेवन्ते' । स्वशरीरापेक्षया द्यूतकारितामुररीचकार परं न तं कदापि किमपि ययाचे । तच्चारित्र्यस्येयं विशिष्टता तदीयान्निम्नाङ्कितात् वाक्या-दभिव्यक्तीभवति—

"इह वि मए पविशिअ उज्जइणिं एक्के अज्जे शुश्शुशिदे जे तालिशे प्रिअदंशणे पिअवादी, दइअण कित्तेदि अवकिदं विशुमलेदि" । (मृच्छ०, २ अं०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अपरश्च साधुसेवी चेटः। सोऽपि चारुदत्ते निर्धनतामापन्ने न तत्सेवातः पराङ्मुखो बभूव। तदीया स्वामिभक्तिस्तस्याधः स्थिताद् वाक्यादुह्या भवति—

"ता जाव दुआलअं शे उग्घाटेमि। अज्ज ! वन्दामि, मित्तेअ ! तुमंपि वन्दामि। एत्थ वित्थिण्णे आशणे णिशीदन्तु'। (मृच्छ०, ३ अ०)

निर्धनस्यापि स्वामिनो भक्तिपूर्वकं परिचरणमसावेव जनः कर्तुं शक्नोति भवति यो नैतिकशक्तिधृक्। तद्विधवलविहीनानां दृष्टिस्तु सततं वित्तमधितिष्ठति। ते प्रथमन्तु दरिद्रं प्रभुमाराधयन्त्येव न, आराधनां चेत् कुर्वन्ति तदावज्ञापुरस्सरम्। पुरातनभारतस्य तत्तद्वैशिष्ट्येष्वन्यतमं वैशिष्ट्यमिदमप्यभूद् यत् तत्र स्वामिभक्तभृत्यवत्त्वं दृष्टमभवत्।

पुरा स्वोक्तस्य वचसः परिपालनं सर्वथा कृतमभवत्। न प्राक्तना जना द्विर्भाषिणोऽभूवन्। तदाननाद् यदपि निर्गतं तद्रक्षणार्थमसूनपि ते होतुमुद्यता अदृश्यन्त। वचनापरिपालनं तदा महान् अधर्मो मतोऽभूत्। दारैर्धनैः प्राणैरपि वचोरक्षाया भावस्तदोत्कृष्टनैतिकवर्चस्कत्वेनागीयत। एष उदात्तभावः पुरातनेऽनेहसि सुलभतयाऽऽसादितो बभूव। नाटककारो भासः स्वप्नवासवदत्ते प्रथमेऽङ्के—

"अय्य ! पढमं उग्घोसिअ को किं इच्छदित्ति अजुत्तं दाणिं निआरिदं। जं एसो भणादि, तं अणुचिट्ठदु अय्यो।" इत्यादिवाक्येन तत्समयवर्तिजनस्य वचनारूढतां ज्ञापयति। एषोदग्रचारित्र्यश्रीः प्राक्तनं भारतं चिरमध्यासाञ्चक्रे।

पौराणिके युगे ब्राह्मणेषु बहवो ब्राह्मणाः स्वब्राह्मणधर्ममुपेक्षाञ्चक्रिरे; ते ब्राह्मणोचितां वृत्तिमप्यजहुः परं क्षत्रिय-वैश्यशूद्रा ब्राह्मणेषु हार्दिकीं गभीरां पुनीतां च श्रद्धां निहितवन्तः। ते ब्राह्मणदर्शित-पथमेव स्वीकृत्य तेनैव ययुः। न ते ब्राह्मणेषु समशेरत। अस्मदनुमानन्त्विदं यदियमन्धश्रद्धापि सामाजिके पतने कारणमभूत्। जना ब्राह्मणेषु विशश्वसुः। ब्राह्मणास्तेषां नेतृत्वं चक्रुः। परं तन्नायकत्वं देशमुत्थापयितुं नार्हत्। तेषु राज्यलिप्सोत्थिताभवत्। अभवच्च तेषु समुन्नता विषयपरकतृष्णा। तात्कालिकस्य समाजस्यायं विश्वास आसीद् यद् ब्राह्मणजात्यां त एव नरा जनुर्गृहीतं शक्नुवन्ति येषां पुण्यानि महान्ति, कठोराणि च तपांसि सन्ति। एतादृशादेव विश्वासात् जनता ब्राह्मणजात्यामुत्प-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मस्य जनस्याविद्यादिदोषान् प्रति दृष्टिमक्षिपदेव न। एषा ब्राह्मणादरभावना तात्कालिकस्य क्षत्रियवैश्यादिवर्गस्य नैतिकतायां प्रविष्टासीदित्येतत् तथ्यमधोलिखितेभ्योऽवतरणेभ्यः प्रकटीभवतिः—

(क) "जानामि सर्वत्र सदा च नाम द्विजोत्तमाः पूज्यतमाः पृथिव्याम्।"

(ख) "······अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः।"

(ग) "किमर्थं ब्राह्मणजनमपराध्यसि।"

(घ) "क्षत्रियकुलोत्पन्नोऽहम्। पूज्यतमाः खलु ब्राह्मणाः।
तस्माच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि।"

(मध्यमव्यायोगः, १ अं०)

स्वस्ववंशस्य मर्यादां प्रतिष्ठां, मानं, महिमानं परम्परां च रक्षन्तः प्राचुर्येण नरास्तदानीन्तना अवाप्यन्त। प्रायेण सर्व एव तत्तद्रक्षणे दत्तमानसा आसन्। वैयष्टिकं सातं विहाय स्ववंशस्य यशोरक्षणं नितान्तं दुष्करं कार्यम्। सनैतिकबलो नर एव प्रलोभनानि विजित्य स्वकुलगरिमाणमवति वर्धयति च। पुरा समाजेऽन्वय-मानमर्यादारक्षणस्य व्यसनमेवावाप्यत। अतः साधारणोऽपि पुरुषस्तत्राप्रयासेणैव प्रावर्तत। मध्यमव्यायोगस्याधःस्थिताः पङ्क्तयोऽस्यां दिशि प्रकाशं किरन्त्यो लभ्यन्ते—

"रक्षितमस्मत्कुलं, स्वकुलमुद्धृतं च। ········कुलं च रक्षितुमिच्छामि।"

उपचिकीर्षा प्रायेण तदा बलीयस्युत्कृष्टतरा च चरित्रेऽजागः। यो जन उपकारिणं प्रत्युपकर्तुं नावसरमाश्नुत सः भृशमन्वशयिष्ट। प्रत्युपकरणानर्हता तदा चारित्रिकं दौर्बल्यमिवावागम्यत। एतस्या विचारणाया उद्भावना वक्ष्यमाणेषु गद्य-पद्येष्वभिव्यज्यते—

(क) "कथमेष खल्वमात्यराक्षसः कृतशीर्षावगुण्ठन इत एवागच्छति।"

(मुद्रारा०, ६ अं०)

(ख) "आर्य! किमस्य भिक्षोः क्रियताम्? भिक्षो, किं तव बहुमतम्।
····तत् पृथिव्यां सर्वविहारेषु कुलपतिरयं क्रियताम्:······उपकारहतस्तु कर्त्तव्यः।" (मृच्छ०, अं० १०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(ग) विद्यावशानां तु भवद्‌विधानां
कोऽस्मद्‌विधः स्यात्प्रतिकर्तुकामः ।
क्रीतोऽस्म्यहं जीवितसम्प्रदानात्
प्रशाधि मां किं करवाणि भृत्यः ॥ (अविमारकम्, अं० ४)

मित्रं मित्रं प्रति नैजं कर्त्तव्यं पालयितुं सन्ततसन्नद्धमवापि । जनस्तदा मित्रं स्वकीयं बहिश्चरजीवनमिवामंस्त । मित्रं निःशङ्कभावेन स्वमित्रसद्मनि नैजपुत्रकलत्रादिकं न्यासीकुर्वंददर्शि । दृश्यताम्—(क) "नूनं सुहृत्तमः, न हि अनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यति ।······भद्र, चन्दनदासस्य गृहे राक्षसेण कलत्रं न्यासीकृतमिति कथमवगम्यते भवता ?" (मु०रा०, १ अं०)

(ख) 'चन्दनदासोऽस्य सुहृदः प्रियसुहृत् तस्य प्रियसुहृद्‌विनाश एवाग्निप्रवेशहेतुरिति यत् सत्यं समाकुलित एवास्मि सुहृत्स्नेहपक्षपातिना हृदयेन" ।
(मु० रा०, ६ अं०)

जनास्तदाधिकंतमसंख्यायाः प्रतिज्ञापालनप्रिया अभूवन् । ध्रुवं, प्राक्तनस्य समाजस्य प्रवृत्ति धर्मोन्मुखीं कर्तुं प्रतिज्ञारक्षणभावनैव प्राभवत् । तदा मानवो जीवनमपि हुत्वा प्रतिज्ञामगोप्सीत् । तदानीन्तनस्यलौकस्यैतया विमलया प्रभया तात्कालिकं साहित्यं नितरां दीप्यमानं दृग्गोचरं जायते । रूपककारोऽधःस्थितेषु वाक्येषु समाजस्य तदानीन्तनस्य तं गुणमेव तादृशं कथाप्रसङ्गं निधाय परोक्षतयाभिव्यक्तीकर्तुं कदाचिदभिलषते—

(क) "तस्मात्प्रतिज्ञां कुरु वीर, सत्यां; सत्या प्रतिज्ञा हि सदाकुरूणाम् ।"
दुर्योधन :—एष एव मे निश्चयः ।" (पञ्चरात्रम्, १ अं०)

(ख) "राक्षसेन समं मैत्री राज्ये चारोपिता वयम् ।
नन्दाश्चोन्मूलिताः सर्वे किं कर्तव्यमतः परम् ।"
(मुद्राारा०, ७ अं०)

(ग) "······नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति ।" (पञ्चरात्रम्, ३ अं०)

(घ) "प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम् ।
मयि चैवं गते राम, विग्रहः किं करिष्यति । (उरुभङ्गम्, १ अं०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रूपककारो, मन्ये, भारतस्य प्रतिज्ञापालनविषयिणीं भावनां प्रदर्श्य तद्वर्णनद्वारेण स्वस्य देशस्य जनेषु तां भावनां समुन्नमयितुं भूयः, दृढीकर्तुं च काङ्क्षति। वात्स्यायन[1]कृतकामसूत्रावलोकनेन तत्समयगामिनां नागराणां स्वान्वयगुणरक्षणनिष्ठा सम्यग् ज्ञाता भवति। भारतीयानां प्रतिज्ञापरत्वात् सत्यासक्तत्वाच्च वैदेशिका इह सुखेन स्वत्वमारोपयामासुः। ते भारतौकसां तत्-तद् गुणान् दुरुपयुयुजुः। अत्र भारतीय इतिहासः साक्षी।

बलात् कस्यचन जनस्य वस्तुनो ग्रहणमत्र नाभिमतमजायत। चरित्रस्य धर्मरतत्वादेव तत्रैतच्चारुत्वमपि वीक्षितमभूत् —

"भरतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः॥" (स्वप्नवा०, ६अं.)

अत्रत्यस्य चरित्रस्येयमपि महनीयतासीद् यन्मृधे निधनं प्रशस्तं मतमभूत्। क्षत्रियाः अत एव सोत्साहं समरे युयुधिरे सहर्षं च प्राणान् अपि तत्र समर्पयितुमुद्यता अवाप्यन्त। सिकन्दरादिवैदेशिकराजानो भारतीयानां क्षत्रियाणां वीरतां सम्यग् ददृशुः। भूत्वा च ते हततेजस्काः सादरमिहत्यं शौर्य्यं प्रशंसन्तः स्वदेशं न्यवर्तन्त[2]—इत्येतत् सर्वविदितमेव। पुरातनाः क्षत्रिया ईदृशं यदजय्यं बलमवापुस्तत्र कारणं तदीयं चारित्र्यचारुत्वमेव।

"हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।
उभे बहुमते लोके नास्ति निष्फलता रणे॥" (कर्णभारम्, १ अं०)

इत्येष श्लोको भारतीयस्य चरित्रस्याभिहितविशिष्टतामेव दर्शयितुं भासो लिलेख।

उत्तरदायित्वसम्बन्धिनी चिन्तात्रत्यस्य मानवस्य मानसेऽजस्रमतिष्ठत्। यावत् साधुतयोत्तरदायित्वं न पालितमभूत्, यावत् तत्पालितमुत्तरदायित्वं समाजं नातूतुषत् तावदुत्तरदायी शान्तिं नाविन्दत्। चरित्रस्यैषा श्रेष्ठता निम्नलिखितेभ्यो वाक्येभ्यो विदिता जायते—

१—कामसूत्रम्, चौ० सं० पु०; अ० ४, पृ० ३८।

२—भारतवर्ष का सरल इतिहास, भारत प्रकाशन, इलाहाबाद, अ० ७, पृ० ११९-१२१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(क) "आपरितोषाद् विदुषां न साधुमन्ये प्रयोगविज्ञानम्" (शाकु०, १।२)

(ख) "हन्त भोः । अर्धमवसितं भारस्य । यथा मन्त्रिभिः सह समर्थितं, तथा परिणमति । ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति ।"

(स्वप्नवा० १ अं०)

(ग) "सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे ।। (तत्रैव, ६ अं०)

पातिव्रतधर्मपालनं भारतीयनार्या चिरन्तनात्समयाद् दृश्यते । तादृशः परमकठोरव्रतस्य धारणार्थमुत्कृष्टतमा नैतिकशक्तिरपेक्ष्यते । छायेव कस्यचन जनस्यानुगमनं न सरलं कार्यम् । तदर्थं तु स्वकीयानां सर्वेषामपि सुखानामाकाङ्क्षाणां च परित्याग एकान्ततया आत्यन्तिकतया चापेक्षितो भवति । अस्मदीयपौराणिककाले नारीसमाज एष चारित्रिको गुणश्रेष्ठो भास्वराभापूर्वकं भ्राजमानोऽवापि :—

(क) "पदिमतधम्मिणी पदिव्वदत्तिणाम्" (मध्यमव्यायोगः, १ अं०)

(ख) "जाद । मुंचे हि मं । मा विग्घं करेहि । भीआमि अज्जउत्तस्स अमंगलाकरणदो" । (मृच्छ०, १० अं०)

पुरुषार्थप्रियता तात्कालिकस्य भारतस्य जनतायामद्भुतैव व्यालोक्यत । शोचनीयां दशां नीता अपि जना न पुरुषार्थं स्वचारित्र्यान्निपातयामासुः । इत्या नियतिवादिता पुरुषार्थवलानुप्राणितैवादृश्यत । न सात्मनस्तत्पृथक्कृत्य समतिष्ठत । अस्मदीयरूपकेषु पौरुषवादिनां वाक्यानां दर्शनाद् भारतीयानां तत्समयवर्तिनां जीवनस्य पुरुषकारानुरागिता पुरुषकारस्याचरणञ्च साधु व्यलोकि जगता । तथाहि—

(क) इह तु पुरुषकारसारसाक्षी,
बहुविषयश्च सुखश्च रात्रिचारः । (अविमारकम् ३ अं०)

(ख) "अभिमानान्मोहान्महापथोविस्मृतः । अन्यथा प्रयतिष्ये ।"

(तत्रैव)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कतिपयान्येवंविधानि च वाक्यानि रूपकेषु दृश्यन्ते येषु तत्समयवर्तिमहीशानां चरित्रस्य प्रजावत्सलत्वगुणस्यच्छाया प्रतिभासिता भवति—

(क) "भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिता;"

(स्वप्नवासवदत्तम्, ५ अं०)

(ख) "स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः"

(शाकुन्तलम्, ५ अं०)

(ग) "सर्वाः प्रजाः क्षत्रियाणां पुत्रशब्देनाभिधीयन्ते"।

(मध्यमव्यायोगः, १ अं०)

'सर्वे भद्राणि पश्यन्तु'—इत्येतस्याः शुभकामनायाः परिणतिः प्रायेण बहुमतानां नृणां चरित्रेच्छुरिताऽभवत्। प्राक्तनानां समग्रोऽप्यध्यवसायोऽखिलोऽपि प्रयासः सर्वेषां सेवायाः कृते बभूव। भारतीयमानवचरित्रस्यैतस्या विशिष्टतायाः प्रश्रयं प्राच्यैव नूनं वैदेशिकं तत्वमिह वर्सातिं लब्धुमशकत्। साम्प्रतमपि भूभुवनं भारतीये चरित्रे गुणमिमं विलसन्त वीक्षते सम्यक्। उत्कृष्टकोटिमाढौकन्तीं सर्वोदयपरकां नीतिं महात्मनि गान्धिनि पं० जवाहरलालमहाभागे जगत्यपश्यदेवाधुनापि सा प्रेक्षते तां तपस्विनि विनोबाभावे महानुभावे। एष गुणविशेषोहि साम्प्रतिकं भारतं खल्वतीतभारतादेव परम्परातोऽलभत-इत्यत्र को नाम सन्दिह्यात्? पुरातनरूपकेषु विद्यमानेभ्योऽधःस्थितेभ्यो वचोभ्योविगतकालगामिजनचरित्रस्य तद् गुणवत्वं सिद्ध्यति—

(क) "सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु॥

(विक्रमोर्वशीयम् ५ अं ०)

(ख) "सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा" (कर्णभारम्)

भारतीयानामेतद्गुणान्वितस्य नैतिकचरित्रस्य प्रशंसायां वैदेशिका यात्रिणो लेखका विद्वांसश्च यानुद्गारान् गिरन्तिस्म यच्च गृणन्तिस्म तेषां सर्वेषां संग्रहः कृतश्चेत् स्यात् तदा नूनमेको महाग्रन्थ एव निर्मितो भवेत्। 'व्हाट केन इट टीच अस्' इत्यत्र मैक्समूलरो यदाह तस्य सार इह स्वभाषायामनूद्यते—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"..........पृथिव्यां यो देशः........। चेत् कश्चन्मां पृच्छेत् को देश एतादृग् यस्याकाशस्याधो मानवस्यान्तःकरणं पूर्णतामाश्नुत, जीवनरहस्यस्य च क्लिष्टाः सिद्धान्ता मीमांसिताः समजायन्त..........तदाहं वक्तुमुत्सहे यत् स देशो भारतमेव।

यूनानदेशस्य सुविदितः सिकन्दरो भारतान्निवर्तमानो 'मेगास्थनीजनामानं प्रणिधिं भारतीयां नीतिं, रीतिं चरित्रञ्चाध्येतुं व्यसृजत्। स भारतीयांल्लक्ष्यीकृत्य यं विचारमभिव्यानक् तत्सारोऽयम्—"न दासत्वमार्यजात्यां लवमात्रमपि। भारतीयासु नारीषु पातिव्रत्यं, पुरुषेषु च ज्ञानं शौर्यं चासीमम्। उत्साहो विद्यते तत्र महान्। भारतीयाः सन्ति कलानुरागिणः, प्रकृत्या च विनीताः। न तेऽधिकरणेष्वभियोगान्निधातुमुचितं मन्यन्ते। वसन्ति ते परस्परं शान्तिपूर्वकम्।

ईशवीयद्वितीयशतकवर्तीतिहासशास्त्री एरेयनः प्राह—"नाहं कमप्यार्यमलीकभाषिणं लब्धवान्"।

अन्यत्र[1] च भारतीयानुद्दिश्य कथितमिदम्—

नात्र आर्येषु चौर्य्यकारिणः। चौर्यशङ्कायाः अभावात् तेषां द्वाराणि अनावृतकपाटानि प्राप्यन्ते। ते नानृतं भाषन्ते। तस्मान्न क्वापि लेखो भवति वाञ्छितः—स्वाभिहिताद् वचसो न ते कदाप्यात्मानं स्रंसयन्ति। नान्यायमाश्रित्य ते सम्पदं गृह्णन्ति। न्यायमर्यादां त्रातुं प्रियतरामपि सम्पत्तिं, किं बहुना, स्वकीयानसूनपि हातुं न विकल्पन्ते।

ईशवीयाब्दात् प्राक् प्रायेण ५५ वर्षपूर्वं यदा जूलियस सीजरो ब्रिटेनद्वीपं स्वायत्तीकर्तुमयासीत् तदासौ तस्मिन् भूमण्डले पशुव्यवहारान् नरान् विलोक्याऽतितरामदूयत। यस्मिन् भूभागे सः स्वकीयं राज्यं स्थापयितुमियेष, स तत्रत्यान् जनान् अभक्तपललमश्नतो भूगर्तमधिवसतः शाखि-शाखासु विहरतस्तदा ददर्श। परं यदा वीरचूडामणिः सिकन्दर ईशवीयाब्दोदयात् ३२६ वर्षोर्द्ध्वे भारतमाचक्राम तदा भारतं समुन्नतं प्राप्यं विस्मयमाततान। सोऽचकथत् यदहो अहं तु नैजे देशे वसन्निदं व्यचारयं यद् भारतं हीनवीर्यं चासभ्यं वर्तते परमिदन्तु यवनजातेर्गुरु र्भवितुमर्हति[2]। पोरसाभिधविश्वविश्रुतवीरेण

१—स्ट्रेवोलाइव, १५, पृ० ४८८।

२—डॉ० रमाशङ्कर त्रिपाठी : प्राचीन भारत का इतिहास, पृ० ५८।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भूरमरेण साकं युध्यमानः सः सम्यगबोधि यदखिलेऽपि मेदिनीमण्डले आर्यजातिरिव न कापि वीरजातिः।

एकतस्त्वास्माकीनसाहित्यादस्मद् भारतस्य प्राक्तनानां जनानां सदाचारशालिता, सन्नीतिपरायणता नैतिकबलान्वितता च सिद्ध्यत्यपरतो मैक्समूलरादिविपश्चिद्धौरेयाणां, मैगस्थनीज-हुएनसांग-फाइयान-इत्सिंग-अलबरूनी प्रभृतियात्रिणां विवरणेभ्यः, पुरातत्वविज्ञानादवाप्तप्राचीनतरसामग्रीणां, शिलालेखस्तूपताम्रपत्रादीनां च दर्शनाद् उपरिनिर्दिष्टं भारतीयं नैतिकं बलं ज्ञातं जायते। एतद्धि सर्वमपि अस्मदभिमतरूपकेषुप्रतिच्छायितमवाप्यते—

(क) "वरमहमुपरतो न पुनरेष कुलपुत्रविहगानां वासपादप आर्यं चारुदत्तः" (मृच्छ०, १० अं०)

(ख) "मितकज्जं समुव्वहमाणो विणासमणुभवामि । ······कुलधम्मो क्खु एसो अहमाणं" (मु० रा०, ७ अं०)

अस्तु नाम तदा धार्मिकी स्थितिः सङ्कीर्णा परं जनता तत् कालवर्तिनी अवश्यमेव शुचिचरित्रासीत्। तस्यां तादृशां जनानां संख्या भूयसी भातिस्म ये स्वप्नेऽपि न स्वकर्त्तव्यादभ्रंशन्त।

जातकग्रन्थेषु तत्कालीनधार्मिक-सामाजिकार्थिकजीवनस्योत्तमोत्तमानि चित्राणि दृष्टानि जायन्ते। ते ग्रन्था ईशवीयाब्दप्रवर्तनात् प्रागेव विरचिता जाताः। तेषु ग्रन्थेषु प्रदत्तासु कथासु जनानां यन्नैतिकं बलं गीतं तच्छुङ्ग शालिवाहनादियुगवर्तिजनस्थितं चारित्रिकं वैशिष्ट्यं संवदति भृशम्।

अस्मदीयः कालः सप्तानामब्दशतकानां कालो वर्तते। एतस्मिन् महत्तरे काले सर्वेष्वपि क्षेत्रेषु महतां हि परिवर्तनानामपि सम्भवं भवितुमर्हत्येव। तस्मात् तस्मिन् विशालतरेऽनेहसि नराणां जीवने नैतिकताया अपि आरोहावरोहाववलोकितावभूताम्। राज्ञां[1] बहुसंख्यायां विलासितायां निलीनत्वाद् जनताया जीवनमीशवीये षष्ठे शतके प्रायेणापकर्षोन्मुखमदृश्यत। सत्यमेवोक्तं यथा राजा तथा प्रजा। मुद्राराक्षसस्य इमा वक्ष्यमाणाः पङ्क्तयोऽस्यामेव दिशायां प्रकाशं क्षिपन्त्यः प्रतीयन्ते—

१—द्रष्टव्यं दण्डिनो दशकुमारचरितम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"अनार्य, कन्यां तीव्रविषप्रयोगविषमां कृत्वा कृतघ्नेन त्वया विश्रम्भप्रवणः पुरा मम पितानीतः कथाशेषताम् ।' (मु० रा० ५ अं०)

प्रथमं जगति मानवा एव कोटिशो भवन्ति, पुनस्तेषु मनोवृत्तयो भवन्ति विविधा विभिन्ना विशालाश्च । अतः, एकस्मिन्नेवानेहसि कस्मिंश्चिद् देशे तत्रत्यस्य समाजस्य मध्ये नानाविधाः स्थितयोऽनायासेनैव विलोकयितुं सुशकाः सन्ति । प्रभुत्वं, लक्ष्मीः नवतारुण्यञ्च[१] यत्र वर्तन्ते सर्वविधानामप्यनर्थानां समुद्भवः सम्भव एव भवति । ये जना विवेकिनो भवन्ति, सतां सान्निध्ये सन्तिष्ठन्ते स्वशुभचिन्तकानां हितानि वचांसि प्रीत्यावधानपूर्वकं शृण्वन्ति ते संयमपूर्वकं जीवनं नेतुं क्षमाः सञ्जायन्ते; दुर्व्यसनानि न तानभिभवितुं पराजेतुं नाशयितुं च प्रभवन्ति । न प्रभुत्वं तान् पातयितुं, न लक्ष्मीस्तान् विप्रलब्धुं, न नवतारुण्यं तान् हन्तुमेवार्हति । अस्मादीयाभिमतरूपकाणां काले चानेके जना विशेषतो नृपाः कुपथगामिना दृष्टा अभूवन् । सदभिनन्दनीयनैतिकाचरणविहीनता समाजस्य रूपकाण्यास्माकीनानि नितरां निपुणतयादर्शकस्य पुरः समुपस्थापयन्तीति न कस्याप्यविदितचरम् । रूपककाराणामुपदेशोऽयं यदि इन्द्रियाणि प्रसभं मनोहरन्त्यत एकैकस्य पुंसः कर्त्तव्यं यत् स तत् संयम्य युक्तो भवेत् ।

शासनं श्रिता विलासिता नगरवासिनां जीवने स्वं प्रभावमपातयदवश्यं परं ग्रामाणां जीवनस्योपरि न सा स्वकीयमाधिपत्यं स्थापयितुमक्षमत । ग्रामाणां स्वायत्तशासनशालित्वाद्[२], वस्तुतस्तत्रत्या जनता, याऽनिशं चिरन्तनादनेहसः शुचितायामृजुतायां धर्मभावनायां रुचिं निदधाना व्यालोक्यत किञ्च गोरक्षणशास्त्राध्ययनादिकार्येषु रममाणा समवाप्यत, तात्कालिकान्[३] नृपान् प्रति दृष्टिमपि पातयितुं क्षणमप्येकं न लब्धुं शशाक । राजनीत्यामनिहितहृदयत्वात्, सा राजचक्रात् सदैव दूर एव स्थिता समासाद्यत । तस्माद् भारतीयं चरित्रं, भारतीयं जीवनं भारतीयाचारविचाराश्च प्रायेणाक्षुण्णा एव अदृश्यन्त ।

१—रघुवंशेऽग्निवर्णनृपचरितम् ।

२—जयचन्द्र विद्यालङ्कारः भारतीय कृष्टि का फ, ख, अ० १२, पृ० घ ६३ ।

३—दी कैम्ब्रिज हिष्ट्री आफ इण्डिया, खं० १ परि० २१, पृ०४७७ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्समयवर्तिनी जनता मुख्यतया धर्मध्वजैः शासितासीत्। जनेषु बहवो बौद्धधर्मे बहवः श्रौतस्मार्तधर्मे बहवश्च अन्यस्मिन् कस्मिन् सम्प्रदाये रुचिं तदा बबन्धुः। तदेव ते बहुषु क्षेत्रेषु विभक्ताः प्राप्यन्त। राजनीतिक्षेत्रे तु वस्तुतः कस्यापि राग एव न दृष्टो बभूव। यः कोऽपि तदा राजनीत्यां स्वकीयं सम्बन्धं समस्थापयत् स निन्द्य एव जातः। "भो महाब्राह्मणः" "अभ्यक्तमिव स्नातः ..", "वयमत्र मध्यस्थाः" (शाकुन्तलम्, ५अं०) इत्यादिकानि पदानि राजकीयताम्प्रति जुगुप्सामेव कदाचिदभिव्यञ्जन्ति। तत्कालगामिनां मानवानामियं हि राजनीतिविमनस्कता तेषां शान्तिप्रियत्वं किञ्च भौतिकतायामनासक्तत्वं च पिशुनयति। यत्र शास्त्रं भवति तत्र ज्ञानं राजते। यत्र ज्ञानं राजते तत्र चरित्रं शोभते। तदानीन्तन्यां भारतीयजनतायां चरित्रचारुतराणां जनानां संख्यैव भूयसी बभूवेत्येतत् तत्समयस्य साहित्यात् विदितं जायते।

(क) "भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम्।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम्" ॥
(मृच्छ०, ३ अं०)

(ख) "चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः ब्राह्मणः" (तत्रैव)

(ग) "साम्बत्सरिकादेशादर्धरात्रसमये..."
(मु०रा० २ अं०)

इत्येतदादिरूपकस्थितपङ्क्तिभिस्तस्य समयस्य चारित्र्यश्रीरस्मत्पुरतः-समुपस्थिता क्रियते।

भारतं चारित्र्यधनं नितातं सावधानं भवच्चिरं ररक्ष। तद् धन-वैभव—पदैश्वर्यादिसम्पदां नाशं नाशमेव न मेने। तद्दृष्ट्यां तु चरित्रस्य विनाश एव विनाशो मतोऽभवत्। तत् संस्कारवर्णाश्रमादिसाधनानि अहिंसा-सत्यास्तेयादिरक्षार्थं ससर्ज। वस्तुतस्तदीयानि तानि साधनानि यमनियमा-दिकाश्चोपाया नितराममोघाः अभिप्रेतसाधकाश्च सिद्धा अभूवन्। यावत्कालं भारतीयास्तानुपायान् अवललम्बिरे तेषु साधनेषु श्रद्धां प्रीतिं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

च निदधाना तत्सकलमपि साधन-वृन्दं स्वव्यवहारे पर्यणमयंस्तावद्[१] भारतं नैतिकताश्रीरपि अध्युवास ।

वैदेशिकानामनायासेनैव निजकपटसाधनायां सिद्धिर्या सञ्जाता सैव स्फुटतया भारतीयानां चरित्रस्य साधुतां सरलतां पुनीतचरिततां च समीचीनभावेन प्रकटीकरोति । अस्मद्देशस्य जनताया सा साधुतास्मत् कवीन् अवश्यमेव[२] अदुनोत् । हा हन्त, देशस्यास्मदीयस्य चारित्रिकबलमेव तमपचकार ।

प्राच्यसाहित्याध्ययनात् स्फुटतयैवास्मदतीतानेहसोऽवदाततरया सदाचारश्रिया शोभिततरत्वं सिद्ध्यति । तदा भारतीयजनता[३]—

(क)"आयुः स्वैरं स्रवति वपुषो भिन्नकुम्भादिवाम्भः ।
को विश्वासः प्रहरति कदा क्रूरकर्मा कृतान्तः ॥
नान्यः पन्था विषयविषतो दूषितो मानवानां ।
कल्याणाय प्रभवति सखे, बन्धुराचार एकः "॥

(ख)"आचारः सर्वधर्माणां मूर्धानमधिरोहति " ॥

इत्यादिवाक्येषु निहितं सत्यं सततं सस्मार अनारतं च तत् स्वव्यवहारे परिणमयितुं प्रायतिष्ट तस्मात् अस्मदीयानां रूपकाणां कालश्चारित्र्यदृष्ट्या नूनं वरीयानवालोक्यत । स :—

"कर्मैव जीवनं नित्यं विकासस्तस्य भास्वरः ।
उत्तरोत्तरलोकेषु कर्त्तव्यत्वेन मन्यताम् ॥
उत्तरोत्तरमुत्कर्षि जीवनंशाश्वतं हि नः ।
अस्पृष्टं तमसा चापि मोहरूपेण सर्वथा" ॥

१—हर्षचरिते प्रथम—तृतीयषष्ठोच्छ्वासाः ।

२—'व्रजन्ति ते मूढ़धियः पराभवम्...' भारविः, किरातार्जुनीयम् । स०१ । ३०।

३—लूनिया : भारतीय सभ्यता तथा संस्कृति का विकास पृ०२४६ ।
दी कैम्ब्रिज हिस्ट्री आफ इण्डिया, खं० १, पृ० १२७ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्येतदुपदिशन्नः श्रुतो भवति ।

अस्मदीयमनुसंहितं भारतमात्मनि सुदृढविश्वासवदलक्ष्यत । न तदात्मचरित्रमधिकृत्य संशेते स्म । तत् सविस्रम्भमिदमभिधातुमशकत् —

(क) "असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्याममिलाषि मे मनः"
(शाकु०,१। १९)

(ख) "अपापानां कुले जातो मयि पापं न विद्यते"
(मृच्छ०, ९ अं०)

अस्तु, एतत्पर्यवेक्षणमस्मान् निष्कर्ममिमं नयति यदस्मद्रूपकाणां काले भारतीयस्य समाजस्य जीवनं सरलं धर्मप्रियमथ च नैतिकबले तत् प्रकृष्टतरमपि अध्यगम्यत ।

———

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एकादशः परिच्छेदः

प्राक्तनानां रूपकाणामर्वाक्तनेषु रूपकेषु प्रभावः

ईशवीयस्य षष्ठस्य शतकस्यानन्तरमवतीर्णेषु सप्तमाष्टमादिशतकेषु यदा दृक्पातः क्रियते तदा तत्रापि संस्कृतवाङ्मयमतितरां विकासं गच्छदवलोकितं जायते। कवयः स्वकीयं साहित्यं तस्मिन्नप्यनेहसि विविधाभिर्भक्तिभाविताभिः सपर्याभिर्भृ शमाराधयन्तः समलभ्यन्त । इन्द्रधनुर्गगनं यथा तथैव कवीनां वागपि अनवद्याभाभास्वरतरा भूत्वा भारतीयसाहित्याम्बरं मण्डयन्ती तदानीं समासादिताभवत् । न केवलं तदा साहित्यस्य कश्चिदङ्गविशेषः पर्यपुष्यदपितु प्रायेण तदीयानि सर्वाण्यप्यङ्गानि शुक्लपक्षे सुधांशुरिव दिनानुदिनमुपचयमेव अगुः ।

तस्मिन् सर्वाङ्गीणसमये मङ्गलमये निर्माणमुपेतस्य संस्कृतवाङ्मयस्यातिसंक्षिप्तमपि विवरणं समुपस्थापितं स्यात् तदापि तत्पृष्ठसहस्रव्यापि जायेत । अलङ्कारशास्त्र एव भट्टोद्भट—वामन—रुद्रटानन्दवर्धनाभिनवगुप्तराजशेखरधनञ्जय—कुन्तक—महिमभट्ट—क्षेमेन्द्र—भोजराज—मम्मट रूय्यक—हेमचन्द्र—विश्वनाथजगन्नाथादिकाः शतशोविपश्चिद्वराः स्वस्वरचनाभिः भारतीभाण्डागारं सम्यग् एधयामासुः। अथाधुनान्यान्यङ्गानिप्रेक्षन्तां प्रेक्षावन्तः । शङ्कराचार्य—कुमारिलभट्ट—वाचस्पतिमिश्रोदयनाचार्य-पद्मनाभ श्रीधराचार्य—विज्ञानभिक्षुप्रभृतयो भारतमातृहृदयहारभूता भारत्या वेदान्त—सांख्य—मीमांसा—न्याय—योग — वैशेषिकाभिधतत्तद्दर्शनान्यधिकृत्यामररचनाः रचयित्वा सरस्वत्या भालमुन्नमयाञ्चक्रुर्यस्मिन् युगे तद् युगं भरतवसुन्धरायाः उपरि षष्ठशतके गते सत्येवावाततार । यानि दर्शनानि श्रुतिमाधृत्य रचितान्यजायन्त तेषां दर्शनानामपि विकासनाय धर्मकीर्ति—धर्मपाल—हरिभद्रादि प्रधीन्द्राः स्तुत्यं प्रयासमनुतस्थुः । ज्योतिः शास्त्रायुर्वेदादिवेदाङ्गोपाङ्गादिषु भास्कराचार्य— वाग्भट्टाद्युद्भटपण्डिताः प्रचुरान् ग्रन्थान् अजग्रन्थन् । तदेवं सर्वेषामपि शास्त्राणां तदा

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वा अपि दिशाः विच्छित्याच्छुरिताः जगताद्दृश्यन्त । अस्तु तावत् । इहास्मदीयं लक्ष्यं साहित्यस्य तदङ्गमस्ति यद् दृश्यकाव्यमित्येतेन नामधेयेन प्रथते । भास - कालिदास—शूद्रकादिरूपककारैः संवर्द्धितं रूपककोषं तदुत्तरकालवर्तिनो भवभूति—हर्ष–नारायणभट्ट–मुरारिप्रभृतिरूपककारा अपि स्वस्वरूपकाणि रचयित्वा संवर्द्धिततरं विधातुं प्रचक्रमिरे ।

आधुनिकानां केषाञ्चनकोविदानां कथनमिदं यत् काव्यानां यादृशं सरलं प्रसादगुणसम्पृक्तं भावपक्षप्रधानं रूपं कालिदासाश्वघोषादिकृतकाव्येषु दृष्टमभूत् तादृशमच्छमवदातं विधानं न तदुत्तरकालवर्तिकविप्रणीतकृतिषु विलोक्यते । अस्मद्विचारेण त्वमिधानमेतन्नयुक्तं यतो नागानन्द--कुन्दमालादिरूपकेषु वयं नितान्तं ललितं सरसं भावप्रधानं च निबन्धनं प्रेक्षामहे । पश्यन्तु तावत् —

(क) तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा ।
यत् संवाहयतः सुखं तु चरणौ तातस्य किं राजके ॥
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो—
रायासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद् गुणः ॥

(नागनन्दे, १।६)

(ख) आशामुखं त्रिदशदुन्दुभयोध्वनन्ति ।
व्योम्नः पतन्ति कुसुमानि निरन्तराणि ॥
आकस्मिकोऽप्युपरि धार्यत एव देव्याः ।
केनाप्यवध्य वितते गगने वितानः ॥

(कुन्दमाला, ६।३५)

(ग) देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा ।
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ॥
श्रुत्वा त्वत्परिवारवारवनिता गीतानि भृङ्गाङ्गनाः ।
लीयन्ते कुसुमान्तरेषु शनकैः सञ्जातलज्जा इव ॥

(रत्नावली, १।२५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यथा सरसः सरलः प्रसन्नश्च प्रवाहो रूपकेषु दृष्टोऽभूत् तथैव श्रव्य-काव्येष्वपि मञ्जुलं नैसर्गिकत्वं सुबोधभाषा ललितता च समवाप्यन्त सप्तमशतकादिगामिन्यनेहसि । दृश्यतां तावत्—

(क) बाले नाथविमुञ्चमानिनि रुषं रोषान्मया किं कृतम् ।
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेपराधा मयि ॥
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते ।
नन्वेतन्मम का तवास्मि दयिता नास्तीत्यतो रुद्यते ॥
(अमरूकः, सप्तमं शतकम्)

(ख) यो मार्गः परिधानकर्मणि गिरां यः सूक्तिमुद्राक्रमो ।
भृङ्गीयाकवरीचयेषु रचनं यद् भूषणालीषु च ॥
द्रष्टुं सुन्दरि कान्यकुब्जललना लोकैरिहान्यच्च यत् ।
शिक्षन्ते सकलासु दिक्षु तरसा तत्कौतुकानिस्त्रियः ॥
(राजशेखरः, दशमं शतकम्)

(ग) येषां जगत्त्रयपवित्रचरित्रभाजां
धत्तेस्म मुक्तिकलशः कुलशेखरत्वं
यस्याग्निहोत्रपरिशीलनजेन जाता
स्वेदाम्भसेव कलिकालकलङ्कशान्तिः ॥
(विल्हणः, एकादशं शतकम्)

(घ) यद्यस्ति कौतुकमपूर्वंमृगे मृगाक्षि
चान्द्रं हरामि हरिणं मम सन्निधेहि
यावन्न मुञ्चसिभयाहृतमेणमेनं
तावद् दधातु तव वक्त्रतुलां मृगाङ्कः ॥
(भोजराजः, ११श०)

(ङ) रात्रिराज, सुकुमारशरीरः कः सहेत तव नाम मयूखान् ।
स्पर्शमाप्य सहसैव यदीयं चन्द्रकान्त दृषदोऽपि गलन्ति ॥
(मङ्खकः, १२ श०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(च)निधानं धर्माणां किमपि च विधानं नवमुदाम्।
प्रधानं तीर्थानाममलपरिधानं त्रिजगताम् ॥
समाधानं बुद्धेरथ खलु तिरोधानमधियां।
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥
(पण्डितराजजगन्नाथः, १७ श०)

आसु कवितासु स्वीकृता पद्धतिः कीदृशी स्वाभाविकी प्रवाहशीला सुबोधा च भूत्वा विभाति ! वस्तुतः एतत्कविताकाराणामुपरि तत्पूर्व-जानां कवीनां प्रभावः सम्यग् निपतात । 'षष्ठशतकानन्तरं संस्कृतकविता अस्वाभाविकतां जगाम' इत्येतद् यद् भणितं भवति तत् कियत् सत्य-मित्येतदपि सुधिय इह विचारयन्तु ।

प्रतापशालिनि महाराजे हर्षवर्धने दिवंगते सति दुखस्था देशस्य राजनीतिकक्षेत्रोपरि तु नैजमव्यर्थप्रभावं समुपस्थापयितुं शशाक परं सा संस्कृतपण्डितानां जगत उपरि न स्वकीयं सफलं प्रभावं विकरीतुं प्रबभूव। सत्यमेवोक्तं—'न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य'। संस्कृतविद्वांसस्तु भवन्ति प्रकृत्या धीराः स्वावलम्बिनश्च। न ते परिच्छ-दानपेक्षन्ते । ते दारुणमपि कष्टं सहर्षं सहन्ते परं न स्वगरिमाणं विलोप्य जिजीविषन्ति। भवन्ति ते नितरां निस्पृहाः। सन्तोषवत्वात् सार-ल्यप्रियत्वात् अपरिग्रहशीलत्वादुच्चविवकेवत्वाच्च न तान् दारिद्रचमपि जेतुं शक्नोति । शास्त्राण्येव तेषां विनोदो भवति; तदेव तेषां धनं तदेव तेषां सर्वस्वं तदेव च तेषां वस्तुतस्तु जीवनमपि जगति भवति । तत्र रममाणास्ते स्वर्गाप्सरसमपि शक्रसम्पदमपि त्रिभुवनसाम्राज्यमपि सहेल-मवजानन्ति । संस्कृतकवीनां हि एवंविधलोकोत्तरगुणवैशिष्ट्यत्वात् संस्कृत-साहित्यस्य मञ्जुलः प्रवाहस्तदापि न संरुद्धोऽभवत् यदा प्रायेण संस्कृत-विद्वांसो राजाश्रयविहीना अभूवन् किंवा यदा भारतमस्मदीयं वैदेशिकानां निघ्नतायामपतत् यद्वा यदा भारतस्यास्माकीनस्य राज्ञां कलहाद् दुर्बलत्वाद-दूरदर्शित्वाच्च राजनीतिकमङ्गमुच्छिन्नतामगमत् ।

संस्कृतविपश्चितान्तु कालश्चिरन्तनादनेहसः काव्यशास्त्रविनोदेनैवाति-क्रम्यमाणः समलक्ष्यत । तस्मात् तस्मिन्नपि समयेऽननुकूले ते शास्त्राण्यधीयानाः शास्त्राण्यध्यापयन्तः, शास्त्राणि विरचयन्तः सन्ततमवालोक्यन्त । तस्मिन्नपि

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काले तेऽनिशभुत्तमोत्तमानि काव्यानि प्रणयन्तः प्राप्यन्त । न मनागपि संस्कृत-भाषायाः प्रवाहो मन्दतामियाय गते रुद्धतायास्तु वार्तैव पुनः का ? कवयः स्वान्तं विनोदयितुमनारतं काव्य—नाटक—कथाख्यायिका—गीतिकाव्य चम्पूप्रभृति विविधविपुलकृतीस्तदापि असृजन्। तदानीमेकैकं दिनं नव-नवरचनारम्यं व्यालोक्यत । तत्समयस्य ताः सकला अपि रचनाः अवश्यमेव नाद्य लभ्यन्ते । तत्र सन्ति कारणानि बहुलानि । प्राञ्चः प्रधीप्रवराः स्व-कीयमन्तःकरणं प्रीणयितुं ग्रन्थान् अजग्रन्थन् । लोकाद् धनस्य, पदस्य ऐश्वर्यस्य लाभाय न ते तान् रचयामासुस्तस्मात् तदीया रचनास्तेषा मेव सकाशेऽवसन् । न प्रचारः प्रसारश्च सामान्यतोऽप्यभवत् । किञ्च लेखन-सामग्र्या अभावात् न्यूनत्वात् मुद्रणालयानामभावाच्च ताः कृतयो भोज-पत्रादिकोपरि लिखिता अजायन्त अतः गच्छता कालेन नाशमगुः । अथ च वैदेशिका मदोन्मत्ततया विनाशयामासुस्ताः । ईदृशानि सन्त्यनेकानि कारणानि । यद् वशात् साम्प्रतमत्यन्तस्वल्पा एव रचनास्तत्कालजाः समुपलभ्यन्ते । अस्तु ।

आदिसमयादेव जगति विभिन्नरुचिमन्तो जनाः संलक्ष्यन्ते । विधानमेव प्रकृत्या ईदृशम् । यस्मिन् विविधा विचित्रा बहुलाश्च विचारा उत्तरलाः सन्त उद्वेल्लन्ति स एव तु मानव इति कथ्यते । एवं स्थिते कथमेतद् भवितुमर्हति यत् कोऽपि काल एकामेव रुचिं प्रगृह्य भुवि अवतरीतुं शक्नुयात् । कस्मैचित् कवये समासबहुलता श्लेषविपुलता च रोचते तु कविवराय कस्मैचित् तद्विपर्यस्तता । कश्चित् कविः शब्देष्वतितरां रमते तु कश्चिदर्थे । तदपरस्त्वेवंविधो दृग्गोचरोभवति यस्य मानस-मुभयत्र प्रीयते । आभ्यन्तरसौन्दर्य—सुन्दरकाव्यानां जनुः प्रदायकत्वाच्चेत् सः काल उपश्लोक्यते तदास्तु स उपश्लोकितः परं यस्मिन् काले अलङ्कार-प्रधानां वा कलामुख्यां किंवा बुद्धिपक्षप्रमुखां पद्धतिम् आश्रित्य निर्माणं प्रभूततयानुष्ठीयते स कालः कैश्चन साहित्यस्य ह्रासकाल इत्युदीर्यते इत्य-त्राश्चर्यम् । मानवस्य प्रकृतिरनुकरणप्रियाप्यस्ति । वयं यदा किमपि काव्यं शब्दसौन्दर्यममुल्लसितमलङ्कारालङ्कृतं श्लेषसमाकुलं दीर्घसमासाच्छुरितं प्रेक्षामहे तदारमाकमपि मानसं तादृशमेव काव्यं कर्तुं परमोत्सुकतां भजते ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदि वयमस्मासु तद्विधकाव्यप्रणयनस्य वैदग्ध्यं प्रतिभाविलासं वैदुष्यं च निदध्मस्तदा प्रवृत्ताश्च सोत्साहं भवामः। अस्मद् देशस्य इदं महत् सौभाग्यं यदत्र देशे तथाविधोऽपि कालोऽवततार यस्मिन् काले वैदुष्यं कवित्वञ्चोभयमपि युगपत् पर्यस्फुरत्। भारतं सहर्षं साभिमानं च भवत् तं कालं धन्यं मन्यते यस्मिन् काले भारवि–माघ–हर्ष–भवभूति--मुरारि रत्नाकरप्रभृतयः कवयः स्वकीयेनागाधेनाद्भुतेन च वैदुष्येण कमनीयेन च कवित्वेन तस्य गरिमाणमतितरामुन्नमयाञ्चक्रुः। अहो कियदाश्चर्यं तं कालं केचन संस्कृतसाहित्यस्यावनतिकालमवगच्छन्ति। अस्तु। दशहस्ता हरीतकीत्येतद् वक्तृरसनां को नाम गृहीतुमीशीत ?

एतस्मिन् सप्तमाष्टमादिशतकगामिनि काले समुद्भूताः कवयस्तत्पूर्ववर्तिभिः कविभिः प्रेरिताः समजायन्त। तस्मात् तेऽपि काव्यप्रणयने प्रावर्तन्त। तेऽपि भूतपूर्वाः कवय इव राम--कृष्णादिगुणकीर्तनकराणि काव्यानि व्यररचन्। तेऽपि त इव पौराणिकान्, विश्वासान् पौराणिकीं निष्ठां श्रौतीं श्रद्धां च प्रति नैजं मौलिं भक्त्या नमयामासुः। ते तमेव पन्थानमङ्गीचक्रुर्यं तदीया जातपूर्वाः कवयोऽशिश्रियन्। 'तस्य तदेव हि मधुरं, यस्य मनो यत्र संलग्नम्' इत्येतद्धेतोस्ते तांस्तान् भावान् आख्यानकं च तत् तत् स्वरुच्यनुसारमेवऽजग्रन्थन् समुदम्।

एवं स्थिते चेत् कविकालिदासस्याभिज्ञानशाकुन्तलं यादृश्यां प्रसादगुणगुम्फितायां भाषायां परिमितपदवत्यामर्थवत्यां पद्धत्यां नाटकानुरूपगृहीतपरिच्छदसम्भारायां रीत्यां पर्यवलोक्यते न तादृश्यां तत् तद् विशिष्टताविभासितायां प्रणाल्यां भवभूतेरुत्तररामचरितं दृष्टं भवति तदा नेदं कदाप्यवगमनीयं जायते यद् भवभूतेरुपरि कालिदासस्य प्रभावो न वर्तते। भवभूतिः कथानकस्यायोजने कालिदासात् प्रेरणां लभमानो दृश्यते। उत्तररामचरिते चित्रदर्शनस्य दृश्यं यद् विद्यते तदपि रघुवंशाद् गृहीतमिव प्रतीयते। अतः कालिदासस्य प्रभावस्तु भवभूतेरुपरि सिद्ध्यत्येव।

संस्कृतरूपककाराश्चिराच्छास्त्रीयां मर्यादामवन्त एव व्यालोक्यन्त। यथा हर्षवर्धनात् प्रागभवाः कवयो रसं प्रधानीकृत्य रूपकाणि प्रागुम्फुस्तथैव तदनन्तरमपि रूपककारा रसमेव मुख्यं मत्वा स्वां रचनां रचयामासुः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नास्यामाशायां ते स्वच्छन्दतां व्यवाहार्षुः। संस्कृतरूपककाराणामेतां रसप्रियतां मानमर्यादानुरागितां च वीक्ष्यैव तु दासगुप्त--दे महोदया आमनन्ति यत् संस्कृतरूपकाणि एलिजावेथकालवर्तीनि आंगलरूपकाणीव सन्ति। तानि काव्यस्य भावनायाः परिवेशेण सन्ति परिवेष्टितनि। तेषामुद्देश्यं मानव-प्रकृतेर्यथार्थवादिचित्रणं न वर्ततेऽतस्तानि भावनाद्वारेण दर्शकेषु रसस्य सञ्चारणं नैजमभिमतं मन्यन्ते[1]।

या भावना पातञ्जलकाले वा ततः प्राग्वर्तिनि काले संस्कृतरूपककृत्सु प्राप्यते सैव १३०० तमे वैक्रमे सम्वत्सरे सञ्जातेषु जयदेवादिषु वीक्षिताभवदित्थं कस्यापि युगस्य संस्कृतरूपकेषु न भावनाया विसंवादः संलभ्यते। अत्र कारण-मत्रत्यायाः संस्कृतेरमोघः प्रभाव एव विदितो भवति।

कविर्भवति सहृदयस्तस्मात् हृदयस्पर्शिनी घटना वा हृदयावर्जकं दृश्या-दिकं नितान्तमेवसरलतया कवेरुपरिद्रागेव स्वं प्रभावं पातयितुं क्षमं भवति। अतः सुमृदुल-स्थलानि मानव-जीवनविषयकाणि प्रायेण सर्वेषामपि कवीनां काव्येषु वीक्षितानि भवन्ति। सीतायाः गिर्वासनं कालिदासस्य मानस-मवेपयत्। तच्छोकाकुलं भूत्वा तन्मनः—

वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य॥
नृपस्य वर्णाश्रमपालनं यत्
स एव धर्मो मनुना प्रणीतः।
निर्वासिताप्येवमतस्त्वयाहं
तपस्विसामान्यमवेक्षणीया।
(रघौ १४। ६१,६७)

इत्यादिशब्देषु स्वकीयां समवेदनां यद्यभिव्यनक्ति तदा भवभूतिस्तदर्थ-मेकं स्वतन्त्रं नाटकमेव प्रणिनाय।

---

(१)—दासगुप्तः दे च: हिस्ट्री आफ सं० लिटेचर, पृ० ५५,५६।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रियविश्लेषजनितं तापं न मानवः सोढुमर्हति । स यस्य कस्यापि जनस्य तादृशीं व्यथां विलोक्य वेपमानो भवति । कालिदासो यक्षं कान्ता-विच्छेदव्यथितं प्रेक्ष्य तद्व्यथामनुबभूव । तदीयां तामनुभूतिं वयं मेघदूतस्य रूपे पर्यवसितां यदा प्रेक्षामहे तदा तामेवानुभूतिं गाहमानं भवभूतिमपि ईक्षामहे । तस्या अभिव्यक्तिः कविना मालतीमाधवे मालतीं प्रति सम्प्रेषितस्य सन्देशस्य सन्दर्भे सम्यग् विहितास्ति । कथनस्य प्रयोजनमेतद् यदेवंविधानि तु साम्यानि प्रायेण समेषामेव कवीनां काव्येषु रचनासु वा शोभन्ते ।

भवभूतिं कालिदासस्य रघौ रामचरितवर्णनमाचकर्ष अतः स महावीरचरितोत्तररामचरिताभिधाने रूपके लिलेख । यस्याचारस्य मतस्य विश्वासस्य वा संरक्षणाय कालिदासेन स्वीया श्रेयः प्रेयस्करी सुधास्यन्दिनी लेखनी समुत्थापिता तस्यैवाचारस्य मतस्य विश्वासस्य वा परिवर्धनाय भवभूतिकविनापि यत्नो व्यधायि । कविः कालिदास इव भवभूतिरपि विशुद्धप्रेम्णि श्रद्धत्ते । यस्य हि विशुद्धप्रेम्णः प्रसाराय प्रचाराय च महाकविः कालिदासो रघुवंश-कुमारसम्भवादीनि काव्यानि प्रणिनाय तस्यैव विशुद्धप्रेम्णः संवर्द्धनाय प्रसारणाय च भवभूतिरुत्तररामचरितं नाम श्रेष्ठं नाटकं रचयामास । द्वयोरपि कव्योरादर्श एव जीवनस्य 'विशुद्धप्रेम' संवृत्तः । यस्य हि पावनस्य प्रेम्णो रक्षां कालिदासस्य रामः स्वकीयं जीवनं सीता-विरहानले निपात्य चकार तस्यैव रक्षार्थं भवभूतेरपि राम आत्मानं तदग्नावेव जुहाव । दृश्यताम्—

कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण ।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे ॥

(रघु० १४।३३)

बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥

(तत्रैव, १४।८४)

हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥
(उत्तररामचरितम् ३।३८)

नात्र सन्देहोऽत्र यत् सः कविः कालिदास एव यो हि भवभूतिं जगति विशुद्धप्रेम-प्रसारणाय भृशमनूनुदत्। तदीयानि रघुवंश-शाकुन्तलादिकाव्यानि भवभूतेरुपरि प्रेरणाप्रदप्रभावं पातयाम्बभूवुस्तस्मादसौ उत्तररामचरितं स्रष्टुमुद्यतो बभूव।

न मानसं मानवस्यैकविधेन रसेन रमते। तत् प्रीयते नवनवैः चमत्कारकारिभि र्वस्तुभिश्च। एतस्मादेव कारणात् कवयोऽपि कदापि प्रसादगुणगुम्फितां, कदाप्योजोगुणललितां, कदापि माधुर्यप्रणतां, कदापि श्लेष-विलसितां, कदापि वैदर्भीविभूषितां, कदापि पाञ्चाल्यादिरीतिसमलङ्कृतां, कदापि वक्रोक्ति-विभावितां, कदापि व्यङ्ग्य-लक्ष्याद्यर्थसमन्वितां कदापि चोत्प्रक्षा-परिसंख्या-विरोधाभास समासोक्त्याद्यलङ्कारैरन्यैश्च विविधैर्वैशिष्ट्यैः समुल्लसितां रचनां रचयन्तः समासाद्यन्ते।

भासः कविः प्राधान्येन प्रसादे व्यस्तपदसंगठनायां च प्रीतिं निदधानोऽपि दीर्घसमासान्तपदावलिपेशलां रचनां कर्तुं क्वाप्युत्सहते। "निहतपतितगज...प्रतिभयता" दिस्थले (ऊरुभङ्गे, प्रथमऽङ्के) द्रष्टव्यास्ति सा। क्वापि च स एव शाब्द्यां क्रीडायां मनोऽभिनिवेशयन् लभ्यते—

"सीताभवः पातु सुमन्त्रतुष्टः सुग्रीवरामः सह लक्ष्मणश्च।
यो रावणार्यप्रतिमश्चः देव्या विभीषणात्मा भरतोऽनुसर्गम्" ॥

ईदृशः कोऽपि विरल एव यस्मै वैचित्र्यं न रोचेत। मृच्छकटिककारोऽपि शब्दसौन्दर्येण क्वचिदात्मानं विनोदयन् प्राप्यते। वीक्ष्यताम्—

"सौभाग्यपताकानिवहेनोपशोभितस्य तोरणधरणस्तम्भवेदिकानिक्षिप्तसमुल्लसद्धरितचूतपल्लवललामस्फटिकमङ्गलकलशाभिरामोभयपार्श्वस्थमहासुरवक्षःस्थलदुर्भेद्यवज्रनिरन्तरप्रतिबद्धकनककपाटस्य···सश्रीकता"। (मृच्छ० ४ अं)

एवमेव मुद्राराक्षसकारोऽपि शाब्द्यां सुन्दरतायां चेतो रमयन् वीक्षितो जायते—

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"विमलमुक्तामणिपरिक्षेपविरचितचित्रपटमयवारवाणप्रच्छादितशरीरे मणिमयमुकुटनिविडनियमितरुचिरतरमौलौसुरभिकुसुमदामवैकक्षिकावभासितविपुलवक्षःस्थले"।

(मुद्राराक्षस०, २ अं०)

कवयो भवन्ति सौन्दर्यजीविनः। सौन्दर्यस्य न कस्मिंश्चिदङ्गविशेष एव तेऽभिनिविशन्ते। न च ते तस्य कमप्यन्यतमं पक्षमेव प्रदर्श्य तृप्यन्ति। न तावत् तेषां मनः शान्तिमश्नुते यावत् तस्य आभ्यन्तरं, बाह्यं, किञ्चाभ्यन्तरबाह्ययोः सर्वाण्यप्यङ्गोपाङ्गानि न तदुपभुनक्ति। न च कविस्तावत् परितुष्टो भवति यावत् तत्कृतिः सकलसचेतोजनान् निषेवितुं न प्रभवति। तस्मात् स तथा यतते येन तदीया रचना लोकरञ्जनकारिणी सिद्ध्येत्। एतस्यां जनमनोनिषेवणकारिण्यां प्रवृत्त्यां कालिदास-शूद्रकादि कवीनामनन्तरं येऽपि भवभूति-नारायणभट्ट-प्रभृतयः कवयः सञ्जातास्तेऽपि सर्वे स्वाभिरुचिं दृढतया निदधाना वीक्ष्यन्ते। तेऽपि स्वप्राग्वर्तिकव्यनुसृतं तं पन्थानं सादरं सश्रद्धं चान्वगमन्।

कविर्भवभूतिः स्वकीये महावीरचरिते उत्तररामचरिते च सर्वलोकाभिराम रामं सङ्कीर्त्य चिरकालात् समागतां परम्परां रक्षन् दृश्यते। प्रतिमायामभिषेके च रामस्यचरितमुपवर्ण्य भासः स्वपूर्ववर्तिकविसमाजं, कालिदासश्च रघुवंशे रघुकुलोद्भवान् प्रगीय भासमनुसरन् प्रेक्षितो भवति। एतेन स्पष्टीभवति यत् संस्कृतनाटककाराणामुपरि स्वपूर्वसम्भूतानां नाटककृतां सांस्कृतिकः प्रभावः पूर्णतया न्यपप्तत्। यथा भवभूतिः महावीरचरितोत्तररामचरितयोर्भासं कालिदासं च स्वीयमादर्शमिव मेने तथैव स मालतीमाधवस्य प्रणयनेऽपि भासं नैजप्रेरयितारमिव मन्यमानोऽधिगम्यते। यतोहि मालतीमाधवोपरि भासकृताविमारकस्य प्रभावो निपतन्निव प्रतिलक्ष्यते। उभयोरपि कथावस्तु लोककथां श्रयते। उभयोरपि प्रकृतिचित्रणं साम्यमवगाहते। अविमारकस्य कुञ्जरविषयिणीं घटनामाश्रित्य, मन्ये, मालतीमाधवे व्याघ्रविषयको व्यतिकरो निबन्धनं नीतो बभूव किञ्च वियोगिन्याः सम्मत्या संवृत्ता माधवस्य रक्षा विद्याधररक्ष्यमाणस्याविमारकस्य रक्षां स्मृतिसरणिमध्यारोपयति। मालतीमाधवीया सरला भाषा सजीवा च पद्धतिः कालिदासस्य भाषां पद्धतिं चानुगच्छन्ती समवाप्यते। भास इव कालिदासोऽपि प्रेम्णः पार्थिवीं प्रकृतिमुपाददान उपपादयंश्च पर्यवलोक्यते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्वयोरपि कव्योः कविता भावमयी भूत्वा विभासते। द्वयोरपि वैदुषी रससागरे सहृदयमुन्मज्जयति निमज्जयति च। कालिदासो दाम्पत्यजीवनस्य यमादर्श नैजेऽभिज्ञानशाकुन्तलेऽभिव्यानक् तमेवादर्शं भवभूतिः स्वकीय उत्तररामचरिते न केवलमानङ्क अपितु तमतिशयगम्भीरं सान्द्रञ्च विधाय प्रादीदृशत्। स्वाधीनप्रणयम्प्रति भवभूतेर्योन्मुखता दृश्यते सापि कालिदासस्य भावुकप्रकृतेः सकाशात् तेनावापीत्युत्प्रेक्ष्यते।

परम्पराया अनुगामित्वात् संस्कृतरूपककाराणां कृतिषु बाहुल्येन रामायणमहाभारतादिपुराणगतकथावस्तूनामेव सन्निवेशः सम्प्राप्यते। तेषां प्रायेण सकलमपि कार्यजातं परम्परामञ्चति। कथावस्तुचयन एव न ते परम्परामाद्रियमाणाः प्राप्यन्ते परं गद्य-पद्ययोः स्वरूपस्य चित्रणे तत्तद् रसस्य तत्तद् विषयेषु समावेशने च ते नैजपूर्वजाननुसरन्तो दृश्यन्ते। वेणीसंहारकारः कविर्नारायणभट्टः स्वरूपकस्य कृते तयोरेव रामायणमहाभारतयोर्ग्रन्थयोरेकतरस्मात् महाभारतात् कथावस्तु सञ्चिनोति ययोः कथावस्तुनिमित्तेन तत् प्राग्भवाः कवयः आश्रयं गृहीतवन्तः। गद्ये च स भवभूतिरिव दीर्घदीर्घसमासान्तपदावलीं प्रयुञ्जानः संलक्ष्यते। तदेवं प्राक्तनानां प्रभावो नारायणभट्टोपरि च स्पष्टमेव दृग्गोचरीभवति।

पौलोमीकुचकुम्भकुङ्कुमरजः स्वाजन्यजन्मोद्धताः।
शीतांशोर्द्युतयः पुरन्दरपुरीसीम्नामुपस्कुर्वते॥
एताभिर्लिहतीभिरन्धतमसान्युद्ग्रथ्नतीभिर्दिशः।
क्षोणीमास्तृणतीभिरन्तरतमं व्योमेदमोजायते॥
(अनर्घराघवम्, २।७३)

कल्पान्तक्रूरसूरोत्करविकटमुखो मानुषद्वन्द्वयुद्ध—
क्रीडाकण्डूयदूर्जस्वलसकलभुजालोकभूयो विलक्षः॥
संभूयोत्तिष्ठमानस्वपरबलमहाशस्त्रसम्पातभीमा —
मुर्वीं गीर्वाणगोष्ठीगुरुमदनिकषो नैकषेयः पिधत्ते॥
(तत्रैव, ६।३१)

इत्येतदुपरिलिखितश्लोकयुग्ममुरारेर्वीक्ष्य सरलतयैव तस्य भवभूत्यनुगामित्वं प्रतीतं भवति। यादृक् पदविन्यासो यादृशी च ओजोमयी भावा-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भिव्यञ्जनपद्धतिर्भवभूतौ वीक्ष्येते तादृगेव पदविन्यासस्तादृश्येव च ओजस्विता मुरारौ च समुपतिष्ठेते। मुरारेः पाण्डित्यं पदचिन्तनं च माघस्य पाण्डित्यं पदचिन्तां च स्मारयतः। एतेन मुरारेश्च पूर्वजप्रभाववशगत्वं सिद्ध्यति।

ईशवीयनवमशतकाभ्यर्णे समुदितस्य मुरारिकविकुलाभरणस्य रचना-श्रियमालोक्य केषाञ्चन मतमिदं यद् यस्मिन् काले माघमुरारिप्रभृतयः कवयो बभूवुः सः कालः काव्यकलायाः अपकर्षकालः। परमेष विचारो न पूर्णतया युक्तः समुचितश्च।

यथा जगति समये-समये परिवर्तनमीक्ष्यते तथैव विपश्चितां चेतःस्वपि परिवर्तनं घटते। परिवर्तनं न जातु 'पतनम्' इत्येतेन शब्देन व्यपदेष्टुं शक्यते। जनमनोऽभिरुचिर्बहुविधा विचित्रा च। सा सर्वदा नैकविधा भूत्वा स्थातुं शक्नोति। इदमेव तज्जीवनस्य लक्षणम्। कस्मिंश्चिद् युगे चेत् काव्यमल-ङ्कारप्राधान्यविहीनं विलोकितामभूत् तदान्यस्मिन् कस्मिंश्चिद्युगे तदलङ्कार-प्राधान्यविशिष्टमपि वीक्षितुं शक्यम्। अलङ्कारप्रधानतां विलोक्य कस्यापि समयस्य, नासौ समयः कलाया निपातसमय इति वक्तुं सुशकः। कलाया जीवनं न केवलहृदयावधिकं, तद्बुद्धिमप्यभिव्याप्य सन्तिष्ठते। यथा तदीय-मङ्गं हृदयं तथैव तस्याङ्गं धीरपि विद्यते। यत्रैतयोः द्वयोरपि दर्शनं भवति तदेव जीवनमित्युच्यते। अतः धीप्रधानानां काव्यानां रूपकाणां वा स्थितिश्चेद् वर्गविशेषस्य कृते न रुचिकरी तदा भवतु नाम तान् प्रति सा अरुचिकरी। सा धीप्रधाना वैदुष्यविशिष्टा रचना न कदापि, वर्गविशेषस्या-प्रीतिकरत्वात्, उपेक्षणीया वा अनादरणीया भवितुमर्हति। कला सैव न या हृदयं प्रीणाति, सापि कला या धियं प्रीणयति। यस्मिन् श्लाघनीये पुण्य-मयेऽनेहसि भवभूति–मुरारि–राजशेखर–विल्हण-जयदेव--भोज--हर्षादिका अनेके कविकुलललामा ज्ञानाभिरामाः समजायन्त किञ्च ते स्वकीयाभिर्बन्धुराभी रचनाभिर्भारतीयं संस्कृतवाङ्मयभाण्डागारमवीवृधन् तं महीयांसं कालं त एवावनतिकाल इति वक्तुं प्रभवन्ति न ये संस्कृतभारत्याः प्रकर्षं सोढुं शक्नुवन्ति। अस्तु।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुरारेश्चिरं प्रागपि ईशवीयतृतीय–चतुर्थशतकप्रत्यासन्ने सञ्जातानां वत्सभट्टयादीनां कवीनां कविता मुरारिकवितायाः सौरस्यं समुपस्थापयति । भासकालिदासादीनां समयात् प्राक् पश्चाच्च एतादृश्यो रचनाः संस्कृतवाङ्मये सृष्टा अभूवन् यत्र उच्चतमा भावाः प्रसन्ना पदावली जीवनवती भाषा च वीक्षिताऽभूत् । भर्तृहरेः शतकत्रयस्य ललितता हृदयस्पर्शिता कस्य नाम अविदिता । दृश्यतां तत्रत्यः श्लोक एकः—

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ,
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्धिजघनं,
परं निन्द्यं रूपं कविजनविशेषैर्गुरुकृतम् ॥

मुधैव केचन कोविदाः ईशवीयषष्ठशतकावसाने प्रवृत्तं कालं मानवजीवनादतिदूरे वसन्त्याः कवितायाः सः काल आसीदित्यभिधाय निन्दन्ति । अत्र अधस्तस्य कालस्य कविताः केचन श्लोकाः प्रस्तूयन्ते यं कालं कतिपये साहित्यस्य पतनकाल इति निगद्य कुत्सन्ते । वीक्ष्यताम्—

तरङ्गा वीजन्ते सजलकणिकाः शीतमरुत-
स्तथैते सङ्गीतं दधति कलहंसाः कलगिरः ।
सखीवच्छायेयं रमयति परिष्वज्य हृदयं,
वने शून्येऽप्यस्मिन् परिजनवती वात्रभवती ॥
(कुन्दमाला, १,७)

कुन्दमाला दशमशतकावसानसञ्जातस्य दिङ्नागस्यास्ति । सम्प्रति प्रबोधचन्द्रोदयकारस्येशवीयैकादशशतके समुत्पन्नस्य श्रीकृष्णमित्रयतेः श्लोक एको विलोक्यताम्—

बाह्वो र्भग्ना दलितमणयः श्रेणयः कङ्कणानां,
चूडारत्नग्रहविकृतिभिर्दूषितः केशपाशः ।
कैः कैर्नाहं हतविधिबलादीहिता दुर्विदग्धैः
दासीकर्तुं सपदि दुरितैर्दूरसंस्थे विवेके ॥
(प्रबोधचन्द्रोदयः, ६,६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्रत्या गद्यश्रीश्च निभाल्यताम्—

"तत्र वत्सया गीतया मां तत्रागतामालोक्य ससम्भ्रमं मातर्मातः इति परिरम्भोपवेशितास्मि । विदितवृत्तान्तया तया चोक्तम् ।" (षष्ठेऽङ्के)

ईशवीये दशमे शतके प्रादुर्भूतस्य राजशेखरस्य बालरामायणाख्ये रूपके कीदृशी हृदयहारितेति प्रेक्ष्यताम्—

"आपन्नार्तिहरः पराक्रमधनः सौजन्यवारांनिधिः ।
त्यागी सत्यसुधाप्रवाहशशभृत् कान्तः कवीनां गुरुः ॥
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ ।
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥" (१।१८)

एष च तदीयाद् बालभारतादुद्ध्रियते—

"व्रीडानतेषु वदनेषु च भूपतीनां,
सञ्चारयन् विकचपङ्कजचारुचक्षुः ।
अभ्येति मत्तगजखेलगतिः स एष,
साभ्यर्थकं मुनिजनेन निषिध्यमानः ॥" (१।७४)

ईशवीये द्वादशे शतके प्रादुर्भूतस्य प्रसन्नराघवकारस्य जयदेवस्य सरस्वत्याम् —

"कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमुरुयुगं न चमूरुदृशः" ॥

"सौमित्रे ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते
चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति ।
वत्सैतद् विदितं कथं नु भवता धत्ते कुरङ्गं यतः
क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ॥"

(प्रसन्नराघवे, ५ । १)

इत्यादीनि बहून्युदाहरणानि सन्ति यानि महाराजहर्षवर्धनोत्तरकाले लिखितानां रूपकाणां सरलतामकृत्रिमताञ्चोच्चैरुद्घोषयन्ति । एवं स्थिते इदं वक्तव्यं कोऽनुमन्येत यच्छष्ठशतकानन्तरं सञ्जातायां रचनायां नैसर्गिकतायाः अभाव उल्लसति ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रुतिस्मृत्यनुमोदितवर्णाश्रमधर्मनिष्ठा, नगरजीवनश्रीः, आस्तिकदर्शनानुरागिता-इत्येता विशिष्टता भासादारभ्य षष्ठशतकानन्तरसंभूतमुरारिप्रभृतिरूपककाराणां सर्वेषामपि रूपकेषु समानभावेन परिस्फुरन्ती पर्यवलोक्यते। एतानि सर्वाणि रूपकाणि 'सत्यमेकमेव तदेव विजयते' इत्येतच्छंसन्ति सादरम्।

अधः कानिचन वचांसि निधीयन्ते यैरुपरिनिगदितस्य सत्यत्वं प्रमाणितं स्यात्—

"किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता॥" (उ० रा०, १, ८)

इत्यत्र वर्णाश्रमधर्मनिष्ठा,

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः॥ (उ० रा०, ६। ६)

इत्यत्र दार्शनिकविचारपरता,

एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्॥ (उ० रा० ४।२४)

इत्यत्र च नागरजीवनश्रियाः आभायां प्रीतिः स्फुटं संलभ्यन्ते।

मुरारिकृतेऽनर्घराघवे च तेषामेव तत्वानां परिपोषणमवाप्यते येषां त्राणं भवभूतिः करोति—

(क) हुतमिष्टं च तप्तं च धर्मश्चायं कुलस्य ते।
गृहात् प्रतिनिवर्तन्ते पूर्णकामो यदर्थिनः॥ (अनर्घ० १ १९)

(ख) त्वं तास्ताः स्मृतवान् ऋचोदशतयीस्त्वत्प्रीतये यज्वभिः।
स्वाहाकारमुपाहितं हविरिह त्रेताग्निराचामति॥ (तत्रैव, १,५३)

राजशेखर-दिङ्नागादिकवयश्च कालिदासादिमतान् सिद्धान्तान् पौराणिकान् विचारांश्चानुमन्यमाना विलोक्यन्ते—

(क) "यागकुण्डशिखिगर्भसम्भवं वन्द्यते न तु करेण लङ्घ्यते"
(बालरामायणम्, १। ६३)

(ख) "यज्ञाङ्गानां समुत्पत्त्यै वासवस्त्वां प्रवर्षति।
रत्नानामोषधीनां च त्वां प्रसूतिं प्रचक्षते"॥ (कुन्दमाला, ६, २८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जयदेवकर्त्रेः प्रसन्नराघवरूपकमपि प्राक्तनरूपकाणां भावनां परिपुष्णाति। तदपि अनर्घराघवं स्वीयमादर्शमिव मत्वात्मानं प्रकाशयितुं यतमानं दृश्यते। यद् रूपकं गो० तुलसिदासमप्यमोहयत् तस्य दर्शनपुराणादि-सम्मततानायासेनैव सिद्ध्यति।

इत्थमीशवीयं षष्ठं यावद् यानि रूपकाणि प्रणीतान्यभूवन् यानि च तदुत्तरकाले द्वादशशतकं यावद् रचितान्यभवन् सकलेष्वपि तेषु श्रुति-स्मृति-पुराणमतो धर्मो विचार आचारश्च समानतामेकरूपतां च भजमान एव लभ्यते। सर्वाणि रूपकाण्येकमेव स्वरमेकामेव मतिं च निदधानानि प्राप्यन्ते।

अस्मदनुसन्धीयमानरूपकोत्तरकाल स आसीद् यत्र तदलङ्कारशास्त्रमधिकृत्य सम्यग् विमर्शश्चिन्तनं च समजनि यद् भरतस्य नाट्यशास्त्रे उपक्षिप्तम् अग्निपुराणे च विचारं प्रति नीतमथ चेशवीयद्वितीयशतकस्य शिलालेखेषु रुद्रदाम्नो भाषायां हरिषेणस्य लेखेषु अविदितवृत्तानां काश्यप-ब्रह्मदत्त-नन्दिस्वामिनां विलुप्तासु च रचनासु प्रतिपादितमभूत्। भावोऽयं कथनस्य यः कालोऽस्मद्रूपकाणां वर्तते सः कालोऽलङ्कारशास्त्रस्यापि कालो विद्यते। तस्मिन्नेव काले रीति-वक्रोक्तिध्वनिविषयेषु च गम्भीरतमो विचारः सञ्जातः। अत एव अस्मद्रूपकेषु एतेषां सर्वेषामपि प्रभावः पतितोऽभवत्। फलञ्चेदं जातं यन्नाटकेषु कलायाः कान्ततरं ललिततरं च सौन्दर्यमात्मानमवतारयितुमनुकूलमवसरमाससाद।

तदेवं वयमीक्षामहे यदुत्तरकालवर्तीनि रूपकाणि प्राग्भवानां रूपकाणां किञ्च स्वकालघटितघटनानां वातावरणस्य च प्रभावेण परिलसितानि भूत्वा संस्कृतरूपकजगति शोभन्ते।

———

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्वादशः परिच्छेदः

संस्कृतरूपकाणां सन्देशस्तदीयो भाविकालश्च

भारतीयसंस्कृतेः संरक्षायां संस्कृतरूपकाणि नितरां महनीयां श्लाघनीयां च सहायतां प्रददुः । तान्यात्मिक-नैतिक-धार्मिकाऽऽदर्शं लोकस्य समक्षे सन्निधाय साम्प्रतमपि तम्प्रति अतितरामुपकारमनुतिष्ठन्ति । मनोरञ्जनाधायक-कार्याचरणपुरस्सरमेतत् सार्वजनीनं श्रेयः प्रेयस्करमाचरणमाचरतां तेषां द्विसहस्रसमाः समतीताः । अद्यापि भारतविजय-भक्तसुदर्शन-वङ्गीय प्रताप-परिवर्तन–धर्मविजयादीनि शतशो रूपकाण्यद्यतनानि प्राक्तनरूपकनिर्दिष्ट-मध्वानं परमोत्साहपूर्वकमनुयान्तीति सर्वेषामपि दृग्गोचरमस्ति मतिमताम् । तेषां सकलानामपि स्वरं साम्प्रतिकोऽयं संसारः सम्यक् शृणोत्येव । तत्प्रदत्तः सन्देशो वस्तुतस्तु जगतः कृतेऽमृतत्वाय कल्पते ।

भासस्य रूपकाणि सस्नेहं सन्दिशन्तिः—

न कदापि मानवो मर्यादां हिंस्यात् । तद्विध्वंसनस्यार्थोऽस्ति स्वमूलस्यैवोन्मूलनम्[१] । स्वजने तथा स्वजनो व्यहरेत् यथा न कस्यचन स्वजनस्य मानसं दूयेत[२]। पुत्रेण पित्रादेशवर्तिना भाव्यम्[३] । पुरन्ध्रीणां प्रज्ञाः प्रायेण भवन्ति मलिनास्तस्मात् उपनिक्षेपणमार्जवस्य न वरम्[४] । माता दैवतानामपि दैवतम्[५] । चरित्रविहीनः पुरुषः कुलं हिनस्ति[६] । सत्ये तिष्ठति सर्वमपि तिष्ठति[७] । यज्ञोहि पावनं कर्म; न कदापि स हेयः[८]।

१—नारीणां पुरुषाणां च निर्मर्यादो यदा·····दैवेन ताडितम् । (प्रतिभा, १।११)

२—हृदये स्वजनस्तथा—(तत्रैव, १।१२)

३—स्वपुत्रकुरुते पितुर्यदिवचः (तत्रैव, १।५)

४—अलमुपहतासु स्त्रीबुद्धिषु···(तत्रैव प्रथमेऽङ्के)

५—माता किल मनुष्याणां दैवतानां च दैवतम् । (मध्यमव्यायोगः; १।३७)

६—कुलचरित्रहीनेन पुरुषेणैव दह्यते । (पञ्चरात्रम्; १।१२)

—७···सर्वे सत्ये तिष्ठन्ति तिष्ठति । (तत्रैव, ३,२५)

८—यज्ञेन भोजय महीं जयविक्रमेण । (तत्रैव,१।१८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कालिदासः शाकुन्तलादिनाटकद्वारेण सन्दिशत्येवम्—रहः संगतं तु विशेषात् परीक्ष्यैव कर्तव्यम्[१]। यदपि वल्गु तद् ग्राह्यम्[२]। कृतकर्मवशात्कदापि जीवनं सुखं पश्यति कदापि च दुःखम्। कदापि समुत्थापनकारीणि संयोजनानि स्वतः समुपतिष्ठन्ते कदापि च पतनविधायिन्यो दुःस्थितयः समुत्पाद्यन्ते तस्माज्जनेन न जातु सम्पदमवाप्योन्मादिना भवितव्यं न च विपदि तेनाधीरेण वा हतोत्साहेन भाव्यम्। को न ना प्रत्यहं चण्डांशुं शीतांशुं च उदयमस्तं च प्रयान्त[३]मीक्षते। शस्त्रस्योद्देश्यमस्त्यार्तिनाशनमतस्तस्य प्रयोगस्तदर्थमेवविधातव्यः[४]। भवितव्यता बलीयसी तस्मान्नोद्योगस्त्याज्यो न च निराशैव कार्या[५]। परस्परं भावयन्तो जनाः श्रेयोऽधियान्ति। अनिर्वेदप्राप्याणि हि श्रेयांसि[६]। एवंविधाननेकसन्देशान् प्रयच्छन्ति तस्य रूपकाणि।

मृच्छकटिककारः शूद्रकः सन्दिशति—

बुद्धिहीना विनश्यन्त्यतो बुद्धेः प्राप्त्यर्थं प्रयतितव्यमनिशम्[७]। पुंसा सततं गुणा अर्जनीयाः[८]। गुणवन्त एव सर्वत्र आदृता भवन्ति। सत्यपि स्खलने स्वल्पे अनर्थाः प्रगुणीभवन्ति[९]। व्यवहारं सम्यग् ये न विचार्य निर्णयन्ति तैर्निर्दोषा अपि दण्ड्यन्ते[१०]। कार्यं सदा ब्राह्मणानां सम्मानम्[११]। इत्येवंविधाः सन्देशा मृच्छकटिके विराजन्ते।

१—अतः परीक्ष्य···वैरीभवति सौहृदम्। (शाकुन्तलम्, ५।२४)
२—हंसो हि क्षीरमादत्ते···अपः। (तत्रैव, ६।२८)
३—यात्येकतोऽस्तशिखरम्···आत्मदशान्तरेषु। (तत्रैव ४।१)
४—आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि। (तत्रैव, १,१०)
५— भवितव्यानां द्वाराणि भवन्ति सर्वत्र। (तत्रैव, १,१४)
६—सूर्यः संवर्धयत्यग्निमग्निः सूर्यं स्वतेजसा। (विक्रमोर्वशीयम्, ५।२०)
,,—अनिर्वेदप्राप्याणि श्रेयांसि (विक्रमोर्वशीयम्, पृ० २०८)
७—निर्बुद्धिः क्षयमेति। (मृच्छ०, १,१४)
८—गुणेष्वेवहि कर्त्तव्यः प्रयत्नः पुरुषैः सदा (मृच्छ, ४।२२)
९—छिद्रेष्वनर्था बहुलीभवन्ति। (मृच्छ०, ९।२६)
१०— ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः।
अपापानां सहस्राणि हन्यन्ते च हतानि च॥ (मृच्छ०, ९,४१)
११— समीहिदसिद्धिए···बम्हणो अगदो···। (मृच्छ, दशमेऽङ्के)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अथ मुद्राराक्षसकारस्य विशाखदत्तस्य सन्देशाः श्रूयन्ताम्-प्रारब्धं कार्यं न कदापि त्याज्यं तत्र तावत् यत्नो विधेयो यावदभिमतं फलं नाधिगतं भवेत्[1]। भृत्याः परीक्ष्य कार्ये नियोजनीयाः। भक्तिपूर्वककार्यसम्पादनकारिणोऽनुयायिनः सदा प्रशंसनीयाः। भक्ताः धीमन्तः कार्यसम्पादनकुशलाः भृत्या सदैव संग्राह्याः[2]। राजनीतिरत्यद्भुता। तत्सं विधाने क्लेशानां ततिः सम्मुखे आपतति। धीरो धीमान् उत्साहवान् सुदृढनिश्चयोऽव्यसनी विद्वान् क्लेशान् सोढुमीष्टे स एव विजयते[3]।

कथनस्यैतस्य प्रयोजनमिदं यदस्मत्संस्कृतरूपकाणि मानवं प्रति सत्पथं प्रदर्शयितुं गृहीतव्रतानि सन्ति। विपदि सिद्धानामुपासनं भवति हितावहमिति तेषां मतम्। तानि आमनन्ति—

"न हि सिद्धवाक्यान्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि"।

यदा च तान्यस्मान् उत्साहविरहितान् प्रेक्षन्ते, शंसन्ति—

"सोत्साहानां नास्त्यसाध्यं नराणाम्" इति। अर्थाभावाद् विषण्णानस्मान् उपदिशन्ति तानि 'अर्थतः पुरुषो-नारी या नारी सार्थतः पुमानिति'। सन्मार्गस्तावन्नलभ्यते यावन्न तमो लीयते, तस्मात्कारणात् तमोऽपनेतुं शासति— "व्यपनयतु स वस्तामसीं वृतिमीशः"। तानि शरणमागतान् पातुं दानपरो भवितुमुपकारिणं प्रत्युपकर्तुं, धर्मं त्रातुं लोकापवादाद् दूरे स्थातुं च नः प्रेरयन्ति। अत एव तत्रोक्तविचाराशययुतानि वाक्यानि प्राप्यन्ते—

(क) "अभयमभयं शरणागतस्य"।

(ख) "एको मां दहति जनापवादवह्निः"।

(ग) "यद्यस्ति भवतः किञ्चिन्मया पूर्वकृतं भवेत्।
तस्य प्रत्युपकारस्य कालस्ते समुपागतः"॥

(घ) "हुतं च दत्तं च तथैव तिष्ठति"।

(च) "धर्मो हि यत्नैः पुरुषेण साध्यः"।

१—मुद्राराक्षसम्, २।१७।

२—तत्रैव, १।१४।

३—तत्रैव, ४।२१।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परतन्त्रः पुरुषो न कदापि कुलमर्यादां त्रातुं क्षमो, न स लज्जामेव निर्वोढुं समर्थो, न स यशोऽधिगन्तुं प्रभविष्णुः, न च मानमवाप्तुमलम्। तस्मात् पारतन्त्र्ये जुगुप्सा निधातव्या-इत्येतद्भावभावितः श्लोकस्तत्रेत्थं गीतः—

"कुले लज्जायां च स्वयशसि च माने च विमुखः।
शरीरं विक्रीय क्षणिकधनलाभाद् धनवति॥
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना।
विचारातिक्रान्तः किमिति परतन्त्रो विमृशति॥"

सेवावृत्तिर्मानवं लघयति, तद्धेतोः सः प्रतिपदमवज्ञामश्नुते। न कदापि सः विद्वद्भिराश्रयणीया-इत्यत्र मुद्राराक्षसमाह :—

"भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा,—
दन्येभ्यश्च वसन्ति येऽथ भवने लब्धप्रसादा विटाः।
दैन्यादुङ्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः,
सेवां लाघवकारिणीं कृतधियः स्थानेश्ववृत्तिं विदुः॥"

अस्यां जगत्यां नीत्यनभिज्ञा न सुखेन जीवितुमर्हन्ति। नयविहीनाः अजस्रं कष्टं सहन्ते। लोकस्तस्य गृहं, दारान्, सम्पदं च सर्वां हरति, तेन जनेन नयविदा भाव्यमित्येतदवधारयितुमपि नाटककारा यतन्ते—

"मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना।
मुहुः सम्पूर्णाङ्गी मुहुरतिकृशा कार्यवशतः॥
मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफले-
-त्यहो चित्राकारा नियतिरिव नीतिर्नयविदः" ॥

ईशवीयात् सप्तमाच्छतकाद् द्वादशशतकपर्यन्तं यावन्ति नाटकानि प्राणीयन्त तान्यखिलान्यपि प्राक्तनानि रूपकाणीव भारतं, नैव नैव, सकलमपि विश्वं प्रति तादृशीनेव शिक्षां प्रायच्छन् यादृश्या शिक्षया मानवमात्रस्यान्तःकरणं कुपथात् सुपथमागच्छेत्।

भरतभुवः संस्कृतिर्गुरुजनादेशपालनं बालानां प्रमुखं धर्मं मन्यते। सा राजेति पदस्य सार्थक्यं प्रजानां रञ्जनेऽवगच्छति। आर्त-प्राणत्राणं मानव-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनस्य सा अन्यतमं लक्ष्यं निर्धारयति । तन्मतेन शरीरस्य कृतेऽघाचरणं नितान्तं जघन्यं कर्म । सुकृतचयनात् परं सा अन्यत् किमपि प्रशस्ततरं कार्यमिति वक्ति । सा ब्राह्मणत्वाराधयित्री, न्यायपक्षपातिनी, शुद्धबुद्धिप्रार्थिनी, कुपथपरिपन्थिनी समदर्शिनी च प्रकृत्यास्ति । संस्कृतरूपकप्रणेतारः स्वरूपकाणां प्रणयने प्रयासं तं चक्रुर्यमवलम्ब्य संस्कृतेः संरक्षणं संवर्धनं प्रसरणं च भवितुमर्हेत् । भासकालिदासाश्वघोषादिकानन्तरं सञ्जाता भवभूति-मुरारिप्रभृतिरूपककाराः अपि स्वपूर्वजरूपककारनिर्दिष्टायामेव दिशायामक्षुण्णतया प्रायतिषत । तेषां यः सन्देशोऽस्ति भारतीयान् प्रति, तस्याभिव्यक्तिं तदीयाः अधः स्थिताः श्लोकाः कुर्वन्तः श्रूयन्ते—

(क) आविर्भूतज्योतिषां ब्राह्मणानां,
ये व्यवहारास्तेषु मा संशयोऽभूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं, विप्लुतार्थां वदन्ति ॥ (उ०रा० ४।१८)

(ख) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत्,
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात् परिणते यत्प्रेमसारे स्थितं,
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥
(तत्रैव, १ । ३९)

ज्ञानधनाः सदाचरणपराः श्रेयस्करा ब्राह्मणाः समाजेन सततं सभाजनीयाः । विश्वस्य-राष्ट्रस्य-उदयो ज्ञानायत्तः । तद्धि ज्ञानं येषां सविधेऽस्ति तेषां रक्षणभरणादिकस्य चिन्ता राष्ट्रेणैव कार्या-इत्येतदादिभावान् आविर्भूतज्योतिषामित्यादिपदेषु प्रपूर्य भवभूतिर्देशं स्वकीयं ज्ञान-प्रकाशेन प्रकाश्यमानं द्रष्टुमभिलषते । जगत्याः स्थितिः प्रेमोपरि वर्तते । तस्मिन् सत्येव सर्वत्र सुखं शान्तिः समृद्धिश्च राजन्ते । कविः 'अद्वैतं सुखदुःखयो'रित्यादिना लोकं तद् वरीतुमनुरुणद्धि ।

न्याय्यात् पथो न पदं प्रविचालयेदित्येतत् कथयितुं मुरारिः अनर्घराघवे श्लोकमिममवतारयति—

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ (१ । ४)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अतिथि-सपर्यां भारतीयसंस्कृतिर्धर्मत्वेन वा यज्ञत्वेन चावगच्छतीति सन्देशं प्रदातुमना हर्षो नागानन्देऽभिदधाति :—

मधुरमिव वदन्तः स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ (१ । ११)

आर्तः प्राणी रक्षणीयः, इति मन्यते भारतीया संस्कृतिः । कविर्हर्षो नागानन्दे—

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥ (४ । ५६)
जायन्ते च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
परार्थबद्धकक्षाणां त्वादृशामुद्भवः कुतः ॥ (४ । ६४)

शरीरस्य हेतोः पापमाचरतो जनान् धिक्करोति कविर्हर्षः—

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ (तत्रैव, ४ । ५६)

शुद्धा बुद्धिः सर्वार्थसाधिका, अतो राजशेखरस्तामधिगन्तुमेवं मानव-समाजं नुदति—

"श्रियः प्रसूते विपदो रुणद्धि
यशांसि दुग्धे मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धिः किल कामधेनुः ॥" (बालभारतम्)

भारतीया संस्कृतिः कुमार्गगामिगुरुमपि न सहते । सा कार्याकार्यमजानन्तं तमपि हातुं प्रेरयति । अत एव प्रबोधचन्द्रोदये श्री कृष्णमिश्रयतिः प्रब्रवीति—

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथः प्रतिपन्नस्य परित्यागो विधीयते ॥

तदेवं संस्कृतरूपकाणि मानव-संसारम्प्रति सस्नेहं मङ्गलमयान् सन्देशान् प्रदाय काङ्क्षन्ति यत् सः सर्वदा भद्राणि पश्येत् । तानि प्रतीच्यानि रूपका-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

णीव मानवस्य पुरस्तमः संस्थापनं तद्गतदोषाणामुद्भावनं न साधु मन्यन्ते। कञ्चन जनं प्रति 'त्वं नृशंसः, त्वं क्रूरः, त्वं काम-क्रोधलोभादिनिधिः' इत्येतदादिकं यदि कथितं भवति भूयोभूयस्तदा तेन हानेरेव सम्भावनास्ति। मनोविज्ञानस्यायमेव विचारः। अतः सदैव मानवे ये गुणाः या च शक्तिर्यच्च पौरुषं राजन्ते तेषामेवाख्यानं युक्ततरं तम्प्रति। संस्कृतरूपकाणि एतस्मादेव कारणात् मानवस्याग्रे तद्गतास्तास्ता विशिष्टताः श्रेष्ठताश्च निदधति। 'नात्मानमवसादयेत्' इत्येतद् दर्शन-मतं सर्वथैव तान्यनुमन्यन्ते। पश्चिमीयानि रूपकाणि अस्मान् संघट्ट-कृष्णवर्त्मनि प्रसभं पातयन्ति। तान्यस्मन् मानसेऽशान्तितनूनपातं प्रज्वालयन्ति। वस्तुतस्तु 'ड्रामा' इत्येषा तदीया संज्ञा स्थाने। तन्नामापि वक्ति यत् ततः शान्तिलाभस्याशा दुराशैव। तेभ्यः संघर्षकलहहिंसादिकानामेवलाभो भवति न च शान्ति-सुमति-शीलादिसद्भावानां लाभः। तत्र न प्रवहति सा शान्तिगङ्गा यस्यामवगाह्य मानवस्य तापोदूरीभवति शमश्च समून्मीलति। क्व तत्रास्ति वाणीयममृता—

अमुष्यसंसारतरोरबोधमूलस्य नोन्मूलविनाशनाय।
विश्वेश्वराराधनबोधजातात् तत्वावबोधादपरोऽभ्युपायः॥

संस्कृतरूपकाणामेक एव समवेतः स्वरः स च अधोनिहितवाक्यानामभ्यन्तरात् स्पष्टं श्रूयते—

(क) ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः॥ (शाकुन्तलम्, ७। ३४)

(ख) तामेतां परिभावयन्त्वभिनवैर्विन्यस्तरूपां बुधाः।
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम्॥
(उ० रा० ७। २१)

(ग) धर्मं समाचर॥ (दूतघटोत्कचम्, १। ५२)

(घ) सङ्गतं श्रीसरस्वत्योर्भूयादुद्भूतये सताम्॥
(विक्रमोर्वशीयम्, ५। २४)

संस्कृतरूपकाणि सौन्दर्यं पुरस्कृत्य सत्यं सर्वेषामपि पुरः समुपस्थापयन्ति। यस्यां धरायां प्रतिष्ठाप्य तानि संस्कृतकवयः संवर्धयन्ति सास्ति सनातनधर्माख्या धरा।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एष दृढीयान् विश्वासो यद् यदा लोकः शान्त्यावाप्तिप्रयोजनेन एकान्तत उत्सुको भवेत् तदा ध्रुवं सः संस्कृतरूपकाणां सत्यसुखशान्तिवर्षिषु श्रीचरणेषु स्वकीयं मौलिं प्रणमयेत् । सम्प्रतिसकलोऽपि संसारो भूयिष्ठैर्भीषणैः कदाचारैर्दुखैश्च नानाधिभिर्व्याधिभिश्च दूयमानः कृच्छतया निश्वसिति । यदा स तेभ्यो नितरामुद्विग्नः, क्लान्तः श्रान्तश्चाभविष्यत् तदावश्यमेव सः सदाचारप्रदर्शकं सन्तापसंहारकं संस्कृतरूपकं शरणमागमिष्यत् । अतः संस्कृतरूपकस्य भाविकालोऽतितरां समुज्ज्वलो भूत्वा चकास्ति ।

अपेक्षा च साम्प्रतमियं यद् भारतीयाः संस्कृतसुधियःसंस्कृतवाङ्मयं प्रति निश्छलमवितथं प्रेम स्वान्ते निधाय आचरणे च तत् परिणमय्य गर्हणीयां लोलुपतां हित्वा भारतीयतायाः समुन्नमनाय वशिष्ठ-याज्ञवल्क्य-व्यास-वाल्मीकि-जनक-दधीचि-राम-कृष्ण-भरतादीनां यशसः प्रवर्धनाय मनसा, कर्मणा वाचा च सदुद्योगं विदधीरन् ।

परमदयालोः पितुः परमात्मनोऽनुकम्पयाधुना भारतं स्वतन्त्रतायां श्वसिति; संस्कृतविश्वविद्यालयाः यत्र तत्रेदानीं प्रतिष्ठाप्यन्ते; संस्कृतभाषा हि अनिवार्यतया सर्वेषामपि छात्राणामध्ययनीया भाषा भवेदित्येतदर्थं प्रयासः क्रियते; संस्कृत भाषायाः प्रसाराय तदुद्धरणाय तद्वर्धनाय च स्थाने स्थाने संस्कृतसम्मेलनानि समायोज्यन्ते; संस्कृतपरिषदः संस्थाप्यन्ते; संस्कृतपत्राणि च प्रकाश्यन्ते; सर्वे च देशशुभचिन्तका नेतारः संस्कृतसाहित्योदयं मनसाभिलषन्ते, संस्कृतकृतयः सादरं शासनेन पुरस्क्रियन्ते; संस्कृतवाङ् मयंनवीनेन विज्ञानेन च समुल्लसतुतरामित्येषा च मङ्गलकामना सर्वेषां मनसि उत्तरलीभवन्ती वीक्ष्यते । एषा हि शिवस्थितिः संस्कृतभाषाया उदयस्य शुभं लक्षणं सूचयति, अतएव संस्कृतरूपकाणामागमिष्यन्ननेहा नूनं देदीप्यमानः प्रतिभाति । परमेश्वरः प्रार्थ्यते—

कैलासशैलशिखरादपि भूरिसारम्,
रत्नाकरादपि गभीरतरं विशालम् ।
शीतांशुतोऽप्यधिकमोदविधायकं यत्,
तद्रूपकं विजयतां भुवि भावभव्यम् ।।
सुललिताभिनयैः समलङ्कृता,
रुचिरभारत--संस्कृति- भूषिता ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्मृति--पुराण--विचारविभाविता,
जयतु संस्कृत--रूपक--मञ्जुता ॥
श्रीकालिदासादिकवीन्द्रवृन्दं,
प्राच्यं समृद्धं जयतु प्रसिद्धम् ।
आचारचारित्र्यविभा विभाति,
काव्येषु यस्य प्रियभारतस्य ॥
समुन्नताभिनयकलाभिजायताम्,
निरन्तरं जगति शुभं विराजताम् ।
सरस्वती श्रुति महती महीयताम्,
पुरारिणा मयि करुणा विधीयताम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

लब्धसाहाय्यानां ग्रन्थानां नामावलिः

१—पद्मपुराणम् : आनन्दाश्रम मुद्रणालयः, महादेव चिमणा जी आप्टे।

२—अग्निपुराणम् : जीवानन्द विद्यासागर, १८८२ ई०, कलिकाता, सरस्वती प्रेस।

३—कीथ : संस्कृत ड्रामा : आक्सफोर्ड यूनीवर्सिटी प्रेस, १९२४।

४—आर०वी० जागीरदार : दी ड्रामा इन दी संस्कृत लिट्रेचर, पापूलर बुकडिपो, बॉम्बे।

५—बी०एन०लूनिया : भारतीय सभ्यता तथा संस्कृति का विकास, प्रकाशक लक्ष्मीनारायण अग्रवाल।

६—सत्यकेतु विद्यालङ्कार : भारतीय संस्कृति और उसका इतिहास, सरस्वती सदन, मसूरी, द्वि०सं०१९५६।

७—जयचन्द्र विद्यालङ्कार : भारतीय कृष्टि का क,ख। प्रका०, इन्द्रचन्द्र नारंग हिन्दी भवन, ३१२, रानी मण्डी, इलाहाबाद।

८—राधाकुमुद मुकर्जी : हिन्दू सभ्यता, अनुवादक : श्री वासुदेवशरण अग्रवाल राजकमल प्रकाशन, प्रा० लि० दिल्ली, द्वि०सं० १९५८।

९—विण्टर नित्ज : ए हिस्ट्री आफ इण्डियन लिट्रेचर, खं० १,२,कलकत्ता यूनीवर्सिटी. १९२७।

१०—वि० रिजवे : ड्रामा एण्ड ड्रामेटिक डान्सेज, केम्ब्रिज यूनीवर्सिटी प्रेस १९१५ ई०।

११—मेकडानल : ए हिस्ट्री आफ सं०लि०, मुंशीराम मनोहरलाल देहली, पञ्चम संस्करणम्।

१२—प्रॉसीडिंग्स एण्ड ट्रान्जक्शन्स आफ दी थर्ड ओरण्टियल कान्फ्रेन्स' मद्रास,१९२४।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१३—दी हिस्ट्री एण्ड कल्चर आफ दी इण्डियन पीपुल, खं०२-३, भारतीय विद्याभवन, बाम्बे ।

१४—प्रॉसीडिंग्स एण्ड ट्रांञ्जक्शन्स ऑफ दी ओ० का०, १९२६ ।

१५—कामसूत्रम्, जयकृष्णदास हरिदास गुप्त, चौखम्बा सं० सी० वाराणसी, वि० सं० १९८६ ।

१६—दी केम्ब्रिज हिस्ट्री ऑफ इण्डिया, खं०१- एस० चन्द्र एण्ड को०, फाउण्टेन, देहली, १९५५ ।

१७—बलदेव उपाध्याय : भारतीय साहित्यशास्त्र, प्रसाद परिषत् काशी ।

१८—पी० वी० काणे : हिस्ट्री ऑफ संस्कृत पोइटिक्स, प्रकाशक : पाण्डुरङ्ग वामन काणे, गिरगांव, बौम्बे, १९५१ ।

१९—याज्ञवल्क्य स्मृति : चौखम्बा वि० भ०, वाराणसी, १९८६ वि० ।

२०—भोजदेव : सरस्वती कण्ठाभरणम्, निर्णयसागर प्रे०, बम्बई ।

२१—श्रीमद्भगवद्गीता, पूना, तृ०मु०, १९१९ ई० ।

२२—श्रीमद्भागवतम्, गी०प्रे०, गोरखपुर, द्वि० सं० ।

२३—महाभारतम्, गी० प्रे०, गोरखपुर, प्र० सं० ।

२४—डा० रमाशङ्कर त्रिपाठी : प्राचीन भारत का इतिहास, नन्दकिशोर एण्ड ब्रादर्स, बनारस ।

२५—रामधारी सिंह दिनकर : संस्कृति के चार अध्याय, प्रकाशक राजपाल एण्ड सन्स, दिल्ली, प्र०सं० ।

२६—श्री स्वा० दयानन्द : प्रवीण दृष्टि में नवीन भारत, भारतधर्म महामण्डल, काशी, प्र०सं० ।

२७—अष्टादशस्मृतिमूल : वेङ्कटेश्वर प्रे०, बम्बई ।

२८—वाल्मीकि रामायणम्, रामनारायणलाल बुकसे० इलाहाबाद ।

२९—भरत : नाट्यशास्त्रम्, निर्णयसागर प्रे० बम्बई ।

३०—अवदानशतकम्, डा० जे०एस०स्पेयर, सेण्ट पीटर्स वर्ग, १९०९ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३१—कृष्ण मिश्र : प्रबोध चन्द्रोदय, नि०सा०प्रे० बम्बई, १९०४ ।

३२—राजशेखर : बालरामायणम्, जीवानन्द टी०, वाल्मीकि प्रे०, कलकत्ता, १८८४ ई० ।

३३—महाभाष्यम् : विश्वनाथ वि० आप्टे, डकन एज्यु० सो० फर्ग्युसन कालेज, पुणा ।

३४—चन्द्रभान गुप्त : इण्डियन थियेटर, मोतीलाल बनारसीदास, बनारस, १९५४ ।

३५—पी०के०आचार्य : ए डिक्शनरी ऑफ हि० आर्चीटेक्चर, ऑक्सफोर्ड यूनीवर्सिटी प्रे०, लन्दन, १९२७ ।

३६—भारतीय मूर्तिकला, नागरी प्रचारिणी सभा, काशी ।

३७—ब्रह्मपुराणम्, क्लाइव रो०, कलकत्ता ।

३८—दण्डी : दशकुमारचरितम् ।

३९—दशरूपकम्, चौखम्बा वि०भ०, बनारस, ।

४०—कौटिल्य अर्थशास्त्रम्, महाभारतकार्यालय, मालीपाड़ा, देहली ।

४१—शुक्रनीति : प्रेम पब्लिशिंग हाउस, लखनऊ ।

४२—एच०सी०राय चौधरी : पॉलीटीकल हिस्ट्रीज ऑफ एनसेण्ट इण्डिया ।

४३—आर०सी०मजूमदार एण्ड आल्टेकर : दी एज आफ दी वाकाटक्स एण्ड दी गुप्ताज ।

४४—ए०एस० आल्टेकर : स्टेट एण्ड गवर्नमेण्ट इन एनसेण्ट इण्डिया ।

४५—आर०एन० साल्टर : लाइफ इन दी गुप्ता एज ।

४६—सी०के० राजा : सम आस्पेक्ट्स आफ एजु० इन एन्सेण्ट इण्डिया ।

४७—छान्दोग्य उप० : नित्यानन्द प्रणीत मिताक्षरा व्या० स० ।

४८—तैत्तिरीय उप० : शाङ्करभाष्य स० ।

४९—डा० वासुदेवशरण अग्रवाल : कला और संस्कृति ।

५०—शिवदत्त ज्ञानी : भारतीय संस्कृति ।

५१—गुलाबराय : भारतीय सं० की रूपरेखा ।

५२—अभिनव भरत सीताराम चतुर्वेदी : अभिनवनाट्यशास्त्र ।

५३—डा० वासुदेवशरण अग्रवाल : पाणिनिकालीन भारतवर्ष ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५४—ऐतरेय ब्रा०, सत्यव्रत सामश्रमी सम्पादित ।
५५—पारस्कर गृह्यसू०, हरिहर भाष्य स० ।
५६—कथा सरित्सागर : नि० सा० प्रे० बम्बई ।
५७—वलदेव उपाध्याय : आर्य संस्कृति ।
५८—कल्हण : राजतरङ्गिणी ।
५९—विष्णु--मत्स्य--वायु--वराह--कूर्म-मार्कण्डेय--स्कन्द पुराणानि ।
६०—आपस्तम्ब शुल्वसूत्रम् ।
६१—लाट्यायन श्रौ० सू० ।
६२—ललितविस्तरः ।
६३—यजुर्वेद ऋग्वेदश्च ।
६४—कादम्बरी ।
६५—रघुवंशम् ।
६६—कुमारसम्भवम् ।
६७—हर्षचरितम् ।
६८—काव्यमीमांसा ।
६९—पञ्चतन्त्रम्, ६९क-- सोशल एण्ड रिलीजस लाइफ इन दी गृह्यसूत्राज ।
७०—मेघदूतम्, ७०क- टाइम्स ऑफ संस्कृत-ड्रामा ।
७१—वेस्सन्तर जातकम् ।
७२—महाजनक जातकम् ।
७३—बुद्धचरितम् ।
७४—विष्णुधर्मोत्तर पुराणम् ,
७५—कंसवधम् ।
७६—हरिवंशपुराणम् ।
७७—जायसवाल : हिन्दू राजतन्त्र ।
७८—सौन्दरानन्द ।
७९—महासलिव जातकम् ।
८०—कुरुधम्म जातकम् ।
८१—दिव्यावदानम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

८२—मज्झिम निकाय ।
८३—हिस्टोरिकल स्केचेज ऑफ दी साउथ ऑफ इण्डिया ।
८४—इण्डिया इन्स्क्रिप्शन ।
८५—सीन्स एण्ड करेक्टर ऑफ इण्डियन हिस्ट्री ।
८६—इत्सिंग की भारतयात्रा ।
८७—प्राचीन भारतीय मुद्राशास्त्र ।
८८—अमरकोषः ।
८९—टाड : राजस्थान का इतिहास ।
९०—दास गुप्त : हिस्ट्री आफ सं० लि० ।
९१—दी रिलेशनशिप आफ शूद्रक टू दी चारुदत्त आफ भास ।
९२—पुसालकर : भास ए स्टडी ।
९३—वर्क्स आफ भास ।
९४—कालिदास ए स्टडी ।
९५—कृष्णमाचार्य : हिस्ट्री ऑफ संस्कृत लि० ।
९६—इण्डियन ड्रामा ।
९७—उद्दालक जातकम् ।
९८—अवदान शतकम् ।
९९—हिन्दीविश्वभारती ।
१००—के० चट्टोपाध्याय : डेट ऑफ कालिदास ।
१०१—विण्टर निट्ज : हिस्ट्री आफ ड्रामाज इन संस्कृत ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

स्वपूर्ववर्तिरूपकप्रभावविभावितोत्तरकालवर्तिरूपकाणां नामानि—

१—भवभूतेः —उत्तररामचरितम् ।
२— ,, —महावीरचरितम् ।
३— ,, —मालती—माधवम् ।
४—मुरारेः—अनर्घराघवम् ।
५—भट्टनारायणस्य —वेणीसंहारम् ।
६—दिङ्नागस्य —कुन्दमाला ।
७—कृष्णमिश्रयतेः —प्रबोधचन्द्रोदयम् ।
८—राजशेखरस्य —कर्पुरमञ्जरी ।
९— ,, —बाल रामायणम् ।
१०— ,, —बालभारतम् ।
११—जयदेवस्य —प्रसन्नराघवम् ।
१२—हर्षस्य —रत्नावली ।
१३— ,, —नागानन्दम् ।
१४— ,, —प्रियदर्शिका ।
१५—शेषकृष्णस्य —कंसवधम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

तेषां रूपकाणां नामानि यद्द्वारेण शुङ्गकालतः प्रत्यासन्नमहाराज हर्षवर्धनराज्योदयकालं यावद् भारतीयानां जीवनं संस्कृतिश्च पर्यवलोकिता:—

१—भासस्य —बाल चरितम् ।

२— ,, —पञ्चरात्रम् ।

३— ,, —मध्यमव्यायोगः ।

४— ,, —दूतवाक्यम् ।

५— ,, —दूतघटोत्कचम् ।

६— ,, —कर्णभारम् ।

७— ,, —ऊरुभङ्गम् ।

८— ,, —प्रतिमा ।

९— ,, —अभिषेकम् ।

१०— ,, —स्वप्नवासवदत्तम् ।

११— ,, —प्रतिज्ञायौगन्धरायणम् ।

१२— ,, —अविमारकम् ।

१३— ,, —चारुदत्तम् ।

१४—कालिदासस्य —अभिज्ञानशाकुन्तलम् ।

१५— ,, —मालविकाग्निमित्रम् ।

१६— ,, —विक्रमोर्वशीयम् ।

१७—शूद्रकस्य —मृच्छकटिकम् ।

१८—अश्वघोषस्य —शारिपुत्रप्रकरणम् ।

१९—विशाखदत्तस्य —मुद्राराक्षसम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi